S. V. University Oriental Series No. 5

General Editor: THE DIRECTOR, S. V. U. O. R. Institute

KṚṢṆAVILĀSA

OF

PUṆYAKOṬI

WITH COMMENTARY

Edited by:
Dr. K. S. RAMAMURTI
S. V. U. O. R. Institute, Tirupati

Published by:
THE DIRECTOR
S. V. U. O. R. Institute

S. V. University Oriental Research Institute
TIRUPATI

1976

S. V. University Oriental Series No. 5

General Editor: DIRECTOR, S. V. U. O. R. Institute

KṚṢṆA VILĀSA

OF

PUṆYAKOṬI

WITH COMMENTARY

Edited by:

Dr. K. S. RAMAMURTI

S. V. U. O. R. Institute, Tirupati

Published by:

DIRECTOR

S. V. U. O. R. Institute

S. V. University Oriental Research Institute

TIRUPATI

1976

First Edition — 500 Copies

Printed at:
T. T. D. Press, Tirupati

S. V. University Oriental Series No. 5

साधारण सम्पादकः— अध्यक्षः

पुण्यकोटिविरचितः

कृष्णविलासः

सव्याख्यः

सम्पादकः

डा. कोपल्ले श्रीराममूर्त्तिः

श्रीवेङ्कटेश्वरविश्वविद्यालयप्राच्यपरिशोधनालयः

प्रकाशकः

अध्यक्षः

श्रीवेङ्कटेश्वरविश्वविद्यालयप्राच्यपरिशोधनालयः

तिरुपति

१९७६

INTRODUCTION

Puṇyakoṭi is the author of the present work the *Kṛṣṇavilāsa-kāvyam.* From the introductory verses of the work it is gathered that Puṇyakoṭi comes of the family 'Calla'. Śrī Jogipaṇḍita and Timmama were his parents and Veṅkaṭeśa the son of Dakṣiṇāmūrti of the Timmāvajjhala family was his preceptor. Puṇyakoṭi studied under Bodhānanda Ghana, a sanyāsin and calls him a '*sadguru*'.

He does not say anything about the scholarship of his father Jogipaṇḍita. But speaking about Veṅkaṭeśa his first preceptor he says that his *Guru* Veṅkaṭeśa was well-versed in all the *Śāstrās* like *Mīmāṃsā*, *Tarka* and Grammar. He was also proficient in Vedas and their ancillaries. He also makes a mention of Dakṣiṇāmūrti, the father of Veṅkaṭeśa, but no work of either Veṅkaṭeśa or Daksiṇā-mūrti is mentioned.

Eulogising Bodhānanda Ghana, his second preceptor, probably his *Guru* in *Vedānta*, he says that on listening to the speech of his *sadguru* (Bodhānanda Ghana) Patañjali (the author of the *Mahā-bhāṣya*, a work on Grammar) faught shy and entered *Pātāḷa* (his abode), Gautama and Jaimini (the authors of *Nyāya* and *Mīmāṁ-sāsūtras*) became dumb. Bhaṭṭa (probably Kumārilabhaṭṭa) entered heavens and Vyāsa and others migrated to the abode of Brahmā. This shows that the sanyāsin Bodhānanda Ghana was very profound and eloquent in all *śāstras* and sciences.

This is all the information we get from his introduction. The colophons in the *Kṛṣṇavilāsa* also do not throw any further light on the author. The author does not seem to have written any other work.

Date:

The poem does not give us any valid information that helps us in determining the date of the author. Though Puṇyakoṭi speaks of Timmāvajjhala Veṅkaṭeśa and Dakṣiṇāmūrti he does not refer to their works. It is also not possible to trace them in the descriptive catalogues.

Regarding his second *Guru* we note that Bodhānanda Ghana was a sanyāsin of the Advaitic order. He does not seem to have written any work. From the list of *Ācāryas* given in the *Sṛṅga-giriparamparā* [1] it is understood that there were Ācāryas with the appellation *Ghana* even from the early days, in this order, as evidenced by Jñāna Ghanācārya, who happened to be the fourth in order from Śaṅkarācārya. The list mentions in all 41 *Ācāryas* in succession. Among these *Ācāryas* Vidyāraṇya, the architect of Vidyānagara and the author of *Vedabhāṣya* is the 22nd *Ācārya*, who occupied the pontifical seat in A.D. 1331. After him there were 19 *Ācāryas* whose total period covers 551 years, i.e. on an average each Ācārya occupied the seat for 19 years.[2] This means that the period of these *Ācāryas* came to an end by A.D. 1882.

The list does not mention any other *Ācārya* with the appellation *Ghana* excepting Jñāna Ghanācārya. But we usually come across *Ācāryas* like Bodha Ghana and Bodhānanda Ghana. As Bodha Ghana happened to be the preceptor of Jñāna Ghana, he should have flourished sometime in the tenth century. Bodha Ghana and Bodhānanda Ghana do not seem to have occupied pontifical seat.

Bodhānanda Ghana was mentioned by Aufrechet [3] as Bodhānanda Ghana or Ahobalaśāstri. It seems that Rāmakṛṣṇa, the author of the *Prakāśikā* on the *Mīmāṃsāsūtras* was a student of Ahobalaśāstri.[4] But the work *Mīmāṃsāsūtraprakāśikā* could not be noticed in the available descriprive catalogues.

Neither Timmāvajjhala Veṅkaṭeśa nor his father Dakṣiṇāmūrti could be identified. As such the period in which they flourished could not be determined.

The poem *Kṛṣṇavilāsa* contains an anonymous commentary. In this commentary, works like the *Saṅgītaratnākara* and authors like Bhaṭṭamalla are mentioned. The commentaries *Sañjīvinī* and *Ghaṇṭāpatha* of Mallinātha also are referred to. Above all the definitions quoted in explaining the figures of the verses in the text,

1. No. 302 of Seshagiri Saastri's report No. 2
2. See article Jñānaghana pūjyapāda by E. P. Radhakrishnan The *New Indian Antiquary* Vol. III. No. 2, pp. 62 ff.
3. cc. of Aufrechet, pt. I. page 377
4. Ibid. p. 38

are taken from the *Kuvalayānanda* of Appayyadīkṣita of the first quarter of the seventeenth century.

In the light of the above material and as Bodhānanda Ghana does not seem to have occupied pontifical seat, it can be presumed that Bodhānanda Ghana might have flourished sometime in the eighteenth century when Puṇyakoṭi had the opportunity of studying under him and producing this present work.

Text and Commentary:

The opening remarks of the commentator indicate that the poet and the commentator are two different persons. But in Sanskrit literature this kind of representation showing differentiation is not rarely met with. There are so many texts like the *Dhvanyāloka* where the *Kārikākāra* is felt as different from the *Vṛttikāra*, though the difference exhibited there is only a difference in capacity. If this argument were to be considered it can be taken that both the text and the commentary of the *Kṛṣṇavilāsa* is by one and the same hand, that is Puṇyakoṭi. The styles of the introductory verses in the poem and the verses in the commentary look alike. If it can thus be established that the poet and the commentator are one and the same, it can be said that Puṇyakoṭi flourished in about the eighteenth century.

Family:

The families '*Calla*' and '*Timmāvajjhala*' are usually met with in Āndhradeśa only. Members of *Calla* family are generally found in Guntur, Krishna and Godavari districts, whereas the members of *Timmāvajjhala* family are noticed in Nellore district. The *Callas* belong to the *Velanāṭi* division of the *Vaidīki* sect and the *Timmāvajjhalas* are known as *Pudūrudrāviḍas*. From this it is understood that the family of Puṇyakoṭi migrated to Nellore where Puṇyakoṭi had the chance of being a disciple to Timmāvajjhala Veṅkaṭeśa.

Scholarship:

From his own account we understand that Puṇyakoṭi is a sound scholar in all the branches of Sanskrit literature, like *Mīmāṃsā*, *Tarka*, *Vyākaraṇa* and *Vedānta*. He acquired this knowledge under the guidance of the able teachers like Veṅkaṭeśa and Bodhā-

nanda Ghana. As he did not mention any work written by these two great teachers, we have to presume that these two great scholars spent their life diffusing knowledge to their students. Quite in keeping with this tradition, even Puṇyakoti must have spent most part of his time in the path cut by his preceptors.

Work:

Puṇyakoṭi has taken the subject matter for his work *Kṛṣṇa-vilāsam* from the 10th Chapter of *Śrīmad Bhāgavatam.* He has beautifully described the exploits of Lord Śrikṛiṣṇa, beginning from his birth, his killing of Pūtana, Cakrāsura, Kaṃsa, and his marriage with Rukmṇī, Satyabhāmā, Mitravindā, etc. to the eradication of poverty of his friend Kucela.

Remarks:

The *Kṛṣṇavilāsakāvyam* is a voluminous work in eleven cantos. The poet seems to have maintained equal enthusiasm through out. The ending is as good as the beginning. The whole work runs in an easy and eloquent style. Nowhere is observed either an obstacle to the continuity of his thought or a hurdle to the heights of his imagination. Though the poet always overwhelmed in the ecstasy of his devotion to his lord he did not fail to observe and depict even the minutest detail of the actions of his Lord. He is a master in *Mīmāṃsā* and always dwells in the realms of philosophy. He goes to the extent of using philosophical figures (IV.39.) The *lokoktis* made use by him reveal his keen observation (VI.89).

At times he unnecessarily takes to the usage of the *alaukika* words like *apīcyam.* He also on some occasions is guilty of dragging on the compounds to the second line and indulges in Grandiloquent Verbosity.

Commentary:

Turning to the commentary we notice that the commentator is at his best in the job. He has exhibited his alround knowledge by profusely quoting from Manu, Dhanurvidyā, etc. He has taken good amount of pains to elucidate clearly the ideas of the poet. His mastery over grammar and rhetoric is very good. But at times he leaves certain words without properly construing them. He

also quotes Nighaṇṭus without verifying his memory, as in the case of पूगो वितानं प्रकरः (IV. 12), गर्वस्या द्विस्मयो मदः (VI. 39 & 90) अन्तिकाश्रयवृक्षःस्यात् (IX. 54), etc. This leads to the defective source and wording. Added to this there are occasions when he referred to imperfect allusions (VI. 15), etc.

Other works on the same theme:

So far it is noticed that there are about five other works on the same theme with the same title. They are the *Kṛṣṇavilāsa* of Sukumāra, Guru Rāma, Śaṅkara, Prabhākara and Śeṣadīkṣita. Of these it is only the work of Sukumāra that is available in print. Even in this only a few cantos have been printed and the other works are still in their manuscript stages. Sukumāra's text is wonderfully popular, because of its poetic beauty, in its native land Kerala. It is also understood that every student initiated into Sanskrit studies in Kerala, is first taught the *Kṛṣṇavilāsa* of Sukumāra.

Edition:

In editing this work, I obtained, two more manuscripts of this text, for collation, from the Madras Government Oriental Mss. Library and Adyar Mss. Library. These two are paper manuscripts bearing nos. R. 7708 (क) and T. R. 301.1 (64835 and 6) (ख) respectively. R. 7708 is incomplete and contains the first two and a half canto whereas T.R. 301 (64835 and 6) is complete in all the eleven cantos. But unfortunately, they seemed to be almost identical throughout. The lacunae and other scribal mistakes found in my palmleaf copy are repeated verbatim in those copies, creating a doubt whether the source is the same for the copies.

The *Kṛṣṇavilāsakāvyam* belonging to the S.V. University Oriental Research Institute Mss. Library:

Substance	..	palmleaf
No. of folios	..	94
Size	..	$47 \times 5\frac{1}{2}$ cms.
Lines on one side	..	11
Letters in a line	..	115

Script	Telugu
Stock No.	51
Extent	Complete in 11 cantos
Condition	good and oiled.

Acknowledgment:

I take this opportunity to thank the authorities of my University for granting me permission to edit this work; and the Director of my Institute for publishing the work. I also thank my colleagues and friends who helped me in preparing a press copy of the work and saw the text through the press.

My thanks are also due to the Manager, T.T.D. Press for the neat execution.

K. S. Ramamurti

EDITOR

श्री कृष्णविलासे सव्याख्याने

॥ प्रथमः सर्गः ॥

* * *

लक्ष्मीसमेतं नवकञ्जनेत्रं गोपीजनानां कुचकुङ्कुमात्तम् ।
केलीषु रासेषु मुदं वहन्तं नतोऽस्मि सर्वोन्नतये मुरारिम् ॥ १ ॥

मार्गेऽन्तर्नलिनोल्लसन्निजमुखं सप्रेमहासं ह्रिया
पश्यन्तीं [1]नयनाञ्चलोच्चलकचां यान्तीं शनै रुक्मिणीम् ।
मातङ्गान् मृगराडिवाविगणयन् यः प्राप वैवाहिके
चैद्यादीन्नवनीरदोज्ज्वलतनुः कृष्णः स पुष्णातु नः ॥

गङ्गोत्तुङ्गतरङ्गवारिनिकरो य च्छेखरे सीकरो
ज्योत्स्नाव्याप्तदिगन्तरालशशभृ द्यन्मौलिरेखायते ।
तार्तीयीक मभू ल्ललाटफलके यस्यानलो लोचनं
सोऽयं मे गिरिजापति र्गिरिजया जाजायतां मानसे ॥

अथ पुण्यकोटि र्नाम कवीन्द्रः स्वकृतसुकृतपरिपाकासादितभगवत्पादारविन्दभक्तिसम्पन्नः 'काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये । सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे' इति काव्यप्रकाशाद्युक्तवचनात् काव्यस्यानेकश्रेयस्साधनतां, 'काव्यालापांश्च वर्जयेद्' इति निषेधशास्त्रस्य असत्काव्यपरतां च निश्चित्य [2]श्रीकृष्णविलासं नाम भागवतदशमस्कन्धकथासुधासारसम्ग्रहं काव्यं चिकीर्षुः, चिकीर्षितस्य ग्रन्थस्याविघ्नपरिसमाप्तये 'मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्राणि प्रथन्ते, वीरपुरुषाण्यायुष्मत्पुरुषाणि च भवन्ति, अध्येतारश्च प्रवक्तारो भवन्ति, इति भगवद्भाष्यकारवचनेन मङ्गलस्य कर्तव्यताप्रतिपादनात् 'आशी र्नमस्क्रिया वस्तु निर्देशो वाऽपि तन्मुखम्'

---

1. क. नयनाञ्चलाञ्चलकचां ।
2. ग. °विलासनामकं ।

इत्याचार्यदण्डिवचनेन च आशीराद्यन्यतमस्य ग्रन्थमुखत्वप्रतिपादनात् श्रीकृष्ण-देवतानमस्काररूपं मङ्गलमनुष्ठाय लोकसम्ग्रहार्थं मादौ (वस्तु) निर्दिशन् ग्रन्थतो निबध्नाति —

लक्ष्मीसमेत मिति । लक्ष्म्या रुक्मिणीरूपया समेतं, 'राघवत्वेऽभव त्सीता रुक्मिणी कृष्णजन्मनि' इति विष्णुपुराणवचनात् । नवे नूतने कंजे के उदके जायेते इति तथोक्ते कमले ते इव नेत्रे यस्य तथोक्तम् । गोपीनां कुचकुङ्कुमेन आत्तं व्याप्तम् । आलिङ्गनादिनेति भावः । रासेषु राससंज्ञिकासु केलीषु मुदं सन्तोषं वहन्तम् । अनेन भगवतः क्रीडादिविशिष्टत्वेनोपास्यता-प्रतिपादनात् प्रार्थितार्था भवन्त्येवेति सूचितम् । मुरारिं श्रीकृष्णम् । सर्वोन्नतये निरतिशयश्रेयसे नतोऽस्मि प्रणतोऽस्मि । अत्यौन्नत्यफलेच्छया तद्विपरीतनमना-नुष्ठानप्रतिपादनाद् विचित्रालङ्कारः । तदुक्तम् — 'विचित्रं तत् प्रयत्नश्चे द्विपरीत-फलेच्छया' इति । अस्मिन् सर्गे प्रायेणोपजातिवृत्तम् । 'अनन्तरोदीरितलक्ष्म-भाजौ पादौ यदीया वुपजातयस्ताः' इति लक्षणात् । वृत्तान्तराणि तु तत्र तत्र व्याख्यास्यन्ते । अत्रादौ लक्ष्मीसमेत मिति देवतावाचकशब्दप्रयोगात् वर्ण-गणादिविचारो न कर्तव्यः । तदुक्तम् —

'देवतावाचकाः शब्दा ये च भद्रादिवाचकाः ।
ते सर्वे नैव निन्द्याः स्यु र्लिपितो गणतोऽपि वा' इति ॥ १ ॥

भुवि चिरोत्पन्नसकलब्रह्मविद्यादि शास्त्रप्रतिष्ठापनावतीर्णदक्षिणाशामुखरूपं स्वब्रह्मविद्यागुरुं मनसि प्रार्थयते —

वाचं यस्य निशम्य शेषफणिराट् पाताल माप ह्रिया
मौनं गौतमजैमिनी किल गतौ भट्टः सुधर्मा गतः ।
व्यासाद्याः कमलासनस्य भवनं याताः स मे सद्गुरुः
बोधानन्दघनेन्द्रयोगियतिराट् जाजायतां मानसे ॥ २ ॥

वाचमिति । यस्य गुरोः वाचं निशम्य श्रुत्वा ह्रिया, इदं पदचतुष्टयं उत्तरत्रापि सम्बध्यते । शेषफणिराट् शेषनामकः फणिराट् व्याकरणशास्त्र-

प्रवर्तकः पतञ्जलि रित्यर्थः । पातालं नागलोकं आप प्राप्तवान् । गौतम जैमिनी तर्कमीमांसाशास्त्रप्रवर्तकौ मौनं मुनिभावं गतौ प्राप्तौ । तूष्णीकभावं गता विति भावः । भट्टः भट्टाचार्योऽपि सुधर्मां देवसभाम्, 'स्यात् सुधर्मा देवसभा' इत्यमरः । गतः प्राप्तवान् । व्यासाद्याः ब्रह्ममीमांसादि शास्त्रप्रवर्तकाः । आदि-शब्देन कपिलादयो गृह्यन्ते । कमलासनस्य ब्रह्मणः भवनं सत्यलोकं याताः प्राप्ताः किल । स गुरुः बोधानन्दधनेन्द्रयोगियतिराट् मे मानसे मनसि । जाजायतां भृश माविर्भवतु । जनिधातोः यङि प्रार्थनायां लोट् । शार्दूल-विक्रीडितं वृत्तम् । 'सूर्याश्वै र्मसजास्तताः सगुरवः शार्दूलविक्रीडितम्' इति लक्षणात् ॥ २ ॥

अथ व्याकरणान्वीक्षक्यादि [1] गुरुं प्रार्थयते—

मीमांसावरतर्कशब्दभणिति र्वेदै स्तदङ्गै र्युता
वाग्रङ्गं परिलभ्य यस्य नटनं चर्कर्ति सालङ्कृतिः ।
तिम्मावज्झलवंशसागरविधुः श्रीवेङ्कटेशो गुरुः
सोऽयं मे कृतिवैभवे विजयतां श्रीदक्षिणामूर्तिभूः ॥ ३ ॥

मीमांसेति । वेदैः ऋगादिभिः । तदङ्गैः शिक्षाकल्पादिभिश्च युता मिलिता । मीमांसावरतर्कशब्दभणितिः मीमांसादिशास्त्ररूपा भणितिः । सालंकृतिः अलंकारशास्त्रयुता सती यस्य गुरोः वाग्रङ्गं; वाक्छब्देन वागिन्द्रियाधिष्ठानजिह्वो-च्यते; सैव रङ्गः तम् । परिलभ्य प्राप्य । नटनं नाट्यम् । चर्कर्ति पुनः पुनः करोति । कृञ्धातो र्यङ्लुकि कर्तरि लट् । तिम्मावज्झलवंश एव सागरः तस्य विधु श्चन्द्रः, श्रीदक्षिणामूर्तेः दक्षिणामूर्त्याख्यविदुषः भवतीति भूः । सोऽयं श्री वेङ्कटाख्यः गुरुः । मे कृतिवैभवे ग्रन्थकरणे विजयतां [2] सर्वोत्कर्षेण वर्त-ताम् । सामर्थ्यसंपादको भवे दिति भावः । अत्र वंशस्य सागरत्वेन रूपणं

1. ग. विद्यागुरुम् ।
2. ग adds जिधातोः कर्तरि लोट् । विपराभ्यां जेरिति तङ् ।

विधुः श्रीवेङ्कटेश इति रूपके निमित्तम् । तच्चैक मेवेति अश्लिष्टकेवलपरंपरित-रूपकालङ्कारः । अत्र प्रस्तुतमीमांसादिभणित्याः वृत्तान्तेन अप्रस्तुतनर्तकीप्रतीतेः समासोक्त्यलङ्कार श्च । तदुक्तम् — 'समासोक्तिः परिस्फूर्तिः प्रस्तुते ऽप्रस्तुतस्य चेत्' इति । तयोः संसृष्टिः । शार्दूलविक्रीडितं वृत्तम् ॥ ३ ॥

अथास्य काव्यस्य सर्वोपादेयत्वसिद्धये विदुषः प्रार्थयते—

वाचो मे परितोषयन्तु विदुषो वाग्वैभवालङ्कृतान्
काव्यालापसुधाश्रया नपि[1] परं धन्यान् गतद्वेषिणः ।
सर्वैश्वर्यसमृद्धिपात्र मतुलं वाचा मशक्यं हरिं
गूढार्थाः शुकमञ्जुकण्ठजनिताः श्रुत्यानुकूल्यं गताः ॥ ४ ॥

वाच इति । मे मम वाचः काव्यरूपाः वाग्वैभवालङ्कृतान् वाग्वैभवैः विद्यासंपद्भिः अलंकृतान् । काव्यालापाः काव्योक्तयः, त एव सुधाः तासा माश्रया स्तान् । धन्यान् । अत एव गतद्वेषिणः द्वेषरहितान् । विदुषः पण्डितान् । सर्वैश्वर्यसमृद्धेः पात्रं स्थानम् । अतुलं सदृशवस्त्वन्तररहितं 'न तत्सम श्चाभ्यधिक श्च विद्यते' इति श्रुतेः । वाचा मशक्यं वागतीतम् । 'यतो वाचो निवर्तन्ते' इति श्रुतेः । हरिं च । गूढार्थाः भावगर्भिताः अव्यक्तार्थकाश्च । श्रुत्यानुकूल्यं गताः श्रुते र्वेदस्य श्रोत्रस्य च आनुकूल्य मेकार्थत्व मिष्टत्वम् । गताः प्राप्ताः । शुकमञ्जुकण्ठजनिताः, शुकस्य शुकयोगिनः कीरस्य च मञ्जु यथा तथा कण्ठेन जनिताः । वाच इव भागवतवाक्यानीव पोषकाध्यापित-भगवन्नामानीव च परितोषयन्तु सन्तोषयुक्तान् कुर्वन्तु । तोषयतेः कर्तरि लोट् । भगवत्प्रतिपादकत्वाविशेषात् भागवतवाक्यानीव शुकोदीरितभगवन्नामानीव च मद्वाचः सन्तोषदा भवेयु रिति भावः । अत्र भगवत्प्रतिपादकत्वादिरूपसाधारण-धर्मस्यानुपादानात् धर्मलुप्तोपमालङ्कारः । केवलाप्रकृतश्लेषश्च । तयो स्तिल-तण्डुलवत् संसृष्टिः । शार्दूलविक्रीडितं वृत्तम् । लक्षणं तूक्तम् ॥ ४ ॥

---

1. ग. इव.

स्वस्य ग्रन्थकरणे भगवत्सेवैव कारण मित्याह—

त्व मब्जयोनिप्रमुखै रमर्त्यैः स्तोतुं न शक्योऽसि किलाम्बुजाक्ष ।
तव स्तवं कर्तु महं प्रवृत्तः सेवैव तेऽङ्घ्रेः शरणं य दल ॥ ५ ॥

त्वमिति ॥ अम्बुजाक्ष । अब्जयोनिप्रमुखैः हिरण्यगर्भप्रभृतिभिः । अमर्त्यै र्देवैः । स्तोतुं न शक्योऽसि किल । अहं तव स्तवं कर्तुं प्रवृत्त इति य दल तवाङ्घ्रेः सेवैव शरणम् । त्वयि भक्तिपारवश्या देव स्तोत्ररूपे काव्ये प्रवृत्ति रिति भावः ॥ ५ ॥

स्वकाव्यस्याधुनिकत्वेन प्रसिद्ध्यभाव माशङ्क्य भगवद्वर्णनात्मकत्वात् प्रसिद्धि र्भवत्ये वेत्याह—

श्रीकालिदासादिकविप्रवीरगङ्गाप्रवाहामलवाग्झरीभिः ।
स्तुत्याऽस्य कुल्योदकतुल्यवाङ् मे याति प्रसिद्धिं न कथं विशुद्धा ॥६॥

श्रीकालिदासेति । श्रीकालिदासादिकविप्रवीराणां गङ्गाप्रवाह इव अमलाभिः वाग्झरीभिः वाक्परम्पराभिः सह । मे कुल्योदकतुल्या वाक् कृत्रिमाल्पसरित्तुल्या वाक् । 'कुल्याऽल्पा कृत्रिमा सरित्' इत्यमरः । अस्य हरेः स्तुत्या विशुद्धा सती प्रसिद्धिं कथं न याति । यात्येवेत्यर्थः । याधातोः कर्तरि लट् । इन्द्रवज्रावृत्तम् । 'स्यादिन्द्रवज्रा यदि तौ जगौ ग' इति लक्षणम् ॥ ६ ॥

स्वकृतग्रन्थं भगवते ऽर्पयन् स्वकीर्त्यनुवृत्तये स्वनाम निबध्नाति —

चल्लान्वयाब्धिशुचितिम्ममगर्भशुक्तौ
श्रीजोगिपण्डितघनोद्भवमौक्तिकेन ।
श्रीपुण्यकोटिसुधियोरसि कृष्णमूर्तेः
कृत्वाऽर्प्यते पदमणिस्फुटकाव्यहारः ॥ ७ ॥

चल्लान्वयेति ॥ चल्लान्वय एवाब्धिः समुद्रः तस्मिन् शुचिः परिशुद्धा तिम्ममाख्यजननी सैव शुक्तिः तस्याम् । श्रीजोगिपण्डित एव घनः मेघः तस्मा

दुद्भवेन मौक्तिकेन मुक्तामणिना । श्रीपुण्यकोटिसुधिया पुण्यकोटयाख्यविदुषा । पदान्येव मणयः तैः स्फुटः प्रकाशितः काव्यहारः कृत्वा कृष्णमूर्तें रुरसि अर्प्यते । ऋधातोः कर्मणि लट् । रूपकालङ्कारः । वसन्ततिलकावृत्तम् । 'उक्ता वसन्ततिलका तभजा जगौ गः' इति लक्षणात् ।। ७ ।।

श्रीकृष्णमूर्तें जगदेकमूर्तेः पादारविन्दातिविवक्षिका भूः ।
केलीषु लक्ष्मी रिव भारशान्तिव्याजेन धातुः पद मध्यगात् सा ।।८।।

श्रीकृष्णेति ।। सा प्रसिद्धा भूः कर्त्री । केलीषु क्रीडासु लक्ष्मी रिव अङ्यन्तत्वा न्न सुलोपः । जगदेका मुख्या मूर्ति र्यस्य । श्रिया लक्ष्म्या समेता कृष्णनाम्नी मूर्ति र्यस्य । यद्वा श्रिया कान्त्या समेता कृष्णनाम्नी मूर्ति र्यस्य ! करिष्यमाणकृष्णावतारस्य मूर्ति र्यस्य भगवत इत्यर्थः । यद्वा श्रिया मायया समेता कृष्णा ब्रह्मात्मिका मूर्तिः स्वरूपं यस्य । 'कृषि र्भूवाचकः शब्दो णश्च निर्वृतिवाचकः । तयो रैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते' इति वचनात् । तस्य पादावरविन्दे इवेत्युपमितसमासः । तयो रतिविवक्षिका अत्यन्तं वोढु मिच्छावती सती । वहतेः सन्नन्तात् कर्तरि ण्वुल् टापि 'प्रत्ययस्थाद्' इति इत् । भारस्य शान्तिः अपगमः । तद्व्याजेन धातु र्ब्रह्मणः पदं स्थानं; सत्यलोक मित्यर्थः । 'पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु' इत्यमरः । अध्यगात् जगाम । अधिपूर्वा दिण् धातोः कर्तरि लुङ् । 'इणो गा लुङि' इति गादेशः । अत्र लक्ष्मीभूपादवहनेव-शब्दानां उपमानोपमेयसाधारणधर्मोपमावाचकानां चतुर्णा मप्युपादानात् पूर्णोप-मालङ्कारः । तदुक्तम् — 'उपमा यत्र सादृश्यलक्ष्मी रुल्लसति द्वयोः' इति । भारशान्तिव्याजेनेत्यत्र व्याजपदेन भारशान्तेः असत्यत्वप्रतिपादनात् कैतवापह्नु त्यलङ्कारः । तदुक्तम् — 'कैतवापह्नुति र्व्यक्तौ व्याजाद्यै र्निह्नुतेः पदैः' इति । अत्रापह्नवे आरोप्यमाणायाः पादारविन्दवहनेच्छायाः लक्ष्मीसादृश्यसापेक्षत्वेन उपमाया उपकारकत्वात् तयोरङ्गाङ्गिभावेन सङ्करः । इन्द्रवज्रावृत्तम् । तदुक्त वृत्तरत्नाकरे — 'स्या दिन्द्रवज्रा यदि तौ जगौ गः' इति ।। ८ ।।

यत्रेत्यादि षड्भिः श्लोकैः ब्रह्मलोको वर्ण्यते—

यत्रान्तरे मानसराजहंसा मृणालषण्डाशन नित्यतृप्ताः ।
निमीलना दक्षियुगस्य नीरे सुयोगिसाम्यं परिलेभिरे ते ॥ ९ ॥

यत्रेति ॥ यत्र ब्रह्मलोके । अन्तरे मध्ये । ते प्रसिद्धाः । मानसे सरसि; 'मानसं सरसि स्वान्ते' इति विश्वः । राजहंसा हंसविशेषाः । 'राजहंसास्तु ते चञ्चुचरणै र्लोहितैः सिता' इत्यमरः । मृणालानां षण्डानां समूहानां, अशनेन भक्षणेन नित्यतृप्ताः अतितृप्ताः सन्तः । नीरे जले । अक्षियुगस्य नेत्रद्वयस्य । निमीलनात् मुकुलनात् सुयोगिभिः साम्यं । परिलेभिरे प्रापुः । परिपूर्वा ल्लभधातोः कर्तरि लिट् । पूर्णोपमालङ्कारः ॥ ९ ॥

सहस्रपत्राणि विभान्ति यत्र सर स्यजस्रं समुपेत्य साम्यम् ।
विष्णोः सदा नेत्रयुगस्य कान्त्या कया जले सज्जनचित्ततुल्ये ॥ १० ॥

सहस्रेति ॥ यत्र सत्यलोके । सरसि मानससरसि । सज्जनस्य सत्पुरुषस्य । चित्तेन तुल्ये । सहस्रपत्राणि कमलानि । कया अनिर्वाच्यया कान्त्या । विष्णो र्नेत्रयुगस्य नेत्रद्वयस्य । सदा साम्यं समुपेत्य प्राप्य । अजस्रं विभान्ति । अत्रत्यकमलानां मुकुलनाभावा दिति भावः । विपूर्वाद् भाधातोः कर्तरि लट् । अत्रोपमानस्य उपमेयत्ववर्णनात प्रतीपालङ्कारः । तदुक्तम्— 'प्रतीप मुपमानस्योपमेयत्वप्रकल्पनम्' इति ॥ १० ॥

सरस्तटे यत्र सुरद्रुमाणां शाखासु हैमीषु सुपुष्पितासु ।
आरुह्य नृत्यन्ति महेन्द्रनीलमनोज्ञसौधे ऽभ्रधिया मयूराः ॥ ११ ॥

सरस्तट इति । यत्र सत्यलोके । मयूराः सरस्तटे । सुरद्रुमाणां कल्पवृक्षाणां सुपुष्पितासु, हैमीषु सुवर्णविकारासु, शाखासु आरुह्य । महेन्द्रनीलैः इन्द्रनीलमणिभिः, मनोज्ञसौधे राजसदने । अभ्रधिया मेघभ्रान्त्या । नृत्यन्ति नटनं कुर्वन्ति । नृति धातोः कर्तरि लट् । भ्रान्तिमदलङ्कारः । 'स्मात् स्मृतिभ्रान्ति-सन्देहै स्तदङ्कालङ्कृतित्रयम्' इति लक्षणात् ॥ ११ ॥

तया धिया चातकमण्डलानि सम्क्रम्य भूयो गतिमण्डलानि ।
उपोषिता न्यम्बुकणेहयाऽल मुत्पेतु रुद्धृत्य मुखानि यत्र ॥ १२ ॥

तयेति । अल मुपोषितानि चिरकालं जलपानरहितानि । चातकमण्डलानि चातकसमूहाः । तया धिया सौधमेघभ्रान्त्या । भूयः गतीनां मण्डलानि गतिविशेषान् । सम्क्रम्य कृत्वा । अम्बुकणेहया जलबिन्दुपिपासया । मुखा न्युद्धृत्य । यत्र ब्रह्मलोके । उत्पेतुः उदपतन् । उत्पूर्वकपदधातोः कर्तरि लिट् । भ्रान्तिम दलङ्कारः । लक्षणं तूक्तम् ॥ १२ ॥

सुवर्णनालोद्धृतपङ्कजेषु मरन्दपाना द्विवशालिमाला ।
परस्परं द्वन्द्वकथा विरेजे स्त्रीसंहति र्मन्मथमोहितेव ॥ १३ ॥

सुवर्णेति ॥ सुवर्णनालैः सह कनकनालैः सह, उद्धृतपङ्कजेषु निर्गतकमलेषु । मरन्दपानात् मकरन्दपानात् । विवशा मत्ता । परस्परं अन्योन्यम् । 'सर्वस्य द्वे' इति सूत्रे 'सर्वनाम्नो द्वे वाच्ये' इति द्वित्वे 'समासवच्च बहुलम्' इति बहुलग्रहणा दसमासवद्भावे पूर्वपदस्य प्रथमैकवचने कस्कादित्वात् विसर्जनीयस्य सत्वम् । स्त्रीनपुंसकयो रुत्तरपदस्थाया विभक्ते राम्भावो वा वाच्य इत्यामादेशः । द्वन्द्वस्य मिथुनस्य कथा यस्याः सा । अलिमाला भ्रमरपङ्क्तिः । मन्मथेन मोहिता स्त्रीसंहति रिव स्त्रीसमूह इव । 'स्त्रियां तु संहतिर्बृन्दम्' इत्यमरः । विरेजे बभौ । विपूर्वाद् राजृधातोः कर्तरि लिट् । पूर्णोपमालङ्कारः ॥ १३ ॥

अजस्र मध्यापनलोलचित्ता गदन्ति विश्वं किल सद्विभिन्नम् ।
ज्योति र्यथा दारुणि यत्र[1] वस्तु तथैव नित्यं जगति प्रसिद्धम् ॥ १४ ॥

अजस्रमिति ॥ यत्र ब्रह्मलोके । अजस्रं अध्यापने वेदान्तशास्त्राध्यापने, लोलं आसक्तं चित्तं येषां ते, ब्रह्मविद इति शेषः, विश्वं प्रपञ्चं, सतः ब्रह्मणः विभिन्नं विलक्षणं, गदन्ति किल । तथैव दारुणि अरणौ । ज्योति र्यथा अग्नि-

---

1. क. तत्र.

रिव । नित्यं वस्तु ब्रह्म । जगति प्रसिद्धं अनुस्यूतत्वेन प्रसिद्धं गदन्ति किल । पूर्णोपमालङ्कारः ॥ १४ ॥

तत्रात्मभूभाषितमञ्जुवाग्भी रेजे सभा सत्यविभूषणाभिः ।
अलङ्कृतासादितदिव्यभूषस्त्रीभि र्वरेवामरराजधानी ॥ १५ ॥

तत्रेति ॥ सत्यं याथार्थ्यं विभूषणं यासां ताभिः । आत्मभुवा ब्रह्मणा भाषिताभिः मञ्जुवाग्भिः । अलङ्कृता सभा ब्रह्मसभा । आसादिता धृताः दिव्यभूषाः याभि स्ताश्च ताः स्त्रियश्च । 'पुंवत्कर्मधारय' इति पुंवद्भावः । अलङ्कृता वरा श्रेष्ठा । अमरराजधानीव रेजे । राजृधातोः कर्तरि लिट् । पूर्णोपमालङ्कारः ॥ १५ ॥

दृष्ट्वा सभां ब्रह्मविदां वरिष्ठै र्गरीयसीं साधुजनै रुपास्याम् ।
सदा मुदा निर्गुणवादविद्भि र्भीता धरा नम्रमुखी बभूव ॥ १६ ॥

दृष्ट्वेति ॥ धरा भूमिः ब्रह्मविदां वरिष्ठैः अतिशयेन श्रेष्ठैः । उरुशब्दस्य 'अतिशायने तमबिष्ठनौ' इतीष्ठन्प्रत्यये 'प्रियस्थिर' इत्यादिना वरादेशः । निर्गुणवादविद्भिः निर्गुणवादचतुरैः । साधुजनैः सत्पुरुषैः । मुदा सदा उपास्यां उपासितुं योग्याम् । अत एव गरीयसीं श्रेष्ठाम् । 'द्विवचनविभज्योपपदे तरबीयसुनौ' इति ईयसुन् प्रत्यये गुरुशब्दस्य 'प्रियस्थिर' इत्यादिना गरादेशः । सभां दृष्ट्वा भीता सती । नम्रमुखी बभूव आनतमुखी बभूव । भूधातोः कर्तरि लिट् ॥ १६ ॥

ब्रह्माण मासीन मथासने सा विज्ञापयामास सुनम्रशीर्षा ।
भारेण सीदामि समुद्धरेति त्वां लोकनाथं शरणं प्रपन्नाम् ॥ १७ ॥

ब्रह्माणमिति ॥ अथ सभादर्शनानन्तरम् । सा भूमिः । दुष्टानां भारेण सीदामि कृशा भवामि । षद्लृ धातोः कर्तरि लट् । 'पाघ्रा' इत्यादिना सीदादेशः । लोकनाथं त्वां शरणं प्रपन्नां मां समुद्धर उत्तारय । समुत्पूर्वक-

हृञ्धातोः कर्तरि सम्प्रार्थनायां लोट् । इति आसने सिंहासने आसीनं निषण्णं ब्रह्माणम् । सुष्ठु नम्रं नतं शीर्षं शिरः यस्याः । 'उत्तमाङ्गं शिरः शीर्षम्' इत्यमरः । तथा भूता राती विज्ञापयामास विज्ञापितवती। विपूर्वात् ज्ञाधातो र्णिचि 'अर्ति ह्री व्ली री क्नू यी क्ष्मा य्या ताम्' इति पुगागमः । कर्तरि लिट् । इन्द्रवज्रावृत्तम् । लक्षणं तूक्तम् ॥ १७ ॥

सभ्या स्त मूचु र्मुनयोऽप्यवादीत् सत्यं सभायां धरणीति वाक्यम् ।
पाल्या त्वयैषा ऽश्रुकणाभिपूर्णा भारावताराय भवान् समर्थः ॥ १८ ॥

सभ्या इति ॥ धरणी भूमिः । सभायां सत्यं वाक्य मवादीत् अवोचत् । वद्धातोः कर्तरि लुङ् । अश्रुकणैः बाष्पलेशैः । अभिपूर्णा परिपूर्णा । एषा भूः त्वया पाल्या पालनीया । भारावताराय तादृशभारावतरणाय । भवान् भाते र्डवतुप्रत्ययः । समर्थ इति सभ्याः मुनयोऽपि दर्शनार्थ मागताः मुनयोऽपि तं ब्रह्माण मूचुः । वचधातोः कर्तरि लिट् । 'वचि स्वपि' इति सम्प्रसारणम् । अत्र समर्थनीयभूपालनस्य भारावताराय भवान् समर्थ इति समर्थनात् वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः । तदुक्तम्—'समर्थनीयस्यार्थस्य काव्यलिङ्गं समर्थनम्' इति । इन्द्रवज्रावृत्तम् ॥ १८ ॥

अङ्गीकृतं देवि वच स्त्वयाऽत्र मध्येसमाजं य दभाणि साधु ।
त्वं याहि नूनं भविताऽचिरेण भारावतारः खलनिग्रहेण ॥ १९ ॥

अङ्गीकृतमिति ॥ हे देवि हे भूः त्वया अत्र मध्येसमाजं समाजमध्ये । 'पारे मध्ये षष्ठ्या वा' इति साधु । यत् साधु वचः । अभाणि उक्तम् । भणधातोः कर्मणि लुङ् । च्लेः श्चिण् । तत् वचः अङ्गीकृतम् । ब्रह्मणेति शेषः । त्वं याहि गच्छ । याधातोः कर्तरि विधौ लोट् । खलानां दुष्टराजरूपराक्षसानां निग्रहेण संहारेण भारावतारः अचिरेण भविता भविष्यति। भूधातोः कर्तरि लुट् । नूनं निश्चयः । इति भूमि मिति शेषः । सभ्या ऊचु रिति योज्यम् । इन्द्रवज्रावृत्तम् ॥ १९ ॥

अभ्यर्थ्य लोकेश मगा द्धरित्री भुवं द्रुतं विज्वरशोकमोहा ।
क्षीरोदधिं गन्तुमना विरिञ्चि र्जगाम चित्तेन हरिं शरण्यम् ॥ २० ॥

अभ्यर्थ्येति ॥ विगताः ज्वरशोकमोहाः यस्याः सा धरित्री भूमिः । लोकेशं ब्रह्माणम । अभ्यर्थ्य याचित्वा भुवं भूलोकम् । द्रुतं अगात् ययौ । क्षीरोदधिं क्षीरसागरं गन्तुं मनो यस्य सः 'तुं काममनसो रपि' इति मकार-लोपः । विरिञ्चिः ब्रह्मा । शरण्यं रक्षकं हरिम् । चित्तेन जगाम प्राप्तवान् । मनसा स्मृतवा नित्यर्थः । गम्लृधातोः कर्तरि लिट् ॥ २० ॥

अथाऽगम न्नक्रझषोर्मिजालं तरङ्गहस्तैः सुविमृष्टतीरम् ।
शैवालमालाभि रगाधपार मब्धिं विरिञ्चिः सह देवसङ्घैः ॥ २१ ॥

अथेति ॥ अथ हरिस्मरणानन्तरम् । विरिञ्चि ब्रह्मा । नक्राणां झषाणां ऊर्मीणां जालं समूहः यस्मिंस्तम् । तरङ्गा एव हस्ता स्तैः । सुष्ठु विमृष्टं तीरं येन तम् । शैवालमालाभिः उपलक्षितम् । न विद्यते गाधः पारे यस्य तम् । अब्धिं समुद्रम् । देवानां सङ्घैः सह अगमत् प्राप गम्लृधातोः कर्तरि लुङ् । लृदित्वादङ् ॥ २१ ॥

दृष्ट्वोर्मिहस्तप्रतितीरनीतैः समञ्चयन्तं नवरत्नसङ्घैः ।
सिन्धुं तदाऽऽनन्द्य स विस्मितोऽभू च्चन्द्रोदये स्वागमने यथर्द्धम् ॥२२॥

दृष्ट्वेति ॥ स ब्रह्मा ऊर्मय एव हस्ता स्तैः । प्रतितीरं तीरं तीरम् । वीप्सायां मव्ययीभावः । नीतैः नवविधानां रत्नानां सङ्घैः समञ्चयन्तं सम्यक् पूजयन्तम् । चन्द्रोदये यथा चन्द्रोदय इव । स्वागमने ऋध्दं वृद्धिं प्राप्तम् । सिन्धुं समुद्रम् । दृष्ट्वा तदा आनन्द्य विस्मितो ऽभूत् । भूधातोः कर्तरि लुङ् । पूर्णोपमालङ्कारः ॥ २२ ॥

भूम्या समभ्यर्थितकार्यसिद्ध्यै मुखै श्चतुर्भि र्वरदं प्रशान्तम् ।
ज्ञानात्मकं ज्ञाननिधिं गुणाढ्यं तुष्टाव विष्णुं कमलासनः प्रभुम् ॥२३॥

भूम्येति ॥ कमलासनः ब्रह्मा भूम्या समभ्यर्थितस्य याचितस्य कार्यस्य सिद्ध्यै सिद्ध्यर्थम् । वरदं प्रशान्तं ज्ञानं आत्मा स्वरूपं यस्य तम् । ज्ञाननिधिं गुणाढ्यं प्रभुं विष्णुम् । चतुर्भि र्मुखैः तुष्टाव स्तौति स्म । ष्टुञ्धातोः कर्तरि लिट् ॥ २३ ॥

नमो नमस्ते कलशाब्धिशायिन् सृष्ट्वेति सम्पाल्य गुणानुबद्धम्[1] ।
सत् संहरेत् ब्रह्म गुणै र्विहीनं को वेत्ति विश्वं वर निष्क्रियं चित् ॥२४॥

नमो नम इति ॥ कलशाब्धौ क्षीरसागरे शेत इति तथा । ताच्छील्ये णिनिः । तस्य सम्बुद्धिः । वर श्रेष्ठ । ते तुभ्यं नमो नमः । आदरे द्विरुक्तिः । गुणै र्विहीनं गुणशून्यम् । निष्क्रियं क्रियाशून्यम् । सत् सत्यस्वरूपम् । चित् ज्ञानस्वरूपम् । ब्रह्म, गुणै रनुबद्धं सम्बद्धम् । विश्वं जगत् । सृष्ट्वा उत्पाद्य, सम्पाल्य संहरे दिति । को वेत्ति? न कोऽपीत्यर्थः । विद्धातोः कर्तरि लट् । अत्र को वेत्तीति गुणक्रियाशून्यब्रह्मकर्तृकसृष्ट्यादे रसम्भाव्यत्ववर्णना दसम्भवालङ्कारः । तदुक्तम् — 'असम्भवो ऽर्थनिष्पत्ते रसम्भाव्यत्ववर्णनम्' इति ॥ २४ ॥

अहं न जाने भगवन् परेश त्वदिच्छया सृष्ट इति प्रपञ्चः ।
रजोगुणेनात्र परं विधाता वृथाऽभिमानेन विभेदबुद्ध्या ॥ २५ ॥

अहमिति ॥ हे भगवन्! परेश परेषां ब्रह्मादीना मीश । त्वदिच्छया तव इच्छया । प्रपञ्चः सृष्ट इति अहं ब्रह्माऽपि न जाने न वेद्मि । परं तु अत्र सृष्टिकरणे रजोगुणेन उत्पन्नेन वृथाऽभिमानेन निरर्थकगर्वेण । विशेषेण भेदबुद्ध्या, अह मेव विधाता सृष्टिकर्ता इति जाने जानामि । ज्ञाधातोः कर्तरि लट् । 'ज्ञा जनोर्जा' इति जादेशः । सृष्टेः रजोगुणकार्यत्वात् स्वातन्त्र्यस्य च गर्वहेतुकत्वात् अहन्त्वस्य च भेदबुद्ध्यधीनत्वाच्चेति भावः । उपेन्द्रवज्रावृत्तम् ॥ २५ ॥

त्वदीक्षया विश्वसृजानुरूपं नित्यास्पदं जन्मलयस्थितिभ्यः ।
कृतः प्रपञ्चस्य विकारभाजः त्वं मायया विश्वसृजां वरिष्ठः ॥ २६ ॥

---

1. ग. गुणानुजातम्; व्या. गुणाननुसृत्य जातम्;

त्वदिति ॥ हे नित्य । त्वदीक्षया तव सिसृक्षापूर्वकवीक्षणेन हेतुना । विश्वसृजा प्रपञ्चनिर्मात्र्या मायया । विश्वसृजां ब्रह्मादीनाम् । वरिष्ठः अतिशयेन श्रेष्ठः । त्वं विकारं भजतीति तथोक्तस्य प्रपञ्चस्य जन्मलयस्थितिभ्यः । 'तादर्थ्ये चतुर्थी' । अनुरूपं योग्यम् । आस्पदं आश्रयः । 'आस्पदं प्रतिष्ठायाम्' इति निपातनात् साधुः । कृतः । अत्रानुरूपयोः मायेशयो र्घटनावर्णनात् समालङ्कारः । तदुक्तम् — 'समं तद्[1] वर्णनं यत्र द्वयो रप्यनुरूपयोः' इति ॥ २६ ॥

तदाऽऽविरासी दशरीरवाणी स्वस्वांशभूतान् जनयध्व माशु ।
यदोः कुले ऽहं भवितेति यूयं ममोपकाराय वधेऽसुराणाम् ॥२७॥

तदेति ॥ तदा असुराणां दुष्टराजरूपराक्षसानां; वधे मम उपकाराय । यदोः कुले यदुवंशे । यूयं ब्रह्मादिदेवाः । स्वस्वांशभूतान् । आशु जनयध्वं उत्पादयध्वम् । जनिधातोः कर्तरि विधौ लोट् । अह मपि यदोः कुले यदुवंशे भविता उत्पत्स्यामि[2] इति अशरीरवाणी आकाशवाक्[3] आविरासी-दाविर्बभूव ॥ २७ ॥

तथैव सर्वे यदुवंशसम्भवा भटा यथा राजविनिर्गमे बहिः ।
विष्णोः सुराः प्रत्यवतस्थिरे पुरा प्रतीक्षमाणा भुवि जन्म मानुषम् ॥२८॥

तथैवेति ॥ तथैव पूर्वोक्तप्रकारेणैव । सर्वे सुराः। यदुवंशे संभवो येषां तथाभूताः सन्तः । भुवि विष्णो र्मानुषं जन्म श्रीकृष्णावतारं प्रतीक्षमाणाः सन्तः । राजविनिर्गमे राज्ञः निःसरणसमये । बहिः भटा यथा भृत्या इव । पुरा पूर्वम् । प्रत्यवतस्थिरे अतिष्ठन् । प्रत्यवपूर्वात् ष्ठाधातोः कर्तरि लिट् । 'समवप्रविभ्यः स्थः' इत्यात्मनेपदम् । पूर्णोपमालङ्कारः ॥ २८ ॥

---

1. स्याद् The *Kuvalayānanda.* P. 117 Nirnaya Sagar Ed. 1947
2. क. उद्भविष्यामि
3. क. आकाशवाणी अशरीरवाक् ।

आसी दित्यादिश्लोकद्वयेन वसुदेवो वर्ण्यते—

आसीत् सुराजा वसुदेवनामा काव्यादरः साधुजनेडचमानः ।
सुदत्तभूमि र्वसुतृप्तदेवो महामतिः [1]पुण्यधनैकबन्धुः ॥ २९ ॥

आसीदिति ॥ काव्यादरः काव्ये ग्रन्थे शुक्रे च आदरः यस्य । 'शुक्रो दैत्यगुरुः काव्यः' इत्यमरः । साधुजनै रीडचमानः स्तूयमानः । सुष्ठु दत्ता भूमि र्येन सः । वसु सुवर्णं तस्य दानं तेन तृप्ता देवाः यस्य सः । महती मति र्यस्य । 'वर्तमाने पृषद्बृहन्महज्जगच्छतृवत्' इति शतृवद्भावे उगित्वात् ङीप् । स्त्रियाः पुंवद्भावे 'आन्महतः' इति महच्छब्दस्य आकारादेशः । पुण्यधनाः एके मुख्याः बन्धवो यस्य । वसुदेव इति नाम यस्य सः । सुराजा । 'न पूजनात्' इति निषेधा न्न टच् । आसीत् अवर्तत । असधातोः कर्तरि लङ् ॥ २९ ॥

अभूतपूर्वः सकलार्थवेत्ता देवोऽध्यवात्सी न्मधुरापुरीं ताम् ।
अयोध्यया चारु समानलक्ष्मीं गृहै र्विभान्तीं गगनं स्पृशद्भिः ॥ ३० ॥

अभूतेति ॥ पूर्वं भूतः भूतपूर्वः, न भूतपूर्वः अभूतपूर्वः । 'भूतपूर्वे चरट्' इति निर्देशात् पूर्वनिपातः । सकलाना मर्थानां वेत्ता देवो वसुदेवः । नामैकदेशे नामग्रहणम् । गगनं स्पृशद्भिः गृहैः । चारु यथा तथा विभान्तीं प्रकाशमानाम् । अयोध्यया समाना लक्ष्मीः यस्या स्ताम् । मधुरापुरीमध्यवात्सीत् उवास । अधिपूर्वकवसधातोः कर्तरि लुङि 'उपान्वध्याङ् वसः' इति आधारस्य कर्मत्वम् । पूर्णोपमालङ्कारः । अतिशयोक्त्यलङ्कारश्च । तयोः संसृष्टिः ॥ ३० ॥

यद्राजेति श्लोकद्वयेन[2] मधुरापुरी वर्ण्यते—

यद्राजमार्गेऽम्बरसक्तसौधे रवि र्यदा याति सरत्नजाले ।
रथेऽस्य संक्रीडति वेगयुक्ते पिनद्धकर्णा न च किं रमण्यः ॥ ३१ ॥

---

1. क. पुण्यजनक.

2. क. श्लोकेन;

यद्राजेति ॥ यस्या मधुरापुर्याः[1] राजमार्गे राजवीथ्यां; रत्नमयै र्जालैः, गवाक्षैः सह वर्तत इति तथोक्ते । 'जालं समूह आनायो गवाक्षक्षारका वपि' इत्यमरः । अम्बर आकाशे सक्तं सौधं यस्मिन् । रवि र्यदा आयाति आगच्छति । याधातोः कर्तरि लट् । तदाऽस्य रवेः वेगेन युक्ते रथे संक्रीडति कूजति सति । 'समोऽकूजन' इति कूजनार्थे पर्युदासा न्नात्मनेपदम् । रमण्यः स्त्रियः । पिनद्धकर्णा निरुद्धश्रोत्राः । अपिपूर्वकनह्यतेः कर्मणि क्तः । 'वष्टि भागुरिरल्लोप मवाप्यो रुपसर्गयोः' इति अकारलोपः । न किम्? पिनद्धकर्णा एव । अत्र सौधानां अम्बरायोगेऽपि योगकल्पनात् सम्बन्धातिशयोक्त्यलङ्कारः । तदुक्तम्—
'सम्बन्धातिशयोक्तिः स्या दयोगे योगकल्पनम्' इति ॥ ३१ ॥

सम्भासय त्यस्य हृदि स शार्ङ्गी प्राविर्भवन् यादववंशजातान् ।
अनुग्रहो मित्रजनेषु वृद्धेः फलं सतामित्यनुबोधयन् सः ॥ ३२ ॥

सम्भासयतीति ॥ शृङ्गस्येदं शार्ङ्गं तदस्यास्तीति स हरिः । अस्य वसुदेवस्य । हृदि हृदये प्राविर्भवन्नेव । सतां वृद्धेः समृद्धेः मित्रजनेषु । अनुग्रहः फल मिति अनुबोधयन् । यादववंशजातान् वसुदेवादीन् । सम्भासयतिस्म समभासयत् । सम्पूर्वकभासतेः (ण्यन्तात्) कर्तरि लट् । स्मयोगाद् भूतार्थकत्वम् । अत्र हरिः स्वाविर्भावसमय एव यादवेषु कान्ति मादधानः तथा आधानक्रियया परान् प्रति समृद्धेः फलं सुहृदनुग्रह एवेति बोधयन् निबद्ध इति सदर्थनिदर्शनालङ्कारः । '[2]सदर्थबोधनां प्राहुः क्रिययाऽसत्सदर्थयोः' इति ॥ ३२ ॥

चिराय सम्प्रार्थनयाऽस्य देवी गर्भे दधेऽन्तर्जगतां निवासम् ।
हरिं हरं सर्वजनैनसां त मुदारगम्भीरगुणोत्तरं सा ॥ ३३ ॥

चिरायेति ॥ अस्य वसुदेवस्य । सा देवी देवकी । चिराय बहुकालेन । 'चिराय चिररात्राय चिरस्याद्या श्चिरार्थकाः' इत्यव्ययेष्वमरः । स्वायं-

---

1. क. मधुपुर्याः ;

2. ग, अपरां बोधनं; The *Kuvalayānanda*.

भुवमन्वन्तरे देवकी पृश्निः वसुदेवः सुतपा नाम प्रजापतिश्चाभूत् । तदानीं पुत्रत्वेन वृतस्य अस्य भगवतः सम्प्रार्थनया हेतुना सर्वजनाना मेनसां पापानां हरम् । उदारा लोकोत्तराः, गम्भीराः ज्ञातु मशक्याः; असंख्येया इति यावत्; गुणाः तैः उत्तरं श्रेष्ठम् । जगतां निवासं आधारभूतं हरिम् । अन्तर्गर्भे । दधे धृतवती । धाधातोः कर्तरि लिट् । अत्राल्पीयसि देवक्या उदरे सकलजगदाधारस्य हरे वृत्तिवर्णना दधिकालङ्कारः । तदुक्तम्— 'आधाराधेययो रानुरूप्याभावोऽधिको मतः[1]' इति ॥ ३३ ॥

दिने दिन इत्यष्टभिः श्लोकै र्गर्भलक्षणानि वर्ण्यन्ते—

दिने दिने तन्मुद माप्य देवी रेखेव चन्द्रस्य विवर्धमाना ।
रत्नौघवन्नूपुरहंसपादसरोरुहाभ्यां धरणीं चचार ॥ ३४ ॥

दिने दिन इति । चन्द्रस्य रेखेवेत्युपमा । विवर्धमाना देवी देवकी दिने दिने प्रतिदिनं; वीप्सायां द्विर्भावः । तन्मुदं गर्भसन्तोषं आप्य प्राप्य, रत्नानां ओघः समूहः तद्वन्तौ नूपुरौ हंसा विव नूपुरहंसौ ययो स्ते च ते पादौ सरोरुहे इव पादसरोरुहे ताभ्यां; उपलक्षिता सती धरणीं चचार अचरत् । चरधातोः कर्तरि लिट् ॥ ३४ ॥

भारेण गर्भस्य कटिस्थलान्तप्रबद्धकाञ्ची त्रुटिता बभूव ।
सा न क्षमा यातुमना श्च देवी गन्तुं पद न्त्वेक मसौ तदाऽसीत् ॥३५॥

भारेणेति ॥ गर्भस्य भारेण । कटिस्थलान्ते मध्यप्रदेशे प्रबद्धा काञ्ची मेखला । 'स्त्रीकट्यां मेखला काञ्ची' इत्यमरः । त्रुटिता छिन्ना बभूव । असौ सा देवी देवकी यातुमनाश्च यातुमना अपि, एकं तु एक मपि पदं गन्तुं तदा क्षमा समर्था नासीत् नाभूत् । असधातोः कर्तरि लङ् ॥ ३५ ॥

---

1. The *Pratāparudrīya*.

**अस्य स्वगाम्भीर्यजिताम्बुराशे र्गभीरता स्यात् कियती ममाग्रे ।
ह्रियेव तस्या इति नाभिकूपः क्रमेण तत्याज गभीरभावम् ॥ ३६ ॥**

अस्येति ॥ स्वस्य गाम्भीर्येण जितोऽम्बुराशिः समुद्रो यस्य तस्य । अस्य गर्भस्थस्य । अग्रे पुरः, मम गभीरता कियती स्यात् अप्रयोजिका इति ह्रियेव लज्जयेव । तस्या देवक्याः नाभिकूपो नाभिप्रदेशः । गभीरभावं निम्नतां क्रमेण तत्याज जहौ । त्यजधातोः कर्तरि लिट् । अत्र नाभिकूपस्य गभीरतात्यागे अहेतो र्लज्जायाः हेतुत्वेनोत्प्रेक्षणात् असिद्धहेतूत्प्रेक्षालङ्कारः । तदुक्तम्— 'सम्भावना स्या दुत्प्रेक्षा वस्तुहेतुफलात्मना .... सिद्धासिद्धे' ति ॥ ३६ ॥

**सा भूषणै रत्नमयै र्विहीनाऽप्यभूतपूर्वां सुषमां बभाज ।
त्रैलोक्यरत्नं य दभूषय त्तां गर्भस्थितं कौस्तुभरत्नवत्सम् ॥ ३७ ॥**

सेति ॥ सा देवकी । रत्नमयैः रत्नप्रचुरैः । भूषणै र्विहीनाऽपि अभूतपूर्वां असदृशीं सुषमां कान्तिम् । 'सुषमा परमा शोभा, शोभा कान्ति र्द्युति श्छविः' इत्यमरः । बभाज प्राप । भजधातोः कर्तरि लिट् । यत् यस्मात् कारणात् कौस्तुभाख्यं रत्नं वत्से वक्षसि । 'उरो वत्सं च वक्षश्च' इत्यमरः । यस्य तत्; त्रैलोक्यरत्नं भुवनत्रयरत्नं गर्भे स्थितं सत् देवकी मभूषयत् । भूषधातो र्णिजन्ता त्कर्तरि लङ् ॥ ३७ ॥

**पयोधरौ नीलमुखौ तदीयौ पीनौ व्यभातां जतुक्लृप्तमुद्रौ ।
शरीरनिर्मित्यवशेषसर्वलावण्यपूर्णा विव हेमकुम्भौ ॥ ३८ ॥**

पयोधराविति ॥ नीले मुखे चूचुके ययो स्तौ । पीनौ पीवरौ । तदीयौ देवकीसम्बन्धिनौ । पयोधरौ स्तनौ । जतुना लाक्षया क्लृप्ते कृते मुद्रे ययो स्तौ । शरीरस्य निर्मितेः निर्माणात् अवशेषेण सर्वेण लावण्येन पूर्णौ पूरितौ । हेमकुम्भौ कनककलशा विव व्यभातां बभतुः । विपूर्वकभातेः कर्तरि लङ् । अत्र पयोधरयोः नीलमुखत्वादिधर्मसम्बन्धेन निमित्तेन कनककलशतादात्म्योत्प्रेक्षणात् उक्तवस्तूत्प्रेक्षालङ्कारः ॥ ३८ ॥

तस्या उरोजा वतिनीलवक्त्रौ वृत्ता वपर्याप्तभुजान्तरौ किम् ।
शरीरलावण्यसरोजपद्मकोशौ मिलिन्दालिसमावृताग्रौ ॥ ३९ ॥

तस्या इति ॥ अति अत्यन्तं नीले वक्त्रे चूचुके ययो स्तौ । वृत्तौ वर्तुलौ । अपर्याप्तं भुजान्तरं भुजमध्यप्रदेशः ययो स्तौ । उरोजौ स्तनौ । मिलिन्दानां भ्रमराणां आलिभिः पङ्क्तिभिः समावृते अग्रे ययो स्तौ । शरीरस्य लावण्य मेव सर स्तटाकः तत्र जातौ पद्मकोशौ ईषद्विकसितकमलकुट्मलौ किम्! अत्र स्तनयोः अतिनीलत्वादिधर्मसम्बन्धेन निमित्तेन पद्मकोशतादात्म्योत्प्रेक्षणात् उक्तवस्तूत्प्रेक्षालङ्कारः ॥ ३९ ॥

(अथ त्रिभिः कुलकेनाह—)

कनज्जगन्मोहनकर्णकुण्डलां शनै श्शनै र्लोचनगोचरोदरीम् ।
महेन्द्रगर्भा मदितिं पुरौकस श्शशङ्किरे वीरसुवं हि देवकीम् ॥४०॥

कनदिति ॥ पुरौकसो नागरिकाः । कनन्ती लसन्ती जगन्मोहने कर्णकुण्डले यस्या स्ताम् । शनै श्शनै र्लोचनानां गोचर मुदरं मध्यः यस्या स्ताम् । वीरं शूरं सूत इति वीरसुवं देवकीं पूर्वोक्तविशेषणत्रयविशिष्टां, महेन्द्रः वज्री गर्भे यस्या स्तां अदितिं देवमातरं शशङ्किरे हि शङ्कितवन्तः । शकिधातोः कर्तरि लिट् । अत्र देवक्याः जगन्मोहनकर्णकुण्डलवत्त्वादिधर्मसम्बन्धेन निमित्तेन अदितितादात्म्योत्प्रेक्षणात् उक्तवस्तूत्प्रेक्षालङ्कारः । लक्षणं तूक्तम् । वंशस्थवृत्तम्, 'जतौ तु वंशस्थ मुदीरितं जरा' विति लक्षणात् । ॥ ४० ॥

आपाण्डुरां पर्वणि रोहिणीं तां जिताब्जवक्त्रद्विजराजकान्त्या ।
ग्रैवेयकाबध्दसुमौक्तिकोडुसमूहभासा च विराजमानाम् ॥ ४१ ॥

आपाण्डुरामिति ॥ जितानि अब्जानि येन तत्, तच्च तद्वक्त्रं च तदेव द्विजराजः चन्द्रः, तस्य कान्त्या । ग्रैवेयके कण्ठभूषणे, 'ग्रैवेयकं कण्ठ-भूषा' इत्यमरः; आसमन्ताद् बध्दाः मौक्तिका न्येवोडूनि तारकाः, 'तार

काप्युडु वा स्त्रिया' मित्यमरः; तेषां समूहस्य भासा च विराजमानां प्रकाशमानां आपाण्डुरां तां देवकीं पर्वणि रोहिणीं शशङ्किरे इति शेषः। अत्र देवक्या मुखचन्द्रकान्त्यादिधर्मसम्बन्धेन निमित्तेन रोहिणीतादात्म्योत्प्रेक्षणादुक्तवस्तूत्प्रेक्षालङ्कारः ॥ ४१ ॥

अत्यन्तविश्रान्तिपरां गिरोऽपि गलत्कचां भूषणभारखिन्नाम्।
चिरं निरालम्बवियद्विहारश्रान्तां शयानां शयने ऽमरस्त्रीम् ॥४२॥

अत्यन्तेति॥ गिरोऽपि वाचोऽपि। अत्यन्तविश्रान्तौ परा मासक्तां; एक मपि वाक्यं वक्तु मशक्ता मित्यर्थः। गलन्तः कचाः शिरोरुहाः यस्या स्ताम्। 'कचः केशः शिरोरुहः' इत्यमरः। भूषणानां अल्पभूषणाना मपि भारेण खिन्नाम्। शयने शयानां एना मिति शेषः। चिरं बहुकालं निरालम्बे अनालम्बे वियति आकाशे विहारेण सञ्चारेण श्रान्तां; अत एव शयने शयानां अमरस्त्रीं देवसुन्दरीम्। 'वाऽमृशसोः' इति वैकल्पिकत्वा न्नेयङ्। अत्र श्रान्तिपूर्वकशयनादिधर्मसम्बन्धेन निमित्तेन अमरसुन्दरीतादात्म्योत्प्रेक्षणादुक्तवस्तूत्प्रेक्षालङ्कारः ॥ ४२ ॥

य न्मायये दं सदसत्स्वरूपं विभा त्यसत्यं गुणसाम्यहीनम्।
न विद्यते जन्म लयश्च यस्य तं पुत्ररत्नं सुषुवेऽथ देवी ॥ ४३ ॥

यदिति॥ अथानन्तरं; देवी देवकी; यस्य भगवतः मायया; सदसत्स्वरूपं कार्यकारणात्मकं; गुणानां सत्त्वादिगुणानां साम्येन समभावेन हीनम्; असत्य मिदं परिदृश्यमानं जगत् विभाति प्रकाशते। यस्य भगवतो जन्म न विद्यते, लयश्च न विद्यते। विद सत्ताया मिति धातोः कर्तरि लट्। तं भगवन्तं पुत्ररत्नं सुषुवे असूत। षूङ्धातोः कर्तरि लिट् ॥ ४३ ॥

जन्मरहितस्य भगवतः कथ मुत्पत्ति रिति आशङ्कां वारयति—

प्रभुः स्वयम्भू र्जगदेकवीरो नभ स्यमौ धातृभचन्द्रयोगे।
पक्षेऽसिते मध्यदिने शुभेऽयौ चन्द्रेण साकं हरि राविरासीत् ॥४४॥

प्रभुरिति ॥ शुभंयौ शुभान्विते इति सर्वत्रान्वयः । 'अहंशुभयोर्युस्' इति गत्वर्थे युस् प्रत्ययः । 'शुभंयु स्तु शुभान्वितः' इत्यमरः । नभसि श्रावणिकमासे । 'नभः खं श्रावणो नभाः' इत्यमरः । असितपक्षे कृष्णपक्षे मध्यदिने ऽष्टम्यां; धातृभेन रोहिण्या चन्द्रयोगे सति; प्रभुः नियन्ता; जगति एकवीरः मुख्यशूरः । स्वयम्भूः उत्पत्तिरहितः असौ हरिः । चन्द्रेण साकं चन्द्रेण सह; आविरासी दाविर्बभूव । अत्र चन्द्रेण साकं हरि रावि रासी दित्य-नेन चन्द्रोदयभगवदाविर्भावयोः सहभाववर्णनात् सहोक्त्यलङ्कारः । तदुक्तम्-'सहोक्तिः सहभावश्चे द्भासते जनरञ्जनः' इति ॥ ४४ ॥

कृतावतारस्य निजान्वयेऽस्योदिते विधा वाशु दिदृक्षयेव ।
नश्ये द्विरोधीति विधो र्वदत्स त्समुच्छूतं सन्तमसं विलीनम् ॥४५॥

कृतेति ॥ निजान्वये स्ववंशे चन्द्रवंशे इत्यर्थः । कृतः अवतारो येन तस्य। अस्य विष्णो र्बालस्य कृष्णस्य आशु दिदृक्षयेव द्रष्टु मिच्छयेव। दृशिधातोः सन्नन्तात् अप्रत्यये टाप् । विधौ चन्द्रे उदिते सति समुच्छूतं प्रवृद्धं सन्तमसं सर्वत्र व्याप्तं तमः । विधोः चन्द्रस्य विष्णोश्च । 'विधु र्विष्णौ चन्द्रमसि' इत्यमरः । विरोधी नश्ये दिति वदत्सत् विलीनं विलयं गतम् । अत्र चन्द्रा-गमे असिद्धैव दिदृक्षा हेतुत्वेन उत्प्रेक्ष्यत इति असिद्धहेतूत्प्रेक्षालङ्कारः । तदुक्तम् — 'सम्भावना स्यादुत्प्रेक्षा वस्तुहेतुफलात्मना । उक्तानुक्तास्पदा ऽऽद्याऽत्र सिद्धासिध्दास्पदे परे' इति । विधुना विरुध्य स्वयं नाशक्रिया-विशिष्टं तमः स्वनाशक्रियया अन्योऽप्येवं विधुविरोधी नश्ये दिति अनिष्टपर्य-वसायिन मर्थं बोधय त्सत् विलीन मिति असदर्थनिदर्शनालङ्कारः । तदुक्तम्-—'अपरां बोधनं प्राहुः क्रियया ऽसत्सदर्थयोः' इति। तथा च तयोः परस्परनैरपेक्ष्यात्तिलतण्डुलव त्संसृष्टिः ॥ ४५ ॥

देवाः क्षणे नेमु र्ननन्त माद्यं भेर्यश्च नेदु र्दिवि पुष्पवृष्टीः ।
अवाकिरन् पन्नगसुन्दरीणां सङ्घा जगु र्मानुषदेहभाजम् ॥ ४६ ॥

देवा इति ॥ दिवि अन्तरिक्षे। देवा ब्रह्मादयः। मानुषदेहं भजतीति तथोक्तम्। न विद्यते अन्तो यस्य तम्। आदौ भवं विद्यमानं श्रीकृष्णं। क्षणे पुत्रोत्सवे। 'निर्व्यापारस्थितौ कालविशेषोत्सवयोः क्षण' इत्यमरः। नेमुः नमस्कृतवन्तः। नमुधातोः कर्तरि लिट्। भेर्यश्च नेदुः दध्वनुः। नद धातोः कर्तरि लिट्। पुष्पवृष्टीः अवाकिरन्। देवा इत्यनुषज्यते। कृधातोः कर्तरि लङ्। पन्नगानां सुन्दरीणां सङ्घाः। जगुः अगायन्। गातेः कर्तरि लिट् ॥ ४६ ॥

चतुर्भुज मित्यादिभि स्सप्तभिः कुलकेन श्रीकृष्णो वर्ण्यते—

चतुर्भुजं शान्ततनुं वदान्यं विशालवक्षस्स्थलचिह्नभाजम्।
शार्ङ्गं गदां चक्रदरौ दधानं कृष्णं ववन्दे वसुदेवजाया ॥ ४७ ॥

चतुर्भुजमिति ॥ वसुदेवजाया देवकी। चत्वारो भुजा यस्य तम्। शान्ता तनु र्यस्य तम्। सत्त्वमूर्ति मित्यर्थः। वदान्यं पुरुषार्थानां दातारम्। विशाले वक्षस्स्थले चिह्नं श्रीवत्साख्यं दक्षिणावर्तरोम सङ्घं भजतीति तथोक्तम्। शृङ्गस्येदं शार्ङ्गं, गदां, चक्रं, दरः शङ्खश्च तौ च दधानम्। (श्री) कृष्णं ववन्दे अवन्दत। वदिधातो रिदित्वा न्नुमागमः, कर्तरि लिट् ॥ ४७ ॥

उन्निद्रपद्माभविचित्रनेत्रं घनाघनश्यामलकान्तिगात्रम्।
नवं नवोत्पन्नकटाक्षमात्रं मौल्यन्तरेऽधिष्ठितचारुतोत्रम् ॥ ४८ ॥

उन्निद्रेति ॥ उन्निद्रस्य विकसितस्य पद्मस्य आभेव आभा ययोस्ते, विचित्रे नेत्रे यस्य तम्। घनाघनः वर्षुकमेघः; 'शक्रघातुकमत्तेभवर्षुकाब्दा घनाघनाः' इत्यमरः, तद्वत् श्यामला कान्तिः यस्य तत्, तादृशं गात्रं यस्य तम्। नवं नूतनं यथा तथा उत्पन्नं, कटाक्षा एव कटाक्षमात्रं तत् यस्य। मौल्यन्तरे मौलिमध्ये अधिष्ठितं प्राप्तं चारु तोत्रं सुन्दरकशा यस्य तम् ॥ ४८ ॥

भवाम्बुधौ मग्नजनोत्तराय दयालु भङ्गीकृतपोतभावम्।
कलत्रपुत्रस्वजनाहिनक्रे स्मृतेन नेतार मलभ्यमुक्तेः ॥ ४९ ॥

भवेति ॥ दयालुं दयायुक्तं; अत एव कलत्रपुत्रस्वजना एव अहिनक्राः यस्मिन् तस्मिन् भवाम्बुधौ संसारार्णवे । मग्नानां जनाना मुत्तराय उत्तारणाय । अङ्गीकृतः स्वीकृतः पोतभावः शिशुभाव एव, पोतभावः यानपात्रभावः येन तम् । 'यानपात्रे शिशौ पोत' इत्यमरः । स्मृतेन स्मरणेन, भावे निष्ठा । अलभ्याया मुक्तेः नेतारं प्रापकम् । कर्मणि षष्ठी । अत्र भवस्य अम्बुधित्वेन रूपणं पोतभाव एव पोतभाव इति श्लिष्टरूपके निमित्तं, तच्च एकमेवेति श्लिष्टकेवलपरम्परितरूपकालङ्कारः । उपेन्द्रवज्रावृत्तम् । लक्षणं तूक्तं वृत्तरत्नाकरे — उपेन्द्रवज्रा जतजा स्ततो गा' विति ॥ ४९ ॥

अत्युन्नसं चारुतरप्रहासं रवीन्दुकोट्याभकपोलभासम् ।
विमत्तभृङ्गालिसमानगात्रं विराजमानं वसुधैककान्तम् ॥ ५० ॥

अत्युन्नसमिति ॥ अत्यन्त मुन्नता नासिका यस्य तं अत्युन्नसम् । 'उपसर्गा' च्चेति बहुब्रीहा वच् प्रत्ययः नसादेशश्च । अत्यन्तं चारुः चारुतरः प्रहासो यस्य । रवीन्दुकोटेः आभेव आभा ययो स्तयोः कपोलयोः भाः यस्य । विशेषेण मत्तानां भृङ्गाना मालिभिः पङ्क्तिभिः समानं गात्रं यस्य तम् । वसुधायाः एककान्तं मुख्यकान्तम् । विराजमानम्; भृङ्गालिसमानगात्र मिति वर्णनात् धर्मलुप्तोपमालङ्कारः ॥ ५० ॥

लसन्नखा न्निःस्रुतगाङ्गनीरं श्रुत्या विमृग्याद्भुतपादपद्मम् ।
अनर्घपीताम्बरमेखलात्तं[1] तनुं वहन्तं नवनीरदाभम् ॥ ५१ ॥

लसदिति ॥ लसन्नखात् अङ्गुष्ठनखा न्निःस्रुतं गाङ्गं नीरं यस्य । श्रुत्या वेदेन । विमृग्ये अन्वेषणीये अद्भुतपादपद्मे यस्य तम् । अनर्घे ऽमूल्ये पीताम्बरमेखले ताभ्या मात्तं व्याप्तं । नवनीरदस्यामेव आभा यस्या स्तां तनुं वहन्तं बिभ्रतम् पादपद्मेति वर्णना द्वाचकधर्मलुप्तोपमालङ्कारः ॥ ५१ ॥

---

1. क. मेखलात्तां ... ... व्या. ताभ्यामात्तां व्याप्तां ... इति क पुस्तके तनोर्विशेषणम् ।

योगीन्द्रहृत्पद्मगृहं कराभ्यां विराजमानं विलसद्भुजाभ्याम् ।
शीतांशुरेखाविलसन्नखाभ्यां रवीन्दुकोट्युज्ज्वलदङ्गदाभ्याम् ॥५२॥

योगीन्द्रेति ॥ योगीन्द्राणां हृत्पद्मं हृदयकमलं गृह मावासस्थानं यस्य तम् । शीतांशो श्चन्द्रस्य रेखेव विलसन्ति नखानि ययोस्ताभ्यां कराभ्याम् । रवीन्दुकोटिवत् उज्ज्वलन्ती अङ्गदे ययो स्ताभ्यां विलसद्भुजाभ्यां च विराजमानम् । शीतांशुरेखाविलस दिति वर्णनात् वाचकलुप्तोपमा ॥ ५२ ॥

अध श्शयानं विनयान्वितांङ्घ्रिं दिशा दश स्वप्रभया जयन्तम् ।
कल्याणकार्त्स्न्येन विराजमानं स्वच्छेन्दुतुल्याननमञ्जुकान्त्या ॥५३॥

अध इति ॥ अधः भूम्यां शयानम् । विनयेन चलनेन अन्वितौ युक्तौ अङ्घ्री यस्य तम् । दश दिशाः स्वप्रभया स्वकान्त्या जयन्तम्; कल्याणानां कार्त्स्न्येन साकल्येन, स्वच्छेन्दुना तुल्यस्य आननस्य मञ्जुकान्त्या च विराजमानं कृष्णम् । स्वच्छेन्दुतुल्यानन मिति वर्णना द्धर्मलुप्तोपमालङ्कारः ॥ ५३ ॥

अरिष्टविध्वंस्यपि बालकोऽसा वरिष्टगामी घननीलरूपः ।
दीपा गृहस्था मणयोऽस्य भाभि र्महेन्द्रनीला अभव न्नमूल्याः ॥५४॥

अरिष्टेति ॥ घनस्य नीलरूप मिव नीलरूपं यस्य सोऽसौ बालकः । अरिष्टानि अशुभानि विध्वंसत इति तथोक्तोऽपि । "अरिष्टे तु शुभाशुभौ" इत्यमरः । अरिष्ट मशुभं गच्छती त्यरिष्टगामीति विरोधः । सूतिकागृहं प्राप्त इति परिहारः । 'अरिष्टं सूतिकागृह' मित्यमरः । अस्य बालकस्य भाभिः कान्तिभिः । गृहस्थाः सूतिकागृहस्थिताः दीपा मणयश्च पद्मरागादयश्च अमूल्याः मूल्यरहिताः महेन्द्रनीला इन्द्रनीलमणयो ऽभवन् बभूवुः । भवतेः कर्तरि लङ् । विरोधाभासालङ्कारः । तदुक्तम् — 'आभासत्वे विरोधस्य विरोधाभास इष्यते' इति । सूतिकागृहस्थदीपाः मणयश्च महेन्द्रनीलमणयो ऽभवन्निति वर्णना त्तद्गुणालङ्कारः । 'तद्गुणः स्वगुणत्यागा दन्यदीयगुणग्रहः' इति । तथा च द्वयोः परस्परनैरपेक्ष्या त्संसृष्टिः ॥ ५४ ॥

नेत्रोत्पलद्वन्द्व मतीव तस्याः सितं मुखेन्दो र्दरहासकान्त्या ।
अस्येन्द्रनीलाभवपुःप्रभाभिः भेजे रजन्या मतिनीलरूपम् ॥५५॥

नेत्रेति ॥ मुख मिन्दुरिवेत्युपमितसमासः तस्य, दरहासस्य ईषत्स्मितस्य कान्त्या । अतीव सितं; तस्या देवक्याः । नेत्रे उत्पले इवेति उपमितसमासः, तयो र्द्वन्द्वम् अस्य श्रीकृष्णस्य । इन्द्रनीलानामाभेवाभा यस्य तस्य वपुषः प्रभाभिः । रजन्यां रात्रौ । अतिनीलरूपं भेजे प्राप । भजधातोः कर्तरि लिट् । अत्र दरहासकान्त्या सितिमानं प्राप्तस्य नेत्रोत्पलद्वन्द्वस्य पुनः स्वकान्तिप्राप्तिवर्णना त्पूर्वरूपालङ्कारः । तदुक्तम् — 'पुनः स्वगुणसम्प्राप्तिः पूर्वरूप मुदाहृतम्' इति ॥ ५५ ॥

मुरारिपादार्पितचित्तवृत्ती विरेजतु स्त्वर्चनया सुदम्पती ।
बालेन संसारितपूर्वदेहौ पुत्रेच्छया तं श्रितपूर्वदम्पती ॥ ५६ ॥

मुरारीति ॥ मुरारेः श्रीकृष्णस्य पादयो रर्पिता चित्तवृत्तिः ययोः । पुत्रेच्छया, या अर्चना तया । हेतौ तृतीया । बालेन श्रीकृष्णेन । संसारितौ-युवां प्रथमजन्मनि पृश्निसुतपसौ भूत्वा पृश्निगर्भनामकं मां सुतं प्राप्तवन्तौ । द्वितीयजन्मनि अदितिकश्यपौ भूत्वा उपेन्द्रं वामननामकं मां सुतं प्राप्तवन्तौ । इदानीं देवकीवसुदेवौ भूत्वा चतुर्भुजं मां श्रीकृष्णं सुतं प्राप्तवन्ता विति संसारितौ पूर्वदेहौ ययो स्तौ । तं भगवन्तं श्रिता वाश्रितौ पूर्वदम्पत्ती पूर्वजन्म न्यपि दम्पती सुदम्पती देवकीवसुदेवौ विरेजतुः । राजृधातोः कर्तरि लिट् ॥ ५६ ॥

ताभ्यां प्रसन्नो वरजातसूनुः बभाण वाचं भयकम्पितं तम् ।
नयेति मां नन्दगृहं पिधाय तत्रत्यशक्तिं द्रुत मानयेह ॥ ५७ ॥

ताभ्यामिति ॥ ताभ्यां देवकीवसुदेवाभ्यां प्रसन्नोऽभिमुखः; वरा ज्जातः सूनुः श्रीकृष्णः, भयात् कंसभयात् कम्पितं तं वसुदेवं प्रति 'मां पिधाय आच्छाद्य नन्दगृहं नय । तत्रत्यशक्तिं 'अव्ययात्त्य' पिति त्यप्प्रत्ययः । नन्दगेहस्थशक्तिं बाला मिह सूतिकागृहे द्रुत मानये' ति वाचं बभाण उवाच । भणधातोः कर्तरि लिट् ॥ ५७ ॥

चतुर्भुजस्यास्य शिशोः प्रभावा दन्तर्दधे सायुधबाहुयुग्मम् ।
इतीव हन्तुं रिपु मेष शक्तो मया विना प्रेयसि बालभावे ॥ ५८ ॥

चतुर्भुजस्येति ॥ चत्वारो भुजा यस्य तस्यास्य शिशोः श्रीकृष्णस्य । आयुधैः स्सहितं बाहुयुग्मं । प्रभावात् एष शिशुः प्रेयसि । प्रियशब्दस्येयसुनि 'प्रियस्थिरे' त्यादिना प्रादेशः । बालभावे मया विना 'पृथग्विने' त्यादिना तृतीया । रिपुं कंसं हन्तुं शक्त स्समर्थः । इतीव इति बुध्द्येव; अन्त र्दधे तिरोदधे । अत्र मां विना कृष्णः शत्रून् हन्तुं शक्त इति विज्ञानं बाहुयुग्मे असदेव तिरोधानहेतुत्वेनोत्प्रेक्ष्यत इति असिद्धहेतूत्प्रेक्षा ॥ ५८ ॥

तथाऽनय द्गोकुल मम्बुजाक्षं निशीथकाले घनसंवृतेऽभ्रे ।
अनन्तफण्यात्तनितान्तगूढं स्वयं स विध्वंसितशृङ्खलाङ्घ्रिः ॥५९॥

तथेति ॥ तथा बालोक्तिप्रकारेण भगवद्वहनहेतुना स्वयं विध्वंसितानि शृंखलानि ययो स्तौ अङ्घ्री यस्य स वसुदेवः । निशीथकाले अर्धरात्रे । अभ्रे आकाशे घनसंवृते मेघावृते सति । अनन्तनामकफणिना आत्तः व्याप्तः स चासौ नितान्तगूढश्च तम् । अम्बुजे इवाक्षिणी यस्य तं हरिम् । गोकुलं नन्दघोषं अनयत् निनाय । णीङ्धातोः कर्तरि लङ् । दुह्यादित्वात् द्विकर्मकत्वम् । अम्बुजे इवाक्षिणी इति वर्णनात् धर्मवाचकलुप्तोपमा । उपेन्द्रवज्रावृत्तम् । लक्षणं तूक्तम् ॥ ५९ ॥

निधाय बालं निशि नन्दगेहे तस्यैव गत्या गलितं कवाटम् ।
अज्ञातरूपो घटितं स्वगत्या कुर्व न्नगाद् गेह मसौ सशक्तिः ॥६०॥

निधायेति ॥ अज्ञातं रूपं यस्य सोऽसौ वसुदेवः । निशि अर्धरात्रे । नन्दस्य गेहे बालं श्रीकृष्णं निधाय; तस्य बालस्य; गत्या गलितं कवाटं स्वगत्यैव घटितं कुर्वन् सशक्तिः बालिकासहितः सन् गेहं स्वगेहं अगात् प्राप । इण् धातोः कर्तरि लुङ् । 'इणो गा लुङी' ति गादेशः । अत्र कृष्णेन गत्या कवाटविघटनं कृतं तदन्येन वसुदेवेन गत्यैव घटनं कृत मिति वर्णनाद् व्याघा-

तालङ्कारः । तदुक्तम् — 'स्याद् व्याघातोऽन्यथाकारि तथाकारि क्रियेत चे' दिति ॥ ६० ॥

कंस स्सदा बद्धनितान्तवैरः प्रतीक्षमाणोऽस्य जनिं हरस्य ।
स्वप्राणसङ्घस्य जिघांसु राशु शुश्राव सूतिं हृदि शल्यरूपाम् ॥६१॥

कंस इति ॥ सदा बद्धं नितान्तं वैरं येन सः । अत एव जिघांसुः । हनधातोः कर्मण इति सन्नन्तात् 'सनाशंसे' ति उप्रत्ययः । स्वप्राणसङ्घस्य हरतीति हरः । अस्य शिशोर्जनिं उत्पत्तिं प्रतीक्षमाणः काङ्क्षन् कंसः हृदि शल्यरूपां सूतिं शुश्राव अशृणोत् । श्रुधातोः कर्तरि लिट् ॥ ६१ ॥

उत्थाय तूर्णं वरखड्गपाणि र्जवेन सूते गृह माप्रविश्य ।
दृष्ट्वा च बालां रुदतीं प्रपन्नां स्नुषेति देवीं परमाप तापम् ॥६२॥

उत्थायेति ॥ वरः खड्गः पाणौ यस्य सः । 'प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ' इति सप्तम्यन्तस्य परनिपातः । स कंसः तूर्णं यथा तथा उत्थाय जवेन सूते गृहं सूतिकागृहं आप्रविश्य सम्प्रविश्य । रुदतीं बालां स्नुषेति 'वदन्ती' मिति शेषः । प्रपन्नां शरणं प्राप्तां देवीं देवकीं च दृष्ट्वा परं तापं सन्तापं आप प्राप । आप्लृधातोः कर्तरि लिट् ॥ ६२ ॥

प्रसह्य कोपात् परिगृह्य पादौ चोत्क्षिप्य खे तां भुवि भासमानाम् ।
अधो विधायासि मसौ सुतीक्ष्णं प्रसारयामास स जातमन्युः ॥६३॥

प्रसह्येति ॥ जातमन्युः स कंसः । कोपात् प्रसह्य बलात्कारेण, पादौ शिशुपादौ परिगृह्य गृहीत्वा भुवि, भासमानां तां बालां खे आकाशे उत्क्षिप्य निरस्य सुतीक्ष्णं असिं अधः अधोभागे विधाय कृत्वा प्रसारयामास प्रसारितवान् । प्रपूर्वकसृधातोः णिचि लिट् । आमि अनुप्रयोगः ॥ ६३ ॥

च्युताऽस्य हस्ता दिव मारुरोह वरैन मुत्सृज्य विनष्टकान्तिम् ।
गतायुषं श्रीरिव योगमाया विनिर्मिताशेषजगत्स्वरूपा ॥ ६४ ॥

च्युतेति ॥ वरा श्रेष्ठा । विनिर्मितं अशेषजगत्स्वरूपं यया सा । योगमाया सा बाला । अस्य कंसस्य हस्तात् च्युता सती । विनष्टा कान्ति र्यस्य तं एनं कंसं । उपात्तस्य पुनरुपादानात् 'द्वितीयाटौस्स्वेनः' इति एनादेशः । गतायुषं म्रियमाणं श्रीरिव लक्ष्मीरिव उत्सृज्य त्यक्त्वा दिव माकाश मारुरोह आरूढवती । आङ्पूर्वकरुहधातोः कर्तरि लिट् । पूर्णोपमालङ्कार । उपेन्द्रवज्रावृत्तम् ॥ ६४ ॥

शक्त्यष्टकं बाहुविलग्न मस्याः शक्तित्रयं तस्य सपञ्चवायु ।
बहि स्समायात मिवाऽऽबभौ खे विनष्टकान्ते रतिदुष्टबुद्धेः ॥६५॥

शक्तीति ॥ अस्या योगमायायाः । बाहुषु विलग्नं । शक्तीना मष्टकं' विनष्टा कान्ति र्यस्य । अतिदुष्टा बुद्धि र्यस्य तस्य कंसस्य । बहि स्समायातं सपञ्चवायु प्राणपञ्चकसहितं; शक्तीनां प्रभुमन्त्रोत्साहशक्तीनां त्रयमेव खे आकाशे आबभौ रेजे । आङ्पूर्वकभातेः कर्तरि लिट् । अत्र योगमायायाः शक्त्यष्टकस्य कंससम्बन्धिप्राणादिनिष्ठाष्टत्वसंख्यासम्बन्धेन निमित्तेन प्राणादितादात्म्योत्प्रेक्षणात् उक्तवस्तूत्प्रेक्षालङ्कारः । अस्ति च सम्भावनाया मिवशब्दः 'दूरे तिष्ठन् देवदत्त इव भाति' इत्यादिप्रयोगदर्शनात् । उक्तंच दण्डिना — उत्प्रेक्षा व्यज्यते शब्दै रिवशब्दोऽपि तादृश इति ॥ ६५ ॥

इत्यध्यवोच द्धरणीगतं तं धक्ष्यन्त्यमुं भीषणभाषणै स्सा ।
सर्वासु दिक्षु स्वगतं जितारिं पश्यन्त माद्यं पुरतोऽपि पश्चात् ॥६६॥

इतीति ॥ सा योगमाया । भीषणै र्भाषणै रमुं पुरः स्थितं कंसं धक्ष्यन्ती । 'आच्छीनद्यो' रिति वैकल्पिकनुमागमः। भस्मीकरिष्यमाणा सती स्वगतं हृद्गतं; जिताः अरयः येन तं जितारिं आद्यं श्रीहरिं; सर्वासु दिक्षु पुरतः पश्चादपि पश्यन्तं; धरण्यां गतं स्थितं तं कंसम् । इति वक्ष्यमाणप्रकारेण अध्यवोचत् जगाद । अधिपूर्वकवचधातोः कर्तरि लुङ् । 'अस्यतिवक्ती' त्यङि 'वच उ' मिति उमागमः । एकस्यैव कृष्णस्यानेकत्र वर्णनात् विशेषालङ्कारः । तदु-

क्तम् --- 'विशेष स्सोऽपि यद्येकं वस्तु नैकत्र वर्ण्यत' इति । इन्द्रवज्रा-वृत्तम् ॥ ६६ ॥

तदात्मभूर्यः प्रहितो गुहायां जन्तो स्सदा नन्दकुले प्रकाशम् ।
विवर्धतेऽरि र्भवतो नताऽस्मि तं विश्वगः स्वीकृतमाय ईशः ॥६७॥

तदिति ॥ हे कंस इति शेषः । भवतः भवस्य संसारस्य । 'सार्व-विभक्तिकस्तसिः' । अरिः शत्रुः । अन्यत्र भवतः अरिः तव शत्रुः । 'अस्या स्त्वा-मष्टमो गर्भो हन्ता यां नयसे ऽ बुध' इत्यशरीरोक्तेः । विश्वगः सर्वगतः । अन्यत्र प्रपञ्चगतः । भूलोकगत इति यावत् । स्वीकृता माया येन सः । अन्यत्र स्वीकृता नन्दपुत्रत्वादिभ्रमजननाय स्वीकृना माया येन सः । ईशो जगत्प्रभुः । अन्यत्र वल्लवानां प्रभुः । जन्तो रिति जाता वेकवचनम् । गुहायां हृत्कमले, आनन्द-कुले आनन्दानां विषयानन्दानां कुलं समूहः यस्मिन् तस्मिन् प्रकाशं यथा तथा प्रहितो वर्तमानः । तथाच श्रुतयः 'यो वेद निहितं गुहायाम्, आत्माऽस्य जन्तो र्निहितो गुहाया' मित्याद्याः । अन्यत्र नन्दस्य कुलं सन्तति र्यस्मिन् । 'सन्तति र्गोत्रजननकुला न्यभिजनान्वयौ' इत्यमरः । तस्मिन् घोषे कस्यचिद् जन्तो र्गुहायां गेहे अप्रकाशं यथा तथा प्रहितो वसुदेवेन निहितः य आत्मभूः आत्मना स्वेनैव भवति प्रकाशते इत्यात्मभूः । स चासा वात्मभूश्चेति कर्मधारयः । स्वप्रकाश इत्यर्थः । तथा च 'अभिज्ञः स्वरा' डिति श्रीभागवतोक्तेः । अन्यत्र तस्या देवक्या आत्मभूः पुत्रः विवर्धते विशेषेण वर्धते तं सदा नताऽस्मि नमस्कृत-वत्यस्मि । अत्र प्रकृतस्य श्रीकृष्णस्य अप्रकृतेन ब्रह्मणा सह श्लिष्टोक्तेः प्रकृता-प्रकृतविषयकश्लेषोऽलङ्कारः । तदुक्तम् — नानार्थसंश्रयः श्लेषः वर्ण्यावर्ण्योभया-स्पद' इति ॥ ६७ ॥

श्रुत्वेरितं वाक्य मसौ विसृज्य गेहं च सम्प्राप्य तया विमोहम् ।
कंसो निशासुप्तजनावकीर्णं गृहं ययौ दिक्षु विलग्ननेत्रः ॥ ६८ ॥

श्रुत्वेति ॥ दिक्षु विलग्ननेत्रः असौ कंसः तया योगमायया । ईरित मुक्तं वाक्यं श्रुत्वा, गेहं सूतिकागृहं विसृज्य त्यक्त्वा, मोहं च सम्प्राप्य,

निशायां रात्रौ सुप्ते जने स्वकीर्णं युक्तं गृहं ययौ प्राप। याधातोः कर्तरि लिट् ॥ ६८ ॥

निद्रां न लेभे भयतप्तविग्रह श्चचाल बुद्धी रिपुवर्धना द्रहः ।
पार्श्वे स्थितान् भृत्यगणान् विलोकयन् विदाञ्चकाराय मतः परं न च ॥६९॥

निद्रामिति ॥ रहः रहसि। रिपोः शत्रो र्वर्धनात्। भयेन तप्तः विग्रहः देहो यस्य सः। अयं कंसः निद्रां न लेभे न प्राप। लभतेः कर्तरि लिट्। बुद्धि श्चचाल। चलधातोः कर्तरि लिट्। पार्श्वे स्थितान् भृत्यगणान् विलोकयन्नपि अतः कृष्णा त्पर मन्यत् न विदाञ्चकार न ज्ञातवान्। पार्श्वे स्थितेषु सर्वेष्वपि कृष्णबुद्धि रासी दिति भावः। विद ज्ञान इति धातोः कर्तरि लिट्। 'उषविदे' त्यादिना आमि 'कृञ्चानुप्रयुज्यत' इत्यनुप्रयोगे 'आम्प्रत्ययवत् कृञोऽनुप्रयोग' श्चेति परस्मैपदम् ॥ ३९ ॥

निजेच्छया नित्यनिबद्धवैरः परं विना तं सुतरां न वेद ।
मन्त्रान्तरे मन्त्रविदां सुवादे विपक्षराष्ट्रान्तविधौ स कंसः ॥ ७० ॥

निजेच्छयेति ॥ निजेच्छया स्वेच्छया। नित्यं बहुकालं निबद्धं वैरं येन सः। मन्त्रान्तरे आलोचनामध्ये। मन्त्रविदां मन्त्रिणां सुवादे सम्भाषणकाले। विपक्षाणां शत्रूणां राष्ट्रस्य राज्यस्य अन्तविधौ नाशकरण ······ तं कृष्णं विना 'पृथग्विने' त्यादिना द्वितीया। पर मन्यत् सुतरां न वेद न ज्ञातवान्। सर्वदा सर्वत्र भगवद्विषयकबुद्धिमा नासी दिति भावः ॥ ७० ॥

आत्मान मत्यन्तविसम्भ्रमार्तं मत्वा स तूष्णीं विकलो बभूव ।
वदामि कं कं शरणं नु यामि जाना म्युपायं न विचिन्तयेति ॥७१॥

आत्मानमिति ॥ स कंसः कं प्रति वदामि, कं नु शरणं यामि, उपायं न जानामीति विचिन्तया आत्मानं स्वं अत्यन्तविसम्भ्रमेण अतिमोहेन आर्तं व्याप्तं मत्वा विकलः विह्वलस्सन् तूष्णीं बभूव स्थितवान् ॥ ७१ ॥

आहूय मन्त्रिप्रवरा नितीमा नाज्ञापयामास विनिश्चितार्थः ।
गत्वाऽधुना निष्ठुरचारसङ्घा श्चिन्वन्तु बालान् प्रतिसूत्यगारम् ॥७२॥

आहूयेति ॥ विनिश्चितः अर्थो येन स कंसः । निष्ठुराः कठिनहृदया श्चाराः; चरतीति चरः, 'पचाद्यच्'; स एव चारः गूढपुरुषः, 'प्रज्ञादित्वात् स्वार्थिकोऽण्'। 'चारश्च गूढपुरुष' इत्यमरः; तेषां सङ्घाः। अधुना 'अधुने' ति सूत्रेण इदमः अधुनाप्रत्ययः 'इदम इश्' । 'यस्येती' कारलोपः । अस्मिन्नेव क्षणे गत्वा, प्रतिसूत्यगारं सूतिकागृहे । वीप्साया मव्ययीभावः । बालान् चिन्वन्तु मृगयन्ताम् । चिञ् धातोः कर्तरि लोट् । इति इमान् पुरः स्थितान् मन्त्रिप्रवरान् आहूय आज्ञापयामास आज्ञप्तवान् । ज्ञाधातोः कर्तरि लिट् । इन्द्रवज्रावृत्तम् ॥ ७२ ॥

आज्ञाप्रकारमेवाह—

हरन्तु तान् ये रिपुशङ्कनीया बला दपि ग्रामपुरव्रजेषु ।
विमृश्य सम्यङ् नितरां निगूढा श्चाराः सदा कल्पितवेषभाजः ॥७३॥

हरन्त्विति ॥ नितरां निगूढाः अत्यन्तं निगूहनयुक्ताः चाराः सदा कल्पित-वेषान् भजन्तीति तथाभूता स्सन्तः सम्य ग्विमृश्य विचार्य । ये रिपव इति शङ्कनीया स्तान् ग्रामपुरव्रजेषु बलादपि बलात्कारेणापि हरन्तु संहरन्त्विति आज्ञापयामासेति पूर्वेणान्वयः । हृञ्धातोः कर्तरि विधौ लोट् ॥ ७३ ॥

तेऽप्यु स्तदन्वेषणकार्यसक्ताः जवादरण्यानि मुनीन्द्रहंसाः ।
यथा व्रजग्रामपुराणि सम्य ग्विमार्गमाणाः सुविसक्तदृष्ट्या ॥७४॥

त इति ॥ तस्य बालस्य, ब्रह्मण श्चान्वेषणकार्ये सक्ताः अत एव विशेषेण सक्तदृष्ट्या चक्षुषा ज्ञानेन च । 'दृष्टि र्ज्ञानेऽक्ष्णि दर्शने' इत्यमरः । विमार्गमाणाः अन्विष्यन्तः ते चारा मुनीन्द्रा हंसाश्च परमहंसाश्च अरण्यानि यथा काननानीव व्रजग्रामपुराणि जवा दयुः ययुः । याधातोः कर्तरि लङ् ।

'लङश्शाकटायनस्ये' ति आदन्तात्परस्य लङो झे जुसादेशः। पूर्णोपमालङ्कारः ॥ ७४ ॥

बहिः स्थितं सर्वगतं पुनश्च गेहान्तरस्थं पिहितं स्वशक्त्या।
हृत्पुण्डरीकान्तरभृङ्गरूपं कदाऽपि तं नाक्षिपथं विनिन्युः ॥ ७५ ॥

बहिरिति ॥ चारा इति शेषः। बहिः स्थितं; आकाशवत् सर्वगतं पुनश्च गेहान्तरे तिष्ठतीति तथोक्तम्, स्वशक्त्या **स्वमायया** पिहितं छन्नम्। धा धातोः कर्मणि क्तः। 'दधातेर्हि' रिति हिकारादेशः। 'वष्टि भागुरि' रित्यल्लोपः। हृत्पुण्डरीकान्तरे भृङ्गरूपं एवम्भूत मपि तं बालं कदापि अक्षिपथं नेत्रमार्गं; 'ऋक्पू' रित्यादिना अप्रत्ययः। भक्त्यभावा न्न विनिन्युः नापश्य — न्नित्यर्थः। विपूर्वकणीञ्धातोः कर्तरि लिट्। दुहयादित्वाद् द्विकर्मकत्वम्। अत्र भगवद्रूपवस्तुनः सर्वत्र वर्णनात् विशेषालङ्कारः। तदुक्तम् — 'विशेष स्सोऽपि यद्येकं वस्तु नैकत्र वर्ण्यते' इति ॥ ७५ ॥

शिशून्निहत्य व्रजपट्टणेषु ग्रामेषु देशेषु गृहेषु भूयः।
आगत्य कार्यं [1]कृतमित्युताहुः [2]चाराः स्म राजान मकार्यकार्यम् ॥७६॥

शिशूनिति ॥ चाराः व्रजपट्टणादिषु भूयः शिशून्निहत्य। पुनः पुनरागत्य। कार्यं नियुक्तकार्यं कृत मिति। अकार्यं कार्यं यस्य तं राजान माहुः स ऊचुः। उत आश्चर्यम्। ब्रूञ्धातोः कर्तरि लटि 'ब्रुवः पञ्चाना' मित्याहादेशः। स्मयोगात् भूतार्थकत्वम् ॥ ७६ ॥

सन्त्यक्तशोकः समराजवन्द्यः स्वात्मान मन्तः सुखयाञ्चकार।
जानन्न तं विश्वसृजां वरिष्ठं हिताय लोकस्य कृतावतारम् ॥७७॥

सन्त्यक्तेति ॥ शिशुहननश्रवणात् सम्यक् त्यक्तः शोको येन सः समराजवन्द्यः सर्वराजवन्द्यः। समशब्दः सर्वपर्याय इति श्रवणात्। 'अथ समं सर्वं

1. क. कृतमित्यवोचन् 2. क. चारा महीपालमकार्य

विश्वमशेषं कृत्स्नं' मित्यमरः। कंस इति शेषः। विश्वसृजां ब्रह्मादीनां वरिष्ठं अतिशयेन श्रेष्ठम्। 'अतिशायने तमबिष्ठना' वितीष्ठन्प्रत्यये उरुशब्दस्य वरादेशः। तं भगवन्तं लोकस्य हिताय कृतावतारं न जानन् स्वात्मान मन्तः सुखयाञ्चकार स्वस्थचित्तो बभूव। सुखधातोः णिचि लिटि 'कास्प्रत्यया दाम-मन्त्रे लिटि' इत्यामि 'कृञ् चानुप्रयुज्यत' इत्यनुप्रयोगः ॥ ७७ ॥

हस्ताग्र्यकङ्कणलसन्मणिकान्तियुक्तं
स्वच्छेन्दुमण्डलनिभं च विरेजिरेऽस्य।
वक्त्रं ध्वजाङ्कुशसरोरुहचिह्नपादौ
पाणिद्वये च नितरां व्रजसुन्दरीणाम् ॥ ७८ ॥

हस्तेति ॥ व्रजसुन्दरीणां गोपिकानां हस्तेषु अग्र्येषु श्रेष्ठेषु कङ्कणेषु लसन्मणीनां कान्त्या युक्तं; स्वच्छेन इन्दुमण्डलेन तुल्यं स्वच्छेन्दुमण्डलनिभं; नित्यसमासः; अस्य श्रीकृष्णस्य वक्त्रं ध्वजादिचिह्नयुतौ पादौ च व्रजसुन्दरीणां पाणिद्वये नितरां विरेजिरे। विपूर्वकराजृधातोः कर्तरि लिट्। वसन्ततिल-कावृत्तम्। तदुक्तं वृत्तरत्नाकरे — उक्ता वसन्ततिलका तभजा जगौ ग' इति ॥ ७८ ॥

श्रीकृष्णपादाम्बुजभक्तिपुञ्ज-
धौरेयसम्मानितपुण्यकोटेः।
पुण्येऽत्र काव्ये सरसे विभाति
सर्गोऽयमादि र्जनकल्मषघ्नः ॥ ७९ ॥

श्रीकृष्णेति ॥ श्रीकृष्णस्य पादाम्बुजे भक्तीनां नवविधानां पुञ्जस्य धौरेयः। धौरेयः धुरंधरः। 'धुरो यड्ढका' विति ढक् प्रत्ययः। 'आयनेयी' त्यादिना एयादेशः। तैः सम्मानितस्य पुण्यकोटेः पुण्ये सुकृतपरिपाके सरसे शृङ्गारादि-नवरसयुक्तेऽत्र काव्ये जनानां कल्मषं हन्तीति तथा। भगवत्प्रतिपादकत्वा दिति भावः। हनधातोः 'अमनुष्यकर्तृके चे' ति टकि 'गमहने' त्युपधालोपे

'हो हन्ते' रिति कुत्वम् । अय मादिः सर्गो विभाति । अत्र चमत्कारजनकतया मङ्गलतया च सर्गान्तश्लोकेषु श्रीशब्दप्रयोगः । यदाह भगवान् भाष्यकारः—'मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानीति हि शास्त्राणि प्रथन्ते वीरपुरुषाण्यायुष्मत्पुरुषाणि च भवन्तीति अध्येतारश्च प्रवक्तारो भवन्ती' ति । सर्गान्तत्वाद्वृत्तभेदः । यदाह दण्डी — 'सर्गै रनतिविस्तीर्णैः श्राव्यवृत्तैः सुसन्धिभिः । सर्वत्र भिन्नवृत्तान्तै रुपेतं सर्वरञ्जन' मिति ॥ इन्द्रवज्रावृत्तम् ॥ ७९ ॥

॥ इति श्रीपुण्यकोटिकृते श्रीकृष्णविलासे सव्याख्याने प्रथमस्सर्गः ॥

———

द्वितीयः सर्गः

वासेन नन्दस्य गृहेऽस्य संप ज्जगन्निवासस्य विवर्धते स्म ।
इन्द्रस्य लक्ष्मी रिव कल्पकस्य गेहे वसत्या ऽतिफलप्रदस्य ॥१॥

वासेनेति ॥ अति अत्यन्तं फलप्रदस्य पुरुषार्थदस्य । जगन्निवासस्य जगता माधारभूतस्य; कुक्षिस्थाखिलभुवनस्येत्यर्थः । अस्य श्रीकृष्णस्य । गृहे वासेन नन्दस्य संपत् । अति अत्यन्तं फलप्रदस्याभीष्टार्थदस्य । कल्पकस्य कल्पवृक्षस्य । गेहे वसत्या । इन्द्रस्य लक्ष्मी रिव संपदिव विवर्धते स्म ववृधे । विपूर्वकवृध् धातोः कर्तरि लट् । स्मयोगात् भूतार्थकत्वम् । अत्र उपमानोपमेयसाधारण-धर्मवाचकानां वर्णनात् पूर्णोपमालङ्कारः । अल्पीयस्यपि नन्दस्य गेहे सकल-जगदाधारस्य श्रीकृष्णस्य आधेयत्वकथनात् अधिकालङ्कारः । तदुक्तम्— 'आधाराधेययोरानुरूप्याभावोऽधिको मत' इति । 'अधिकं पृथुलाधारादाधेया-धिक्यवर्णन' मिति । जगन्निवासस्य जगदेकदेशनिवासित्वमिति विरोधश्च । तेषा मन्योन्यनैरपेक्ष्येण समावेशात् तिलतण्डुलवत् संसृष्टिः । अस्मिन् सर्गे प्रायेण उपजातिवृत्तम् । वृत्तान्तराणि तु तत्र तत्र व्याख्यास्यन्ते ॥ १ ॥

चरीकरीति स्म कृशोदरीणां नेत्रोत्पलानां स्मितचन्द्रिकाभिः ।
प्रमोद माभीरवरस्य घोषे नन्दस्य वंशाब्धिजबालचन्द्रः ॥ २ ॥

चरीकरीतीति ॥ घोषे व्रजे । आभीराणां गोपानां वरस्य श्रेष्ठस्य, नन्दस्य, वंश एवाब्धिः स्तत्र जातः बाल एव चन्द्रः । कृशोदरीणां स्त्रीणां । नेत्राण्येव उत्पलानि तेषां । स्मितान्येव चन्द्रिकाः ताभिः । प्रमोद मानन्दं । चरीकरीति स्म पुनः पुनः चकार । कृधातो र्यङ्लुकि 'रीगृदुपधस्य चे' ति सूत्रे 'रीगृत्वत' इति वार्तिकात् रीगागमः । कर्तरि लट् । स्मयोगात् भूतार्थकत्वम् । रूपकालङ्कारः ॥ २ ॥

समाजमध्ये व्रजवल्लरीणां लीलायमानं करपङ्कजेषु ।
दृष्ट्वा व्यगायन्त सुरोत्तमस्य साक्षा दिदं रूप मिति प्रवृद्धाः ॥ ३ ॥

समाजमध्य इति ॥ प्रवृद्धाः वृद्धाङ्गनाः । व्रजवल्लरीणां गोपिकानाम् । समाजमध्ये समूहमध्ये । करपङ्कजेषु; लीलायमानं लीलां कुर्वन्तं; बालं दृष्ट्वा । इदं परिदृश्यमानं, सुरोत्तमस्य विष्णोः, साक्षात् रूपं स्वरूप मिति व्यगायन्त अवादिषुः । विपूर्वकगैधातोः कर्तरि लङ् । अत्र विष्णोः पूर्वावस्थातः वर्णनीय-बालभावावस्थायां न्यूनत्वाधिक्ययो रवर्णनात् अनुभयाभेदरूपकालङ्कारः । तदुक्तम्—विषय्यभेदताद्रूप्यरञ्जनं विषयस्य यत् । रूपकं तत् त्रिधाधिक्यन्यूनत्वानुभयोक्तिभिः ॥ ३ ॥

बालस्य लीला मवलोक्य मोदं प्रपेदिरे बल्लवमुख्यपत्न्यः ।
सायन्तने मञ्जुवचः सुदत्यः घोषेऽस्य सौवर्णनिकेतमध्ये ॥ ४ ॥

बालस्येति ॥ मञ्जूनि वचांसि यासां ताः । सुदत्यः । 'संख्यासुपूर्वस्ये' त्यनुवर्तनात् 'वयसि दन्दस्य दतृ' इति दत्रादेशः । उगित्वात् ङीप् । बल्लव; मुख्यस्य नन्दस्य, पत्न्यः । घोषे स्वस्य सौवर्णनिकेतनस्य मध्ये कनकगृहमध्ये- सायन्तने सायङ्काले । 'सायञ्चिर' मिति ट्युप्रत्ययतुडागमौ । बालस्य श्रीकृष्णस्य लीला मवलोक्य दृष्ट्वा । मोदं सन्तोषं प्रपेदिरे प्रापुः । प्रपूर्वकपदधातोः कर्तरि लिट् ॥ ४ ॥

सायन्तने गोपगृहे सुदत्यः चिरन्तनाङ्गानि सुरक्षितानि ।
कुर्वत्य आशीर्भि रिमाः स्म ताव द्यावन्न दोषो लगति प्रचेरुः ॥ ५ ॥

सायन्तन इति ॥ गोपगृहे नन्दगेहे; सायन्तने सायङ्काले; सुदत्यः गोपिकाः आशीर्भिः । चिरन्तनस्य बालस्य; अङ्गानि सुरक्षितानि कुर्वत्यः इमाः तत्काले विद्यमानाः स्त्रियः, यावत् दोषो न लगति तावत् 'यावत्तावत्पर-भेदे काये मानेऽवधारण' इति विश्वः । 'यावत्तावच्च साकल्येऽवधौ' इत्यमरश्च ।

प्रचेरुः स आश्चर्यम् । सर्वदोषहरे भगवति दोषारोपात् । प्रपूर्वकचरधातोः कर्तरि लिट् । 'अत एकहल्मध्येऽनादेशादे र्लिटि' इति एत्वाभ्यासलोपौ ॥५॥

य ज्जन्मनैवात्र गलत्पयस्सुधा गोप्य श्शिशून् मन्द मपाययन् स्तनम् ।
संवीक्ष्य तेषां मुखपङ्कजानि ता स्संप्राप्तमोदाः कलहंसभाषणैः ॥ ६ ॥

यज्जन्मनेति ॥ अत्र घोषे यस्य श्रीकृष्णस्य जन्मनैव अवतारेणैव हेतुना पय एव सुधा पयस्सुधा; गलन्ती पयस्सुधा यासां ताः; ता गोप्यः तेषां बालानां; मुखानि पङ्कजानीवेत्युपमितसमासः । तानि संवीक्ष्य; कलहंसानां भाषणतुल्यभाषणैः संप्राप्तमोदाः सत्यः; शिशून् स्तनं स्तन्यं मन्दं यथा तथा अपाययन् पाययामासुः । पाधातोः 'शाच्छासाह्वाव्यावेपां युगि' ति णिचि युगागमः । कर्तरि लङ् । इन्द्रवंशावृत्तम् । 'स्या दिन्द्रवंशा ततजै रसंयुतै' रिति लक्षणात् ॥ ६ ॥

तस्मिन् शिशावाहितचित्तगोपी जना न दध्युः पतिगेहसंगान् ।
हंसा इव ब्रह्मणि लग्नचित्ता देहेन्द्रियप्राणगुणान् स्वबुध्दौ ॥७॥

तस्मिन्निति ॥ तस्मिन् प्रसिद्धे शिशौ श्रीकृष्णे । आहितं निहितं चित्तं यै स्ते । गोपीजनाः स्त्रीजनाः । ब्रह्मणि परमात्मनि । लग्नं चित्तं येषां ते हंसाः परमहंसाः । देहश्च इन्द्रियाणि च प्राणाश्च गुणाः देहधर्माः तानिव । पतयश्च गेहश्च तेषां सङ्गान् स्वबुध्दौ अन्तःकरणे न दध्युः नाचिन्तयन् । ध्यै चिन्ताया मिति धातोः कर्तरि लिट् पूर्णोपमालङ्कारः ॥ ७ ॥

अयं सुत स्सर्वजनानुराग मपीच्यरूपः कि मतीव धत्ते ।
इतीश्वरं गोपकुलावतंसं सर्वात्मकं प्राहु रबुध्यमानाः ॥ ८ ॥

अयमिति ॥ गोपकुलस्य गोपवंशस्य अवतंसं उत्तमं भूषणं तं श्रीकृष्णं सर्वात्मकं ईश्वरं अबुध्यमानाः तत्प्रभाव मजानन्त्यः गोप्यः । अपीच्यं सुन्दरं

रूपं यस्य सः। अयं सुतः श्रीकृष्णः सर्वजनानां अनुरागं प्रीतिं अतीव धत्ते, किमेतदिति प्राहुः वदन्ति स्म। ब्रूञ् धातोः कर्तरि लिट्। 'ब्रुवः पञ्चाना' मित्याहादेशः ॥ ८ ॥

गवां पतिः कञ्जदलायताक्षं विश्वस्य हेतुं त मजं पुराणम् ।
फेणु र्जनाः पूर्वकृतेन पुण्यपुञ्जेन केनेति सुतं स लेभे ॥ ९ ॥

गवांपतिरिति। गवां पतिः स नन्दः। कञ्जदले इव आयते अक्षिणी यस्य तं। विश्वस्य प्रपञ्चस्य हेतुं कारणं। पुराणं पुरातनं। अजं जननरहितं तं श्रीकृष्णं। पूर्वजन्मनि कृतेन केन अनिर्वाच्येन पुण्यपुञ्जेन पुण्यसमूहेन; सुतं लेभे प्राप; इति जनाः फेणु रवदन्। फणधातोः कर्तरि लिट्। 'फणां च सप्ताना' मिति एत्वाभ्यासलोपौ ॥ ९ ॥

नन्द स्सदानन्दपयोधिमग्नो यशोदया युक्तमनोहरश्च ।
आपूर्णकामै रभिवर्धमानः कुबेरसम्पत्ति मथाक्षिपत् सः ॥ १० ॥

नन्द इति। अथ जनोक्त्यनन्तरं। सदा आनन्द एव पयोधिः तत्र मग्नः। यशोदया भार्यया; युक्तः; यशोदयाभ्यां च युक्तः। स चासौ मनोहरश्च। आसमन्तात् पूर्णैः कामैः अभिवर्धमानः समृद्धिं भजमानः स नन्दः। कुबेरस्य धनदस्य संपत्तिं आक्षिपत् तिरस्कृतवान्। आङ्-पूर्वकक्षिपुधातोः कर्तरि लङ् ॥ १० ॥

दिने दिने मञ्जुलगोगणानां ददर्श घर्मे पयसां समृद्धिम् ।
सर्वर्तुरम्ये विपिने वनेऽसावुपत्यकायां तृणभूप्रदेशे ॥ ११ ॥

दिने दिन इति। असौ नन्दः। दिने दिने प्रतिदिनं, वीप्सायां द्विर्भावः। सर्वर्तुरम्ये विपिने अटव्यां, वने उपवने उपत्यकायां पर्वतसमीपभूम्यां। 'उपाधिभ्यां त्यकन्नासन्नारूढयो' रिति त्यकन् प्रत्ययः। 'उपत्यकाद्रेरासन्ना भूमि'

रित्यमरः । तृणभूप्रदेशे च विद्यमानानां मञ्जुलगोगणानां पयसां क्षीराणां समृद्धिं घर्मे ग्रीष्मर्तौ । ददर्श । दृशिधातोः कर्तरि लिट् ॥ ११ ॥

तद्गोपिकानां कुचकुङ्कुमात्तमुक्ताफलानां विरराज माला ।
गजोत्तमव्रातविभिन्नगण्डस्थलोद्गलन्मौक्तिकपङ्क्तिकेव ॥ १२ ॥

तद्गोपिकानामिति । तस्य नन्दस्य; गोपिकानां स्त्रीणां । कुचकुङ्कुमेन आत्तानां व्याप्तानां मुक्ताफलानां । माला हारः । गजोत्तमानां व्रातानां समूहानां विभिन्नेभ्यः गण्डस्थलेभ्यः उद्गलन्मौक्तिकानां पंक्तिकेव विरराज । विपूर्वकराजृधातोः कर्तरि लिट् । धर्मलुप्तोपमालङ्कारः ॥ १२ ॥

तद्वल्लवीसुन्दरपादसक्तसुहीरमञ्जीरवरालि मेव ।
मेने जनो मानसपङ्कजस्य हंसावलिं श्वेततनूरुहाढ्याम् ॥ १३ ॥

तद्वल्लवीति । जनः तस्य नन्दस्य वल्लवीनां स्त्रीणां; सुन्दरपादेषु सक्तानां सुहीरयुतानां वज्रखचितानां मञ्जीरवराणां नूपुरश्रेष्ठानां आलिं पङ्क्तिं । श्वेततनूरुहै राढ्यां मानससरःस्थितपङ्कजस्य हंसावलि मेव मेने अमन्यत । मनुधातोः कर्तरि लिट् । भ्रान्तिमदलङ्कारः ॥ १३ ॥

कोकूयते तत्र वने प्रभातमुखे द्विजाली रुचिरं प्रबुद्धा ।
नन्दस्य वन्दित्व मुपासितुं किं सुतस्य मन्दस्वरगान शीला ॥१४॥

कोकूयत इति । तत्र घोषे वने व्यधिकरणसप्तमी । प्रभातमुखे उषःकाले । प्रबुद्धा मन्दस्वराणां गानं शीलं स्वभावो यस्या स्सा । द्विजालिः पक्षिपङ्क्तिः । नन्दस्य सुतस्य श्रीकृष्णस्य, व्यधिकरणषष्ठी । वन्दित्वं वन्दिभावं उपासितुं प्राप्तुं रुचिरं मनोज्ञं यथा भवति तथा, कोकूयते पुनः पुनः कूजति किं ? अभ्यस्यती त्यर्थः । कुधातोः यङन्तात् कर्तरि लट् । 'नकवते' रिति चुत्वनिषेधः । अत्र प्रभातकालीनद्विजालिकूजनस्य नन्दसुतवन्दित्वप्राप्ति रसिद्धैव फलत्वेनोत्प्रेक्ष्यत इति असिद्धफलोत्प्रेक्षालङ्कारः ॥ १४ ॥

चोकूयमानेषु कपोतवर्ययोषित्कुलेषूत्तमसौधमध्ये ।
नीडेषु षिद्गै ररमन्त रामाः समं मुदा मन्दमनङ्गधूताः ॥ १५ ॥

चोकूयमानेष्विति । उत्तमसौधमध्ये नीडेषु कुलायेषु । 'कुलायो नीड मस्त्रिया' मित्यमरः । कपोतवर्याणां योषित्कुलेषु भार्यासमूहेषु चोकूयमानेषु सत्सु अतिशयेन कूजत्सु सत्सु । 'न कवते र्यङ्' इति, चुत्वनिषेधः कवते रेव । कौति कुवत्यो स्तु चुत्वं भवत्येव । अनङ्गेन मन्मथेन । धूताः कंपिताः । रामाः स्त्रियः । षिद्गैः समं विटैः सह । 'षिद्गः पल्लविको विटः' इत्यमरः । मुदा सन्तोषेण । मन्दं यथा तथा । अरमन्त क्रीडितवत्यः । रमुधातोः कर्तरि लङ् ॥ १५ ॥

कोकूयतेऽस्मिन् परपुष्टसंघः पान्थां स्तथा तत्र खरांशुतप्तान् ।
मार्गान्तरश्रान्तिगदापनुत्यै विश्रम्यता मित्यवद न्निवोच्चैः ॥१६॥

कोकूयत इति । अस्मिन् वने परपुष्टानां कोकिलानां संघः तदा तस्मिन् काले खरांशुतप्तान् आतपतप्तान् पान्थान् प्रति मार्गान्तरे मार्गमध्ये जातश्रान्ति-गदापनुत्यै श्रान्तिरूपरोगनाशाय । 'रोगव्याधिगदामयाः' इत्यमरः । अद्य तत्र वने विश्रम्यतां स्थीयता मिति उच्चै र्वदन् इव कोकूयते पुनः पुनः कूजति । कुधातो र्यङन्तात् कर्तरि लट् । अत्र कोकिलकूजने पथिकाह्वानत्वोत्प्रेक्षणात् उक्तवस्तूत्प्रेक्षालङ्कारः ॥ १६ ॥

कैलासवासस्य गिरिं जना स्तु हिमं च सर्वत्र न मेनिरे किम् ।
दिदृक्षया तस्य समीपदेशे वस्तुं नियुक्तं गिरिराजपुत्र्या ॥ १७ ॥

कैलासेति । जनाः सर्वत्र घोषसमीपभूमिषु स्थितं हिमं तुहिनं तस्य श्री-कृष्णस्य दिदृक्षया । कर्मणि षष्ठी । दृशिर् धातोः सन्नन्तादप्रत्ययः । समीपदेशे वस्तुं वासाय; गिरिराजपुत्र्या पार्वत्या चकारेण शिव स्समुच्चीयते । नियुक्तं आज्ञप्तं; कैलासवासस्य शिवस्य गिरिं कैलासं न मेनिरे किं? मेनिर एवेत्यर्थः ।

मनुधातोः कर्तरि लिट् । अत्र धावल्यरूपान्यधर्मसंबन्धेन निमित्तेन हिमे कैलासगिरितादात्म्योत्प्रेक्षणात् उक्तवस्तूत्प्रेक्षालङ्कारः ॥ १७ ॥

चञ्चूर्यते तत्र गजालि राशु संसेवितुं विष्णु महर्दिवं किम् ।
बालं सुनाशीरसहोदरं तं घोषान्तिके नूतननीरदाभा ॥ १८ ॥

चञ्चूर्यत इति । तत्र वने घोषान्तिके घोषसमीपे नूतननीरदानां नवमेघानां आभेवाभा यस्या स्सा गजालि र्मातङ्गपङ्क्तिः । अहर्दिवं प्रत्यहं; 'अचतुरे' त्यादिना साधुः । सुनाशीरस्य इन्द्रस्य; 'वृद्धश्रवा स्सुनाशीर' इत्यमरः । सहोदरं भ्रातरं तं बालं बालरूपं विष्णु आशु संसेवितुं चञ्चूर्यते किं? पुनः पुनः चरति किं? चरधातोः यङि 'सन्यङो' रिति द्वित्वे, 'चरफलोश्चे' त्यभ्यासस्य नुकि, 'उत्परस्यात' इत्युत्वे, 'हलि चे' ति दीर्घे कर्तरि लट् । अत्र वनगजानां घोषसमीपे याद‍ृच्छिकसंचारस्य असिद्धैव भगवत्सेवा फलत्वेनोत्प्रेक्ष्यत इति असिद्धफलोत्प्रेक्षालङ्कारः । इन्द्रवज्रावृत्तम् ॥ १८ ॥

झडित्यसौ द्रष्टुमनाः कुमार माराम्बुजाक्षं सुकुमारमारम् ।
उमासुतः केकिरथः प्रकामं गेहं व्रजेशस्य रमालयं तम् ॥ १९ ॥

झडितीति । सुकुमार श्चासौ मार श्चेति कर्मधारयः । त मम्बुजाक्षं कुमारं श्रीकृष्णं झडिति द्रष्टुं मनो यस्य सः । केकिरथो मयूरवाहनः असौ उमासुनः कुमारस्वामी प्रकामं रमालयं भगवत्सान्निध्या दिति भावः । व्रजेशस्य नन्दस्य गेहं आर प्राप । ऋधातोः कर्तरि लिट् ॥ १९ ॥

संद्रष्टुकामस्य गुहस्य केकी नरीनृतीति स्फुटपीतवस्त्रम् ।
आलक्ष्य बालं धृतनीलमूर्तिं सविद्युदानीलपयोदबुद्ध्या ॥ २० ॥

संद्रष्टुकामस्येति । सम्यक् द्रष्टुकामस्य गुहस्य केकी मयूरः स्फुटं पीतवस्त्रं यस्य तं; धृता नीलमूर्तिः यस्य तं; बालं श्रीकृष्ण मालक्ष्य दृष्ट्वा; विद्युत्सहितः सविद्युत्; आसमन्तात् नीलः पयोदः मेघ इति बुद्ध्या भ्रान्त्या नरी-

नृतीति पुनः पुनः नृत्यति । नृतीधातोर्यङ्लुकि 'रीगृदुपधस्ये' ति रीगागमे सनादिधातुत्वे लटि 'यङोवे' ति ईडागमः । भ्रान्तिमदलङ्कारः ॥ २० ॥

विनायको मूषकवाहनोऽयं लम्बोदरो मोदकभक्षणेन ।
व्रजं समागम्य रमेश माद्यं ददर्श बालं सुखदं सखीनाम् ॥ २१ ॥

विनायक इति । मोदकानां भक्षणेन लम्बमान मुदरं यस्य सः । मूषको वाहनं यस्य सः । अयं विनायकः । व्रजं घोषं समागम्य संप्राप्य रमेशं आदौ भवं सृष्टेः पूर्वं विद्यमान मित्यर्थः । दर्शनमात्रेण सखीनां सुखदं बालं श्रीकृष्णं ददर्श । दृशिर् धातोः कर्तरि लिट् ॥ २१ ॥

बालं शयानं शरदिन्दुवक्त्रं विलासिनीनां विविधोक्तिगानम् ।
डोलान्तरे पन्नगभोगतुल्ये माता मुहु स्तं कलयाञ्चकार ॥ २२ ॥

बालमिति । माता यशोदा पन्नगस्य आदिशेषस्य भोगो देहः । 'भोग स्सुखे स्त्र्यादिभृतावहेश्च फणकाययो' रित्यमरः । तत्तुल्ये डोलान्तरे प्रेङ्ख-मध्ये शयानं, शरदिन्दु रिव वक्त्रं यस्य तं; बालं विलासिनीनां स्त्रीणां विविधोक्तिरूपं गानं यथा तथा । मुहुः कलयाञ्चकार क्रीडयाञ्चकार । कलधातो र्णिचि लिटि 'कासू प्रत्यया' दित्यामि 'कृञ्चानुप्रयुज्यत' इत्यनुप्रयोगः । धर्मलुप्तोपमालङ्कारः ॥ २२ ॥

क्रीडासु बालस्य सुदत्तदृष्ट्या गोपस्य पत्नी मुद मुद्वहन्ती ।
योगी समाधा विव लब्धलक्ष्यो मुक्तो मुनि स्सा विरराम रामा ॥२३॥

क्रीडास्विति । बालस्य क्रीडासु सुष्ठु दत्तदृष्ट्या मुद मुद्वहन्ती । 'शप् श्यनो र्नित्य' मिति नुमागमः । तोष मनुभवन्ती गोपस्य नन्दस्य पत्नी । सा रामा यशोदा । योगी अष्टाङ्गयोगनिरतः । समाधौ लब्धं लक्ष्यं येन सः । अत एव मुक्तः जीवन्मुक्तः । मुनिरिव विरराम तूष्णीं बभूव । विपूर्वक रमुधातोः कर्तरि लिट् । 'व्याङ्परिभ्यो रम' इति परस्मैपदम् । पूर्णोपमालङ्कारः । इन्द्रवज्रावृत्तम् ॥ २३ ॥

अथ श्लोकत्रयेण श्रीकृष्णं प्रति पूतनाप्रेषण माह—

कंसो नृशंसः कृतकिल्बिषोऽपि ज्ञात्वा हरिं गोपवधूकिशोरम् ।
जगाद दुर्बुद्धि रयं प्रधानबलिं हरेः कुत्सितपूतनां ताम् ॥ २४ ॥

कंस इति । दुष्टा बुद्धि र्यस्य सः । अयं नृशंसः घातुकः कंसः । कृतकिल्बिषः । शिशुहननार्थं भटप्रेषणाद्यनेकप्रयत्नेन हरिं, गोपवध्वाः यशोदायाः किशोरं बालं ज्ञात्वा हरेः श्रीकृष्णस्य प्रधानबलिं आदिबलिरूपां तां कुत्सितपूतनां पूतनानामिकां राक्षसीं जगाद उवाच । गदधातोः कर्तरि लिट् ॥ २४ ॥

कंसोक्तिप्रकार मेवाह—

अयेऽधुना याहि जवा द्रुदन्तं शिशुं व्रजं तं तव पायया्शु ।
स्तन्यं विषेणात्त मितीष्टवाचं कंसोऽध्यवादीत् किल कालवश्यः ॥२५॥

अय इति । अये हे पूतने! अधुनाऽद्य; व्रजं नन्दघोषं; जवात् याहि । रुदन्तं तं शिशुं श्रीकुष्णं विषेणात्तं व्याप्तं तव स्तन्यं आशु पायय इति कालस्य यमस्य वश्यः वशंगतः । 'वशंगत' इति यत्प्रत्ययः । कंसः इष्टवाच मध्यवादीत् उवाच । किल आश्चर्यम् । अधिपूर्वकवदधातोः कर्तरि लुङि 'वदव्रजे' ति वृद्धिः ॥ २५ ॥

तथा सती सुन्दरभूषितेव साक्षात् शची रूपितयेव यक्षी ।
समुद्यतानन्दभुवं कुयोगिचेष्टेव गम्यं शनकै रिवाप्तुम् ॥ २६ ॥

तथेति । तथा कंसोक्तिप्रकारेण सुन्दरं यथा तथा भूषिता; साक्षा च्छचीव इन्द्राणीव रूपितया रूपवत्तया यक्षीव स्थिता, असती पूतना, गम्यं प्राप्यं ब्रह्म कुयोगिचेष्टेव नन्दभुवं श्रीकृष्णं घोषं च अवाप्तुं प्राप्तुं शनकै स्समुद्यता प्रवृत्ता । पूर्णोपमालङ्कारः ॥ २६ ॥

अथ श्लोकत्रयेण पूतनायाः नन्दगृहप्रवेश माह —

पन्थान माप्तुं परिबन्धहानं मुक्ते स्सदानन्दभुवं पदं हि ।
चिराय यत्नेन सुदुर्लभं सा योगीव योगोत्तम माप तर्हि ॥ २७ ॥

पन्थानमिति । तर्हि तदा; सा पूतना; चिराय बहुकालेन; यत्नेन प्रयत्नेन; सुदुर्लभं प्राप्तु मशक्यं; सदा परितः बन्धस्य कारागृहनिबन्धस्य हानि र्यस्मा त्तं; अन्यत्र परिबन्धस्य संसारस्य हानिः यस्मा त्तत्; मुक्तेः आपद्विमुक्तेः; पदं हेतुभूतं; अन्यत्र मुक्तेः मोक्षस्य पदं स्थानं नन्दभुवं श्रीकृष्ण माप्तुं प्राप्तुं; अन्यत्र आनन्दभुवं आनन्दभूमिं भगवन्तं आप्तुं योगी योगोत्तम मिव पन्थानं मार्गं आप प्राप हिः प्रसिद्धौ । आप्लृधातोः कर्तरि लिट् । पूर्णोपमालङ्कारः । प्रकृतस्य श्रीकृष्णस्य अप्रकृतेन भगवता सह वर्णनात् प्रकृताप्रकृतश्लेषः । तस्योपमाया मुपकारकत्वा त्तयो रङ्गाङ्गिभावेन सङ्करः ॥ २७ ॥

ऐक्षिष्ट तद्घोषसुपर्ववृक्षे प्राप्यं चिरेणेप्सित मञ्जसाऽसौ ।
गोगोपरामाकुलकीरसंघजुष्टप्रभुस्थानफलं मनोज्ञम् ॥ २८ ॥

ऐक्षिष्टेति ॥ असौ पूतना । तस्य नन्दस्य घोष एव सुपर्ववृक्षः कल्पवृक्षः तस्मिन्, प्राप्यं आप्तुं योग्यं चिरेणेप्सितं द्रष्टु मभिलषितं मनोज्ञं गोगोपरामाणां कुलं संघः स एव कीरसंघः तेन जुष्टं सेवितं, प्रभोः नन्दस्य स्थानफलं गृहरूपफलं अंजसा ऐक्षिष्ट ददर्श । ईक्षधातोः कर्तरि लुङ् । अत्र कल्पवृक्षस्य पूर्वावस्थातः वर्णनीयघोषे भावावस्थायां न्यूनत्वाधिक्ययो रवर्णनात् अनुभयाभेदरूपकालङ्कारः । इन्द्रवज्रावृत्तम् ॥ २८ ॥

गलत्पयःपीनपयोधराभ्यां दिवोऽवतीर्णामरसुन्दरीव ।
अवीविश त्सद्म सुतस्य गोप्या मुखेन्दुना ध्वान्त मधिक्षिपन्ती ॥२९॥

गलदिति ॥ गलन्ति पयांसि याभ्यां ताभ्यां पीनपयोधराभ्यां; उपलक्षिता; दिवः स्वर्गात् अवतीर्णा आगता अमरसुन्दरीव स्थिता; मुखेन्दुना ध्वान्तं तमः अधिक्षिपन्ती तिरस्कुर्वन्ती 'आच्छीनद्यो' रिति नुम् । पूतनेति शेषः । गोप्याः यशोदायाः । सुतस्य श्रीकृष्णस्य; सद्म गृहं अवीविशत्

विवेश । विशधातो र्णिचि सनादिधातुत्वे कर्तरि लुङि 'च्लिलुङि' ति च्लिप्रत्यये 'णिश्रिद्रुस्रुभ्यः' इति च्ले । श्चङिति द्वित्वे 'सन्वल्लघुनि' सन्वद्भावे, 'दीर्घो लघो' रित्यभ्यासदीर्घः । उपेन्द्रवज्रावृत्तम् । उक्तवस्तूत्प्रेक्षालङ्कारः ॥२९॥

अथ विंशतिश्लोकैः पूतनावधरूपलीला वर्ण्यते—

दृष्ट्वा स्त्रियः सम्य गभूतपूर्वां सुहासनासास्यविराजमानाम् ।
निश्शङ्क मङ्कं स्वय मागतां तां सुविस्मिताः चित्रनिभा बभूवुः ॥३०॥

दृष्ट्वेति ॥ स्त्रियो गोप्यः; पूर्वं भूता भूतपूर्वा, न भूतपूर्वा अभूतपूर्वा तां । 'भूतपूर्वे चर डि' ति निर्देशा त्पूर्वनिपातः । शोभने हासनासे यस्य तेन आस्येन विराजमानां । निश्शङ्कं यथा तथा अङ्कं समीपं; 'अङ्कं चिह्न-समीपयो' रिति मेदिनी, 'अङ्कं समीप उत्संग' इति केशवः । स्वयमेवागतां तां पूतनां सम्यक् दृष्ट्वा सु विस्मिताः अत एव चित्रनिभाः चित्रार्पितप्रतिमा सदृशाः; 'आलेख्याश्चर्ययो श्चित्र' मित्यमरः । बभूवुः । भूधातोः कर्तरि लिट् ॥३०॥

विस्मापयामासु रतीव तन्व्यः माधुर्यवैदग्ध्यविवर्धिनीभिः ।
वाग्भि र्वैराभि र्जनितातिमूर्च्छा समं तया भाषितु मक्षमा श्च ॥३१॥

विस्मापयामासुरिति ॥ तयेत्यत्र तस्या इति विभक्तिविपरिणामः । तस्याः पूतनायाः माधुर्यैः वैदग्ध्यैः चातुर्यैः विवर्धिनीभिः विवर्धमानाभिः वाग्भिः जनिता अतिमूर्छा मोहो यासां ताः । तन्व्यो गोप्यः । तया पूतनया संभाषितुं वक्तु मपि अक्षमाः असमर्थाः सत्यः । आत्मान मिति शेषः । अतीव विस्मापया-मासुः विस्मापितवत्यः । विपूर्वकस्मिङ्धातोः णिचि 'नित्यं स्मयते' रित्यात्वे 'अर्तिह्री' त्यादिना पुकि 'कास्प्रत्यया' दित्यामि 'कृञ्चानुप्रयुज्यत' इत्यनु-प्रयोगः । कर्तरि लिट् ॥३१॥

आगत्य बालं निकषा सुयोषा विषादहर्त्रीव निविश्य तत्र ।
शिशुं यशोदे तव लोचनं मे द्रष्टुं समाकर्षति सेत्युवाच ॥३२॥

आगत्येति ॥ सुघोषा सा पूतना । बालं निकषा बालस्य समीपे; 'अभितः परितः समया निकषे' ति द्वितीया। आगत्य एत्य विषादस्य खेदस्य हन्त्रीव तत्र निविश्य स्थित्वा; हे यशोदे तव शिशुं द्रष्टुं मे लोचनं; मामिति शेषः। समाकर्षति इति उवाच। वचधातोः कर्तरि लिट् ॥ ३२ ॥

चिराय साफल्यमितो विचक्षणे सुचक्षुषी मे तव बाललोकनात्।
ईदृक्सुतावाप्ति रथोत्तरायते भवादृशीनां किल मादृशां भुवि ॥३३॥

चिरायेति ॥ हे विचक्षणे यशोदे। मे सुचक्षुषी तव बालस्य लोकनात् चिराय बहुकालस्य साफल्य मितः प्राप्नुतः। इण् धातोः कर्तरि लट्। भवादृशीनां; 'आ सर्वनाम्ना मि' त्याकारः। त्वादृशीनां ईदृक् सुतावाप्तिः। अथ अनन्तरमपि भुवि मादृशीनां; 'त्वमा वेकवचने' इति मादेशे 'आ सर्वनाम्न' इत्याकारः। उत्तरायते किल श्रेष्ठव दाचरति। 'उपमाना दाचारे' 'कर्तुः क्यङ् सलोपश्चे' ति क्यङ् ॥ ३३ ॥

शिशुं नवं पर्वणि पूर्ण मिन्दुं स्मरं ह्यकस्मा दपि न स्मरामि।
दृष्ट्वा च कान्त्या कलया गुणाढ्ये वचश्श्रिणा वाक्पतिवृत्रशत्रू ॥३४॥

शिशुमिति ॥ हे गुणाढ्ये यशोदे! कान्त्या कलया वचश्च श्रीश्च तयोः समाहारः वचःश्रि तेन वचश्श्रिणा च उपलक्षितं शिशुं दृष्ट्वा, अकस्मा दपि अवशा दपि स्मरं मन्मथं; पर्वणि पूर्ण मिन्दुं वाक्पतिः बृहस्पतिश्च वृत्रशत्रु रिन्द्रश्च तौ च न स्मरामि। स्मृधातोः कर्तरि लट्। अत्र श्रीकृष्णः कान्त्यादि-गुणैः स्मरादिभ्योऽप्यधिक इति व्यतिरेको व्यज्यते। यथासंख्यालङ्कारश्च। तदुक्तं—यथासंख्यं क्रमेणैव क्रमिकाणां समन्वयः इति ॥ ३४ ॥

तृप्तिं गताहं गुणदेवते ते गुणै र्वरै रुत्तमगानयोग्यैः।
अनन्यसाधारणकै र्विशुद्धैः पीयूषधारां मनसा न चक्षे ॥ ३५ ॥

तृप्तिमिति ॥ हे गुणानां देवते श्रेष्ठे यशोदे। उत्तमानां गानयोग्यैः। वरैः। अन्येषां साधारणाः न भवन्तीति अनन्यसाधारणकाः तैः। विशुद्धैः

परिशुद्धैः ते तव गुणैः, तृप्तिं गता अहं पीयूषधारां अमृतधारां 'पीयूष ममृतं सुधे' त्यमरः। मनसा न चक्षे न स्मरामि। चक्षिङ्धातोः कर्तरि लट्। अत्रापि व्यतिरेको व्यज्यते ॥ ३५॥

सुप्रीति माधास्यति का सुतातः कुमारसन्दर्शनलालसायाः।
सुरद्रुमोऽप्यन्य दभीष्टदाना त्किं वा प्रजानां विदधाति देवि ॥३६॥

सुप्रीतिमिति ॥ हे देवि यशोदे। कुमारस्य संदर्शने लालसाया उत्सुकायाः मे धात्र्याः। अतः कुमारसंदर्शना दन्या मधिका मिति शेषः। कां सुप्रीति माधास्यति करिष्यति ? न कामपीत्यर्थः। उताश्चर्ये। सुरद्रुमः कल्पतरु रपि अभीष्टदाना दन्यत् 'अन्यारादि' त्यादिना पञ्चमी। प्रजानां किं वा विदधाति ? न किमपीत्यर्थः। विपूर्वकधाधातोः कर्तरि लट्। 'श्लौ' विति द्वित्वम्। अत्र कुमारसंदर्शनप्रीतिप्रदात्रीत्व मेव, अभीष्टदानप्रदाता सुरद्रुम एवेति बिम्बप्रतिबिम्बभाववर्णनात् दृष्टान्तालङ्कारः। तदुक्तं—'चेद् बिम्बप्रतिबिम्बत्वं दृष्टान्त स्तदलंकृतिः' इति। बिम्बप्रतिबिम्बभावो नाम वस्तुतः भिन्नयोः परस्परसादृश्या दभिन्नयोः पृथगुपादानं बिम्बप्रतिबिम्बभाव इति आलङ्कारिकाणां समयः ॥ ३६॥

अस्या विमायां न विजानती सा डिंभं निधायाशु सती यशोदा।
तदा समीपे कमनीयगात्र मतीव विश्वस्तमति श्चचार ॥ ३७॥

अस्या इति ॥ तदा तस्मिन् समये, अस्याः पूतनायाः; विमायां न विजानती सती, साध्वी सा यशोदा; समीपे पूतनासमीपे कमनीयं मनोज्ञं गात्रं यस्य तं; डिंभं शिशुं 'पोतः पाकोऽर्भको डिंभः' इत्यमरः। निधाय अतीव विश्वस्ता मतिः यस्याः। तथाभूता सती। आशु चचार। चरधातोः कर्तरि लिट् ॥ ३७॥

सायंतने लालितबालका स्ताः स्त्रियः प्रसादं गमनाय देवीम्।
आराध्य जग्मुः परमात्तकामाः गृहान् मुदा माधववादचित्ताः ॥३८॥

सायंतन इति ॥ सायंतने सायंकाले । लालितो बालकः याभि स्ताः । अत एव परं आत्तः कामो याभि स्ताः । माधवस्य वादे कथायां चित्तं यासां ताः स्त्रियः गोप्यः । देवीं यशोदां । गमनाय प्रसादं आज्ञां आराध्य याचित्वा, मुदा गृहान् जग्मुः ययुः । गम्लृधातोः कर्तरि लिट् ॥ ३८ ॥

छिद्रं तदानीं समवेक्ष्य दुष्टा सोन्निद्रकञ्जाक्ष मलक्ष्यशक्तिम् ।
हस्ते विधायाशु पयोधरान्तं मुखे न्यधा दात्तविषं कुधात्री ॥३९॥

छिद्र मिति ॥ दुष्टा सा कुधात्री पूतना तदानीं "तदो दाचे" ति दानीं प्रत्ययः । छिद्रं समयविशेषं समवेक्ष्य ज्ञात्वा उन्निद्रे विकसिते कञ्जे इवाक्षिणी यस्य तं; अलक्ष्या शक्तिः यस्य तं; अनेन पूतनाहननसामर्थ्यं सूच्यते । हस्ते विधाय कृत्वा । आत्तं विषं यस्मिन् तं, पयोधरान्तं चूचुकं शिशोः मुखे न्यधात् निदधौ । निपूर्वकधाधातोः कर्तरि लुङ् । 'गातिस्थे' ति सिचो लुक्॥ ३९॥

समागता हन्तु ममुं कुमारं प्रदाय दुग्धं सविषं विमूढा ।
बभूव धात्री खलपूतना सा गृहीतजीवा पयसाऽमुनैव ॥ ४० ॥

समागतेति ॥ सविषं विषयुक्तं दुग्धं स्तन्यं प्रदाय; अमुं कुमारं बालं हन्तुं समागता । अत एव विमूढा मन्दा । सा धात्री खला दुष्टा पूतनानामिका राक्षसी । अमुना कुमारेणैव पयसा स्तन्येन सह गृहीतो जीवः यस्या स्तथा भूता बभूव । भूधातोः कर्तरि लिट् । अत्र कुमारहननरूपेष्टार्थसमुद्यमात न केवलं तदभावप्राप्तिः । स्वनाशरूपानिष्टप्राप्तिश्चेति वर्णनात् विषमालङ्कारः । तदुक्तं —'अनिष्टस्या प्यवाप्तिश्च तदिष्टार्थसमुद्यमात्' इति । उपेन्द्रवज्रावृत्तम् ॥४०॥

क्षणेन पीनस्तनचक्रवाकमुखा त्पयःपानपरम्पराभिः ।
असा वसू नाशु जहार तस्या स्तदांशुमालीव करैर्जलानि ॥ ४१ ॥

क्षणेनेति ॥ तदा असौ श्रीकृष्णः । स्तन श्चक्रवाक इवेत्युपमितसमासः । पीनस्तनचक्रवाकस्य मुखात् चूचुकात् क्षणेन पयसः स्तन्यस्य पानपरंपराभिः ।

तस्याः पूतनायाः असून् प्राणान्। 'पुंसि भूम्न्यसवः प्राणा' इत्यमरः। अंशुमाली सूर्यः करैः किरणैः। जलानीव आशु जहार हृतवान्। हृञ्धातोः कर्तरि लिट्। पूर्णोपमालङ्कारः। उपेन्द्रवज्रावृत्तम् ॥ ४१ ॥

प्रयातजीवा मकरो त्स योषां स्वरूपसंस्था मवलम्बमानाम्।
दन्तोष्ठनेत्रेण विरूपभाजं प्रसारिबाहूरुशिरोजभीषाम् ॥ ४२ ॥

प्रयातजीवा मिति ॥ सः श्रीकृष्णः स्वस्य रूपं स्वरूपं राक्षसीरूपं, 'रूपं स्वभावे सौन्दर्ये .... आकारश्लोकयो रपी' ति विश्वः। तस्य संस्थां स्थितिं अवलम्बमानां प्राप्तां; अत एव दन्ताश्च ओष्ठौ च नेत्रे च दन्तोष्ठनेत्रं; प्राण्यङ्गत्वा देकवद्भावः। तेन विरूपं विकाररूपं भजतीति तथोक्ताम्। प्रसारिभिः बाहूरुशिरोजैः भीषयतीति तथोक्तां योषां पूतनां; प्रयातो जीवः यस्या स्तां गतप्राणा मित्यर्थः। अकरोत् चकार। कृञ्धातोः कर्तरि लङ् ॥ ४२ ॥

पपात धात्री समुदग्रवृक्षः क्षणेन बालप्रलयानिलेन।
प्रसार्य बाहूरुविशालशाखा भूमौ हतो भीषणनादयुक्तः ॥ ४३ ॥

पपातेति ॥ धात्र्येव समुदग्रवृक्षः उन्नततरुः। क्षणेन क्षणकालेन। बाल एव प्रलयानिलः तेन हतः पीडितस्सन्। बाहूर्वेव विशालशाखाः ताः प्रसार्य भीषणेन नादेन युक्तः। भूमौ पपात। पतॢधातोः कर्तरि लिट्। अनुभया भेदरूपकालङ्कारः। तदुक्तं—'विषय्यभेदताद्रूप्यरञ्जनं विषयस्य यत् रूपकं त' दिति ॥ ४३ ॥

शिश्ये शिशु र्लम्बपयोधरान्त श्चलद्वराम्भोरुहपाणिपादः।
कलेबरे व्यात्तमुखे रुदन् सन् जितारि रत्यन्तभयङ्करेऽत्र ॥४४॥

शिश्य इति ॥ चलत् वराम्भोरुह मिव पाणिपादं यस्य सः। जिताः अरयः शत्रवः येन सः शिशुः श्रीकृष्णः। व्यात्तं मुखं यस्य तस्मिन्। अत्यन्त-भयङ्करे; अत्र तस्मिन् कलेबरे; लम्बमानयोः पयोधरयोः स्तनयोः अन्तः मध्ये। रुदन् सन् शिश्ये शेते स्म। शीङ्धातोः कर्तरि लिट् ॥ ४४ ॥

नादं निशम्याशनिपातकल्पं माता गृहासक्तयशोदयाऽऽशु ।
ससंभ्रमं विश्लथकेशपाशाः स्त्रियः कुमारं परिवव्रु रेनम् ॥ ४५ ॥

नाद मिति ॥ तदा मात्रा गृहासक्तयशोदया गृहकार्यसक्तया यशोदया सह स्त्रियः गोप्यः । अशनिपातेन कल्पं तुल्यं नादं निशम्य श्रुत्वा । विश्लथाः शिथिलाः केशपाशाः कबरा यासां ताः तथाभूताः सत्यः । ससंभ्रमं यथा तथा एनं कुमारं आशु परिवव्रुः परिवृतवत्यः । परिपूर्वकवृञ्धातोः कर्तरि लिट् । ॥४५॥

चल न्नयं वक्षसि पूतनायाः दंष्ट्राप्रभाभि र्धवलीकृतोऽपि ।
भीताङ्गनाव्याकुलदृष्टिपातैः पुनः प्रपेदे सुषमां स्वकीयाम् ॥ ४६ ॥

चल न्निति ॥ पूतनाया वक्षसि चलन् अयं श्रीकृष्णः, दंष्ट्राणां तदीयदन्तविशेषाणां प्रभाभिः कान्तिभिः धवलीकृतोऽपि । भीताना मङ्गनानां गोपीनां व्याकुलैः चञ्चलै र्दृष्टिपातैः पुनः स्वकीयां सुषमां कान्तिं प्रपेदे प्राप । पदधातोः कर्तरि लिट् । अत्र दंष्ट्राकान्तिभिः धवलीकृतस्य पुनः स्वकान्तिप्राप्तिवर्णनात् पूर्वरूपालङ्कारः । तदुक्तं — 'पुनः स्वगुणसंप्राप्तिः पूर्वरूपमुदाहृतम्' इति ॥ ४६ ॥

दिष्ट्या ह्यवस्थेय मकारि घोरं पैशाचरूपं पद मापदां वा ।
हेतुं यशोदे तव सूनु मत्र जानीम इत्याहु रिमाः स्म गोप्यः ॥४७॥

दिष्टचेति ॥ इय मवस्था दिष्ट्या दैवेन अकारि कृता । आपदां पदं स्थानं पैशाचरूपं घोरं भयंकरं हि । वा अथवा, हे यशोदे अत्र कार्ये तव सूनुं श्रीकृष्णं हेतुं कारणं जानीमः । इति इमाः तत्र गोप्यः आहुः स्म अब्रुवन् । ब्रूञ्धातोः कर्तरि लट् । 'ब्रुवः पञ्चाना' मित्याहादेशः । स्मयोगात् भूतार्थत्वम् । अत्र दिष्टयाकारीति स्वयमुक्तस्य मनसा विचार्य अथवा तव सूनुं हेतुं जानीम इति प्रतिषेधसूचनात् आक्षेपालङ्कारः । तदुक्तं — 'आक्षेपः स्वय मुक्तस्य प्रतिषेधो विचारणात्' । इन्द्रवज्रावृत्तम् ॥ ४७ ॥

शिशुं प्रगृह्याशु कथंचि दस्माद् गोप्यै ददु र्धीरतरा श्चिरेण ।
संप्राप्य हस्ते तनयं विसंज्ञा बभूव यत्नेन सुलब्धसंज्ञया ॥ ४८ ॥

शिशुमिति ॥ धीरतरा अतिधैर्यवत्यः गोप्यः चिरेण कालविलम्बेन कथंचि दतिप्रयासेन; शिशुं श्रीकृष्णं; अस्मात् पूतनादेहात् प्रगृह्य गोप्यै यशोदायै आशु ददुः । विगता संज्ञा यस्या स्सा यशोदा हस्ते तनयं संप्राप्य; यत्नेन प्रयत्नेन । सुलब्धा संज्ञा यया तथाभूता बभूव । भूधातोः कर्तरि लिट् ॥ ४८ ॥

संप्राप्तपुत्रा मुद माप नन्दभार्येव संप्राप्तनिधि र्धनार्थी ।
कुमुद्वती प्राप्तविधूदयेव पद्मावली प्राप्तदिवाकरेव ॥ ४९ ॥

संप्राप्तेति ॥ संप्राप्तः पुत्रो यया सा नन्दभार्या । प्राप्तो निधिः येन सः धनार्थीव । 'अर्था च्चासन्निहित' इति इनिप्रत्ययः । प्राप्तः विधूदयः यया सा कुमुद्वतीव । प्राप्तो दिवाकरः यथा सा पद्मावलीव मुद माप प्राप । आप्लृ-धातोः कर्तरि लिट् । मालोपमालङ्कारः ॥ ४९ ॥

तत्रान्तरे प्राप्य पुरीं व्रजेशः कंसाय देयं कर मब्दक्लृप्तम् ।
प्रदाय रम्यं वसुदेवगेहं ययौ तदाऽऽभाषणलोलचित्तः ॥ ५० ॥

तत्रेति ॥ तत्रान्तरे तस्मिन् समये । व्रजेशो नन्दः पुरीं मधुरां; प्राप्य गत्वा अब्दमभिव्याप्य । क्लृप्तं निर्णीतं देयं करं बलिं 'बलिहस्तांशवः करा' इत्यमरः । कंसाय प्रदाय दत्वा । तेन वसुदेवेन । आभाषणे संभाषणे लोलं चित्तं यस्य तथाभूत स्सन् । रम्यं मनोज्ञं; वसुदेवस्य गेहं ययौ । याधातोः कर्तरि लिट् ॥ ५० ॥

स्नेहा त्समालिंग्य पतिं पशूना मनामयं तस्य सुतस्य पृष्ट्वा ।
गत्वा व्रजं वत्सप वत्स माशु व्याघ्रीभया त्पाहि स इत्युवाच ॥ ५१ ॥

स्नेहा दिति ॥ स वसुदेवः । स्नेहात् पशूनां पतिं नन्दं, सम्यक् आलिंग्य, तस्य नन्दस्य सुतस्य श्रीकृष्णस्य । अनामयं कुशलं पृष्ट्वा । हे वत्सप

व्रजं गोष्ठं; 'व्रजं स्याद् गोकुलं गोष्ठ' मिति वैजयन्ती। गत्वा व्याघ्रीभयात् वत्सं पाहि इति उवाच जगाद। वच धातोः कर्तरि लिट्। अत्र व्याघ्रीरूप-पूतनाभयात् वत्सं श्रीकृष्णं पाहि। नन्दोद्देशेन कंचन वत्सपालं प्रति श्लेषोक्तिः। गूढोक्त्यलङ्कारः। तदुक्तं — 'गूढोक्ति रन्योद्देश्यं चे द्यदन्यं प्रति कथ्यते,' इति ॥ ५१ ॥

क्षणा दयासी दथ गोपघोषं योगीव लक्ष्यं दृढचित्तयुक्तः।
मार्गे महोत्पातविचारभीरुः स्मरन् प्रियोक्तिं नितरां तदानीम् ॥५२॥

क्षणादिति ॥ अथ संभाषणानन्तरं; मार्गे घोषमार्गे; महता मुत्पातानां विचारात् संचारात्। भीरुः भीतः। नन्दः तदानीं प्रियोक्तिं प्रियस्य वसुदेवस्य उक्तिं प्राप्य भयसंभवोक्तिं नितरां स्मरन्। लक्ष्यं स्थानं प्राप्य, दृढचित्तयुक्तः योगीव गोपानां घोषं क्षणात् अयासीत् ययौ। याधातोः कर्तरि लुङ्। 'यमरमे' ति सगागमे सिच इडागमः। पूर्णोपमालङ्कारः ॥ ५२ ॥

संप्राप्य गेहं त्वरया स नन्दो दृष्ट्वा शयानां विगतासुयोषाम्।
देवी मवोच न्न निवारितेति शुनीव किं संस्कृतयागशालात् ॥५३॥

संप्राप्येति ॥ स नन्दः। त्वरया गेहं संप्राप्य। विगताः असवः प्राणाः यस्या स्तां 'पुंसि भून्म्यसवः प्राणा' इत्यमरः। योषां पूतनां शयानां दृष्ट्वा। यागस्य शाला यागशाला। संस्कृतात् यागशालात् 'विभाषा सेनासुराच्छाया शाले' त्यादिना साधुः। शुनीव शुनः योषेव। किं न निवारिता इति देवीं यशोदां अवोचत् उवाच। वचधातोः कर्तरि लुङ्। पूर्णोपमालङ्कारः ॥ ५३ ॥

देव्यप्यवोच त्त मुदग्रचित्तं यक्षीव रूपेण शचीव चेति।
प्रविश्य गेहं च शिशो स्समीप ममूमुष न्नो हृदयं कुधात्री ॥५४॥

देवीति ॥ रूपेण यक्षीव यक्षसुन्दरीव। शचीव इन्द्राणीव च स्थिता कुधात्री पूतना गेहं शिशो स्समीपं च प्रविश्य। नः अस्माकं हृदयं अमूमुषत्

अचूचुरत् । मुषधातोः कर्तरि लुङ् । इति देवी यशोदा उदग्रं निष्ठुरं चित्तं यस्य तं नन्दं अभ्यवोचत् उवाच । अधिपूर्वकवचधातोः कर्तरि लुङ् । पूर्णोपमालङ्कारः ॥ ५४ ॥

शिशुं समाघ्राय स मूर्धदेशे व्यचीकर त्तां शतश स्सुतीक्ष्णैः ।
परश्वधै र्घोरविकाररूपं सम्मार्जितै र्मत्स्य मिव क्षणेन ॥ ५५ ॥

शिशु मिति ॥ स नन्दः शिशुं पुत्रं मूर्धदेशे शिरःप्रदेशे सम्य गाघ्राय तां पूतनां संमार्जितैः कर्मारपरिमार्जितैः । अत एव सुतीक्ष्णैः परश्वधैः आयुधविशेषैः । घोरं विकारं रूपं यस्येति तथोक्तं । मत्स्यमिव शतशः क्षणेन व्यचीकरत् चिच्छेद । कृधातोः णिजन्तात् कर्तरि लुङ् । उपमालङ्कारः ॥५५॥

अत्यन्तदाहोत्थितपुण्यगन्धं यज्ञेशपीतस्तनदेहजन्यम् ।
अजिघ्र दत्यन्तमनोहरं तं गन्धं वपाया इव देवसंघः ॥ ५६ ॥

अत्यन्तेति ॥ देवानां संघः । यज्ञेशेन विष्णुना पीतस्तनात् देहात् जन्यं जातं । अत्यन्तदाहात् उत्थितं, अत्यन्तं मनसः हरं तं पुण्यगन्धं; वपायाः गन्ध मिव अजिघ्रत् जिघ्रौ । घ्राधातोः कर्तरि लङ् । 'पाघ्रे' त्यादिना जिघ्रादेशः । उपमालङ्कारः ॥ ५६ ॥

गतां सुलोकान् प्रति मन्महे तां तदङ्गसङ्गा न्न भवे द्यदीदम् ।
संस्मृत्य तं प्राणवियोगकाले जनो विमुक्तिं कथम प्यभक्ष्यत् ॥५७॥

गता मिति ॥ तां पूतनां । तदङ्गसङ्गात्; भगवदङ्गसङ्गात् स्तन्यपानकालसंगा दित्यर्थः । सुलोकान् वैकुण्ठादिलोकान् प्रति गतां मन्महे । वय मिति शेषः । इदं पूतनापुण्यलोकगमनं न भवे द्यदि जनः तं भगवन्तं प्राणवियोगकाले प्राणप्रयाणसमये संस्मृत्य विमुक्तिं मोक्षं कथम प्यभक्ष्यत प्राप्स्यत्॥५७॥

प्रसाध्य विघ्नेशबलिं बकारिः कार्यस्य सिद्ध्यै बकसोदरीं ताम् ।
मुदा स्म निर्विघ्न मभीप्सितस्य वस त्यसौ गोपकुलेशगेहे ॥ ५८ ॥

प्रसाध्येति ॥ असौ बकारिः श्रीकृष्णः । अभीप्सितस्य अभिलषितस्य कार्यस्य निर्विघ्नं यथा तथा सिद्ध्यै सिद्धये । बकस्य बकासुरस्य । सोदरीं तां पूतनां विघ्नेशस्य विनायकस्य बलिं बलिरूपं प्रसाध्य कृत्वा । गोपकुलेशस्य नन्दस्य गेहे मुदा वसति स्म अवर्तत । वसधातोः कर्तरि लट् ॥ ५८ ॥

तदादि नन्दस्य गृहेऽतिभद्रं ररक्षु रत्यन्तविशुद्धचित्ताः ।
न लोकदिष्टत्रितयेऽपि भद्रं वस्त्वन्तरं तं सम मस्ति यस्य ॥५९॥

तदादीति ॥ तदादि तत्प्रभृति । नन्दस्य गृहे । अत्यन्तं विशुद्धं चित्तं यासां ताः गोप्यः । लोकदिष्टत्रितयेऽपि लोकानां त्रितयं दिष्टानां कालानां त्रितयं; 'द्वन्द्वान्ते' ति न्यायेन प्रत्येकं संबन्धः "संख्याया अवयवे तय" बिति तय प्प्रत्ययः । 'लोकस्तु भुवने जने, कालो दिष्टोप्यनेहापी' त्यमरः। यस्य भगवतः । समं तुल्यं भद्रं शुभयुक्तं अन्य द्वस्तु वस्त्वन्तरं नास्ति तं भगवन्तं श्रीकृष्णं अतिभद्रं यथा तथा ररक्षुः रक्षन्ति स्म । रक्षधातोः कर्तरि लिट् ॥५९॥

व्यवर्धताधिव्रज मम्बुजास्यः शशीव बालोऽनुदिनं कलाभिः ।
महेन्द्रनीलावयवै र्मनोज्ञैः पित्रो स्सदा मोदचयं वितन्वन् ॥ ६० ॥

व्यवर्धतेति ॥ अधिव्रजं व्रजे; सप्तम्यर्थे ऽव्ययीभावः । अम्बुज मिव पद्म मिव आस्यं मुखं यस्य स बालः श्रीकृष्णः । पित्रोः मातापित्रोः'पिता मात्रे' त्येकशेषः । सदा मोदचयं वितन्वन् कुर्वन् । मनोज्ञैः महेन्द्रनीलसदृशैः अवयवैः । कलाभिः स्वांगैः । 'चन्द्रांशे कलने कलेति' वैजयन्ती । शशीव चन्द्र इव अनुदिनं व्यवर्धत ववृधे । वृधिधातोः कर्तरि लङ् । पूर्णोपमा-लङ्कारः॥ ६० ॥

नक्षत्रपो ह्येष नवाम्बुदाभः नगोद्धरो ह्येष नगप्रहन्ता ।
भुजङ्गसख्यो ऽपि भुजङ्गशास्ता गोपालसूनु र्भवतीह यावत् ॥६१॥

नक्षत्रप इति ॥ इह घोषे । गोपालस्य नन्दस्य सूनुः एष कृष्णः, नवाम्बुदाभोऽपि नीलमेघश्यामोऽपि नक्षत्रपः चन्द्र इति विरोधः, क्षत्रियपालको

नेति परिहारः । एष नगोद्धरोऽपि पर्वतोद्धारकोऽपि नगप्रहन्ता पर्वतप्रहर्तेति विरोधः । यमलार्जुनभञ्जन इति परिहारः । भुजङ्गेषु विटेषु सख्यं स्नेहो यस्य स, तथाभूतोऽपि भुजङ्गशास्ता विटशिक्षक इति विरोधः, कालियमर्दन इति परिहारः । 'भुजङ्गो विटसर्पयो' रिति विश्वः । यावद् भवति भविष्यति 'यावत् पुरा निपातयो' रिति लट् । विरोधाभासालङ्कारः । तदुक्तं—'आभासत्वे विरोधस्य विरोधाभास इष्यत' इति ॥ ६१ ॥

अतीव साऽऽलोक्य सुतस्य वैभवं समागतासु प्रयती मुदं प्रसूः ।
अधिस्त्रि विश्रान्तिपदै रनुत्तमं स्तवै र्हि मानं नयनैपुणै र्व्यधात् ॥६२॥

अतीवेति ॥ सा प्रसूः माता यशोदा । सुतस्य श्रीकृष्णस्य वैभवं पूतनाहननरूपं आलोक्य, अतीव मुदं सन्तोषं प्रयती जानती सती; अनुभवन्तीत्यर्थः । समागतासु बालरक्षणार्थ मागतासु अधिस्त्रि स्त्रीषु । विभक्त्यर्थेऽव्ययीभावः । नयनैपुणैः नयस्य न्यायस्य नैपुणं चातुर्यं येषु तैः विश्रान्तिपदैः विश्रान्ति भूतैः सुखकरै रित्यर्थः । 'पदं व्यवसितत्राणस्थानलक्ष्मांघ्रिवस्तुष्वि' त्यमरः । स्तवैः स्तोत्रैः । अनुत्तमं सर्वोत्तमं मानं बहुमानं व्यधात् हि कृतवती खलु । धाधातोः कर्तरि लुङ् । वंशस्थवृत्तम् । 'जतौ तु वंशस्थ मुदीरितं जरा' विति लक्षणात् ॥ ६२ ॥

पूर्णमासत्रयः श्रीकृष्ण इत्याह—

कन्दर्परूप स्स मुदं वितन्वन् व्यरोचताथ व्रजवल्लवीजः ।
मासत्रयं गोपवधूवराणां नेता क्षणं काल मिव क्रियाभिः ॥६३॥

कन्दर्पेति ॥ अथानन्तरं व्रजवल्लवीजः यशोदापुत्रः, कन्दर्पस्य मन्मथस्य रूप मिव रूपं यस्य सः । उष्ट्रग्रीवादिवत् समासः । स श्रीकृष्णः क्रियाभिः क्रीडाभिः, गोपवधूवराणां गोपवधूश्रेष्ठानां, मुदं वितन्वन् मासत्रयं क्षणकाल मिव नेता नयन् सन् । नीङ् धातोः तृच् । व्यरोचत बभौ । विपूर्वकरुचधातोः कर्तरि लङ् ॥ ६३ ॥

गोपी तन्मुद माप सन्ततशुभाचारप्रचारोज्ज्वला
देवी तत्र महेन्द्रनीलविलसन्माणिक्यमालायुजाम् ।
नाभीदेशसमुद्रतीरमिलनां मुक्तामणीनां रुचा
युक्तं वीक्ष्य मुनीन्द्रयोगिनिवहप्रार्थ्यं रमेशं तदा ॥ ६४ ॥

गोपीति ॥ तत्र गेहे; सन्ततशुभानां नित्यशुभानां आचाराणां प्रचारेण अनुष्ठानेन उज्ज्वला प्रकाशमाना गोपी देवी यशोदा । महेन्द्रनीलानां विलसन्माणिक्यानां मालाभिः युञ्जन्तीति तथोक्तानां । नाभीदेश एव समुद्रतीरं तत्र मिलतां युक्तानां मुक्तामणीनां रुचा कान्त्या युक्तं । मुनीन्द्राश्च योगिनश्च तेषां निवहः समूहः । तेन प्रार्थ्यं प्रार्थनीयं । रमेशं बालं तदा वीक्ष्य दृष्ट्वा। तन्मुदं अनिर्वाच्यं सन्तोष माप प्राप । आप्लृ धातोः कर्तरि लिट् । शार्दूल-विक्रीडितं वृत्तम् ॥ ६४ ॥

इत्यालप त्युरुनखेन्दुलसन्मुरारि-
पादाम्बुजार्चनसमार्जितपुण्यकोटौ ।
सर्गोत्तम स्समरसैः प्रथितो ह्यनन्त-
नामाङ्कितै मृदुपदै र्गलितो द्वितीयः ॥ ६५ ॥

इतीति ॥ इति पूर्वोक्तप्रकारेण । उरु अधिकं नखेन्दुभि र्लसती, मुरारेः पादाम्बुजे तयोः अर्चनेन पूजया समार्जिताः पुण्यानां कोटयः यस्य तस्मिन् पुण्यकोटौ इति शेषः । आलपति सति । समे सर्वे रसाः विद्यन्ते येषु तैः । अनन्तस्य श्रीकृष्णस्य अनन्तानि यानि नामानि तै रङ्कितैः । मृदुपदैः प्रथितः प्रसिद्धः । द्वितीयः सर्गोत्तमः गलितः पूर्णः । वसन्ततिलकावृत्तम् । 'उक्ता वसन्ततिलका तभजा जगौग' इति लक्षणात् ॥ ६५ ॥

इति श्रीपुण्यकोटिकृते सव्याख्याने श्रीकृष्णविलासे
द्वितीयस्सर्गः समाप्तः

तृतीयः सर्गः

सुखं दद न्नन्दसुत स्सुधांशु रिवाथ तद्वल्लवसुन्दरीणाम् ।
दिगङ्गनाशर्म नितान्तदित्सु र्मुखे निशायां व्रज मध्यवात्सीत् ॥ १ ॥

सुखमिति ॥ अथ अनन्तरं, तेषां वल्लवानां सुन्दरीणां, दिगेवाङ्गना तस्याः शर्म सुखं; 'शर्मशातसुखानि चे' त्यमरः । नितान्तं दातु मिच्छुः दित्सुः दाधातोः सनि द्वित्वे 'सनि मीमे' ति इसादेशे 'अत्र लोप' इत्यभ्यासलोपे 'सः स्यार्धधातुक' इति तादेशे उप्रत्ययः । सुधांशु रिव चन्द्र इव सुखं ददत् 'नाभ्यस्ता' दिति नुम्निषेधः । नन्दसुतः श्रीकृष्णः निशाया मुखे सायंकाले । व्रजं घोषं अध्यवात्सीत् उवास । 'उपान्वध्याङ्वस' इत्याधारस्य कर्मत्वम् । अधिपूर्वकवसधातोः कर्तरि लुङ् । पूर्णोपमालङ्कारः । उपेन्द्रवज्रावृत्तम् ॥ १ ॥

अथ श्लोकद्वयेन चन्द्रो वर्ण्यते—

अगाहताकाश मतीव शीघ्रं सुखेन गोपीसुतदर्शनाय ।
व्रजे तदा षिड्गवियोगयोषित्करग्रहा द्भीरु रयं विधुः किम् ॥ २ ॥

अगाहतेति ॥ तदा रजनीमुखे षिड्गानां विटानां; 'षिड्गः पल्लविको विट' इत्यमरः; वियोगो यासां तासां योषितां करग्रहात् हस्तग्रहणा दतीवात्यन्तं, भीरु भीतः । अयं विधु श्चन्द्रः । 'विधुः सुधांशु' रित्यमरः । गोप्या यशोदायाः सुतस्य श्रीकृष्णस्य दर्शनाय आकाशं शीघ्रं यथा तथा अगाहत आगच्छत् किं? गाहूधातोः कर्तरि लङ् । अत्र गोपीसुतदर्शनरूपफल मसिद्ध मेव फलत्वेनोत्प्रेक्ष्यत इति असिद्धफलोत्प्रेक्षा । अहेतुभूत एव भीः हेतुत्वेनोत्प्रेक्ष्यत इति असिद्धहेतूत्प्रेक्षा । उपेन्द्रवज्रावृत्तम् ॥ २ ॥

गलत्ययं सत्वर मोषधीश्वरो वातायना न्मार्गगतात् गृहान्ते ।
मन्दं समायातसमीरसंभ्रमद्वधूसुशीर्षण्यविधुन्तुदभ्रमः ॥ ३ ॥

गलतीति ॥ गृहान्तरे गृहमध्ये मार्गगतात् चन्द्रमार्गगतात् वातायना द्गवाक्षात् । 'वातायनं गवाक्षोऽथ' इत्यमरः । मन्दं यथा तथा समायाते समीरे संभ्रमन्तीनां सञ्चरन्तीनां वधूनां सुशीर्षण्ये वेण्यां 'वेणिः प्रवेणी शीर्षण्य शिरस्यौ विशदे कचे' इत्यमरः । विधुन्तुदो राहु रिति भ्रमो यस्य सः 'सैंहिकेयो विधुंतुद' इत्यमरः । 'विध्वरुंषोस्तुद' इति खचि 'अरुर्द्विष' दिति मुमागमः । अयं ओषधीश्वर श्चन्द्रः सत्वरं यथा तथा गलति गच्छति । गलधातोः कर्तरि लट् । अत्र वेणीषु विधुन्तुदभ्रान्तिवर्णनात् भ्रान्तिमदलङ्कारः । तदुक्तं — 'स्या त्स्मृतिभ्रान्तिसन्देहै स्तदङ्कालंकृतित्रयम्' इति । वातायनस्य चन्द्रमार्गासम्बन्धेपि सम्बन्धोक्ते रतिशयोक्ति रलंकारः । तेन सौधानां तादृशौन्नत्यं व्यज्यते ॥ ३ ॥

अथ श्लोकषट्केन गोपिका वर्ण्यते —

जना मुखेन्दुं प्रभयोल्लसन्तं पश्चाच्च वेणीघनसैंहिकेयम् ।
दृष्ट्वा तयो र्मेलन मङ्गनानां शशंकिरे ग्राह मपर्वणीन्दोः ॥ ४ ॥

जना इति ॥ जना घोषजनाः । प्रभया उल्लसन्तं अङ्गनानां गोपिकानां । मुखेन्दुं पश्चा द्ध्रियमानवेण्येव घनसैंहिकेयः प्रबलराहुः 'सैंहिकेयो विधुंतुद' इत्यमरः । तं च तयो र्मेलनं च दृष्ट्वा अपर्वणि पर्वभिन्नकाले इन्दो श्चन्द्रस्य ग्राहं ग्रहणं शशङ्किरे अशङ्कन्त । शकिधातोः कर्तरि लिट् । मुखवेणिसंबन्धस्य ग्रहणत्वेनोत्प्रेक्षणात् उक्तवस्तूत्प्रेक्षालङ्कारः । तदुक्तं—संभावना स्या दुत्प्रेक्षा वस्तुहेतुफलात्मनेति' । उपजातिवृत्तम् । लक्षणं तूक्तम् । प्रायेणेतःपर मुपजातयः, वृत्तान्तराणि तु तत्र तत्र व्याख्यास्यन्ते ॥ ४ ॥

दोषातने वल्लवसुन्दरीणां नेपथ्यनैपुण्यकृतश्रमाणाम् ।
परस्परां मन्मथवह्निधाय्या प्रियानुरक्ति र्व्यवृधेतरां सा ॥ ५ ॥

दोषातन इति । दोषातने सायंकाले 'सायंचिर' मिति ल्युट्प्रत्यय-तुडागमौ । परस्परा मन्योन्यम् । 'कर्मव्यतिहारे सर्वनाम्नो द्वे वाच्ये' इति द्वित्वे 'समासवच्च बहुल' मिति बहुलग्रहणा दसमासवद्भावे पूर्वपदस्य प्रथमैकवचने कस्कादित्वा द्विसर्जनीयस्य सत्वम् । 'स्त्रीनपुंसकयो रुत्तरपदस्थाया विभक्ते राम्भावो वा वक्तव्यः' इत्यामादेशः । नेपथ्ये अलंकारे 'आकल्पवेषौ नेपथ्य' मित्यमरः । यन्नैपुण्यं चातुर्यं तत्र कृतः श्रमः याभि स्तासां वल्लवसुन्दरीणां गोपिकानां सा प्रसिद्धा मन्मथवह्ने र्मदनाग्ने र्धाय्या उद्दीपिका । 'ऋक् सामिधेनी धाय्या च सा स्या दग्निसमिन्धने' इत्यमरः ॥ धाय्यापदस्य अग्न्युद्दीपकऋक्परत्वेपि तदुद्दीपकमात्रलक्षणा । प्रियेषु पतिषु । 'धवः प्रियः पति र्भर्ता' इत्यमरः । अनुरक्ति रनुरागः । ववृधेतरा मतिशयेन ववृधे । वृध् धातोः कर्तरि लिट् । 'द्विवचनविभज्योपपदे' इति तरप् । 'किमेत्तिङव्ययघा' दि त्याप्रत्ययः ॥ ५ ॥

चन्द्रोदये कोकवराङ्गनेव काचि द्वियोगानलतप्यमाना ।
अन्तर्गृहा द्भर्तृकटाक्षवर्षसिक्ता तमालिङ्ग्य सुखं बभाज ॥ ६ ॥

चन्द्रोदय इति । चन्द्रोदये कोकवराङ्गनेव चक्रवाकीव 'कोकश्चक्र-श्चक्रवाक' इत्यमरः । वियोगानलेन विरहाग्निना तप्यमाना काचिद्गोपिका अन्तर्गृहात् । 'ल्यब्लोपे पञ्चमी' । क्रीडागेहं प्राप्य भर्तुः प्रियस्य कटाक्षाणां वर्षमेव वर्षं; तेन सिक्ता तं पतिं आलिङ्ग्य सुखं रतिसुखं बभाज प्राप । भज धातोः कर्तरि लिट् । रूपकालङ्कारः । इन्द्रवज्रावृत्तम् । लक्षणं तूक्तम् ॥ ६ ॥

क्रीडागृहे निश्यधिशय्य शय्या माकांक्षया भर्तृसमागमस्य ।
कस्यां मुदा रत्नमयप्रदीपे गोप्यां स्थितायां रवि राविरासीत् ॥ ७ ॥

क्रीडागृह इति । रत्नमया रत्नप्रचुराः दीपा यस्य तस्मिन् । क्रीडागृहे केलीगृहे । भर्तृसमागमस्य आकांक्षया इच्छया निशि रात्रौ शय्या मधिशय्य ।

'अधिशीङ्स्थासां कर्म' त्याधारस्य कर्मत्वम् । शीङ्धातो र्ल्यपि अयङ्यि क्ङिति' इति अयङादेशः । शय्यायां शयित्वेत्यर्थः । कस्यां गोप्यां गोपिकायां मुदा स्थितायां रविः सूर्यः आविरासीत् आविर्बभूव । सूर्योदयो बभूवेत्यर्थः । अत्र इष्यमाणार्थः पतिसमागमः । तद्विरुद्धसूर्योदयवर्णनात् विषादनालंकारः । तदुक्तं – इष्यमाणविरुद्धार्थसंप्राप्तिस्तुविषादन' मिति । इन्द्रवज्रावृत्तम् । लक्षणं तूक्तम् ॥ ७ ॥

युते कलाभि स्सकलाभि रिन्दा वनन्यसाधारणतीक्ष्णदाहे ।
उज्जृम्भमाणे ऽतिमनोजतापा समीप मापाशु धवस्य रन्तुम् ॥ ८ ॥

युत इति । सकलाभिः कलाभि र्युते इन्दौ संपूर्णचन्द्र इत्यर्थः । अन्यसाधारणो न भवतीति अनन्यसाधारणः । तथाभूतः तीक्ष्णो दाहो यस्य तस्मिन् उज्जृम्भमाणे सति, अति अत्यन्तं मनोजस्य मन्मथस्य तापो यस्या स्सा काचि द्गोपिका धवस्य पत्युः समीपं रन्तुं आशु प्राप । आप्लृधातोः कर्तरि लिट् ॥ ८ ॥

आरुह्य शुभ्रोन्नतचन्द्रशाला मधोमुखी चारु कदाचिदन्या ।
मुखं समालक्ष्य तटाकनीरे व्यमन्यतान्तर्जलपद्ममेव ॥ ९ ॥

आरुह्येति ॥ अन्या ऽपरा गोपिका शुभ्रोन्नतचन्द्रशालां शिरोगृहं, 'चन्द्रशाला शिरोगृह' मित्यमरः । आरुह्य कदाचि दधोमुखी सती तटाकनीरे सौधसमीपस्थतटाकजले चारु स्वं मुख मालक्ष्य दृष्ट्वा, अन्तर्जले पद्म मिव, व्यमन्यत मेने । विपूर्वकमनधातोः कर्तरि लङ् । अत्र जले दृष्टमुखे पद्मत्व-भ्रान्तिवर्णनात भ्रान्तिमदलंकारः ॥ ९ ॥

अथाष्टभिः श्लोकैः शकटासुरवधरूपलीला वर्ण्यते —

तदाऽऽगम त्कंसनियोगकारी कश्चिच्छकटरूप श्शकटासुरस्सन् ।
अधश्शयाने शकटस्य बाले जन्मर्क्षकाले विजनेऽस्य सद्म ॥ १० ॥

तदेति ॥ तदा कंसस्य नियोग आज्ञा तत्कारी शकटासुरः अस्यतीत्यसुरः 'असे रुक्कनादिति' रुन्प्रत्ययः । कापट्यं रूपं स्वरूपं यस्य सः । कपटपुञ्ज' इत्यर्थः । तथाभूतस्सन् अस्य बालस्य जन्मर्क्षकाले महोत्सवे विगतो जनो यस्मा त्तस्मिन् देशे शकटस्याधः अधोभागे बाले शयाने सति सद्म आगमत् आययौ । गम्लृधातोः कर्तरि लुङ् ॥ १० ॥

रथाङ्गपाणेः पदताडनेन रथाङ्गरूपो ऽभव दद्य भाव्ये ।
जन्म न्यसौ भाव्य मनेन सोऽनु भव न्ननस्त्वं बत भाविनेव ॥११॥

रथाङ्गपाणे रिति ॥ सः असौ शकटासुर रथाङ्गं चक्रं पाणौ यस्य सः । 'प्रहरणार्थेभ्य श्चे' ति पूर्वनिपातः । तस्य श्रीकृष्णस्यानेन सन्निहितेन भाविना भविष्यता पदताडनेन भाव्ये जन्मनि जन्मान्तरे भाव्यं भवितु योग्यं अनस्त्वं शकटभावं शकटैकदेशचक्रभाव मिति भावः । अद्यैवानुभवन्निव रथाङ्गरूप श्चक्ररूपः अभवत् । बतेत्याश्चर्ये । भूधातोः कर्तरि लङ् ॥ ११ ॥

क्षणेन बालं विनिहन्तु मेव गूढप्रयत्नः शठ आततायी ।
स्वयं स तस्योपरि पातुक स्तत्पादप्रहारेण हतः प्रभग्नः ॥ १२ ॥

क्षणेनेति ॥ आततायी वधोद्यतः । 'आततायी वधोद्यतः' इत्यमरः । शठो वंचकः । क्षणेन बालं हन्तुं गूढप्रयत्नः । अत एव तस्य बालस्योपरि पातुकः पतयालुः । 'लषपते' त्यादिना उकञ्प्रत्यय । 'पतयालुस्तु पातुके' इत्यमरः । स शकटासुरः तस्य बालस्य पादप्रहारेण प्रकर्षेण भग्नः सन् स्वय मेव हतः । अत्र बालहननेष्टार्थसमुद्यमात् न केवलं तदभावप्राप्तिः, किं तु स्वनाशरूपानिष्टप्राप्तेश्च वर्णना द्विषमालङ्कारः । तदुक्तं — अनिष्टस्या प्यवाप्तिश्च तदिष्टार्थसमुद्यमात् ॥ १२ ॥

सुमण्डलाकाररथाङ्गभण्डसमूहमध्यं समधिष्ठितो ऽसौ ।
मयूखमालीव दिगन्तरालतमः प्रभाभिः प्रहरन् रराज ॥ १३ ॥

सुमण्डलेति ॥ सुमण्डलाकारस्य रथाङ्गस्य भाण्डानां समूहस्य मध्यं समधिष्ठितः मध्ये वर्तमानः । 'अधिशीङ्स्थासा' मित्याधारस्य कर्मत्वम् ।

असौ श्रीकृष्णः मयूखमाली सूर्य इव दिगन्तराले यत्तमः तत्प्रभाभिः कान्तिभिः प्रहरन् छिन्दन् रराज। राज्धातोः कर्तरि लिट्। पूर्णोपमालङ्कारः। उपेन्द्रवज्रावृत्तम् ॥ १३ ॥

भग्नस्य भीता शकटस्य मध्ये बालं विलोक्यात्र समागता स्ताः।
अवादिषुः कार्य मका र्यनेन बाला रुदद्वालपदेति सत्यम् ॥ १४ ॥

भग्नस्येति ॥ अत्र बालसमीपे वर्तमाना बालाः कर्तारः समागताः भग्नस्य शकटस्य मध्ये बालं विलोक्य भीताः ताः गोपीः प्रति अनेन रुदतो बालस्य पदा कार्यं अकारि कृतं सत्य मित्यवादिषुः ऊचुः। वदधातोः कर्तरि लुङ् ॥ १४ ॥

माता त मालोक्य शिशुं शयानं तथाविधं तत्र रुदन्त माशु।
पाणौ समादाय सुमूर्धदेशे व्यजिघ्र दत्यन्तमशोकमोहा ॥ १५ ॥

मातेति ॥ माता यशोदा। तत्र शकटमध्ये तथाविधं भिन्नभाण्डमध्यगतं शयानं रुदन्तं तं शिशु मालोक्य दृष्ट्वा पाणौ हस्ते। आशु समादाय धृत्वा। न विद्येते शोकमोहौ यस्याः सा तथा भूता सती, सुमूर्धदेशे शिरोभागे अत्यन्तं पुनःपुनः व्यजिघ्रत् जिघ्रौ। घ्राधातोः कर्तरि लङ्। 'पाघ्रे' त्यादिना जिघ्रादेशः ॥ १५ ॥

रक्षन्तु मद्बाल मतीव भीतं मदिष्टदेवा वरदा स्सदैनम्।
भ्रान्त्याध्यवादी दिति नन्दपत्नी न जानती तं किल सर्वरक्षम् ॥१६॥

रक्षन्त्विति। नन्दस्य पत्नी यशोदा। वरदा मदिष्टदेवाः अतीवभीतं एनं मद्बालं सदा रक्षन्तु। इति तं बालं सर्वरक्षं सर्वेषां रक्षा यस्मात् तथाभूतं न जानती सती भ्रान्त्या शिशुत्वभ्रान्त्या अध्यवादीत् अवोचत्किल। अधिपूर्वात् वदधातोः कर्तरि लुङि 'च्लेःसिचि' 'वदव्रजे' ति च वृद्धिः ॥१६॥

क्रीडन्त मत्यन्तशिशुत्वभूत्या दृष्ट्वा स्त्रियो य त्त मलक्ष्यरूपम् ।
अमूमुहन् यस्य कि मद्भुतं त द्भवादयो मोहलवे निमग्नाः ॥१७॥

क्रीडन्त मिति ॥ स्त्रियो गोप्यः अलक्ष्य मदृश्यं रूपं निजरूपं यस्य तं अत्यन्तं शिशुत्वस्य शिशुभावस्य भूत्या लीलया क्रीडन्तं रममाणं तं श्रीकृष्णं दृष्ट्वा अमूमुहन् मोहं प्रापवत्यः इति यत् तत् कि मद्भुत माश्चर्यं न भवति । यस्य श्रीकृष्णस्य मोहलवे मोहलेशे भवादयोऽपि शिवादयोऽपि निमग्नाः । मुहधातो र्णिचि कर्तरि लुङि चङ् सन्वद्भावः । अर्थापत्त्यलङ्कारः । तदुक्तं — 'कैमुत्येनार्थसंसिद्धिः काव्यार्थापत्ति रिष्यते' इति ॥ १७ ॥

अथ त्रयोदशभिः श्लोकैः तृणावर्तवधरूपलीला वर्ण्यते—

कदाचि दुत्सङ्गगतं सुतं सा सर्वज्ञ मीशं समुदैक्षतालम् ।
विराजमानं मुखचन्द्रकान्त्या प्रेमास्पदं वल्लवसुन्दरीणाम् ॥१८॥

कदा चिदिति । कदाचित् कालविशेषे, सा यशोदा, सर्वज्ञ मीशं मुखं चन्द्र इवेत्युपमितसमासः । तस्य कान्त्या विराजमानं; वल्लवसुन्दरीणां गोपिकानां प्रेम्णः प्रीते रास्पदं स्थानभूतं; 'प्रेमा ना प्रियता हार्द' मित्यमरः। उत्सङ्गगतं अङ्कगतं सुतं श्रीकृष्णं, अलं समुदैक्षत सम्यग् ददर्श । समुत्पूर्वेकेक्षधातोः कर्तरि लङ् ॥ १८ ॥

बाल स्समालोच्य स भाविकार्यं भारायमाण स्सदयो बभूव ।
अङ्के जनन्या स्त मसौ यशोदा निधाय भूमा वगमद् गृहान्तम् ॥१९॥

बाल इति ॥ स बालः श्रीकृष्णः भाविकार्यं तृणावर्तागमनरूपभाविकार्यं समालोच्य विचार्य, जनन्या यशोदायाः, अङ्के उत्सङ्गे; 'उत्सङ्गचिह्नयो रङ्क' इत्यमरः । सदयस्सन् भार इवाचरतीति भारायमाणः, 'कर्तुः क्यङ् सलोपश्चे' ति आचारार्थक्यङन्ता त्कर्तरि लटः शानजादेशः । बभूव । असौ यशोदा तं सुतं भूमौ निधाय गृहान्तं गृहमध्य मगमत् प्राप । गम्लृधातोः कर्तरि लुङ् ॥ १९ ॥

नाम्ना तृणावर्त इति स्म दैत्यो व्यगा द्व्रजे कंससखः कुमारम् ।
भ्रमत्समीरोद्धतधूलिसङ्घनिरुद्धरोदोन्तरदिग्वितानः ॥ २० ॥

नाम्नेति । कंसस्य सखा कंससखः, 'राजाहस्सखिभ्य ष्टच्' । नाम्ना तृणावर्त इति प्रसिद्धः । दैत्यः राक्षसः । भ्रमत्समीरेण चक्राकारवायुना उद्धतेन उपरि नीतेन धूलिसंघेन निरुद्धं पिनद्धं रोदोन्तरं द्यावापृथिव्योरन्तरं 'द्यावाभूमी च रोदसी' इत्यमरः । दिग्वितानं च दिक्संघः 'पूगो वितानं प्रकरः' इत्यमरः । ते येन सः तथाभूतस्सन् व्रजे विद्यमान मिति शेषः । कुमारं बालं व्यगात् । विपूर्वा दिण् धातोः कर्तरि लुङ् । 'इणो गा लुङि' इति गादेशः ॥ २० ॥

आवृत्य घोषं रजसा पिधाय प्रगृह्य खं बाल मगाहतासौ ।
गृहीतकण्ठ स्स ययौ निहन्तु मिवान्तकः कालवशं प्रपन्नम् ॥२१॥

आवृत्येति ॥ असौ तृणावर्तः, घोष मावृत्य आक्रम्य रजसा धूल्या । 'रेणु र्द्वयो स्त्रियां धूलिः पांसु र्ना न द्वयो रज' इत्यमरः । पिधाय आच्छाद्य, बालं श्रीकृष्णं प्रगृह्य गृहीत्वा, खं आकाशं अगाहत ययौ । स श्रीकृष्णः गृहीतः कण्ठो येन तथाभूतस्सन् कालवशं मरणकालवशं प्रपन्नं प्राप्तं अन्तको मृत्यु रिव निहन्तुं ययौ । याधातोः कर्तरि लिट् । पूर्णोपमालंकारः ॥ २१ ॥

विहायसा गन्तुमनाः स दैत्यः पदानि गत्वा लघु बालकण्ठः ।
द्वित्राणि भारेण विनष्टसत्त्वः नान्यत्पदं गन्तु मसौ शशाक ॥२२॥

विहायसेति । विहायसा आकाशमार्गेण गन्तुं मनो यस्य सः । बालः कण्ठे यस्य सः । 'गड्वादेः परा सप्तमी' ति सप्तम्यन्तस्य परनिपातत्वं । असौ दैत्यः तृणावर्तः । द्वे वा त्रीणि वा द्वित्राणि । 'बहुव्रीहौ संख्येये डच्-अबहुगणा' दिति डच् । पदानि लघु शीघ्रं यथा तथा 'जवोऽथ शीघ्रं त्वरितं लघु क्षिप्र मरं द्रुत' मित्यमरः । गत्वा भारेण विनष्टं सत्त्वं बलं यस्य स

तथा भूतः सन् अन्यत्पदं गन्तुं न शशाक नाशकत् । शकधातोः कर्तरि लिट् ॥ २२ ॥

भारेण सीदज्जवसत्त्वभाजः जीवोऽगम त्कण्ठ मवेक्षितुं तम् ।
सखाय मीशं परिरब्धकण्ठं तदान्तरिक्षे चलतोऽस्य नूनम् ॥२३॥

भारेणेति ॥ तथा भारेण कण्ठभारेण, जवो वेगः, सत्त्वं बलं, सीदती जवसत्त्वे भजतीति तथोक्तस्य अन्तरिक्षे चलतः अस्य तृणावर्तस्य जीवः परिरब्धः आलिंगितः कण्ठो येन तं सखायं; 'द्वा सुपर्णा सयुजा सखाया' इति श्रुतेः । ईशं प्रभुं, अवेक्षितुं द्रष्टुं कण्ठ मगमत् प्राप । नूनं निश्चयः । गम्लृधातोः कर्तरि लुङ् । अत्र तृणावर्तजीवस्य 'कण्ठप्राप्ते रसिद्धमेव भगवदीक्षणं फलत्वेनोत्प्रेक्षित मिति असिद्धफलोत्प्रेक्षा ॥ २३ ॥

अलातचक्रभ्रमदुग्रचक्षु र्हलायुधभ्रातृभरप्रभग्नः ।
क्षणाद्विसंज्ञो न्यपतद्धरित्र्यां सिंहार्दितो नाग इव प्रभिन्नः ॥२४॥

अलातेति ॥ अलातचक्र मिव उल्मुकचक्र मिव । 'अङ्गारोऽलात - मुल्मुक' मित्यमरः । भ्रमती उग्रे चक्षुषी यस्य सः । हलायुधस्य बलरामस्य भ्रातुः श्रीकृष्णस्य भरेण भारेण, प्रभग्नो हतः, तृणावर्तः क्षणात् विगता संज्ञा यस्मा त्तथाभूतः सन् सिंहेन अर्दितः हतः प्रभिन्नः मत्तः । 'प्रभिन्नो गर्जितो मत्त' इत्यमरः । नागः गज इव । 'गजेऽपि नागमातङ्गा' वित्यमरः । धरित्र्यां भूम्यां न्यपतत् पपात । निपूर्वकपतधातोः कर्तरि लङ् । पूर्णोपमालङ्कारः ॥ २४ ॥

कृत्वाऽसुरं तं प्ररुदन् गतासुं अशेत तस्योपरि बालकोऽसौ ।
किमप्यजानन्निव दीनवेषो निमज्जयन् द्रष्टृमनांसि दैन्ये ॥ २५ ॥

कृत्वेति ॥ असौ बालः श्रीकृष्णः तं असुरं तृणावर्तं गतासुं गतप्राणं, 'पुंसि भून्म्यसवः प्राणा' इत्यमरः । कृत्वा प्रकर्षेण रुदन् किमप्यजानन्निव

दीनस्य वेष इव वेषो यस्य सः । तथाभूतस्सन्, द्रष्टॄणां जनानां मनांसि दैन्ये दीनभावे निमज्जयन् तस्य तृणावर्तस्योपरि अशेत शिश्ये । शीङ्धातोः कर्तरि लङ् ॥ २५ ॥

शान्ते परागे शरदिन्दुमुख्यः संप्राप्य शीघ्रं व्रजनाथगेहम् ।
मुखं मुरारे रनवेक्षमाणा निष्पिष्य हस्तौ बिभयाम्बभूवुः ॥ २६ ॥

शान्त इति ॥ शरदि इन्दु रिव मुखं यासां ताः गोप्यः, परागे शान्ते सति व्रजनाथगेहं नन्दगृहं शीघ्रं संप्राप्य मुरारेः श्रीकृष्णस्य मुख मनवेक्षमाणाः अपश्यन्त्यः सत्यः हस्तौ निष्पिष्य संपीड्य बिभयांबभूवुः भीता बभूवुः । भीधातोः 'भीह्रीभृहुवां श्लुवच्च' - त्यामि द्वित्वम्; कर्तरि लिट् ॥२६॥

अन्वेष्टु मत्यन्तविकल्पयुक्ताः दुरन्ततापाः ककुभ श्चतस्रः ।
गता स्त मालक्ष्य कलेबरेऽभ्रतुल्ये मुदा निन्यु रमुं निकेतम् ॥२७॥

अन्वेष्टु मिति ॥ अत्यन्तविकल्पैः क गतः, क वर्तत इत्यादिवितर्कै र्युक्ताः । अत एव दुरन्तः तापो यासां ता गोप्यः । तं बाल मन्वेष्टुं चतस्रः ककुभः दिशः । 'दिशस्तु ककुभः काष्ठा' इत्यमरः । गतास्सत्यः, अभ्रतुल्ये मेघसदृशे । 'अभ्रं मेघो वारिवाह' इत्यमरः । कलेबरे वर्तमान मिति शेषः । आलक्ष्य दृष्ट्वा, मुदा, अमुं बालं निकेतं नन्दगृहं निन्युः । नीङ्धातोः कर्तरि लिट् । दुह्यादित्वात् द्विकर्मकत्वम् ॥ २७ ॥

अचिन्त्यशक्तिं नविजानती तं ग्रस्तो ग्रहेणेति शिशुं विचिन्त्य ।
कुलप्रवृद्धाभि रथास्य रक्षां सा कारयामास कृशोदरीभिः ॥ २८ ॥

अचिन्त्येति ॥ अथ आनयनानन्तरं तं बालं अचिन्त्या शक्ति र्यस्य तं नविजानती नावगच्छन्ती सा यशोदा शिशु र्ग्रहेण पिशाचेन ग्रस्त इति विचिन्त्य मत्वा कुले प्रवृद्धाभिः कृशोदरीभिः गोपिकाभिः अस्य बालस्य रक्षां

कारयामास कारितवती । कृञ्धातोः णिचि आमि कर्तरि लिटि अनु-प्रयोगः ॥ २८ ॥

दिने दिने नन्दकुलावतंसः सुरत्नभूषाभि रलंकृतस्सन् ।
व्रजे जनानां मुद माशु तन्वन् निनाय कालं नलिनायताक्षः ॥२९॥

दिने दिन इति ॥ नन्दकुलावतंसः नन्दकुलस्योत्तमभूषणम् । नलिने इव आयते अक्षिणी यस्य सः । 'वा पुंसि पद्मं नलिन' मित्यमरः । श्रीकृष्णः दिने दिने प्रतिदिनं । वीप्सायां द्विर्भावः । सुरत्नै र्माणिक्यैः खचितभूषाभिः अलंकृतस्सन् व्रजे जनानां मुद माशु तन्वन् कुर्वन् कालं निनाय अनयत् । नीङ्धातोः कर्तरि लिट् ॥ २९ ॥

अनुग्रहायास्य गृहं बभाज नन्दस्य गर्ग स्समदेवरूपः ।
स्वयं जनान् पावयितुं वितृष्णा महानुभावा हि तथा भजन्ति ॥३०॥

अनुग्रहायेति ॥ समदेवरूपः सकलदेवतास्वरूपः । सम स्सर्वपर्याय इति श्रवणात् । गर्गः गर्गाचार्यः अस्य नन्दस्य गृहं अनुग्रहाय अनुग्रहार्थं बभाज प्राप । तथा हि, वितृष्णा विगताशाः महानुभावाः जनान् पावयितुं पवित्रीकर्तुं स्वयं भजन्ति । भजधातोः कर्तरि लट् । अत्र सामान्येन विशेष-समर्थना दर्थान्तरन्यासालङ्कारः । तदुक्तं — 'उक्ति रर्थान्तरन्यासः स्या त्सामान्यविशेषयो' रिति ॥ ३० ॥

पुरोहितोऽस्मत्कुलसंभवानां दिदृक्षया नो गृहपावनाय ।
उक्त्वा मुनिः प्राप्त इतीह लब्धुं तं दम्पती नेमतु रुन्नतिं तौ ॥३१॥

पुरोहित इति ॥ तौ दंपती नन्दयशोदे । राजदन्तादित्वात् पतिशब्दस्य परनिपातः । जायाशब्दस्य दंभावो जंभावश्च निपात्यते । 'दंपती जंपती जायापती' इत्यमरः । अस्मत्कुलसंभवानां पुरः हित मिच्छतीति पुरोहितो मुनि र्गर्गाचार्यः स नोऽस्माकं; कर्मणि षष्ठी । दिदृक्षया द्रष्टु मिच्छया गृहपावनाय

इह प्राप्त आगतः इति उक्त्वा तं गर्गाचार्यं उन्नतिं लब्धुं नेमतुः अनमतां; नमुधातोः कर्तरि लिट् । विचित्रालङ्कारः । 'विचित्रं तत्प्रयत्नश्चे द्विपरीत-फलेच्छये' ति ॥ ३१ ॥

जानेऽह मद्यात्तसुतौ युवानौ चिराय संप्रार्थनया भवन्तौ ।
नारायणं देव मिमं सुतं वां मन्ये श्रिया कान्तिवपुर्यशोभिः ॥३२॥

जाने इति ॥ अहं गर्गः युवतिश्च युवा च युवानौ, भवती च भवांश्च भवन्तौ । 'पुमांस्त्रिये' त्येकशेषः । चिराय बहुकालेन संप्रार्थनया भगवत्संप्रार्थनया आत्तौ प्राप्तौ सुतौ रामकृष्णौ याभ्यां ताविति जाने जानामि । अद्य वां युवयोः इमं सुतं श्रीकृष्णं श्रिया संपदा कान्तिश्च वपुश्च यशश्च तैः देवं नारायणं मन्ये । मनु धातोः कर्तरि लट् ॥ ३२ ॥

दृष्ट्वेति तं गूढविभूमरूपं निगूढवाग्भी रममाण मत्र ।
अवोच दाचार्यवर स्स गोपौ गर्गो मुदा योगिमुनीन्द्रवन्द्यः ॥३३॥

दृष्ट्वेति ॥ इति पूर्वोक्तप्रकारेण योगिनां मुनीन्द्राणां वन्द्यः पूज्यः आचार्यवरः गुरुश्रेष्ठः स गर्गः गर्गाचार्यः अत्र समीपे रममाणं गूढं विभूम्नः व्यापकस्य रूपं यस्य तं बालं दृष्ट्वा नितरां गूढाभिः वाग्भिः तात्पर्यगर्भवाग्भिः मुदा गोपी च गोपश्च गोपौ 'पुमांस्त्रिये' त्येकशेषः । नन्दयशोदे (कर्म) अवोचत् उवाच । वच धातोः कर्तरि लुङ् ॥ ३३ ॥

बाल्येन य द्वस्तु समस्तभूति व्रजेशगेहेऽक्षिपथं गतं मे ।
मुदेऽस्तु तद्वस्तु निरस्तमाय मिति स गर्गो मनसाऽभ्यवादीत् ॥३४॥

बाल्येनेति ॥ बाल्येन बालरूपेण समस्ता भूतिः ऐश्वर्यं यस्य तत् 'विभूति र्भूति रैश्वर्य' मित्यमरः । य द्वस्तु व्रजेशगेहे नन्दगृहे मे अक्षिपथं नेत्रमार्गं 'ऋक् पू' रित्यादिना अप्रत्ययः । गतं निरस्ता माया यस्मात् तत् वस्तु मे मुदे अस्तु । असधातोः कर्तरि संप्रार्थनायां लोट् । इति गर्गः

मनसा अभ्यवादीत् उवाद । स आश्चर्यम् । वदधातोः कर्तरि लुङ् वद-व्रजेति वृद्धिः ॥ ३४ ॥

नामकरणावसरे बालस्य स्थिति माह—

अदीपि गोपीकुलदीप एषः हस्ताग्र्यसौवर्णसुपात्र आसाम् ।
स्नेहैधितः पुण्यदशानुवृत्तिः संसारघोराधितमःप्रहन्ता ॥ ३५ ॥

अदीपीति ॥ संसारे घोरा ये आधयः मनोव्यथाः । 'पुंस्याधि-र्मानसी व्यथे' त्यमरः । त एव तमः तस्य प्रहन्ता नाशकः । आसां गोपि-कानां पुण्यमेव दशा वर्तिः 'दशा वर्ता ववस्थाया' मिति विश्वः । तां अनु अनुसृत्य वृत्ति र्वर्तनं यस्य सः आसां भगवति स्नेह एव स्नेहः तैलं 'स्नेह स्तैलादिकरसद्रव्य' इति विश्वः । तेनैधितः प्रवृद्धः । गोपीनां कुलस्य दीपः एषः श्रीकृष्णः आसां हस्त एवाग्र्यं श्रेष्ठं सौवर्णसुपात्रं तस्मिन् अदीपि बभौ । दीपधातोः कर्तरि लुङ् । 'दीपजने' – त्यादिना चिण् । रूपकालङ्कारः ॥३५॥

स कारयामास रह स्यथो व्रजे तयो रनेनैव सुनामनी परे ।
बलेति कृष्णेति जनौघतोषके दुरन्तसंसारसमुद्रतारके ॥ ३६ ॥

स इति ॥ अथो अनन्तरं स नन्दः व्रजे गोष्ठे 'व्रजं स्या द्गोकुले गोष्ठे' इति वैजयन्ती । रहसि एकान्ते तयो र्बालयोः । अनेन गर्गाचार्येण दुरन्तसंसार एव समुद्रः तस्य तारके तरणसाधके जनौघस्य तोषके बलेति कृष्णेति परे श्रेष्ठ शुभनामनी कारयामास अकारयत् । कृधातोः णिचि कर्तरि लिटि आमि अनुप्रयोगः । यद्यपि रामोत्पत्तिः स्पष्टं नोक्ता तथापि जानेऽह-मित्यस्मिन् श्लोके आत्तसुता वित्यत्र आत्तौ प्राप्तौ सुतौ युवाभ्या मिति व्याख्या-तत्वात् उक्तप्रायैव । वंशस्थवृत्तम् ॥ ३६ ॥

गर्गस्य तस्याधिकतोष आसी त्कृष्णस्य दृष्ट्या पथि वांछिताच्च ।
नन्देन सम्यक्कृतपूजया च तन्नामधेयामृतपानतृप्त्या ॥ ३७ ॥

गर्गस्येति ॥ घोषे गर्गस्य तस्य भगवतो नामधेयमेवामृतं 'भागरूपनामभ्यो धेय' इति धेयप्रत्ययः । तस्य पानेन तृप्त्या नन्देन सम्यक् कृतपूजया च कृष्णस्य दृष्ट्या दर्शनेन च पथि वांछिता दधिकः तोषः आसीत् । अस्तेः कर्तरि लङ् । प्रहर्षणालङ्कारः । 'वाञ्छिता दधिकार्थस्य संसिद्धिश्च प्रहर्षण' मिति ॥ ३७ ॥

संपूज्य नन्दो गुरुवर्यपादौ यान्तं गुरुं सोऽप्यनुगत्य दूरम् ।
आज्ञां समाराध्य गृहं ययौ स यथामरेशो गुरुमग्रगण्यम् ॥३८॥

संपूज्येति । स नन्दः गुरुवर्यस्य गर्गस्य पादौ संपूज्य अग्रगण्यं गुरुं बृहस्पतिं अमरेशो यथा इन्द्र इव यान्तं गच्छन्तं गुरुं दूर मनुगत्य गत्वा आज्ञां समाराध्य याचित्वा गृहं ययौ गतवान् । याधातोः कर्तरि लिट् । पूर्णोपमालङ्कारः ॥ ३८ ॥

अथ व्रजेश श्शकटासुरादिवधा न्निमज्जन् प्रमदाम्बुराशौ ।
कुमार मेनं कुधरापतिघ्नं धरातुरासाह मबोधि नन्दः ॥ ३९ ॥

अथेति ॥ अथानन्तरं प्रमदः हर्ष एव अम्बुराशिः । 'मुत्प्रीतिः प्रमदो हर्ष' इत्यमरः । तस्मिन् निमज्जन् व्रजेशः नन्दः शकटासुरः आदिर्येषां तेषां वधात् एनं पुरोवर्तिनं कुमारं श्रीकृष्णं कुत्सितान् धरापतीन् हन्तीति तथाभूतं धरातुरासाहं भूमिस्थदेवेन्द्रं । तुरं सहत इत्यस्मि न्नर्थे 'अन्येषा मपि दृश्यत' इति पूर्वपददीर्घः । अबोधि बुबुधे । बुधधातोः कर्तरि लुङ् । दीपजनेत्यादिना चिण् । असुरवधरूपधर्मसंबन्धेन निमित्तेन श्रीकृष्णे भूगतेन्द्रतादात्म्योत्प्रेक्षणात् स्वरूपोत्प्रेक्षालङ्कारः ॥ ३९ ॥

अथ त्रिभिः श्लोकै र्जानुक्रीडां वर्णयति —

अतीत्य माणिक्यसुदर्पणान्तर्विराजमानातुलजानुचारः ।
द्वारं स्वगेहस्य ययौ पुनस्स अन्त र्यथा सिंहशिशु र्गुहायाः ॥४०॥

अतीत्येति ॥ माणिक्यसुदर्पणाना मन्तः मध्ये विराजमानयोः अतुल जान्वोः चारो यस्य स श्रीकृष्णः । सिंहशिशुः गुहायाः स्वगेहस्य द्वार मतीत्य पुर रन्तः गुहामध्यं यथा ययौ तथाऽय मपि । याधातोः कर्तरि लिट् ॥४०॥

गृहाङ्गणे जानुचरः कुमारः किञ्चि त्तिरश्चीनविलोलमौलिः ।
सिंहावलोकेन मुदं जनन्या अकिंपचां संजनयाम्बभूव ॥ ४१ ॥

गृहेति ॥ गृहाङ्गणे गृहचत्वरे । 'अङ्गणं चत्वराजिरे' इत्यमरः । जानुभ्यां चरतीति तथाभूतः कुमारः किंचि त्तिरश्चीनः तिर्यक्कृतः । विलोलो मौलिः केशबन्धो यस्य सः तथाभूतस्सन् सिंहावलोकेन जनन्याः यशोदाया अकिंपचा मधिकां मुदं संजनयांबभूव उत्पादयामास । संपूर्वकजनिधातोः कर्तरि लिट् । आमि अनुप्रयोगः ॥ ४१ ॥

बालै स्समं क्रीडति जानुचारे वीथीषु निश्शंक मकुण्ठशक्तौ ।
गलत्पयोभारमनोगतं त माहूय चालिंग्य पयोऽददा त्सा ॥ ४२ ॥

बालैरिति ॥ सा यशोदा, अकुण्ठा अमन्दा शक्ति र्यस्य तस्मिन् । जानुभ्यां चारो यस्य तस्मिन् श्रीकृष्णे इति शेषः । वीथीषु बालै स्समं निश्शंकं यथा तथा क्रीडति सति, गलत्पयसां भारेण मनोगतं मनसा स्मृतं तं बाल माहूयालिंग्य च पयः अददात् ददौ । दाधातोः कर्तरि लङ् ॥ ४२ ॥

पादचारं वर्णयति —

अपूरि पादाञ्चितनूपुराणां नाद स्तदा मातर माशु दिक्षु ।
बालो यदाऽऽयाति धरां विमर्द न्निव स्वगत्या कलभः करेणुम् ॥४३॥

अपूरीति । बालः श्रीकृष्णः यदा स्वगत्या मन्दगत्या धरां विमर्दन् कलभः 'त्रिंशद्वर्षस्तु कलभः' इति वचनात् । मातरं करेणुमिव गजवधू मिव । 'करेणु रिभ्यां स्त्री नेभे' इत्यमरः । मातरं यशोदां प्रति आशु आयाति

तदा पादयो रञ्चितानां नूपुराणां नादः दिक्षु अपूरि पूर्णोऽभूत् । पूरीधातोः कर्तरि लुङ् । दीपजनेत्यादिना चिण् । पूर्णोपमालङ्कारः ॥ ४३ ॥

ऊरू वर्णयति —

अस्योरुणा साम्य मुपैतु मादौ प्रसारयामास करं स्वकीयम् ।
उद्धृत्य संकोच्य पलायतासौ बालो गजोऽसाम्यजलज्जयेव ॥४४॥

अस्येति ॥ असौ बालगजः आदौ अस्य श्रीकृष्णस्य ऊरुणा साम्य मुपैतुं प्राप्तुं स्वकीयं करं प्रसारयामास । असाम्यजलज्जयेव उद्धृत्य संकोच्य पलायत अधावत् । परापूर्वकस्य अयतेः कर्तरि लङ् । 'उपसर्गस्यायता' विति लत्वम् । अत्र करिकरप्रसारणस्यासिद्धा ऊरुसाम्यप्राप्तिः फलत्वेनोत्प्रेक्ष्यत इति असिद्धफलोत्प्रेक्षा । सा च व्यञ्जकाप्रयोगात् गम्या । गजपलायने असिद्धैव लज्जा हेतुत्वेनोत्प्रेक्ष्यत इति असिद्धहेतूत्प्रेक्षालङ्कारः । साम्यप्रेप्सोरेव लज्जा-प्राप्तेः तयो रङ्गाङ्गिभावेन सङ्करः ॥ ४४ ॥

द्वाभ्यां करौ वर्णयति —

वीक्ष्यास्य मञ्जुस्फुटचक्रशंखरेखाद्वयालंकृतपाणिपद्मे ।
उत्पत्तिकाले धृतशंखचक्रकरं सुतं सा मनसा जगाहे ॥ ४५ ॥

वीक्ष्येति ॥ सा माता अस्य श्रीकृष्णस्य मञ्जुना स्फुटेन चक्रशंखरेखा-द्वयेन अलंकृते पाणी पद्मे इवेत्युपमितसमासः । पाणिपद्मे वीक्ष्य उत्पत्तिकाले पुत्रजननकाले धृते शंखचक्रे करयोः येन तं सुतं श्रीकृष्णं मनसा जगाहे सस्मार । गाहूधातोः कर्तरि लिट् । स्मृतिमदलङ्कारः ॥ ४५ ॥

करारविन्देन स कोमलेन ददाति मोदा दभयं जनेभ्यः ।
कृतावतारः खलनिग्रहाय सदङ्गदालङ्कृतबाहुयुग्मः ॥ ४६ ॥

करेति ॥ खलानां दुष्टानां निग्रहाय, कृतः अवतारो येन सः । सदङ्गदाभ्यां अलङ्कृतं बाहुयुग्मं यस्य, स श्रीकृष्णः कोमलेन सुकुमारेण कर

एवारविन्दं ; मयूरव्यंसकादित्वा त्समासः । तेन मोदा त्सन्तोषात, जनेभ्यः भक्तेभ्यः, अभयं ददाति । दाधातोः कर्तरि लट् । अत्रारोप्यमाणस्यारविन्दस्य करतादात्म्यापत्त्या जनाभयदानरूपकार्योपयोगित्वात् परिणामालङ्कारः । तदुक्तम् — 'परिणामः क्रियार्थश्चे द्विषयी विषयात्मने' ति ॥ ४६ ॥

उरो वर्णयति —

अपूरि कण्ठेऽस्य विलग्नमालामरन्दपानागतषट्पदानाम् ।
नाद स्समस्तासु ककुप्सु लक्ष्मीनिवासभूतोरसि चारुचिह्ने ॥४७॥

अपूरीति ॥ अस्य भगवतः चारु चिह्नं श्रीवत्साख्यं यस्मिंस्तस्मिन् । लक्ष्मीनिवासभूते उरसि, कण्ठे च विलग्नमालायां मरन्दपानार्थ मागतषट्पदानां भ्रमराणां नादः समस्तासु ककुप्सु दिक्षु । 'दिशस्तु ककुभः काष्ठे' त्यमरः । अपूरि पुपूरे । पूरीधातोः कर्तरि लुङ् । 'दीपजने' त्यादिना चिण् ॥ ४७ ॥

पञ्चभि र्मुखं वर्णयति —

वीथीषु बालै स्सम मागतस्य नीलालकस्वेदयुतं विहर्तुम् ।
मुखं यथा खे परिलब्धतारं कृष्णस्य रेजे शिशिरांशुबिम्बम् ॥४८॥

वीथीष्विति ॥ वीथीषु बालैस्समं विहर्तु मागतस्य श्रीकृष्णस्य नीलालकैः स्वेदैश्च युतं मुखं खे आकाशे परिलब्धतारं परिलब्धानि ताराणि येन तं ; शिशिरा अंशवो यस्य तस्य बिम्बं यथा रेजे । राजृधातोः कर्तरि लिट् ॥ ४८ ॥

समस्तलोकप्रियदर्शनं तन्मुखं सदाह्लादकरं प्रसन्नम् ।
कलाभिसंपूर्णशशीव रात्रौ किं तु प्रकृत्या किल निष्कलङ्कम् ॥४९॥

समस्तेति ॥ समस्तानां लोकानां जनानां 'लोकस्तु भुवने जने' इत्यमरः । प्रियं दर्शनं यस्य तत् । तस्य श्रीकृष्णस्य तन्मुखं रात्रौ कलाभिः

स्वांशैः 'चन्द्रांशे कलने कले' ति वैजयन्ती । अभिसंपूर्णः परिपूर्णः शशीव चन्द्र इव सदा आह्लादकरं प्रीतिजनकं किं तु प्रकृत्या स्वभावेन निष्कलङ्कं किल । अत्रोपमानोपमेययो र्विशेषवर्णनात् व्यतिरेकालङ्कारः । तदुक्तं — 'व्यतिरेको विशेषश्चे दुपमानोपमेययो' रिति ॥ ४९ ॥

शरीरलावण्यकलिन्दकन्याझरोत्थितं वीक्ष्य मुखं प्रसन्नम् ।
सुतस्य मन्दस्मितचन्द्रिकात्तं चन्द्राब्जयो स्संशय माप माता ॥५०॥

शरीरेति ॥ माता यशोदा, शरीरस्य लावण्य मेव कलिन्दकन्याझरः, यमुनाप्रवाहः, 'प्रवाहो निर्झरो झर' इत्यमरः । तस्मा दुत्थितं मन्दस्मित मेव चन्द्रिका तया आत्तं युक्तं प्रसन्नं सुतस्य मुखं वीक्ष्य चन्द्राब्जयो श्चन्द्रकमलयोः संशय माप प्राप । आप्लृधातोः कर्तरि लिट् ॥ ५० ॥

मुखेन्दु रस्य प्रतिभाति नूनं नीलालकाकाशपृषत्सुतारः ।
आशान्तरव्याप्तनितान्तगाढं तमः प्रभिन्दन् भुवि मङ्गलाय ॥५१॥

मुखेन्दुरिति ॥ नीलालकाः कुन्तला एवाकाशः । 'अलका श्चूर्णकुन्तला' इत्यमरः । पृषन्त्येव सुताराणि यस्य सः । 'पृषन्ति बिन्दु पृषता' इत्यमरः । अस्य भगवतः मुखेन्दुः मुखचन्द्रः, आशान्तरालेषु दिगन्तरालेषु व्याप्तं नितान्तं गाढं, तमः प्रभिन्दन् भुवि मंगलाय प्रतिभाति । नूनं निश्चयः । प्रतिपूर्वक भाधातोः कर्तरि लट् । सावयवरूपकालंकारः ॥ ५१ ॥

उत्तमाङ्गं वर्णयति—

सुमौलिसंसक्तमयूरपिञ्छव्याजप्रभामञ्जुलबर्हिसंघः ।
प्रत्यग्रतद्विग्रहवारिवाहे नरीनृतीतीति विचित्र मेतत् ॥ ५२ ॥

सुमौलीति ॥ सुमौलिसंसक्तमयूरपिञ्छः तस्य व्याज इति प्रभया मञ्जुलो बर्हिसंघः मयूरसंघः 'मयूरो बर्हिणो बर्ही' त्यमरः । प्रत्यग्रे अभिनवे

'प्रत्यग्रोऽभिनवो नव्य' इत्यमरः। तस्य भगवतो विग्रह एव वारिवाहो मेघ स्तस्मिन् नरीनृतीतीति पुनःपुनः नृत्यतीति यत् एतत् विचित्र माश्चर्यम् ॥ नृती-धातो र्यङ्लुगन्ता त्कर्तरि लट् ॥ ५२ ॥

त्रिभि र्गात्रं वर्णयति—

नीलं विषं पीतचरं स्वदेहा द्वमन्निवासौ नवनीरदाभः।
संछादयन् घोष मतीव कान्त्या बभौ प्रदोषे कुलटासहायः ॥५३॥

नीलमिति ॥ नवनीरदाना माभेवाभा यस्य सः। प्रदोषे रजनीमुखे 'प्रदोषो रजनीमुख' मित्यमरः। कुला त्कुल मटन्ति संचरन्तीति कुलटाः 'पुंश्चली धर्षिणी बन्ध क्यसती कुलटेत्वरी' त्यमरः। शकन्ध्वादित्वा त्पररूपम्। तासां सहायः कान्त्या घोषं संछादयन् आच्छादयन् असौ श्रीकृष्णः पूर्वं पीतंपूतना-स्तन्यपानकाले पीतं पीतचरं 'भूतपूर्वे' इति चरट्। नीलं विषं स्वदेहात् अतीव वमन् उद्गिरन्निव बभौ। भाधातोः कर्तरि लिट्। उक्तवस्तूत्प्रेक्षालङ्कारः ॥५३॥

उक्तमेवार्थं भङ्ग्यन्तरेणाह—

नीलाम्बरस्यानुजदेहकान्त्या दया धृता नीलसरोजसंघे।
नीलाम्बरे नीलघने नितान्तं नो चेत्कथं कान्तिलवोऽपि तेषाम् ॥५४॥

नीलेति ॥ नीलाम्बरस्य बलरामस्य अनुजस्य श्रीकृष्णस्य देहकान्त्या कर्त्र्या नीलसरोजाना मुत्पलानां संघे, नीलाम्बरे नीलाकाशे नीलघने नितान्तं दया धृता। नोचेत् दयाधारणाभावे तेषां पूर्वोक्तानां कान्तिलवोपि कान्ति-लेशोऽपि 'लवलेशकणाणव' इत्यमरः। कथम्? न स्या दित्यर्थः ॥ ५४ ॥

रराज नीलाञ्जनतुल्यकृष्णनवीनमेघस्य दयारसस्य।
मध्ये समावेष्टितसूक्ष्मचारुसुवर्णपीताम्बरचञ्चलाऽलम् ॥५५॥

रराजेति ॥ दयैव रसः उदकं यस्य सः तस्य। नीलाञ्जनेन तुल्यः कृष्ण एव नवीनमेघः नूतनवारिदः 'नवीनो नूतनो नव' इत्यमरः। तस्य

मध्ये मध्यप्रदेशे समावेष्टितं सूक्ष्मं चारु सुवर्णं शोभनवर्णयुक्तं पीताम्बर मेव चंचला विद्युत्। 'विद्युत् चञ्चला चपला अपि' इत्यमरः। अलं भृशं रराज बभौ। राजतेः कर्तरि लिट्। रूपकालङ्कारः ॥ ५५ ॥

अथ श्लोकषट्केन मृद्भक्षणलीला वर्ण्यते —

बालै स्समं तौ बलरामकृष्णौ जगत्प्रधाने नितरां महान्तौ।
व्रजाङ्गनानां मुद मादधानौ क्रीडाविहाराय जवा दयाताम् ॥५६॥

बालैरिति ॥ जगतः प्रधाने कारणे नितरां महान्तौ श्रेष्ठौ व्रजांगनानां गोपिकानां मुदं आदधानौ कुर्वन्तौ तौ बलरामकृष्णौ बालै स्समं क्रीडाविहाराय क्रीडितुं जवा दयातां गतौ। या धातोः कर्तरि लङ् ॥ ५६ ॥

मृल्लेशसंमिश्रितपाणिपद्मः करीषपङ्काङ्कितपादयुग्मः।
वत्सानुगो धूलिवितानयुक्तो रामेण सायं गृहमाययौ सः ॥ ५७॥

मृदिति ॥ मृदः लेशैः कणैः। 'लवलेशकणाणव' इत्यमरः। संमिश्रिते पाणी पद्मे इव पाणिपद्मे यस्य सः। वत्सा ननु गच्छतीति वत्सानुगः। अत एव करीषपङ्केन गोमयशुष्कपङ्केन 'तत्तु शुष्कं करीषोऽस्त्री' त्यमरः। अङ्कितं पादयुग्मं यस्य सः श्रीकृष्णः धूलिवितानेन पांसुसंघेन युक्तः सन्। 'रेणु र्द्वयोः स्त्रियां धूलिः पांसु र्ना न द्वयो रजः', 'प्गो वितान' मिति चामरः। रामेण बलरामेण सह सायंकाले गृह माययौ आजगाम। आङ्पूर्वकयाधातोः कर्तरि लिट् ॥ ५७ ॥

मातरि मृद्भक्षणं निवेदयति --

अनेन कृष्णेन मृ दम्ब जग्धा मया समं क्रीडितु मागतेन।
इत्यध्यवादी द्धलपाणि रेनां समक्ष मेषां व्रजबालकानाम् ॥५८॥

अनेनेति ॥ हे अम्ब यशोदे मया सह क्रीडितुं रन्तु मागतेन अनेन पुरोवर्तिना कृष्णेन मृत् मृत्तिका 'मृण्मृत्तिके' त्यमरः। एषां व्रजबालकानां

समक्षं प्रत्यक्षं जग्धा भक्षिता इति हलपाणिः बलरामः एनां यशोदां अध्यवादीत अवोचत् । अधिपूर्वा द्वदधातोः कर्तरि लुङ् । वदव्रजेति वृद्धिः ॥ ५८ ॥

वक्त्रव्यादानव्याजेन विश्वरूपं दर्शयति —

पश्याम्ब मेऽनार्य मिति क्षणेन व्यादाय वक्त्रं समदर्शय त्सः ।
दृष्ट्वा तदन्त र्जगतां त्रयं सा विस्मापयामास निमीत्य नेत्रे ॥५९॥

पश्येति ॥ स श्रीकृष्णः हे अम्ब मातः मे अनार्यं अनुचितं पश्येति क्षणेन वक्त्रं व्यादाय विवृत्य समदर्शयत् दर्शयांचकार । सा यशोदा तस्मि न्मुखेऽन्तः जगतां त्रयं लोकत्रयं दृष्ट्वा नेत्रे निमीलय मुकुलीकृत्य आत्मान मिति शेषः । विस्मापयामास विस्मापितवती । विपूर्वक स्मिङ्धातो र्णिचि आत्वे पुकि अनुप्रयोगः कर्तरि लिट् । इन्द्रवज्रावृत्तम् ॥ ५९ ॥

शिशुमुखे लोकत्रयं दृष्ट्वा विकल्प मापेत्याह—

दोषस्य नाभावत एव मोहः नादर्शभानं कि मसम्मुखग्रहात् ।
स्वप्नोऽथवा जाग्रति किं तु नायं माता विकल्पं समपद्यतेति सा ॥६०॥

दोषस्येति ॥ अयं शिशुमुखे प्रपञ्चसाक्षात्कारो मोहः भ्रमः किं? दोषस्याभावतः अभावादेव न, दोषजन्यत्वाभावात् न भ्रम इति भावः । आदर्शभानं किं? दर्पणप्रतिफलनं किं? असम्मुखग्रहात् भावप्रधानोऽयं निर्देशः । अनभिमुखवस्तुजन्यत्वा न्न । आदर्शे हि पुरोवर्तिवस्तुन एव प्रतिफलन मिति भावः । अथवा स्वप्नः किं नु? जाग्रति जाग्रदवस्थायां जाग्रत्कालीनत्वा दयं न स्वप्नः । जाग्रति हि तस्य प्रपञ्चसाक्षात्कारस्य स्वप्नरूपत्वं न संभवतीति भावः । इति माता सा यशोदा विकल्पं समपद्यत प्राप । संपूर्वकपदधातोः कर्तरि लङ् । अत्र शिशुमुखे प्रपञ्चसाक्षात्कारं मोहादिरूपतया सन्दिह्य दोषजन्यत्वाभावादिविशेषदर्शनेन मोहत्वादिनिषेधेऽपि कुक्षिस्थाखिललोकदर्श-नादिप्रपञ्चसाक्षात्कारत्वनिश्चयाभावात् निश्चयगर्भसन्देहालङ्कारः । तदुक्तं विद्यानाथेन —

विषयो विषयी यत्र सादृश्या त्कविसंमतात् ।
सन्देहगोचरौ स्यातां सन्देहालंकृतिश्च सा ॥

अर्धसमवृत्तम् ॥ ६० ॥

हे कृष्ण कृष्णोऽसि पिधेहि वक्त्र मलं चरित्रै रतिमानुषै स्ते ।
चित्रं तृणावर्तबकानुजादिमायाविनां हन्तरि न त्वयीदम् ॥६१॥

हे कृष्णेति ॥ हे कृष्ण अतिमानुषैः मानुष मतिक्रान्तैः ते तव चरित्रैः कुक्षिस्थाखिललोकदर्शनादिरूपचरित्रै रलं पर्याप्तम् । वक्त्रं पिधेहि । त्वं कृष्णोऽसि । तृणावर्तः बकानुजा पूतना आदिः येषां तेषां मायाविनां हन्तरि त्वयि इदमखिललोकदर्शनं न चित्रं; अत्र विज्ञातश्रीकृष्णस्य पुनर्विधान मनुपयुक्तं सत् अर्थान्तरं गर्भीकरोति । तच्च मायाविनां हन्तरीत्यादिपदै राविष्कृतत्वात् विध्यलङ्कारः । तदुक्तं – "सिद्धस्यैव विधानं य त्ता माहु र्विध्यलंकृतिम्" इति ॥ ६१ ॥

योऽ स्यैव मायेति विनिश्चितार्थां स्वस्मिन् रमेशप्रतिभां चकार ।
क्षणा दसौ ता मकरो त्तनूजबुद्धिं विचित्रं न च विश्वरूपे ॥६२॥

य इति ॥ यः श्रीकृष्णः अस्यैव भगवतः मायेति विनिश्चितः अर्थो यया तां, मातर मिति शेषः । स्वस्मिन् रमेश इति प्रतिभा बुद्धिः यस्या स्तथाभूतां चकार । असौ श्रीकृष्णः क्षणात् तां मातरं तथाभूतां तनूज इति बुद्धि र्यस्या स्तथाभूतां । अकरो च्चकार । विश्वरूपे सर्वात्मके भगवति न च विचित्रं चित्रं न भवति ॥ ॥ ६२ ॥

क्रीडन्त मालोक्य चिराय माता पिपासया श्रान्तिगतं सुतं सा ।
पिबाद्धि दध्यन्न मिति स्म वाचं मुग्धा मुहु र्यज्ञभुजं जगाद ॥६३॥

क्रीडन्तमिति ॥ मुग्धा भगवद्विषये मुग्धा सा माता यशोदा चिराय बहु-कालेन, पिपासया पानेच्छया, श्रान्तिगतं क्रीडन्तं यज्ञभुजं विष्णुं सुत मालोक्य

दधि पिब अन्न मद्धि इति मुहुः वाचं जगाद उवाच । स्म आश्चर्यम् । गदधातोः कर्तरि लिट् । अत्र पिब अद्धि दधि अन्न मिति वर्णना यथासंख्यालङ्कारः । तदुक्तं–यथासंख्यं क्रमणैव क्रमिकाणां समन्वयः ' इति ॥ ६३ ॥

तदुक्ति माकर्ण्य बलानुजोऽसौ मुरारि रत्यन्त मुता दरेण ।
अजक्ष दन्नादिक मम्बुजाक्षो मुदं वितन्वन् सह सीरिणाऽपि ॥ ६४ ॥

तदुक्ति मिति ॥ अम्बुजे इवाक्षिणी यस्य स मुरारिः असौ बलानुजः श्रीकृष्णः तस्या यशोदाया उक्तिं वाक्यं आकर्ण्य श्रुत्वा । अत्यन्तं मुदं वितन्वन् प्रीतिं जनयन् सीरिणा रामेण सह अपिना बाला स्समुच्चीयन्ते । अन्नादिक मादरेण अजक्षत् । उताश्चर्यम् । जक्षधातोः कर्तरि लङ् । 'अड् गार्ग्यगालवयो' रित्यडागमः ॥ इन्द्रवज्रा वृत्तम् ॥ ६४ ॥

तं सर्वलोकसुहृदं निजमन्दिरेषु गोप्यो मनोहरगभीरविचित्रवाक्यैः ।
तोष्टूय्यमानगुणसंहतिकीर्तिभाजं दृष्ट्वा मुहुः परमतृप्ति मवापु रुत्काः ॥६५॥

तमिति ॥ गोप्यः गोपिकाः निजमन्दिरेषु स्वस्वगेहेषु मनोहरै गंभीरैः विचित्रवाक्यैः विनोदवाक्यैः तोष्टूय्यमाने पुनः पुनः स्तूयमाने । स्तौते र्यङन्ता त्कर्मणि शानच् । गुणानां संहतिः समूहः कीर्तिश्च ते भजतीति तथोक्तम् । सर्व-लोकसुहृदं सर्वलोकप्रियं, तं बालं दृष्ट्वा उत्काः उन्मनसः सत्यः । 'उत्क उन्मना' इति निपातः । 'स्या दुत्क उन्मना' इत्यमरः । परमतृप्तिं उत्कृष्टप्रीतिं, 'स्त्रियाः पुंव' दिति पुंवद्भावः । मुहुः अवापुः प्रापुः । अवपूर्वादाप्लृधातोः कर्तरि लिट् । वसन्ततिलकावृत्तम् ॥ ६५ ॥

श्रीकृष्णदेवदृढभक्तवरेण गीत-
काव्ये लसद्गुणविमत्सरपण्डितानाम् ।
सन्तुष्टये समरसे रुचिरे मुरारे-
स्सर्गो गुणैः प्रियतमो गलित स्तृतीयः ॥ ६६ ॥

श्रीकृष्ण इति ॥ श्रीकृष्णदेवस्य दृढभक्तवरेण पुण्यकोटिनेति शेषः । लसद्गुणानां विमत्सरपण्डितानां सन्तुष्टये सन्तोषाय । रुचिरे समरसे गीतकाव्ये मुरारेः श्रीकृष्णस्य गुणैः प्रियतमः तृतीयस्सर्गः गलितः पूर्ण स्समाप्तः ॥ ६६ ॥

इति श्रीपुण्यकोटिकृते श्रीकृष्णविलासे सव्याख्याने

॥ तृतीय स्सर्गः समाप्तः ॥

चतुर्थ स्सर्गः

देवादिदेवः पयसां समृद्धिमद्गेहेऽस्य नन्दस्य रराज माधवः ।
क्षीरोदधौ विष्णु रिवातिरागवत्पद्मादिरेखाविलसत्पदाम्बुजः ॥१॥

देवेति । अतिरागवतीभिः अत्यन्तरक्तिमवतीभिः, पद्मादिरेखाभिः विलसती पदाम्बुजे यस्य सः । देवानां ब्रह्मादिदेवानां, आदिदेवः पुरातनः माधवः श्रीकृष्णः अस्य नन्दस्यपयसां क्षीराणां, समृद्धिमद्गेहे क्षीरोदधौ क्षीरसागरे विष्णुरिव रराज । राजृधातोः कर्तरि लिट् । उपमालङ्कारः । इन्द्रवंशावृत्तम् – 'स्यादिन्द्रवंशा ततजैरसंयुतै' रिति लक्षणात् ॥ १ ॥

स बालगोपालसहस्रसेनया समावृत श्शक्र इवामरावृतः ।
अतीव दुग्धादिकचौर्यचातुरो दधीहयाऽमत्रजयाय निर्ययौ ॥ २ ॥

स इति । बालगोपालानां सहस्रं यस्यां सा । सहस्रा च सा सेना च तया सेनया समावृतः अतीव अत्यन्तं दुग्धं आदि येषां नवनीतादीनां चौर्ये स्तेये चातुरः चतुरः । स्वार्थे अण् । अमरैः देवैः आवृतः शक्र इव श्रीकृष्णः दध्नः ईहया इच्छया अमत्रजयाय दधिभाण्डजयाय । 'पात्रामत्रे च भाजन' मित्यमरः । निर्ययौ निर्जगाम । निर् पूर्वकयाधातोः कर्तरि लिट् । वंशस्थं वृत्तम् 'जतौ तु वंशस्थ मुदीरितं जरा' विति लक्षणात् ॥ २ ॥

अत्यन्तधावल्यतनूरुहाणां कान्त्या युतं बालविडालचक्रम् ।
सहाय मासाद्य स वल्लवीनां जितारि रायाद् भवनानि शौरिः ॥३॥

अत्यन्तेति ॥ जिताः अरयो येन सः । शौरिः श्रीकृष्णः, अत्यन्तं धावल्यं येषां तेषां तनूरुहाणां रोम्णां, 'तनूरुहं रोम लोमे' त्यमरः । कान्त्या युतं

बालबिडालचक्रं बालमार्जालसमूहः। 'ओतु बिडालो मार्जाल' इत्यमरः। सहाय मासाद्य प्राप्य, वल्लवीनां गोपिकानां भवनानि प्रति आयात् आययौ। आङ्पूर्वकयाधातोः कर्तरि लङ् ॥ ३ ॥

तच्चन्द्रशालान्तगतातिशुभ्रकपोतकेतूत्तमपंक्तिभासा।
नासीर मत्यन्त विराजमान मासी त्सुनासीरमखस्य हर्तुः ॥ ४ ॥

तदिति ॥ सुनासीर इन्द्रः। 'वृद्धश्रवा स्सुनासीर' इत्यमरः। तस्य मखस्य यज्ञस्य। 'सप्ततन्तु र्मखः क्रतु' रित्यमरः। हर्तुः श्रीकृष्णस्य नासीरं सेनामुखं, 'सेनामुखं तु नासीर' मित्यमरः। तस्य नन्दस्य चन्द्रशालायाः शिरोगृहस्य, 'चन्द्रशाला शिरोगृह' मित्यमरः। अन्त मुपरिभागं गताः अतिशुभ्रकपोताः पारावताः। 'पारावतः कलरवः कपोतः' इत्यमरः। त एव केतूत्तमाः तेषां पंक्तीनां भासा अत्यन्तविराजमानं आसीत् अवर्तत। अस् धातोः कर्तरि लङ्। रूपकालङ्कारः ॥ ४ ॥

गृहान् प्रविश्याशु सबालसेनः संस्थाप्य तद्द्वारि निवारणाय।
भृत्यान् स्वयं गोकुलदेवसूनुः क्षीरं ग्रहीतुं व्यविशत् गृहान्तम् ॥५॥

गृहानिति ॥ बालानां सेनया सहितः सबालसेनः गोकुलदेवसूनुः नन्द-पुत्रः श्रीकृष्णः गृहान् गोपिकागृहान् आशु प्रविश्य निवारणाय अन्यनिवारणाय, तस्य गृहस्य द्वारि भृत्यान् बालगोपान् संस्थाप्य स्वयं क्षीरं ग्रहीतुं गृहान्तं व्यविशत् प्रविवेश। विपूर्वकविशधातोः कर्तरि लङ् ॥ ५ ॥

कृष्ण स्तदाऽसौ दधिदुग्धसंघान् माधुर्यसौरभ्यगुणादिचुञ्चून्।
ऐक्षिष्ट तत्रोपरिभागभाजो ग्रहीतुकामः करलाघवेन ॥ ६ ॥

कृष्ण इति ॥ तदा करलाघवेन हस्तलाघवेन ग्रहीतुं कामो यस्य सः। 'तुं कामे' ति तुमो मकारलोपः। असौ कृष्णः तत्र गेहे उपरिभागं भजन्तीति

तथोक्तान् माधुर्यसौरभ्यगुणाः आदि येषां इतररसानां तैः चुञ्चून् प्रसिद्धान् । 'तेन वित्त श्चुञ्चुप् चणपा' विति चुञ्चुप् प्रत्ययः । दधिदुग्धसंघान् भाण्डस्थदध्यादीन् ऐक्षिष्ट ददर्श । ईक्षधातोः कर्तरि लुङ् ॥ ६ ॥

आप्लुत्य बालो ह्यनवाप्य काम मचिन्तयत् सर्वसुपर्वरूपः ।
प्राप्तुं न शक्यं करणं विनेति महामहीभृद्गणवन्द्यपादः ॥ ७ ॥

आप्लुत्येति । महतां महीभृतां राज्ञां गणस्य समूहस्य वन्द्यौ पादौ यस्य सः । सर्वेषां सुपर्वणां देवानां 'सुपर्वाण स्सुमनस' इत्यमरः । रूपं स्वरूपं यस्य सः । बालः श्रीकृष्णः । अप्लुत्य उद्गत्य । काम्यत इति कामः । दधिभाण्डग्रहणरूपकामः तं अनवाप्य अप्राप्य करणं साधनं विना प्रातुं न शक्य मिति अचिन्तयत् चिन्तयामास । हि प्रसिद्धौ । चितिधातो र्णिजन्तात् कर्तरि लङ् । इदि त्वान्नुमागमः ॥ ७ ॥

मन्थानवेणुं हरि रेष मेदिनीं हित्वा गृहीत्वाद्भुत मारुरोह ।
चूल्युत्तमं यन्त्रसमीपगामिनं मञ्जीरनिर्घोषभयः शनै श्शनैः ॥८॥

मन्थानेति ॥ एष हरिः श्रीकृष्णः मेदिनीं हित्वा त्यक्त्वा मन्थानवेणुं मन्थानदण्डं, 'वैशाख मन्थ मन्थान मन्थानो मन्थदण्डके' इत्यमरः । गृहीत्वा च मञ्जीराणां नूपुराणां 'मञ्जीरो नूपुरोऽस्त्रिया' मित्यमरः । निर्घोषात् भयं यस्य तथा भूतस्सन् यन्त्रस्य शिक्यस्य समीपगामिनं चूल्युत्तमं पाकसाधनवेदिकाविशेषं, शनैः शनैः अद्भुतं यथा तथा आरूरोह आरूढवान् । अङ् पूर्वकरुहधातोः कर्तरि लिट् । इन्द्रवंशावृत्तम् । लक्षणं तूक्तम् ॥ ८ ॥

विधाय रन्ध्रं मुनिहृद्विहारी निधाय मन्थान मयं धरण्याम् ।
पिधाय नेत्रे शययुक्तवक्त्रः व्यलिक्ष दास्वादु दधि प्रकामम् ॥ ९ ॥

विधायेति ॥ मुनीनां हृदि विहारो यस्यास्तीति सः, अयं श्रीकृष्णः रन्ध्रं भाण्डे रन्ध्रं विधाय कृत्वा, धरण्यां मन्थानं निधाय निक्षिप्य, नेत्रे पिधाय

निमील्य शयेन हस्तेन 'पंचशाखः शयः पाणि' रित्यमरः। युक्तं वक्त्रं यस्य तथाभूत स्सन् अधरसमीपे योजितहस्तद्वयस्सन् इत्यर्थः। आ समन्तात् स्वादु दधि प्रकामं व्यलिक्षत् अपिबत्। विपूर्वकात् लिह् धातोः कर्तरि लुङि 'शल इगुपधा' दिति क्सादेशः। उपेन्द्रवज्रावृत्तम्। लक्षणं तूक्तम् ॥ ९॥

पीयूषमाधुर्यवहां सुधारा ममत्ररन्ध्रा द्विगलत्पृषत्काम्।
दध्नः सुरैः प्रार्थ्यतमां स मूर्ध्नः पिबन् व्यधा त्पानरुचिं विकम्पैः ॥१०॥

पीयूषेति॥ स श्रीकृष्णः पीयूषस्यामृतस्य। 'पीयूष ममृतं सुधे' त्यमरः। माधुर्यवहां माधुर्यं वहतीति तथोक्तां, अमत्रस्य भाण्डस्य रन्ध्रात् विगलन्ति पृषन्ति यस्या स्तां, 'पृषन्तिबिन्दुपृषता' वित्यमरः। सुरै र्देवैः प्रार्थ्यतमां, दध्नः सुधारां पिबन्, मूर्ध्नः विकम्पैः पानस्य रुचिं आस्वादं व्यधात् प्रकटीचकार। विपूर्वात् धाधातोः कर्तरि लुङ् ॥ १०॥

यो लोकदिष्टत्रितयप्रवृत्तसर्वाध्वरादत्तहविःप्रभागः।
तृप्तिं स नाविन्द दनेन तृप्तः तेभ्योऽप्यदा देष हि पीतशेषम् ॥११॥

य इति॥ यः लोके भूलोके 'त्रिष्वथो जगती लोक' इत्यमरः। दिष्टत्रितये कालत्रितये 'कालो दिष्टोऽप्यनेहापि' इत्यमरः। भूतभाविवर्तमान कालेषु प्रवृत्तेषु सर्वेष्वध्वरेषु आ समन्तात् दत्ताः हविःप्रभागाः यस्मै तथा भूतोऽपि तृप्तिं नाविन्दत् न प्राप। सः एषः श्रीकृष्णः अनेन दध्यादि-पानेन तृप्तस्सन् पीतशेषं तेभ्यः गोपेभ्योऽपि अदात् दत्तवान्। विद् धातोः कर्तरि लङ्। अत्र दत्तहविःप्रभागरूपकारणपौष्कल्ये सति तृप्तिरूपकार्या-नुत्पत्तिवर्णनात् विशेषोक्त्यलङ्कारः। तदुक्तम्— 'कार्याजनिर्विशेषोक्तिः सति पुष्कलकारण' इति। इन्द्रवज्रावृत्तम् ॥ ११॥

तत्रान्तरं प्राप्य स बालपालो घटा नभैत्सीत् कलशप्रपूर्णान्।
कदुष्णशान्तोष्णयुता नमूल्यान् सुगन्धसंपूरितदिग्वितानान् ॥१२॥

तत्रेति ॥ बालान् पालयतीति तथोक्तः स श्रीकृष्णः तत्र गेहे अन्तरं अवकाशं, 'अन्तर मवकाशावधि परिधानान्तर्धि भेद तादर्थ्ये' इत्यमरः । प्राप्य कलशेन क्षीरेण प्रपूर्णान् कदुष्णं ईषदुष्णं 'कोष्णं कवोष्णं मन्दोष्णं कदुष्णं त्रिषु तद्वती' त्यमरः । शान्तोष्णं ताभ्यां युतान् अमूल्यान् मूल्यरहितान् सुगन्धेन संपूरितानि दिग्वितानानि दिक्संधाः । 'पूगो वितानं प्रकर' (?) मित्यमरः । येषां तान् घटान् अभैत्सीत् विभेद । भिदिर् धातोः कर्तरि लुङ् ॥ १२ ॥

ईषद्गलत्स्वादुपयःप्रपूर्णं घटं स हस्ते हरि राशु धृत्वा ।
एत स्म वः पान महं प्रदास्य इत्याह तान् माक्षिक माक्षिपद्वाक् ॥१३॥

ईषदिति ॥ स हरिः श्रीकृष्णः, ईषत्गलत्स्वादुपयसा मधुरक्षीरेण प्रपूर्णं घटं हस्ते आशु धृत्वा हे बालाः एत अगच्छत । आङ्पूर्वक इण् धातोः कर्तरि लोट् । वः युष्माकं पीयत इति पानं पयः अहं प्रदास्ये इति तान् बालान् माक्षिकं मधु आक्षिपन्ती तिरस्कुर्वती वाक् यस्य तथा भूतस्सन् आह स जगाद । ब्रूञ् धातोः कर्तरि लट् । 'ब्रुवः पञ्चाना 'मित्याहादेशः । स्मयोगाद् भूतार्थकत्वम् ॥ १३ ॥

अपेक्षितं याव दहो सखिभ्य स्ताव त्प्रदायाशु पय स्स तत्र ।
मुदं प्रलेभे जनताघहर्ता हसन् तदा गोकुलदेवसूनुः ॥ १४ ॥

अपेक्षित मिति ॥ तत्र गेहे जनानां समूहो जनता 'ग्रामजनबन्धुभ्य' इति तल्प्रत्ययः । तस्या अघस्य पापस्य हर्ता गोकुलदेवसूनुः नन्दपुत्रः सः श्रीकृष्णः याव दपेक्षितं ताव दपि पयः क्षीरम्; सखिभ्यः बालेभ्य; आशु प्रदाय दत्वा, तदा हसन् मुदं प्रलेभे प्राप । अहो आश्चर्यम् । प्रपूर्वकलभधातोः कर्तरि लिट् ॥ १४ ॥

तस्मिन् क्षणे वीक्ष्य लसत्पयोधरां मुग्धां वधूं नूतनयौवनोदयाम् ।
गण्डूषफूत्कारनिमीलितेक्षणां कृत्वाऽग्रहीत् कञ्चुकमञ्जसा हरिः ॥१५॥

तस्मि न्निति ॥ हरिः श्रीकृष्णः । तस्मिन् क्षणे पयःप्रदानसमये लसन्तौ अभिव्यक्तौ पयोधरौ स्तनौ । 'स्त्रीस्तनाब्दौ पयोधरा' वित्यमरः । यस्याः तां, नूतनः यौवनस्य उदयः प्रादुर्भावः यस्या स्तां मुग्धां वधूं वीक्ष्य गण्डूषफूत्कारेण निमीलिते ईक्षणे यस्या स्तथा भूतां कृत्वा अञ्जसा कञ्चुक मग्रहीत् गृहीतवान् । ग्रहधातोः कर्तरि लुङ् । इन्द्रवज्रावृत्तम् । लक्षणं तूक्तम् ॥१५॥

तेनैव सा बाल मभूत् ग्रहीतुं स्वपाणिना धूलिपिनद्धनेत्रा ।
विचिन्वती तं मुनिभि र्विमृग्यो विशुद्धहृत्पद्मदलान्तरे यः ॥१६॥

तेनैवेति ॥ सा गोपिका यः भगवान् मुनिभिः विशुद्धस्य हृत्पद्मस्य दलानामन्तरे मध्ये विमृग्यः मृगयितुं योग्यः तं बालं बालरूपं भगवन्तं स्वपाणिना ग्रहीतुं विचिन्वती तेन कृष्णेनैव धूल्या पिनद्धे आच्छादिते नेत्रे यस्या स्तथाभूता अभूत् । भूधातोः कर्तरि लुङ् । अत्र बालग्रहणं इष्यमाणर्थः, तद्विरुद्धदृष्टिनाशप्राप्तिवर्णनात् विषादनालङ्कारः । तदुक्तम्— 'इष्यमाणविरुद्धार्थसंप्राप्तिस्तु विषादन' मिति ॥ १६ ॥

बालं भीषयन्ती आह—

रे रे शिशो चोर गृहान् गतो नो जारोऽसि दौष्ट्यं तव वच्मि मात्रे ।
नूनं यदि त्वं मम नेत्रमार्गं गन्ता न चे दद्य तु सेत्युवाच ॥ १७ ॥

रे रे इति ॥ रे रे शिशो बालचोर जारः त्वं नः अस्माकं गृहान् गतोऽसि । मम नेत्रमार्गं चक्षुष्पथं अद्य तु अद्यैव गन्ता, तृन्नन्तः । न चे न्न भवसि यदि तव दौष्ट्यं स्तनग्रहणरूपं दौष्ट्यं मात्रे यशोदायै वच्मि वदामि । नून मिति गोपी उवाच । वचधातोः कर्तरि लिट् । अभ्यासस्येति संप्रसारणम् । इन्द्रवज्रावृत्तम् । लक्षणं तूक्तम् ॥ १७ ॥

एवं भीषयन्तीं गोपिकां श्रीकृष्णः भीत इवाह—

न या स्यये त्वं यदि मातरं मे गृहात्तवाहं स्वगृहं प्रयामि ।
इति स्म तां सर्वगतः कुमारो वाचं जगादातिविडम्बनं सः ॥१८॥

न यासीति ॥ अये हे गोपिके त्वं मे मातरं न यासि यदि अहं तव गृहात् स्वगृहं स्वगेहं प्रयामि इति सर्वगतः व्यापकः स कुमारः श्रीकृष्णः तां गोपिकां अतिविडम्बनं यथा तथा वाचं जगाद । स्म आश्चर्यम् ॥ १८ ॥

वेश्मान्तरं यातुमनाः स गोपो निर्गत्य गोपीभवना द्रमेशः ।
वीथीषु गायन् हरि राशु सद्म न्यवीविशन् मुग्धवधूजनस्य ॥१९॥

वेश्मेति ॥ गोपैः सहितः सगोपः । अन्यत् वेश्म वेश्मान्तरं यातुं मनो यस्य सः । 'तुं काम मनसो रपीति' तुमो मकारलोपः । रमेशः हरिः श्रीकृष्णः गोपीभवनात् निर्गत्य निष्क्रम्य वीथीषु गायन् मुग्धवधूजनस्य कस्यचित् गोपिकाजनस्य सद्म आशु न्यवीविशत् प्रविवेश । विशधातोः कर्तरि णिचि लुङि चङि सन्वद्भावेऽभ्यासदीर्घः ॥ १९ ॥

आदौ कवाटं सुदृढं निबध्य प्रविश्य सोऽन्य त्सदनं वधूटीम् ।
चेलान्तरं दुष्टभुजङ्गयुक्त मुक्त्वाऽकरो त्ता मिति वस्त्रहीनाम् ॥२०॥

आदाविति ॥ स श्रीकृष्णः अन्यत् सदनं प्रविश्य, आदौ कवाटं सुदृढं यथा तथा निबध्य, वधूटीं गोपिकां चेलान्तरं वसनमध्य, 'चेलं वसन मंशुक' मित्यमरः । दुष्टभुजङ्गेन कृष्णसर्पेण युक्तं इति उक्त्वा तां गोपिकां वस्त्रहीनां अकरोत् चकार । कृधातोः कर्तरि लङ् ॥ २० ॥

अन्योन्यहस्तप्रभवप्रतालै र्बालैश्च तस्यां नटवेषभाजि ।
कृष्णेन युक्तेन परिप्रहासै रहस्यतात्यन्तमुदा चिरण्टी ॥ २१ ॥

अन्योन्येति ॥ तस्यां गोपिकायां नटवेषभाजि नृत्यन्त्यां सत्यां अन्योन्यं परस्परं हस्तप्रभवाः हस्तोत्पन्नाः प्रतालाः येषां तैः बालैः युक्तेन कृष्णेन, परि-

प्रहासैः नर्मोचितवाक्यैः अत्यन्तं मुदा चिरण्टी गोपिका ; 'चिरण्टी तु सुवासिनी' इत्यमरः । अहस्यत परिहसिता । हसधातोः कर्मणि लङ् ॥ २१ ॥

पलायनेच्छां परिहासभाजां ज्ञात्वा हरि र्मन्दिरभाण्डसंघान् ।
भित्त्वा स गोपीं नवनीतयुक्तान् हैयंगवीनं समजक्ष दाशु ॥२२॥

पलायनेच्छा मिति ॥ स हरिः श्रीकृष्णः परिहासं भजतीति तथोक्तां गोपीं, पलायने इच्छा यस्या स्तथाभूतां ; ज्ञात्वा ; नवनीतयुक्तान् 'नवनीतं नवोद्धृत' मित्यमरः । मन्दिरस्थान् भाण्डसंधान् भित्त्वा, हैयंगवीनं नवनीतं, 'हैयंगवीनं संज्ञाया' मिति निपातनात् साधुः । आशु समजक्षत् अखादत् । संपूर्वक जक्षधातोः कर्तरि लङ् ॥ २२ ॥

काऽप्यन्त रालक्ष्य गृहे किशोरं किमत्र कार्यं तव बालकेति ।
मातेऽस्य वक्तुं परिभिन्नभाण्डसंघान् कवाटं स्वय माबबन्ध ॥२३॥

काऽपीति ॥ काऽपि गोपिका अन्तरा गृहे गृहमध्ये, किशोरं श्रीकृष्णं, परितः भिन्नभाण्डसंघांश्च आलक्ष्य दृष्ट्वा , हे बालक तव अत्र गृहे किं कार्य मिति उक्त्वेति शेषः । अस्य बालकस्य मात्रे यशोदायै वक्तुं कवाटं स्वयं आबबन्ध बध्नाति स्म । बन्ध् धातोः कर्तरि लिट् ॥ २३ ॥

गत्वा जवात् सद्म वरस्य मात्रे ख्यातुं सुतस्यास्य विचेष्टितं सा ।
दृष्ट्वा सुतं तत्र विहारभाजं ह्रिया स्वगेहं समगात् पुनश्च ॥ २४ ॥

गत्वेति ॥ सा गोपिका वरस्य अस्य सुतस्य श्रीकृष्णस्य विचेष्टितं, नवनीतचौर्यादिकं मात्रे यशोदायै ख्यातुं सद्म गृहं जवात् गत्वा तत्र मातृसमीपेऽपि विहारभाजं क्रीडन्तं सुतं दृष्ट्वा , ह्रिया लज्जया पुनश्च गेहं समगात् ययौ । संपूर्वक इण् धातोः कर्तरि लुङि गादेशः ॥ २४ ॥

अन्यां कुमारी मधिशय्य शय्यां व्यादाय दृष्ट्वा वदनं प्रसुप्ताम् ।
लिप्त्वा कुचाग्रे नवनीत मास्ये दत्वा स तस्याः पर माप हर्षम् ।।२५।।

अन्यामिति ।। स श्रीकृष्णः शय्या मधिशय्य ; 'अधि शीङ् स्थासां कर्मे' त्याधारस्य कर्मत्वं; शय्यायां शयित्वेत्यर्थः । शीङ् धातोः ल्यपि 'अयङ् यि क्ङिति' अयङादेशः । वदनं व्यादाय विवृत्य प्रसुप्तां अन्यां कुमारीं गोपिकां दृष्ट्वा तस्याः कुचाग्रे नवनीतं लिप्त्वा, आस्ये मुखे दत्वा निक्षिप्येत्यर्थः । परं हर्षं आप प्राप । आप्लृ धातोः कर्तरि लिट् । इन्द्रवज्रा वृत्तम् ।। २५ ।।

तच्चूचुके न्यस्य मुखं बिडालचक्रस्य गोपोऽय मतीव धूर्तः ।
उक्त्वा च तां जागृहि पश्य वाच मिति प्रहासेन ननर्त शौरिः ।।२६।।

तदिति ।। अतीव धूर्तः अयं गोपः शौरिः श्रीकृष्णः तस्या गोपिकायाः चूचुके कुचाग्रे, 'चूचुकं तु कुचाग्रं स्या' दित्यमरः । बिडालानां मार्जालानां 'ओतु बिडालो मार्जाल' इत्यमरः । चक्रस्य समूहस्य । मुखं न्यस्य निक्षिप्य तां शयानां जागृहि पश्य इति प्रहासेन वाचमुक्त्वा च ननर्त नर्तनं कृतवान् । नृतीधातोः कर्तरि लिट् ।। २६ ।।

तदा प्रकोपां समुदीक्षमाणां दष्टाधरां हस्तगृहीतदण्डाम् ।
इत स्ततो ऽधाव दसा वभीतः तत्रैव गेहे रमणीं प्रधर्ष्यन् ।। २७ ।।

तदेति ।। अभीतः भयरहितः असौ श्रीकृष्णः तदा तस्मिन् काले प्रकृष्टः कोपो यस्या स्तां सम्यगुदीक्षमाणां दष्टः अधरः यस्या स्तां, हस्ते गृहीतः दण्डः यया तां रमणीं गोपिकां प्रधर्ष्यन् तिरस्कुर्वन् तत्रैव गेहे इतस्ततः अधावत् दधाव । धावु धातोः कर्तरि लङ् ।। २७ ।।

तस्या स्समक्षं जयतां वरोऽयं हैयंगवीनं परिगृह्य हस्ते ।
पलायते वातिभयाद् ध्वजादिचिह्नै स्तदा वीथि मलंकरिष्णुः ।।२८।।

तस्या इति ॥ जयतां वरः अयं श्रीकृष्णः तस्या गोपिकायाः समक्षं हैयंगवीनं नवनीतं हस्ते परिगृह्य अतिभयात् अत्यन्तभयादिव ध्वजादिचिह्नैः ध्वजरेखा आदिः येषां पद्मादीनां तै श्चिह्नैः तदा वीथि मलंकरिष्णु स्सन् । 'अलं कृञ्' इत्यादिना इष्णुच् प्रत्ययः । पलायत अधावत् । परापूर्वकअयधातोः कर्तरि लङ् । 'उपसर्गस्यायता' विति लत्वम् ॥ २८ ॥

मुहु र्मुहु स्तत्र मुदा चरिष्णोः मन्थाननादश्रुतिलग्न आसीत् ।
प्रविश्य गेहं हरि राशु गोपी मयाचताऽयं नवनीतखण्डम् ॥ २९ ॥

मुहुर्मुहुरिति ॥ तत्र वीथ्यां मुहुर्मुहुः मुदा चरिष्णोः 'अलं कृ' ञित्यादिना इष्णुच् प्रत्ययः । संचरतो भगवतः मन्थाननादः । श्रुतौ श्रोत्रे । 'श्रुतिः स्त्री श्रवणं श्रवः' इत्यमरः । लग्नः आसीत् । अयं हरिः श्रीकृष्णः गेहं नादोत्पत्तिस्थानभूतं गृहं आशु प्रविश्य, गोपीं नवनीतखण्डं अयाचत ययाचे । दुह्यादित्वा द्विकर्मत्वम् । याचधातोः कर्तरि लङ ॥ २९ ॥

मन्थानरश्मीन् परिगृह्य मञ्जु शयद्वयेनाशु निमथ्नतीं सः ।
अचष्ट वस्त्रोत्तमबद्धमध्यां गलत्कचां पीनकुचालसां ताम् ॥३०॥

मन्थानेति ॥ श्लोकद्वय मेकं वाक्यम् । सः श्रीकृष्णः मन्थानस्य रश्मीन् रज्जूः । 'किरणप्रग्रहौरश्मी' त्यमरः । शयद्वयेन हस्तद्वयेन परिगृह्य गृहीत्वा मञ्जु यथा तथा आशु निमथ्नतीं मथनं कुर्वतीं च वस्त्रोत्तमेन बद्धं मध्यं यस्या स्तां, गलन् कचः यस्या स्ताम् । 'कचः केशः शिरोरुह' इत्यमरः । पीनकुचाभ्यां अलसां मन्दां तां गोपीं अचष्ट अवोचत् । चक्षिङ् धातोः कर्तरि लङ् ॥ ३० ॥

याचाम्यये त्वा मह मद्य गव्यं पातुं पय स्स्वोदरपूरणार्हम् ।
देहीति वाचं वटु रञ्जसेव बालो बलिं वञ्चितु मात्तमायः ॥ ३१ ॥

याचामीति ॥ अयि हे गोपिके । अद्य अहं त्वां स्वोदरस्य पूरणार्हं पूरयितुं योग्यं गव्यं गोर्विकारः । 'गोपयसो' रिति यत्प्रत्ययः । तत् पयः क्षीरं पातुं याचामि । अञ्जसा देहि । दा धातोः कर्तरि लोट् । इति बलिं बलिचक्रवर्तिनं वञ्चितुं आत्ता माया येन सः । बालः वटुः वामन इव वाचं अचष्ट इति पूर्वेणान्वयः । सर्वहरणेच्छयेति भावः । पूर्णोपमालङ्कारः । इन्द्र-वज्रावृत्तम् ॥ ३१ ॥

तदन्तरोत्सिक्तपयःप्रपूर्णभाण्डा न्यवेक्ष्याऽऽशु समीप माप्य ।
सन्नीय भूमौ स्वगृहक्रियासु तत्रैव साऽभू त्सुविलग्नचित्ता ॥३२॥

तदन्तरेति ॥ सा गोपी तदन्तरा याचनासमये उत्सिक्तपयसा उद्धृत-क्षीरेण प्रपूर्णानि भाण्डानि अवेक्ष्य दृष्ट्वा आशु समीप माप्य भूमौ सन्नीय अधः नीत्वा तत्रैव स्वगृहक्रियासु सुष्ठु विलग्नं चित्तं यस्याः तथाभूता अभूत् । भूधातोः कर्तरि लुङ् ॥ ३२ ॥

अगा दसौ क्षीरघटा न्विलोकितुं गृहान् प्रवेष्टुं समयोऽद्य नस्त्विति ।
मुदाऽर्भका नन्दसुतानुयायिनो गिरं जगु स्तं पुरुहूतमानदम् ॥ ३३ ॥

अगादिति ॥ नन्दसुतं श्रीकृष्ण मनुयान्तीत्यनुयायिनः । अर्भकाः कर्तारः असौ गोपी क्षीरघटान् विलोकितुं अगात् जगाम । गृहान् प्रवेष्टुं, नः अस्माकं, अद्य तु अद्यैव, समय इति पुरुहूतस्य पुरन्दरस्य । 'पुरुहूतः पुरन्दर' इत्यमरः । मानं ददातीति तथोक्त तं श्रीकृष्णं प्रति गिरं मुदा जगुः ऊचुः । गैधातोः कर्तरि लिट् । वंशस्थवृत्तम् ॥ ३३ ॥

निशम्य गंभीरनिगूढवाक्यं बालैरितं गोपकुमारवेषः ।
गृहं समालक्ष्य पतिं विनूत्ना संगाय नारीव विवेश मन्दम् ॥३४॥

निशम्येति ॥ गोपकुमारस्य वेष इव वेषो यस्य सः श्रीकृष्णः बालै-रीरितं उक्तं गंभीरं निगूढं भावगर्भं वाक्यं निशम्य श्रुत्वा । 'निशम्यतीति श्रवणे

तथा निशमयत्यपि' इति भट्टमल्लः। शाम्यते रेवेदं रूपं अन्यथा निशमय्येति स्यात्। अतएव वामनः 'निशम्य नेशमय्यशब्दौ प्रकृतिभेदा' दिति। गृहं समालक्ष्य लक्षीकृत्य पतिं प्रति विनूतनसंगाय नूतनसंगार्थं 'नवीनो नूतनो नवः नूत्न' श्चे त्यमरः। नारी भार्येव मन्दं यथा तथा विवेश। विशधातोः कर्तरि लिट्। पूर्णोपमालङ्कारः ॥ ३४ ॥

ददर्श धाराभि रतीव शान्तरजोविताने गतमेघसंघे।
व्योम्नि प्रभाजालनितान्तशुभ्रं चन्द्रं तिरस्कुर्व दसौ दधीशः ॥३५॥

ददर्शेति ॥ असौ ईशः श्रीकृष्णः धाराभि र्वर्षधाराभिः अतीव शान्तानि अपगतानि रजोवितानानि यस्मा त्तस्मिन्, गतो मेघसंघः यस्मा त्तस्मिन् व्योम्नि आकाशे प्रभाजालैः कान्तिसमूहैः नितान्तं शुभ्रं अतीव धवलं चन्द्रं तिरस्कुर्वत् आक्षिपत् दधि ददर्श। दृशिर् धातोः कर्तरि लिट् ॥ ३५ ॥

आहूय बालान् करसंज्ञयाऽसौ मार्जालसंघै स्सहितान् वयस्यान्।
तानाह वाचं पिबताधुनेति यथेष्ट मत्र स्म दधि प्रकृष्टम् ॥ ३६ ॥

आहूयेति ॥ असौ श्रीकृष्णः मार्जालसंघै स्सहितान् युक्तान्, वयस्यान् वयसा तुल्यान्, 'नौवयो धर्मे' त्यादिना यत् प्रत्ययः। बालान् करसंज्ञया करचेष्टया आहूय संबोध्य अधुना इदानीं अत्र गृहे प्रकृष्टं श्रेष्ठं दधि, यथेष्टं इष्ट मनतिक्रम्य पिबत इति तान् बालान् वाचं आह स्म उवाच। दुह्यादित्वाद् द्विकर्मकत्वम्। ब्रूञ् धातोः कर्तरि लटि आहादेशः ॥ ३६ ॥

याव द्धरि र्हन्त मुदा ह्यजक्षत् हैयंगवीनं जगता मधीशः।
ऐक्षिष्ट ताव न्नवनीतचोरं गृहान्तरे सा दधिभाण्डपूर्णे ॥ ३७ ॥

याव दिति ॥ जगतां लोकाना मधीशः ईश्वरो हरिः श्रीकृष्णः हैयंगवीनं नवनीतं मुदा यावत् अजक्षत् अखादत् तावत् सा गोपी दधिभाण्डैः पूर्णे

गृहान्तरे गृहमध्ये नवनीतचोरं श्रीकृष्णं ऐक्षिष्ट अद्राक्षीत्। हन्तेति खेदे। ईक्षधातोः कर्तरि लुङ् ॥ ३७ ॥

रे रे किशोरेश हरे मुकुन्द क्व यासि भो मे गृहमध्यग स्त्वम्।
उक्त्वेति गोपी नयनप्रकम्पैः स्त्रीपुंसयो र्हूति मसौ चकार ॥३८॥

रे रे इति ॥ रे रे हे किशोर बाल ईश हरे भो मुकुन्द मे गृहमध्यं गच्छतीति तथाभूतः त्वं क्व यासि क्व गच्छसि इति असौ गोपी उक्त्वा-नयनयोः प्रकम्पै श्चेष्टाभिः स्त्रीपुंसयोः स्त्रीपुरुषयोः 'अचतुरे' त्यादिना निपातना त्साधुः। हूति माह्वानं; 'हूति कारणाऽऽह्वान' मित्यमरः। चकार। कृञ्धातोः कर्तरि लिट् ॥ ३८ ॥

तस्मिन् क्षणेऽसौ हरि राशु गेहान् ज्ञात्वा प्रयातुं व्यवसाय मस्याः।
मनो दधे मौनिहृदब्जभृङ्गः योगीव संपादितकर्मदेहात् ॥ ३९ ॥

तस्मिन्निति ॥ मौन मेषा मस्तीति मौनिनः तेषां हृदब्जे भृङ्गः भृङ्गाय-मानः, असौ हरिः श्रीकृष्णः, तस्मि न्नेव क्षणे, अस्या गोप्याः, व्यव-सायं स्त्रीपुरुषयोः आह्वानरूपं कार्यं ज्ञात्वा गेहा त्प्रयातु गन्तुं संपादितात् कर्मदेहात्। ल्यब्लोपे पञ्चमी। कर्मदेहं परित्यज्येत्यर्थः। योगीव मनो दधे दधार। धाधातोः कर्तरि लिट्। उपमालङ्कारः ॥ ३९ ॥

सव्येतरस्मि न्नवनीतखण्डं हस्ते प्रगृह्याशु पलायमानम्।
क्षणेन तं बालक मग्रहीत् सा रयात् स्वयं सव्यकरेण गोपी ॥४०॥

सव्येति ॥ सा गोपी गोपिका सव्या दितरस्मिन् दक्षिणे हस्ते 'वामं शरीरे सव्यं स्या दपसव्यं तु दक्षिण' मित्यमरः। नवनीतस्य खण्डं शकलं प्रगृह्य आशु पलायमानं धावन्तं तं बालकं श्रीकृष्णं क्षणेन क्षणकालेन रयात् जवात् स्वयं सव्यकरेण वामहस्तेन अग्रहीत् जग्राह। ग्रहधातोः कर्तरि लुङ् ॥ ४० ॥

व्याक्षिप्य तस्याः कर मादिमोऽयं हृत्पुण्डरीके मुनिभि र्विमृग्यः ।
स्थित्वाऽ विदूरे जरठां प्रहस्य हा हेति वाचं हरि रध्यवादीत् ॥४१॥

व्याक्षिप्येति ॥ हृत्पुण्डरीके हृत्कमले मुनिभि र्विमृग्यः अन्वेषणीयः आदिमः 'अग्रादिपश्चा ड्डिमच्' इति डिमच्प्रत्ययः । अय हरिः श्रीकृष्णः तस्या गोप्याः करं व्याक्षिप्य परिहृत्य अविदूरे समीपे स्थित्वा प्रहस्य स्मित्वा जरठां वृद्धगोपिकां हाहा इति वाचं अध्यवादीत अवोचत् । अधिपूर्वकवदधातोः कर्तरि लुङि 'वदव्रजे' ति वृद्धिः । इन्द्रवज्रावृत्तम् ॥ ४१ ॥

योगीन्द्रहृत्पद्मसदानिरुद्धरूपोऽपि तेषां सुतरा मवैतुम् ।
शक्यो न य स्सोऽय ममोघशक्तिः कथं भवे न्मुग्धवधूकरस्थः ॥४२॥

योगीति ॥ यः योगीन्द्राणां हृत्पद्मे हृत्कमले सदा निरुद्धं ध्यातं रूपं स्वरूपं यस्य तथाभूतोऽपि, तेषां योगिनां अवैतुं ज्ञातुम् । अत्र 'वृद्धिरेची' ति वृद्धौ प्राप्तायां 'एङि पररूप' मिति पररूपे प्राप्ते तदपवादत्वेन 'एत्येधत्यूठ्सु' इति वृद्धिः । सुतरां न शक्यः । सोऽयं अमोघा शक्ति र्यस्य स श्रीकृष्णः, मुग्धानां वधूनां करस्थः हस्तगृहीतः कथं भवेत् न भवे दित्यर्थः । भूधातोः कर्तरि विधिलिङ् । अत्र मनोग्रहणायोग्यस्य भगवतः करग्रहणायोग्यत्वं किं वक्तव्य मिति कैमुत्यन्यायसिद्ध मिति काव्यार्थापत्ति रलङ्कारः । तदुक्तम्- 'कैमुत्येनार्थासंसिद्धिः काव्यार्थापत्ति रिष्यत' इति ॥ ४२ ॥

रणल्लसन्नूपुर भूषितांघ्रिसरोजपद्मध्वजचिह्नलक्ष्म्या ।
शनै श्शनै र्गां समलङ्करिष्णुः व्रजेशसूनुः व्रजवीथि मागात् ॥४३॥

रणदिति ॥ रणन्ति लसन्ति नूपुराणि मञ्जीराः । 'मञ्जीरो नूपुरोऽस्त्रिया' मित्यमरः । तै र्भूषिते अंघ्री सरोजे इव तयोः पद्मध्वजौ रेखारूपौ तावेव चिह्नं लक्ष्म तस्य लक्ष्म्या संपदा शनैः शनैः गां भूमिं अलङ्करिष्णुः 'अलं कृ' ञित्यादिना इष्णुच् प्रत्ययः । व्रजेशसूनुः श्रीकृष्णः व्रजवीथि मागात्

आङ्पूर्वक इण्धातोः कर्तरि लुङि गादेशः । उपेन्द्रवज्रावृत्तम् । लक्षणं तूक्तम् ॥ ४३ ॥

कवाट मुत्पाट्य गृहान्तरस्य गोपीकुलस्याभरणं स कृष्णः ।
अमूमुष श्चन्द्रसमानकान्ति विराजमानं नवनीतखण्डम् ॥ ४४ ॥

कवाट मिति ॥ गोपीनां कुलस्य वंशस्य आभरणं उत्तमभूषणं; स श्रीकृष्णः अन्यत् गृहं गृहान्तरं तस्य कावाट मुत्पाट्य चन्द्रेण समानकान्तिः यस्येति उपमा । तत् अत एव विराजमानं प्रकाशमानं; नवनीतस्य खण्डं शकलं अमूमुषत् अचूचुरत् । मुषधातोः ण्यन्तात् कर्तरि लुङि 'च्लिलुङी' ति च्लौ 'णिश्रि....' इति चङि 'चङी' ति द्वित्वे, हलादिशेषे अभ्यासह्रस्वेच, 'णौ चङी' ति उपधाह्रस्वे , अडागमे , 'सन्वल्लघुनी' ति सन्वद्भावे दीर्घः ॥ ४४ ॥

दृष्ट्वा स्त्रियः तद्भवनाङ्गणस्थिताः दैत्यारिणा गोपकुलेशसूनुना ।
मात्रेऽस्य तान् भिन्नघटा न्निवेदितुं कृत्यानि नन्दस्य गृहं ययु स्तदा ॥४५॥

दृष्ट्वेति ॥ तद्भवनस्य तद्गृहस्य अङ्गणे चत्वरे स्थिताः स्त्रियः दैत्यारिणा तृणावर्तादिसंहारिणा गोपकुलेशस्य नन्दस्य सूनुना पुत्रेण तान् भिन्नघटान् दृष्ट्वा अस्य कृत्यानि मात्रे यशोदायै निवेदितुं नन्दस्य गृहं तदा ययुः । या धातोः कर्तरि लिट् ॥ ४५ ॥

गत्वा गृहं गोपवरस्य गोप्यो निवेदयामासु रमुष्य मात्रे ।
सूनु स्तवाद्याऽऽशु गृहान् प्रविश्य प्राचूचुरत् सर्व मिति स न स्स्वम् ॥४६॥

गत्वेति ॥ गोप्यः गोपवरस्य नन्दस्य गृहं गत्वा तव सूनुः श्रीकृष्णः अद्य आशु नः अस्माकं गृहान् प्रविश्य सर्वं स्वं क्षीरादिकं प्राचूचुरत् अपहृतवान् स खेदे । इति अमुष्य श्रीकृष्णस्य मात्रे यशोदायै निवेदयामासुः विज्ञापितवत्यः । विपूर्वकविदधातोः णिचि कर्तरि लिटि अनुप्रयोगः ॥ ४६ ॥

याचामहे देवि तवाज्ञया वरे यातु विदेशान् सह बालगोगणैः ।
अत्र व्रजे स्थातु मनेन बाधिताः शक्ता न बालेन दिने दिने वयम् ॥४७॥

याचामह इति ॥ वरे श्रेष्ठे हे देवि यशोदे दिने दिने अनुदिनं अनेन बालेन बाधिताः वयं अत्र व्रजे अस्मिन् घोषे स्थातुं वस्तु न शक्ताः । अतः कारणात् तव आज्ञया बालैः गोगणैश्च सह विदेशान् यातुं गन्तुं याचामहे अनुज्ञा मिति शेषः । याचृ धातोः कर्तरि लट् । इन्द्रवज्रावृत्तम् ॥ ४७ ॥

माता तदालोक्य सुतस्य कृत्य माह स्म ता गोपकुलप्रवृद्धाः ।
मा प्राप्नुतेहैव शुचं तु यूयं नियोजयामीति शिशुं गृहे तम् ॥४८॥

मातेति ॥ माता यशोदा कर्त्री सुतस्य श्रीकृष्णस्य तत्कृत्यं कार्यजातं आलोक्य विचार्य तं शिशुं बालं इहैव गृहे नियोजयामि बध्नामि यूयं तु शुचं विषादं मा प्राप्नुत इति ताः गोपकुलप्रवृद्धाः वृद्धांगनाः आह स्म उवाच । ब्रूञ् धातोः कर्तरि लटि आहादेशः । स्म योगात् भूतार्थकत्वम् ॥ ४८ ॥

तद्वाक्य माकर्ण्य विषादयुक्ताः गोप्य स्तदा स्वस्थहृदो बभूवुः ।
सुतं तदा गोकुलदुग्धचोरं बबन्ध दाम्ना न विजानतीशम् ॥४९॥

तदिति ॥ विषादयुक्ता गोप्यः गोपिकाः तस्या यशोदायाः वाक्यं आकर्ण्य श्रुत्वा, तदा स्वस्थं हृत् यासां तथाभूताः बभूवुः । तदा गोकुले दुग्धं चोरयतीति तं गोकुलदुग्धचोरं तं सुतं श्रीकृष्णं ईशं भगवन्तं, यद्वा शं सुखस्वरूपं न विजानती नावगच्छन्ती यशोदा दाम्ना रज्ज्वा । 'न पुंसि दाम संदान' मित्यमरः । बबन्ध । बन्धधातोः कर्तरि लिट् ॥ ४९ ॥

तया तदोलूखलबध्यमध्यो व्यदर्शयत् सर्वसुहृत्तमत्वम् ।
कर्तृत्व मस्यै प्रियसूनु रेष मात्रे स दाम्ना ऽसमपूरणेन ॥ ५० ॥

तयेति ॥ स एष प्रियसूनुः श्रीकृष्णः तया यशोदया तदा न समं असमं न्यून मित्यर्थः । तादृशं पूरणं यस्य तम् अपर्याप्त मित्यर्थः । तेन

दाम्ना रज्ज्वा उलूखले बध्दं मध्यं यस्य तथाभूतस्सन् अस्यै मात्रे यशोदायै सर्वेषां सुहृत्तमः प्रियतमः तस्य भावः तत्त्वं तत कर्तृत्वं जगत्कर्तृत्वं परमेश्वरत्व मिति यावत् । व्यदर्शयत् दर्शयामास । विपूर्वक दृशिधातोः णिचि कर्तरि लङ् । यत स्सर्वदामान्यस्य बन्धनाय नालं बभूवु स्ततोऽयमीश्वर इति ज्ञातव्य मिति भावः ॥ ५० ॥

उलूखले तत्र तथा निबद्धो व्याकृष्य तद्गन्तुमना बभूव ।
व्रजाद् बहि र्यत्र तरुप्रवीरौ प्रतीक्षयामासतु रीश्वरं सः ॥ ५१ ॥

उलूखल इति ॥ स श्रीकृष्णः उलूखले 'उदूखल मुलूखल' मित्यमरः । तथा पूर्वोक्तप्रकारेण निबद्धोपि व्रजात् बहिः 'अपपरिबहि' रिति समासविधानात् पञ्चमी । यत्र प्रदेशे तरुप्रवीरौ यमलार्जुनौ ईश्वरं भगवन्तं प्रतीक्षयामासतुः । तत्र तस्मिन् देशे तत् उलूखल माकृष्य गन्तुं मनो यस्य तथाभूतो बभूव । भूधातोः कर्तरि लिट् ॥ ५१ ॥

गत्वा शनै र्बालविलासखेलो निनाय तन्मध्य मुलूखलं सः ।
सम्यक् तिरश्चीनतया भवारिः नयेन तच्छापविमोक्षणाय ॥ ५२ ॥

गत्वेति ॥ बालानां विलास एव खेला क्रीडा यस्य सः । भवारिः संसारशत्रुः, स श्रीकृष्णः शनै र्गत्वा तयो र्यमलार्जुनयोः शापस्य विमोक्षणाय विमोचनाय । नयेन उपायेन उलूखलं सम्यक् तिरश्चीनतया तिर्यक्तया तन्मध्यं तयो र्वृक्षयो र्मध्यं निनाय प्रापयामास । नीङ् धातोः कर्तरि लिट् ॥ ५२ ॥

तदन्तराऽऽकृष्य जवेन वृक्षौ छायासहायो यमलार्जुनौ सः ।
निपातयामास वसुन्धरायां शाखाभि रामृष्टवलाहकौ तौ ॥५३॥

तदन्तरेति ॥ छाया सहायो यस्य सः । श्रीकृष्णः वृक्षौ अन्तरा । 'अन्तरान्तरेणे' ति द्वितीया । वृक्षयो र्मध्ये, तत उलूखलं जवेन आकृष्य,

शाखाभिः आमृष्टाः परिमृष्टाः वलाहकाः मेघा याभ्यां तौ, तौ यमलार्जुनौ, वसुन्धरायां भूमौ । 'वसुधोर्वी वसुन्धरे' त्यमरः । निपातयामस । 'निपूर्वक-पतधातोः णिचि कर्तरि लिट् ॥ ५३ ॥

तदुत्थितौ यक्षवरौ सुरूपौ दिवि स्थितौ दिव्यसुवेषभाजौ ।
ज्योतिर्मयौ गन्धसुमाल्यभूषौ तस्मै नमश्चक्रतु रन्तिके तौ ॥५४॥

तदिति ॥ ताभ्यां वृक्षाभ्यां उत्थितौ निर्गतौ यक्षवरौ यक्षश्रेष्ठौ शोभनं रूपं ययो स्तौ । दिवि आकाशे स्थितौ दिव्यौ प्रकाशमानौ सुवेषौ भजत इति तथा भूतौ ज्योतिर्मयौ तेजःप्रचुरौ, गन्धसुमाल्यान्येव भूषा ययोस्तौ, एवंभूतौ तौ शापग्रस्तत्वेन प्रसिद्धौ नलकूबरमणिग्रीवौ तस्मै बालाय अन्तिके समीपे नमश्चक्रतुः अनमताम् । कृञ्धातोः कर्तरि लिट् ॥ ५४ ॥

आवां सुधन्यौ तव दर्शनेन प्रशान्तशापानलतीक्ष्णदाहौ ।
त्वल्लोचनोत्सिक्तसुधाभिषेका वभूव तीर्णौ भवसागरान्तात् ॥५५॥

आवा मिति ॥ आवां यक्षौ त्वल्लोचनाभ्या मुत्सिक्तायाः सुधाया अभि-षेको ययो स्तौ । अत एव प्रशान्तः शापानलस्य तीक्ष्णदाहो ययो स्तौ । तव दर्शनेन सुधन्यौ । भव एव सागरः तस्य अन्ता नमध्यात् तीर्णौ बभूव आस्व । भूधातोः कर्तरि लुङ् ॥ ५५ ॥

नमो नमः पङ्कजलोचनाय मादृकूजनोत्तारणकारणाय ।
दयाब्धये वाङ्मनसातिगाय प्रपञ्चजन्मस्थितिकारणाय ॥ ५६ ॥

नमो नम इति ॥ पङ्कजे इव लोचने यस्येति उपमा तस्मै । दयाब्धये कृपासमुद्राय । अत एव मादृशां जनानां उत्तारणकारणाय । वाक् च मनश्च वाङ्मनसं, 'अचुतरे' त्यादिना निपातना त्साधुः । तस्य अतिगाय । अतीत्य गच्छति वर्तत इति तथाभूताय, प्रपञ्चस्य जन्म उत्पत्तिः स्थितिः पालनं, तयो कारणाय । तुभ्य मिति शेषः । नमो नमः । आदरे द्विरुक्तिः ॥ ५६ ॥

आत्मान मभिनन्दतः—

यस्यांघ्रिरेणो र्भजनेच्छया श्रीः तपोऽचरत् भाग्य महो मुरारेः ।
सोऽयं व्रजे गोपकुमारवेषः चक्षुष्पदं नौ समगा द्धरण्याम् ॥५७॥

यस्येति ॥ यस्य मुरारे र्भगवतः, अंघ्रेः पादस्य रेणो रजसः, भजनस्य सेवायाः, इच्छया वाञ्छया, श्री र्लक्ष्मीः, तपः अचरत् कृतवती । गोपकुमारस्य वेष इव वेषो यस्य सोऽयं धरण्यां व्रजे नौ आवयोः चक्षुष्पथं नेत्रमार्गं समगात् प्राप । अहो भाग्यम् । संपूर्वक इण्धातोः कर्तरि लुङि गादेशः ॥ ५७ ॥

अनेकजन्मार्जितपापसंघसंपादिताशेषकुदेहबद्धौ ।
क्वावा मशक्तौ क्व च लीलयात्तरूपस्य नोतुं तव पादसेवा ॥५८॥

अनेकेति ॥ अनेकजन्मभि रार्जितैः पापसंघैः संपादितेषु अशेषकुदेहेषु बद्धौ, अत एव नोतुं स्तोतुं 'नितुत्रे' ति नेट् । अशक्ता वसमर्थौ आवां क्व? लीलाया स्वलीलया, आत्तानि स्वीकृतानि रूपाणि येन तस्य तव पादसेवा क्व च? अत्र कुदेहयुक्तत्वेन योगिना मप्यलभ्यत्वेनाननुरूपयोः यक्षभगवत्पाद सेवयोः घटनावर्णनात् विषमालङ्कारः । तदुक्तम्—'विषमं वर्ण्यते यत्र घटनाऽननुरूपयो' रिति ॥ ५८ ॥

विमुक्तशापौ गमनाय देव याचावहे त्वां जगदेकवीरम् ।
प्रसादलेशेन कटाक्षपात्रे स्यावास्तु सा भक्ति रहर्दिवं ते ॥ ५९ ॥

विमुक्तेति ॥ हे देव भगवन् ते तव प्रसादलेशेन विमुक्तः शापः याभ्यां तौ आवा मिति शेषः । जगति एकवीरं मुख्यशूरं त्वां गमनाय यातुं याचावहे प्रार्थयावहे । अनुज्ञा मिति शेषः । कटाक्षस्य पात्रे योग्यौ स्याव भवेव । अहर्दिव महोरात्रं, 'अचतुरे' त्यादिना साधुः । सा प्रसिद्धा भक्तिः । त्वयीति शेषः । अस्तु भवतु । असधातोः कर्तरि प्रार्थनायां लोट् ॥ ५९ ॥

स्तुत्वैव मामन्त्र्य निजालयं तौ विहायसा यक्षवरौ व्यगाताम् ।
तत्पादपद्मे निहितस्वबुद्धी योगीन्द्रहृत्पद्मनिवासभाजि ॥ ६० ॥

स्तुत्वेति ॥ यक्षवरौ यक्षश्रेष्ठौ, एवं पूर्वोक्तप्रकारेण स्तुत्वा आमन्त्र्य आज्ञां याचित्वा योगीन्द्राणां हृत्पद्मे हृदयकमले निवासं भजतीति तथोक्ते तस्य भगवतः पादपद्मे निहिते स्वबुद्धी याभ्यां तथाभूतौ सन्तौ निजालयं अलकापुरीं विहायसा आकाशमार्गेण व्यगातां जग्मतुः । विपूर्वा दिण्धातोः कर्तरि लुङि गादेशः ॥ ६० ॥

तरुद्वयान्तर्जवसंविकृष्टतिर्यक्कृतोलूखलभग्नवृक्षे ।
शिशौ तदा तत्र विवर्तमाने जनोऽशृणोत पात मकाण्डजातम् ॥६१॥

तर्विति ॥ तर्वोः द्वयस्य अन्तः मध्ये जवेन संविकृष्टेन तिर्यक्कृतेन उलूखलेन भग्नौ वृक्षौ यस्य तस्मिन् । शिशौ श्रीकृष्णे तदा तस्मिन् काले तत्र तरुसमीपे वर्तमाने परिभ्रमति सति जनः कर्ता, अकाण्डजातं अनवसरजातं, 'काण्डोऽस्त्री दण्डबाणार्त्रवर्गावसरवारिषु' इत्यमरः । पातं पतनशब्दं अशृणोत् शुश्राव । श्रुधातोः कर्तरि लङ् ॥ ६१ ॥

सुतं प्रयातं बहि राशु गेहात् द्रुतं समालोक्य कुलप्रवृद्धाः ।
गोपाः पलायन्त विचित्य नेतुं बालं गृहं नून मतीव भीताः ॥६२॥

सुत मिति ॥ कुले प्रवृद्धाः, गोपाः, सुतं श्रीकृष्णं, गेहात् बहिः आशु प्रयातं निश्चित्य अतीव भीताः सन्तः, बाल श्रीकृष्णं, विचित्य विमृग्य गृहं नेतुं आनेतुं द्रुतं पलायन्त अगच्छन् । नूनं निश्चयः । परापूर्वक अयधातोः कर्तरि लङ् । 'उपसर्गस्यायतौ' विति लत्वम् ॥ ६२ ॥

दृष्ट्वा सुतं संपरिभिन्नवृक्षमूले शयानं शरदिन्दुवक्त्रम् ।
झडित्यमी तं परिवव्रुरेनं हाहेति वाचं समुदीरयन्तः ॥ ६३ ॥

दृष्ट्वेति ॥ अमी गोपाः सम्यक् परितः भिन्नयो वृक्षयोः मूले शयानं शरत्कालेन्दुरिव वक्त्रं यस्येत्युपमा । तं एनं सुतं दृष्ट्वा हाहा इति वाचं समुदीरयन्तः सम्यग्वदन्तः झडिति तं सुतं परिवव्रुः परितः वृतवन्तः । परिपूर्वक वृञ्धातोः कर्तरि लिट् ॥ ६३ ॥

कृत्यं शिशो रस्य तु नान्यशक्य ममानुषं मानुषवेषभाजः ।
निश्चित्य तं बाल ममी निकेतं निन्यु र्मुदा गोपवरस्य तस्य ॥६४॥

कृत्य मिति ॥ अमी गोपाः मानुषस्य वेषं भजतीति तथोक्तस्य अस्य शिशोः अन्यशक्यं न भवतीति नान्यशक्यं कृत्यं अमानुषं निश्चित्य तं बालं तस्य गोपवरस्य नन्दस्य निकेतं गृहं मुदा निन्युः प्रापयामासुः । नीञ्धातोः कर्तरि लिट् । दुह्यादित्वाद् द्विकर्मकत्वम् ॥ ६४ ॥

यस्य प्रसादा दसुरप्रहन्ता शक्रोऽप्यभू त्सर्वसुपर्वराजः ।
सोऽयं मुदा भूमिनिगूढरूपः गोपीभि रुत्खेलति चान्वहं स ॥६५॥

यस्येति ॥ यस्य भगवतः, प्रसादा दनुग्रहात्, शक्र इन्द्रः, असुराणां राक्षसानां प्रहन्ता नाशकः सर्वेषां सुपर्वणां देवानां राजाऽपि अभूत् । सोऽयं श्रीकृष्णः भूम्यां निगूढं रूपं स्वरूपं यस्य तथाभूत स्सन् गोपीभि स्सह मुदा अन्वहं प्रतिदिनं उत्खेलति स्म चिक्रीड ॥ ६५ ॥

गोपी तन्मुद मुद्वह न्त्यनुदिनं लीलावतारेण त-
च्छ्रुत्वा कृत्य मनेन तत्र चरितं ह्येकेन बालेन सा ।
भीतामीतविशुद्धसत्वमनसा व्यालोच्य वाचाऽवदत्
सौख्यं मेऽस्तु सुतस्य तस्य सततं धूर्तस्य देवेति च ॥ ६६ ॥

गोपीति ॥ तस्य भगवतः संबन्धिनीं मुदं अनुदिनं प्रतिदिनं, वीप्साया मव्ययीभावः । उद्वहन्ती प्राप्नुवन्ती सा गोपा यशोदा, लीलार्थ मवतारो यस्य

तेन। अनेन पुरःस्थितेन, एकेन असहायेन बालेन श्रीकृष्णेन तत्र तरुप्रदेशे चरितं आचरितं तत्पूर्वोक्त कृत्यं कार्यं श्रुत्वा बालेन कृतत्वात् भीतं पूतनादिवैरिणा कृतत्वा दभीतं ; 'क्तेन नञ्विशिष्टेनानञ्' इति समासः। सत्ववृत्तिप्रधानं मनः सत्वमनः विशुद्धं अवहितं कामक्रोधादिरहितं च तत् सत्वमनश्चेति कर्मधारयः। भीताभीतं च तत् विशुद्धसत्वमनश्चेति समासः। तेन व्यालोच्य विचिन्त्य च देव हे हरे धूर्तस्य तस्य मे सुतस्य सततं सर्वदा सौख्य मस्तु इति वाचा कण्ठरवेण अवदत् उवाच। वदधातोः कर्तरि लङ्॥ ६६॥

श्रीकृष्णदेव चरितामृत पानतृप्त-
श्रीपुण्यकोटिविदुषा रचिते प्रबन्धे।
सर्ग स्स्वभावरुचिरः कमनीयभाव-
स्तस्यैव वर्णनधुरो गलित स्तुरीयः ॥ ६७॥

श्रीकृष्णेति॥ श्रीकृष्णदेवस्य चरितमेव अमृतं तस्य पानेन कथनेन तृप्तेन श्रीपुण्यकोटिविदुषा रचिते विरचिते प्रबन्धे काव्ये स्वभावेन रुचिरो मनोज्ञः कमनीयः भावो यस्य सः भगवत्प्रतिपादकत्वा दित्यर्थः। तस्यैव भगवतः वर्णनधुरः वर्णनस्य धू भारो यस्य। 'ऋक्पू' रित्यदिना अप्रत्ययः। तथाभूतः सर्वप्रकारेण भगवद्गुणाना मेवात्र वर्णना दिति भावः। तुरीय श्चतुर्थः 'चतुर श्छयता वाद्यक्षरलोप' श्चेति चकारलोपः छप्रत्ययश्च। 'आयने' त्यादिना' ईयादेशः। सर्गः गलितः पूर्णः॥ ६७॥

॥ इति श्रीपुण्यकोटि कृते श्रीकृष्णविलासे सव्याख्याने चतुर्थस्सर्गः॥

पञ्चमस्सर्गः

बालरूपे भगवति गोपीना मत्यन्तानुरक्ति माह—

वामा नवाभ्रोपमकृष्णदेहकान्तिच्छले यामुनवारिपूरे ।
तत्पाणिपादानन नेत्रपद्मे स्नानं व्यधुः श्रीमति निर्मलेऽमूः ॥ १ ॥

वामा इति ॥ अमूः वामा गोपिकाः, श्रीमति निर्मले स्वच्छे, नवाभ्रेण नवीनमेघेन उपमस्तुल्यः, स चासौ कृष्णदेहश्च तस्य कान्ति रिति छलं यस्य तस्मिन् यामुने यमुनासंबन्धिनि वारिपूरे जलप्रवाहे, तस्य भगवतः पाणी च पादौ च आननं च नेत्रे च तेषां समाहारः पाणिपादानननेत्रं, प्राण्यङ्गत्वादेक-वद्भावः । तान्येव पद्मानि यस्मिं स्तस्मिन् । स्नानं व्यधुः अकुर्वन् । विपूर्वक धाधातोः कर्तरि लुङ् । तस्मिन्नेव लग्नचित्ता बभूवु रिति भावः । अत्र श्रीकृष्णदेहकान्तेः छलशब्देन असत्यत्वप्रतिपादनात् कैतवापह्नुत्यलङ्कारः तदुक्तम्—'कैतवापह्नुतिर्व्यक्तौ व्याजाद्यै र्निह्नुतेः पदैः' रिति । तत्पाणीत्यत्र रूपकालङ्कारः । अस्यकैतवापह्नुत्युद्भावि त्वात् तयो रङ्गाङ्गिभावेन सङ्करः । इन्द्रवज्रावृत्तम् । लक्षणं तु 'स्यादिन्द्रवज्रा ततजा स्ततौ गौ' इति ॥ १ ॥

उक्तमेवार्थं पुनर्भङ्ग्यन्तरेणाह द्वाभ्याम्—

आसां मनो यज्ञभुजि प्रकृष्टे जज्ञे मुहुर्यज्ञभुजां वरिष्ठे ।
मनोहरे कर्ममुचां जनानां पद्मादिचिह्नाङ्कितपादपद्मे ॥ २ ॥

आसा मिति ॥ आसां गोपिकानां मनः प्रकृष्टे उत्तमे यज्ञभुजामिन्द्रा-दीनां वरिष्ठे अतिशयेन श्रेष्ठे, 'अतिशायने तमबिष्ठना' विति इष्ठन् प्रत्यये 'प्रियस्थिरे' त्यादिना उरुशब्दस्य वरादेशः । कर्ममुचां कर्मत्यागिनां जनानां

सन्न्यासिनां मनोहरे, पद्मादिचिह्नै रङ्किते पादपद्मे यस्य तस्मिन् यज्ञभुजि विष्णौ मुहु र्जज्ञे अभूत् जनिधातोः कर्तरि लिट् । भगवति अत्यन्तानुरक्ति रभूदिति भावः ॥ २ ॥

अस्मि स्त्रिलोकीतिलके हि भावा स्तासां न्यमज्ज न्निरवद्यदेहे ।
विमुग्धगोपीजनयोगभाजां फलप्रदे पुंसि समान मत्र ॥ ३ ॥

अस्मि न्निति ॥ अत्र घोषे आसां गोपिकानां भावाः मनोवृत्तयः 'भाव स्सत्तास्वभावाभिप्रायचेष्टात्मजन्मसु' इत्यमरः । त्रयाणां लोकानां समाहार स्त्रिलोकी । 'तद्धितार्थे' त्यादिना समाहारे द्विगुसमासः । 'अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्ट' इति भाष्योक्तेः स्त्रीत्वं 'द्विगो' रिति ङीप् । तस्या स्तिलके भूषणे । 'तमालपत्र तिलक चित्रकाणि विशेषक' मित्यमरः । निरवद्यः अनिन्द्य उत्तम इति यावत । तथाविधो देहः श्रीमूर्ति र्यस्य तस्मिन् । विशेषेण मुग्धानां गोपीजनानां योगभाजां च समानं तुल्यं यथा तथा फलप्रदे फलस्य दातरि अस्मिन् पुंसि श्रीकृष्णे न्यमज्जन् ममज्जुः । हि प्रसिद्धौ । निपूर्वक-मज्जधातोः कर्तरि लङ् । अत्र प्रस्तुतभगवता दीयमानमुक्त्याश्रयतया वर्णनीयानां गोपिकानां योगिनां च गुणान्वयदर्शना तुल्ययोगितालङ्कारः । तदुक्तम् - 'वर्ण्यानां मितरेषां वा धर्मैक्यं तुल्ययोगिते' ति ॥ ३ ॥

नन्दस्य सुतसमीपगमनकारण माह—

हन्तार मन्तर्हृदि वासनाया हन्तार मामण्डितवक्षसं तम् ।
अहंत्वरोगस्य भिषग्वरेण्यं नन्द स्सुतं द्रष्टुमना स्समीपम् ॥ ४ ॥

हन्तार मिति ॥ अन्तर्हृदि हृदयमध्ये विद्यमानाया वासनायाः काम-वासनायाः हन्तारं नाशकम् । मया लक्ष्म्या आमण्डित मलङ्कृतं वक्षः उरः यस्य तं 'उरो वत्सं च वक्षश्चे' त्यमरः । अहंत्वं अहङ्कार एव रोगो व्याधिः 'रोग-व्याधिगदामया' इत्यमरः । अस्य भिषग्वरेण्यं चिकित्सकं नाशक मित्यर्थः ।

सुतं श्रीकृष्णं द्रष्टुं मनो यस्य तथाभूतस्सन् समीप मार प्राप । हन्तेति हर्षे । ऋधातोः कर्तरि लिट् ॥ ४ ॥

बृन्दावनं यातुमना स्स गोपबृन्दावनो गोकुलचारणाय ।
भूकम्प माकल्पय दत्र धेनुबृन्दावनः कल्पितधूमकेतुः ॥ ५ ॥

बृन्दावन मिति । धेनूनां बृन्दस्य संघस्यावनं रक्षणं यस्मात् सः, गोपबृन्दानां गोपसंघानां अवनं रक्षणं यस्मात्सः श्रीकृष्णः, गवां कुलस्य संघस्य चारणाय संचारार्थं बृन्दावनं बृन्दावननामकक्षेत्रं यातुं मनो यस्य तथा भूतस्सन् कल्पितो धूमकेतुः दिव्युत्पातः येन तथाभूतः अत्र घोषे भूकम्प माकल्पयत् सृष्टवान् । आङ्पूर्वक कृप धातोः 'कृपो रोल' इति लत्वे कर्तरि लङ् । इन्द्रवज्रावृत्तम् । लक्षणं तूक्तम् ॥ ५ ॥

अस्यैव माया मविचिन्त्य गोपका स्तदा महोत्पातविचारभीरवः ।
पप्रच्छु रार्यान् प्रति गोपवृद्धकान् वसाम घोषेऽत्र न वेति संशयात् ॥६॥

अस्यैवेति ॥ गोपकाः अस्य श्रीकृष्णस्य माया मविचिन्त्यैवाज्ञात्वैव, तदा तस्मिन् काले महोत्पातानां विचारात् विमर्शात् भीरवः भीतास्सन्तः, अत्र घोषे वसाम वा न वेति संशया दार्यान् गोपवृद्धकान् पप्रच्छुः पृष्टवन्तः । प्रच्छधातोः कर्तरि लिट् । अर्धसमवृत्तम् ॥ ६ ॥

ते मन्त्रयित्वाऽथ भृशं भयार्दिताः नन्दाय तस्मै विनिगद्य तद्भयम् ।
गन्तुं मन श्चक्रु रमी व्रजौकसः बृन्दावनं गोकुल मास मञ्जुलम् ॥७॥

त इति ॥ अथानन्तरं, व्रज ओकः स्थानं येषां ते । ते गोपवृद्धाः, भयेन भृश मर्दिताः पीडिताः सन्तः, तद् भयं महोत्पातभयं तस्मै नन्दाय विनिगद्य निवेद्य तेन सह मन्त्रयित्वा आलोच्य गोकुलस्य गवां संघस्य वासस्य मञ्जुलं योग्यं बृन्दावनं बृन्दावननामकं वनं गन्तुं मन श्चक्रुः । कृञ्धातोः

कर्तरि लिट् । इन्द्रवंशावृत्तम् । 'स्यादिन्द्रवंशा ततजै रसंयुतै' रिति लक्षणात् ॥ ७ ॥

आज्ञां समाराध्य विभोः पशूनां गन्तुं रथां स्ते युयुजु स्तदानीम् ।
सबालगोपीजनधेनुवत्सकदम्बकश्लाघ्यधना व्रजस्थाः ॥ ८ ॥

आज्ञा मिति ॥ धेनूनां वत्सानां कदम्बक मेव 'निकुरम्बं कदम्बक' मित्यमरः । श्लाघ्यं धनं येषां तैः बालै र्गोपीजनैश्च सह वर्तन्त इति तथाभूताश्च ते धेनुवत्सकदम्बकश्लाघ्यधनाश्चेति विशेषणद्वयकर्मधारयः । व्रजे तिष्ठन्तीति तथोक्ताः ते गोपाः तदानीं पशूनां विभोः नन्दस्य आज्ञां समाराध्य याचित्वा गन्तुं रथान् युयुजुः । युज धातोः कर्तरि लिट् ॥ ८ ॥

अनांसि संयोज्य बहूनि तेऽयुः गोपा बलीवर्दयुतानि मुख्याः ।
संभारसंपूरितदध्यमत्रसंपूर्णभाराणि समुन्नतानि ॥ ९ ॥

अनांसीति ॥ मुख्याः श्रेष्ठाः ते गोपाः, संभारै रुपस्करैः, संपूरितानि दध्यमत्राणि तैः संपूर्णः भारो येषां तानि । बलीवर्दै र्वृषभैः । 'उक्षा भद्रो बलीवर्द ऋषभो वृषभो वृषः' इत्यमरः । युतानि समुन्नतानि अनांसि शकटानि 'क्लीबेऽनश्शकटोऽस्त्रिया' मित्यमरः । संयोज्य एकत्र संघीकृत्य अयु र्ययुः, याधातोः कर्तरि लङ् ॥ ९ ॥

असौ पितृभ्यां सह दानवारिः हर्षेण सिंहासन मारुरोह ।
अनोऽन्तरे स्वच्छसुवर्णरत्नमयोन्नतं मञ्जु विराजमानम् ॥ १० ॥

असा विति ॥ दानवाना मसुराणां अरिः शत्रु रसौ श्रीकृष्णः । पिता च माता च पितरौ । 'पिता मात्रे' त्येकशेषः । ताभ्यां सह अनोऽन्तरे शकटमध्ये स्वच्छं परिशुद्धं सुवर्णरत्नमयं सुवर्णैन रत्नैश्च प्रचुरं 'प्राचुर्यार्थे मयट्' । उन्नतं श्रेष्ठं मञ्जु मनोज्ञं विराजमानं सिंहासनं राजासनं 'नृपासनं

यत् तत् भद्रासनं सिंहासनं तु तत्' इत्यमरः । हर्षेण आरुरोह आरूढवान् । आङ्पूर्वकरुहधातोः कर्तरि लिट् ॥ १० ॥

अयासिषु स्ते त मलं भजन्तः खुरप्रहारोद्धतधूलिपुञ्जैः ।
संच्छादयन्तः ककुभ श्चतस्रः सवासवा देवगणा इवोच्चैः ॥ ११ ॥

अयासिषु रिति ॥ तं श्रीकृष्णं, अलं भजन्तः अत्यन्तं सेवमानाः ते गोपाः, उच्चैः, गोगणाना मिति शेषः । खुरप्रहारैः शफशातनैः । 'शफं क्लीबे खुरः पुमान्' इत्यमरः । उद्धतै रूर्ध्वं प्रापितैः धूलिपुंजैः रेणुसंघैः । 'रेणुर्द्वयोः स्त्रियां धूलि' रित्यमरः । चतस्रः ककुभो दिशः । 'दिशस्तु ककुभः काष्ठा' इत्यमरः । संछादयन्तः सम्य गाच्छादयन्तः वासवेन इन्द्रेण सहिताः देवगणा इव । अयासिषु जग्मुः । याधातोः कर्तरि लुङ् । उपमालङ्कारः ॥ ११ ॥

मार्गेषु सर्वत्र विलोलदीर्घशाखाग्रपत्राञ्जलिमध्यभाग्भिः ।
संपूजितुं मञ्जुलमञ्जरीभिः तस्थुः किं मेनं तरवो व्रजन्तम् ॥१२॥

मार्गे ष्विति ॥ तरवो वृक्षाः सर्वत्र मार्गेषु विलोलानां दीर्घाणां शाखानां अग्रेषु स्थितानि पत्राण्येव पल्लवान्येवाञ्जलयः तेषां मध्यं भजन्तीति तथोक्ताभिः मञ्जुलमञ्जरीभिः मञ्जुपुष्पकदम्बैः । 'वल्लरी मञ्जरी स्त्रियौ' इत्यमरः । व्रजन्तं गच्छन्त मेनं श्रीकृष्णं संपूजितु तस्थुः किम् । ष्ठाधातोः कर्तरि लिट् । अत्र तरूणां मार्गस्थितैः पुष्पचयैः भगवत्पूजन मसिद्धमेव फलत्वेनोत्प्रेक्ष्यत इति असिद्धफलोत्प्रेक्षालङ्कारः । इन्द्रवज्रावृत्तम् । लक्षणं तूक्तम् ॥ १२ ॥

मार्गे निकुञ्जोन्नतसौधमध्या ल्लताङ्गनापल्लवपञ्चशाखाः ।
आनम्य तं सुन्दर मच्युतं किं द्रष्टुं स्थिता मन्दर मीरकम्पाः ॥ १३ ॥

मार्ग इति ॥ मन्दसमीरेण मन्दमारुतेन कंप श्चलनं चित्तचाञ्चल्यं यासां ताः मन्दसमीरजनितमदनविकारवत्यः इति भावः । 'वेपथुः कम्प' इत्यमरः । पल्लवा एव किसलयान्येव 'पल्लवोऽस्त्री किसलय' मित्यमरः । पञ्च-शाखाःपाणयो यासां ताः 'पञ्चशाख श्शयः पाणि' रित्यमरः । लता एवाङ्गनाः निकुञ्जाः लतागृहाण्येव । 'निकुञ्जकुञ्जौ वा क्लीबे लतादिपिहितोदर' इत्यमरः । उन्नतसौधाः तेषां मध्यात् 'ल्यब्लोपे पञ्चमी' । तादृशं सौध मारुह्येत्यर्थः । सुन्दर मच्युतं नाशरहितं तं श्रीकृष्णं आनम्य किंचि दानम्य द्रष्टुं स्थिताः किं? अत्र लताङ्गनानां निकुञ्जसौधस्थितेः आनमनपूर्वकभगवद्दर्शन मसिद्धमेव फलत्वेनोत्प्रेक्षत इत्यसिद्धफलोत्प्रेक्षा । सा च रूपकानुप्राणितेति सङ्करः ॥ १३ ॥

वनालि मत्तालि समूहनादसंगीत कापोत वचस्सुवाद्याः ।
विहारशाला इव रेजु रस्य समल्लिका श्शीततला निकुञ्जाः ॥ १४ ॥

वनालीति ॥ वनालिषु वनपंक्तिषु 'वीथ्यालि रावलिः पंक्ति' रित्यमरः । मत्तालीनां मत्तभ्रमराणां 'षट्पदभ्रमरालय' इत्यमरः । समूहस्य नाद इव संगीतं कपोताना मिमानि कापोतानि । संबन्धार्थे ऽण् । वचांस्येव सुवाद्यानि तच्च तानि च येषां ते । समल्लिका मल्लिकाभिः सहिताः । शीतानि शीतलानि तलानि प्रदेशाः येषां ते तथोक्ताः । निकुञ्जाः लतागृहाणि अस्य कृष्णस्य विहारशालाः क्रीडागृहाणीव रेजुः । राजृधातोः कर्तरि लिट् ॥ १४ ॥

किं पद्मपत्राणि च निर्मलानि नीराणि दध्यन्नभुजिक्रियासु ।
सरांसि भाव्यर्थविदा विधात्रा कृष्णाय सृष्टानि पथि प्रदातुम् ॥ १५ ॥

किमिति ॥ पथि मार्गे दध्यन्नभुजिक्रियासु भोजनव्यापारेषु कृष्णस्य पद्मपत्राणि पद्मपत्रभाजनानि, निर्मलानि स्वच्छानि नीराणि च प्रदातुं भाव्यर्थ-विदा भविष्यत्कार्यवेदिना विधात्रा ब्रह्मणा सरांसि पद्मिन्यः सृष्टानि किं? कर्मणि क्तः । अत्र विधातृकर्तृकसरस्सृष्टेः पद्मपत्रादिदान मसदेव फलत्वेनो-त्प्रेक्ष्यत इत्यसिद्धफलोत्प्रेक्षालङ्कारः ॥ १५ ॥

कुमुद्वती कैरवगन्धिशीतमन्दानिलै र्नन्दसुतं प्रयान्तम् ।
विधोः स्वबन्धोः कुलजात एष इतीव हार्दात् सुखयाञ्चकार ॥१६॥

कुमुद्वतीति ॥ कुमुद्वती कुमुदिनी एष कृष्णः स्वबन्धोः विधोः चन्द्रस्य कुलजातः वंशजः इति हार्दात् स्नेहात् 'प्रेमा ना प्रियता हार्द' मित्यमरः। प्रयान्तं नन्दसुतं कैरवाणां कुमुदानां 'सिते कुमुदकैरवे' इत्यमरः। गन्धो येषां ते च ते शीतमन्दानिलाश्च तै स्सुखयांचकार। अत्र सुखकरणे असदेव हार्दं हेतुत्वेनोत्प्रेक्ष्यत इत्यसिद्धहेतूत्प्रेक्षालङ्कारः ॥ १६ ॥

पद्मानि तत्पादकराभिमर्श मवाप्तु मत्यन्तगभीरनीरे ।
सरोवरे तस्य हरेः पदव्यां कुर्वन्ति तीव्रं व्रत मत्र किं नु ॥१७॥

पद्मानीति ॥ तस्य हरेः अत्र पदव्यां मार्गे 'पन्थानः पदवी सृति' रित्यमरः। पद्मानि तस्य श्रीकृष्णस्य पादौ च करौ च पादकरं प्राण्यङ्गत्वादेकवद्भावः। तस्याभिमर्शनं संस्पर्शं अवाप्तुं प्राप्तुं, अत्यन्तं गभीरं निम्नं 'निम्नं गभीरं गंभीर' मित्यमरः। तादृशं नीरं यस्मिन् सरोवरे तटाकश्रेष्ठे तीव्रमुग्रं व्रतं तपःस्वरूपं कुर्वन्ति किं नु आचरन्ति किं? करोतेः कर्तरि लट्। अत्र पद्मानां तपस्त्वेनाध्यवसितायाः सरस्थितेः कृष्णपादादिसंस्पर्शः असन्नेव फलत्वेनोत्प्रेक्ष्यत इति असिद्धफलोत्प्रेक्षालङ्कारः ॥ १७ ॥

बृन्दावनं पुण्यतमं व्यपश्यन् समृद्धि माश्वोषधिपङ्क्तिभि स्ते ।
नदीह्रदग्रावविनूत्नघासवनालिवापीनलिनीवितानैः ॥ १८ ॥

बृन्दावनमिति ॥ हे गोपाः ओषधीनां लताविशेषाणां पंक्तिभिः नदीनां ह्रदानां ग्रावणां, 'ग्रावाणौ शैलपाषाणा' वित्यमरः। विनूत्नघासानां नूतनतृणानां 'नवीनो नूतनो नवः नूत्नश्चे' त्यमरः। 'घासो यवसं तृण मर्जुन' मित्यमरः। वनानां आलीनां राजीनां वापीनां 'अल्पसरो वापी तु दीर्घिके' त्यमरः। नलिनीनां वितानैः समूहैश्च समृद्धं, अतिशयेन पुण्यं पुण्यतमं

बृन्दावनं बृन्दावननामकं वनं आशु अत्र समीपे मार्गे व्यपश्यन् ददृशुः । दृशिधातोः कर्तरि लङ् । पाघ्रेत्यादिना पश्यादेशः ॥ १८ ॥

गवां गणत्राणपरायणोऽसावावासमानन्ददमत्र चक्रे ।
क्षणेन सर्वर्तुसमृद्धियुक्तं गोपाङ्गनासंघविहारणाय ॥ १९ ॥

गवामिति ॥ गवां गणस्य त्राणं रक्षणं परायणं यस्य सः । गोरक्षण-पर इत्यर्थः । असौ कृष्णः गोपाङ्गनासंघस्य विहारणाय क्रीडां कारयितुं अत्र बृन्दावने क्षणेन क्षणकालेन सर्वेषां ऋतूनां समृद्ध्या युक्तं आनन्दं ददातीति तथोक्तं सुखदं आवासं आवासस्थानं चक्रे । कृञ् धातोः कर्तरि लिट् ॥ १९ ॥

बृन्दावनं गोपकबालगोपीबृन्दावनं नन्दकुमारकेण ।
बृन्दारकाधीश्वररक्षकेण युतं रराजेव वनं मघोनः ॥ २० ॥

बृन्दावन मिति ॥ गोपकानां बालानां गोपीनां गोपिकानां बृन्दस्य संघस्य अवनं रक्षणं यस्मिन् तत् बृन्दारकाणां देवाना मधीश्वरस्य इन्द्रस्य रक्षकेण नन्दकुमारेण श्रीकृष्णेन युतं बृन्दावनं बृन्दावननामकं वनं मघोनः इन्द्रस्य वन मिव नन्दन मिव रराज । राजृधातोः कर्तरि लिट् । उपमा-लङ्कारः ॥ २० ॥

गवां गणानां शुभपादभाजां विवक्षया नन्दमुखान्यकानाम् ।
स्थितं जनोऽमन्यत सत्यलोकं न किं वनं हैमतरुप्रसन्नम् ॥ २१ ॥

गवा मिति ॥ जनः कर्ता शुभपादभाजां शोभनचरणवतां, अन्यत्र शोभनान् पादान् तुर्यांशान् भजन्तीति तथोक्तानां 'पादा रश्म्यंघ्रितुर्यांशा' इत्युभयत्राप्यमरः । नन्दमुख्यान्यकाना मिति नन्दः मुखं आदि येषां ते अन्ये । अन्यत्र आनन्दः मनुष्यानन्दः मुखं आदिर्येषां ते । अन्ये इतरा नन्दाः येषां तेषां, 'शेषा द्विभाषे' ति कप्रत्ययः । गवां गणानां पशुसंघानां

अन्यत्र वाक्संघानां उपनिषदा मिति यावत् । 'स्वर्गेषुपशुवाग्वज्रदिङ्नेत्रघृणि-भूजले । लक्ष्यदृष्ट्या स्त्रियां पुंसि गौ' रित्यमरः । विवक्षया वोढु मिच्छया । वहतेस्सन्नन्ता दप्रत्यये टाप् । अन्यत्र वक्तु मिच्छया । वचधातोः सन्नन्ता दप्रत्यये टाप् । स्थितं विवक्षुजनयुत मिति यावत् । हैमतरुप्रसन्न मिति हिम-संबन्धिभिः अन्यत्र हेमसंबन्धिभिः तरुभिः प्रसन्नं वनं बृन्दावनं सत्यलोकं नामन्यत किं? मेने एव । मनुधातोः कर्मणि लङ् । श्लेषानुप्राणितोक्त-वस्तूत्प्रेक्षालङ्कारः । उपेन्द्रवज्रावृत्तम् ॥ २१ ॥

अस्योपकण्ठे वरवत्सपालो भूत्वा स नीचोत्तमकर्मसाम्यः ।
सञ्चारयन् वत्सगणान् निनाय कालं मुदाऽऽद्ये वयसि प्रकृष्टान् ॥२२॥

अस्येति ॥ नीचानि उत्तमानि च कर्माणि तेषु साम्यं समभावो यस्य सः श्रीकृष्णः, वरवत्सपालः भूत्वा अस्य बृन्दावनस्य उपकण्ठे समीपे । 'उपकण्ठान्तिकाभ्यर्णे' त्यमरः । प्रकृष्टान् श्रेष्ठान् वत्सगणान् संचारयन् आद्ये वयसि बाल्ये कालं मुदा निनाय । नीङ्धातोः कर्तरि लिट् । इन्द्रवज्रा-वृत्तम् ॥ २२ ॥

येषा मभूवन् सुहृदेकदेवे तस्मिन् हृषीकाणि समर्पितानि ।
सर्वात्मना भाग्य महो नु तेषां न लब्ध मन्यै र्हृदि लब्धरूपैः ॥२३॥

येषा मिति ॥ येषां व्रजजनानां हृषीकाणि इन्द्रियाणि 'हृषीकं विषयीन्द्रिय' मि त्यमरः । सुहृदा मेकदेवः तस्मिन् देवे प्रवर्तके । तस्मि न्कृष्णे सर्वात्मना सर्वप्रकारेण समर्पितानि अभूवन् । तेषां हृदि हृदये लब्धं ध्यातं रूपं यैस्ते । अन्यैः योगिभि रपि न लभ्यं प्राप्तुं न शक्यम् । अहो नु भाग्यं आश्चर्यम् ॥ २३ ॥

नीलालकाकाशपृषत्सुतारमुखेन्दुना संतमसं प्रणुद्य ।
सायन्तने ऽगात् गृह मम्बुजाक्षो वत्सै स्समं सोऽन्वह मत्र बालः ॥२४॥

नीलेति ॥ अम्बुजे इवाक्षिणी यस्य स श्रीकृष्णः । नीलालका एव आकाश स्तस्मिन् पृषन्त्येव सुताराणि यस्य तथोक्तेन । 'अलकाश्चूर्णकुन्तलाः; पृषन्ति बिन्दुपृषता' इत्यमरः । मुखेन्दुना अत्र बृन्दावने सन्तमस मन्धकारं, 'अवसमन्धेभ्यस्तमस' इत्यच् प्रत्ययः । प्रणुद्य अपनीय अन्वहं प्रतिदिनं; 'वीप्सायाम व्ययीभावः' । सायन्तने सायंकाले वत्सैः स्समं गृहमागात् प्राप । इण्धातोः कर्तरि लुङि गादेशः ॥ २४ ॥

अथ वत्सासुरवधरूपलीला श्लोकत्रयेण वर्ण्यते—

वत्सासुरः कंसखोऽस्य दर्पहन्ताऽह मद्यैव भवेय माशु ।
इति स्वबुद्ध्या त मयाद्रमेशं गुप्तेषु वत्सेषु वने वसन्तम् ॥ २५ ॥

वत्सासुर इति ॥ कदाचित् कंसस्य सखा कंससखः । 'राजाहस्सखिभ्य ष्टच्' । वत्सासुरः अहं अस्य कृष्णस्य, दर्पस्य अवलेपस्य । 'दर्पोऽवलेपोऽवष्टम्भ' इत्यमरः । हन्ता अद्यैव भवेय मिति स्वबुद्ध्या वत्सेषु गुप्तेषु पालितेषु सत्सु । बालै रिति शेषः । वने वसन्तं तं रमेशं आशु अयात् अगच्छत् । याधातोः कर्तरि लङ् ॥ २५ ॥

ज्ञात्वाऽऽगतं कंससखं कुबुद्धिं स्वपाल्यवत्सान्तगवत्सरूपम् ।
हन्तुं मनोऽधा च्छकटासुरादिमायाविदाद्यो ऽपरिमेयमायः ॥ २६ ॥

ज्ञात्वेति ॥ शकटासुरादीनां मायाः वेत्तीति तथाभूतः । अपरिमेया अतर्क्या माया यस्य सः । आद्यः श्रीकृष्णः । स्वेन पाल्यानां वत्सानां अन्तं मध्यं गच्छतीति तथोक्त वत्सस्य रूपं यस्य तम् । कुत्सिता बुद्धिर्यस्य तं, कंसस्य सखा कंससखः तं वत्सासुरं आगतं ज्ञात्वा हन्तुं मनः अधात् धाधातोः कर्तरि लुङ् ॥ २६ ॥

तं प्राहिणोत् दण्डधरस्य गेह मुद्दण्डदोर्दण्डधरः प्रचण्डः ।
ब्रह्माण्डकोटिप्रविमण्डिताङ्गो हरि र्हरि र्नाग मिव क्षणेन ॥ २७ ॥

तमिति ॥ दोषौ दण्डाविवेत्युपमितसमासः । उद्दण्डयोः अतिसमर्थयोः दोर्दण्डयोः धरः प्रचण्डः श्रेष्ठः ब्रह्माण्डानां कोटिभिः प्रविमण्डितानि अलङ्कृतानि अङ्गानि यस्य स हरिः श्रीकृष्णः, हरिः सिंहः । 'यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु । शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिषु' इत्यमरः । नागं गजमिव क्षणेन तं वत्सासुरं दण्डधरस्य यमस्य । 'कालो दण्डधरः श्राद्धदेव' इत्यमरः । गेहं प्राहिणोत् प्रेषितवान् । प्रपूर्वक हिधातोः कर्तरि लङि 'हिनुमीने'ति णत्वम् । पूर्णोपमालङ्कारः ॥ २७ ॥

अथ बकासुरवधरूपलीला श्लोकचतुष्टयेन वर्ण्यते —

बकारिदेहच्छलनीरजस्कगभीरपाथोयमुनाप्रवाहे ।
झषा निवान्वेष्टु मखर्वचञ्च्वा द्रुतं समाधाव दथो बक स्तम् ॥२८॥

बकेति ॥ अथो अनन्तरं बको बकासुरः, बकारेः श्रीकृष्णस्य देह इति च्छलं व्याजो यस्य तथाभूते निर्गतं रजो यस्मात्तथाभूतं गभीरमगाधं पाथः जलं यस्य तथोक्ते 'कबन्ध मुदकं पाथ' इत्यमरः । यमुनायाः प्रवाहे अखर्वचञ्च्वा । 'खर्वो ह्रस्वश्च वामनः' इत्यमरः । दीर्घचञ्चूपुटेन झषान् मत्स्यान् 'पृथुरोमा झषो मत्स्य' इत्यमरः । न्वेष्टु मिव तं श्रीकृष्णं द्रुतं शीघ्रं, समाधावत् समागच्छत् । समाङ्पूर्वकधावृधातोः कर्तरि लङ् । कैतवापह्नुत्यलङ्कारः । किं च मत्स्यान् विचिन्वन्निवेत्युक्तेः उत्प्रेक्षा । तथा चापह्नवस्योत्प्रेक्षाया मुपकारकत्वात् अङ्गाङ्गिभावेन सङ्करः ॥ २८ ॥

निशाम्य तं निष्ठुरचण्डतुण्डपदप्रहारेण निहन्तुकामः ।
बकासुरो भीषणपक्षपातः दधाव संपाति रिवोष्णरश्मिम् ॥ २९ ॥

निशाम्येति ॥ निष्ठुरं दृढं 'कठोरं निष्ठुरं दृढ' मित्यमरः । चण्डं तीक्ष्णं तुण्डं मुखं पदं च तयो स्समाहारः । तस्य प्रहारेण निहन्तुं कामो यस्य सः । भीषणः भयङ्करः पक्षपातो यस्य सः बकासुरः संपातिः उष्णरश्मिं सूर्य

मिव तं कृष्णं निशाम्य दृष्ट्वा दधाव । धावृधातोः कर्तरि लिट् । पूर्णोपमालङ्कारः । उपेन्द्रवज्रावृत्तम् ॥ २९ ॥

पदा त माक्रम्य शयद्वयेन विदार्य चञ्चूपुटमध्य माशु ।
किटिः सुतीक्ष्णाग्रदता प्रवृद्धतृणं यथा खे समुदक्षिप त्सः ॥ ३० ॥

पदेति ॥ स कृष्णः तं बकासुरं पदा पादेन आक्रम्य संघस्य शयद्वयेन हस्तद्वयेन चञ्चूपुटस्य 'चञ्चुस्त्रोटि रुभे स्त्रियौ' इत्यमरः । मध्यं मध्यभागं किटिः वराहः 'वराह स्सूकरो घृष्टिः कोलः पोत्री किरिः किटि' रित्यमरः । सुतीक्ष्णं अग्रं यस्य तादृशेन दन्तेन दता प्रवृद्धं तृणं यथा तृण मिव आशु विदार्य । खे आकाशे समुदक्षिपत् उक्षिप्तवान् । समुत्पूर्वकक्षिप्धातोः कर्तरि लङ् । पूर्णोपमालङ्कारः । उपेन्द्रवज्रावृत्तम् ॥ ३० ॥

तं तुष्टुवु र्मर्त्य ममर्त्यकार्यकर्तार मस्यानुचरा ह्यघस्य ।
हर्तार मस्मिन् वरधेनुवत्सपाला इवेन्द्रं त्रिदशा स्समाजे ॥ ३१ ॥

तमिति ॥ अस्य श्रीकृष्णस्यानुचराः सहचराः वराः ये धेनूनां वत्सपालाः बालगोपाः मर्त्यं मर्त्यवेषिणं न मर्त्यकार्यं अमर्त्यकार्यं तस्य कर्तारं अघस्य पापस्य हर्तारं नाशकं तं श्रीकृष्णं अस्मिन् बृन्दावनसमीपदेशे समाजे गोपसंघे त्रिदशा देवाः इन्द्र मिव तुष्टुवुः अस्तौषुः । हि प्रसिद्धौ । उपमालङ्कारः । इन्द्रवज्रावृत्तम् ॥ ३१ ॥

अथ अघासुरवधरूपलीला श्लोकचतुष्टयेन वर्ण्यते—

वने चरन्तः शिशवो बिलाभ मलक्ष्यसर्पस्य गलं प्रविष्टाः ।
सञ्चारयन्तो निजवत्ससंघान् तृणार्थिन स्तां स्तृणभूमिबुद्ध्या ॥ ३२ ॥

वन इति ॥ 'वने अटव्यां चरन्तः संचरन्तः तृणार्थिनः 'अर्थाच्चासंनिहित' इति इनिप्रत्ययः । तान् निजानां वत्सानां संघान् संचारयन्तः

शिशवः बालगोपाः, तृणानां भूमि रिति बुद्धया बिलाभं विवरसदृशं 'सुषिरं विवरं बिल' मित्यमरः। अलक्ष्यस्य ज्ञातु मशक्यस्य सर्पस्य गल कण्ठं 'कण्ठो गलोऽथ ग्रीवाया' मित्यमरः। प्रविष्टाः प्राप्ताः। सर्पे तृणभूमिभ्रान्ते र्भ्रान्तिमदलङ्कारः ॥ ३२ ॥

ज्ञात्वा गता नाजगरे शरीरे बालान् स तत्कण्ठ मवाप्य हन्तुम् ।
व्यवर्धतात्यन्त मिव प्ररोद्धुं विन्ध्यो रवे र्मार्ग मगाधिराजः ॥ ३३ ॥

ज्ञात्वेति ॥स कृष्णः अजगरस्येदं आजगरं तस्मिन् शरीरे बालान् इद मुपलक्षणम्। वत्सांश्च गतान् प्रविष्टान्। ज्ञात्वा तदा दूरे स्थित इति भावः। हन्तुं संहर्तुं तस्य अघासुरस्य कण्ठमवाप्य रवेः सूर्यस्य मार्गं प्ररोद्धुं निरोध्दुं अगानां पर्वतानां अधिराजः प्रभुः विन्ध्य इव अत्यन्तं व्यवर्धत। वृध् धातोः कर्तरि लङ्। पूर्णोपमालङ्कारः ॥ ३३ ॥

अहन्नहिं पर्वततुल्यगात्रं तृणावृतं द्रष्टु मशक्यरूपम् ।
भूम्यन्तरिक्षात्तमुखं गिलन्त मघासुरं बालगणा नघारिः ॥३४॥

अहन्निति ॥ अघस्य पापस्य अरिः शत्रुः श्रीकृष्णः पर्वतेन तुल्यं गात्रं तृणै रावृत माच्छादितं अतः द्रष्टु मशक्यं रूपं यस्य तम् भूम्यन्तरिक्षयोः आत्तं व्याप्तं मुखं यस्य तं अधरोष्ठं भूम्यां प्रसार्य उत्तरोष्ठं चान्तरिक्षे प्रसार्य स्थित मित्यर्थः। बालगणान् वत्ससहितबालगणान् गिलन्तं भक्षयन्तं; गिरधातोः रेफस्य 'अचि विभाषे' ति लत्वम्। अहिं सर्परूपं अघासुरं अहन् जघान। हनधातोः कर्तरि लङि तिपि हल्ङ्याादिना तिलोपः ॥ ३४ ॥

विमोचिता स्तन्मुखराहुवक्त्राद् बालेन्दवोऽनेन कि मद्भुतं तत् ।
क्षणं स्वभू र्दौर्बलपालिता ये मुक्तेश्च तेषां समयप्रतीक्षा ॥ ३५ ॥

विमोचिता इति ॥ तस्य अजगरस्य मुखमेव राहुवक्त्रं तस्मात् बाला एव इन्दवः। अनेन कृष्णेन विमोचिताः इति यत् तत् किमद्भुतं किं माश्चर्यं? यत्

क्षणं क्षणकालं, 'कालाध्वनो' रिति अत्यन्तसंयोगे द्वितीया। स्वभूः हरिः तस्य दोर्बलेन पालिताः रक्षिताः ये तेषां मुक्तिश्च मुक्तिरपि समयं प्रतीक्षत इति तथा। अत्र कैमुत्यन्यायेनार्थसंसिद्धेः काव्यार्थापत्त्यलङ्कारः। तदुक्तं --
"कैमुत्येनार्थसंसिद्धिः काव्यार्थापत्ति रिष्यत" इति ॥ ३५ ॥

शिक्येष्वित्याद्यष्टश्लोक्या दध्यन्नभोजनरूपलीला वर्ण्यते—

शिक्येषु दध्यन्न मघारियोग्यं पीयूषमाधुर्यरसं मनोज्ञम्।
सोपस्करं भूरि वनं सकृष्णाः संयुज्य तेऽयु र्मुदिता स्सवत्साः ॥३६॥

शिक्येष्विति ॥ कृष्णेन सहिताः सकृष्णाः ते गोपालाः अघारेः श्रीकृष्णस्य योग्य मुचितं पीयूषस्येव माधुर्यरसो यस्य तत्। मनोज्ञं उपस्करैः आम्रजंबीराद्युपदंशैः सहितं, 'वेशवार उपस्कर' इत्यमरः। भूरि बहुदध्ना मिश्रितं अन्नं शिक्येषु यन्त्रेषु। 'भारयष्टि स्तदालम्बि शिक्य' मित्यमरः। संयुज्य निक्षिप्य मुदिताः सन्तः सवत्साः वनं अयुः। याधातोः कर्तरि लङ् ॥ ३६ ॥

घोरास्थिजाले रतिभीषिकायां भूम्यां तृणावर्ततनुं विरूपाम्।
विलोकयेऽद्यापि बभाण कृष्णो मा यात बाला इति तत्प्रदेशम् ॥३७॥

घोरेति ॥ हे बालाः गोपकाः घोरैः रस्थिजालैः अतिभीषिकायां अत्यन्त भयंकरायां भूम्यां विरूपां विकाररूपां तृणावर्तस्य तनुं अद्यापि विलोकये पश्यामि। तत् प्रदेशं मा यात मा गच्छत इति कृष्णः बभाण उवाच। भणधातोः कर्तरि लिट्। अत्र भूतार्थसाक्षात्कारस्य वर्णनात् भाविकालङ्कारः। तदुक्तं—'भाविक भूतभाव्यर्थसाक्षात्कारस्य वर्णन' मिति ॥ ३७ ॥

अन्योन्यहस्तप्रभवप्रतालै र्मुदं वहन्तो हरिगानमत्ताः।
समाधवा स्ते विविशु र्वनान्त मिवामरा नन्दन मिन्द्रमुख्याः ॥३८॥

अन्योन्यमिति ॥ अन्योन्यं परस्परं हस्तेषु प्रभवैः उत्पन्नैः प्रतालैः मुदं वहन्तः, माधवेन सहिताः, हरिगानेन मत्ताः ते बालाः। इन्द्रः मुख्यो येषां ते। अमरा देवाः। नन्दन मिव वनान्तं वनमध्यं विविशुः। विशधातोः कर्तरि लिट्। पूर्णोपमालङ्कारः ॥ ३८ ॥

गरिष्ठया पद्मयवादिचिह्नैः लघीयसीं त्वाशु गरीयसीं क्ष्माम्।
तन्व न्पदस्य प्रभया वनान्ते बालै स्समं रन्तु मसा वियेष ॥३९॥

गरिष्ठयेति ॥ असौ कृष्णः लघीयसीं क्ष्मां भूमिं पद्मयवरूपरेखे आदि येषां तैः चिंह्नैः गरिष्ठया गुरुशब्दस्य इष्ठनि 'प्रियस्थिरे' त्यादिना गरादेशः। पदस्य प्रभया आशु गरीयसीं श्रेष्ठां गुरुशब्दात् ईयसुनि टिलोपे 'उगितश्चे' ति ङीप्। तन्वन् कुर्वन्। बालै स्समं वनान्ते वनमध्ये रन्तु इयेष ऐच्छत्। इषधातोः कर्तरि लिट् ॥ ३९ ॥

जलाशये पीतदुकूलमध्यः पद्मान्तरे पांसुपिशङ्गिताङ्गम्।
भृङ्गं स्वसाम्यं नितरां भजन्तं निशाम्य मोदं सखिभि स्स लेभे ॥४०॥

जलाशय इति ॥ पीतं दुकूलं मध्ये मध्यप्रदेशे यस्य स श्रीकृष्णः जलाशये तटाके पद्मस्य अन्तरे मध्ये पांसुभिः किंजल्करजोभिः पिशंगितानि पीतरूपं प्रापितानि अङ्गानि यस्य तम्। तेन साम्यं नितरां भजन्तं वहन्तं भृङ्गं निशाम्य दृष्ट्वा सखिभि स्सह गोपै स्समं मुदं लेभे प्राप। लभधातोः कर्तरि लिट्। उपमानत्वेन प्रसिद्धे भृङ्गे उपमेयत्वकल्पनात् प्रतीपालङ्कारः। तदुक्तं—प्रतीप मुपमानस्योपमेयत्वप्रकल्पनम् इति ॥ ४० ॥

संखादयन् तत्समजं समीपे घासेषु गारुत्मतकान्तिभाक्षु।
आहूय गोपा नवमुच्य भोज्या न्यत्तुं मनोऽधात्त्वरया मुदाऽसौ ॥४१॥

संखादयन्निति ॥ असौ श्रीकृष्णः समीपे सरस स्समीपे गरुत्मत इमानि गारुत्मतानि मरकतरत्नानि 'गारुत्मतं मरकत' मित्यमरः। तेषां कान्तिं भजंतीति

तथाभूतेषु घासेषु तत्समजं तेषां वत्सानां संघं 'पशूनां समज' इत्यमरः। संखादयन् सम्यक् खादयन् गोपान् आहूय भोज्यानि भोज्ययुक्तशिक्यानि। अर्शआदित्वा न्मत्वर्थे अच् प्रत्ययः। अवमुच्य विमुच्य मुदा त्वरया अत्तुं भोक्तुं मनः अधात् दधार। धाधातोः कर्तरि लुङ्। इन्द्रवज्रावृत्तम् ॥ ४१ ॥

तस्मिन् क्षणे द्रष्टु ममुं धरण्याः कार्याय मानुष्यकदेहभाजम्।
बालं रमेशं दिवि वासवेशाः समागता देवगणा विरेजुः ॥ ४२ ॥

तस्मिन्निति ॥ तस्मिन् क्षणे तत्समये वासवः ईशः येषां ते, देवगणाः धरण्याः कार्याय कार्यार्थं मनुष्यसंबन्धिदेहं भजतीति तथोक्त 'मनो र्जाता-वञ्यतौ षुक् चे' ति यत्प्रत्ययान्तात् मनुष्यशब्दात् 'गोत्रोक्षोष्ट्र' इत्यादिना समूहार्थक वुञ् प्रत्ययस्य संबन्धिनि लक्षणा। 'युवोरनाका' वित्यकादेशे 'प्रकृत्याऽके राजन्यमनुष्ययुवान' इति प्रकृतिभावः। अमुं बालं दध्यन्नभोक्तारं रमेशं श्रीकृष्णं द्रष्टुं दिवि अन्तरिक्षे समागताः सन्तः विरेजुः। विपूर्वात् राजृधातोः कर्तरि लिट् ॥ ४२ ॥

विमुच्य शिक्यानि तटाकतीरे बाला रमेशं परिवृत्य तस्थुः।
त मध्वरे क्लृप्तहवींषि भोक्तु मिवामरा यज्ञभुजां वरिष्ठम् ॥ ४३ ॥

विमुच्येति ॥ बाला गोपालाः तटाकस्य तीरे तटे शिक्यानि यन्त्राणि विमुच्य यज्ञभुजां देवानां वरिष्ठं अतिशयेन श्रेष्ठं उरु शब्दस्य 'अतिशायने' इत्यादिना इष्ठनि 'प्रियस्थिरे' त्यादिना वरादेशः। अध्वरे यागे क्लृप्तानि श्रुत्या विहितानि विष्णव इदं इन्द्रायेद मिति क्लृप्तानि हवींषि भोक्तु ममराः देवा इव रमेशं श्रीकृष्णं परिवृत्य तस्थुः स्थितवन्तः। ष्ठाधातोः कर्तरि लिट्। पूर्णोपमा-लङ्कारः ॥ ४३ ॥

अन्योन्य मामन्त्र्य पलाशपद्मपत्रेषु दध्यन्न ममी शिलासु।
देवै रपि प्रार्थ्यतमं व्यजक्षु स्तेनैव साकं हरिणा तटान्ते ॥४४॥

अन्योन्य मिति ॥ अमी गोपाः अन्योन्यं परस्परं आमन्त्र्य आहूय पलाशानां पद्मानां च पत्रेषु 'द्वन्द्वान्त' इति न्यायेन प्रत्येकं संवन्धः । शिलासु देवै रपि अतिशयेन प्रार्थ्यं प्रार्थ्यतमं 'अतिशायने' इत्यादिना तमप् प्रत्ययः । तेनैव हरिणा साकं तटान्ते तीरसमीपे दध्यन्नं व्यजक्षु रखादन् । विपूर्वाज्जक्षधातोः कर्तरि लङि 'सिजभ्यस्ते'ति झे जुस् । इन्द्रवज्रावृत्तम् ॥ ४४ ॥

अथ तदेत्यादिपञ्चदशश्लोक्या वत्सापहरणरूपलीला वर्ण्यते—

तदैव मायां नितरां बुभुत्सुः पद्मोद्भवः पद्मदलाक्षवश्याम् ।
जहार वत्सा नवलेपदुष्टः सर स्समीपे तृणभूमिभाजः ॥ ४५ ॥

तदैवेति ॥ तदैव तस्मिन् समये पद्मदले इवाक्षिणी यस्येति धर्मवाचकलुप्तोपमा । तस्य वश्यां वशे स्थितां 'वशं गत' इति साधुः । मायां नितरां वोद्धु मिच्छुः । पद्मे उद्भवो यस्य स ब्रह्मा अवलेपेन गर्वेण दुष्टस्सन् सर स्समीपे तटाकस्य समीपे तृणयुक्तां भूमिं भजन्तीति तथोक्तान् वत्सान् जहार अपहृतवान् हृञ्धातोः कर्तरि लिट् ॥ ४५ ॥

उत्कन्धरः कन्दरलग्ननेत्रो मुरारि रीशः शतपत्रनेत्रः ।
तृणेषु वत्सान् सरत स्समीपे नापश्य देना नपि दूरदेशे ॥ ४६ ॥

उदिति ॥ उन्नता कन्धरा यस्य सः । कन्दरेषु गुहासु 'दरी तु कन्दरो वा स्त्री' त्यमरः । लग्ने नेत्रे यस्य सः । शतपत्रे इव नेत्रे यस्य सः । धर्मवाचकलुप्तोपमा । 'शतपत्रं कुशेशय' मित्यमरः । ईशः प्रभुः । मुरारिः श्रीकृष्णः समीपे समीपदेशे तृणेषु पूर्वं सरतः संचरतः एनान् वत्सान् दूरदेशेऽपि नापश्यत् नावलोकितवान् । दृशिधातोः कर्तरि लङि 'पाघ्रे'-त्यादिना पश्या देशः ॥ ४६ ॥

आमन्त्र्य बाला नह मेक एव गच्छामि नो वत्सविलोकनाय ।
इति स्म ता नाह सखा स यूयं प्रजक्षितालं क्षणकाल मत्र ॥४७॥

आमन्त्र्येति ॥ सखा स श्रीकृष्णः बाला नामन्त्र्य संबोध्य नः अस्माकं वत्सानां विलोकनाय अन्वेषणाय अह मेक एव गच्छामि 'यूयं क्षणकाल मत्र भोजनप्रदेशे अन्नं प्रजक्षित खादत । जक्षिधातो कर्तरि विधौ लोट् । 'रुदादिभ्य स्सार्वधातुक' इति इट् । इति तान् बालान् आह स उवाच ॥ ४७ ॥

दध्यन्नपाणिः स्वय माशु गत्वा वत्सान् विचिन्वन्नपि नैव दृष्ट्वा ।
सरस्समीपं पुन रेत्य बालान् विलोक्य चित्ते न परं व्यमृक्षत् ॥४८॥

दधीति । दध्यन्नं पाणौ यस्य स श्रीकृष्णः स्वय माशु गत्वा वत्सान् विचिन्वन् अन्वेषमाणोऽपि नैव दृष्ट्वा पुनः सरस्समीपं तटाकस्य समीप मेत्य आगत्य बालानपि न विलोक्य अदृष्ट्वा चित्ते मनसि परं व्यमृक्षन् परामृष्टवान् ध्यातवा नित्यर्थः । विपूर्वात् मृशधातोः कर्तरि लुङि 'शलयुगुपधे' ति क्सा देशः ॥ ४८ ॥

ज्ञात्वाब्जयोने रथ मायया ऽऽत्तान् बालान् वितत्याशु निजां च मायाम् ।
अभू त्तत्र तत्तुल्यकुमारवत्सरूप स्तदा वर्णवयोगुणै श्च ॥ ४९ ॥

ज्ञात्वेति ॥ अथ ध्यानानन्तरं स श्रीकृष्णः बालान् चकारो वत्स-समुच्चायकः । अब्जयोने र्ब्रह्मणः मायया आत्तान् तिरोहितान् ज्ञात्वा तदा निजां स्वकीयां मायां च आशु वितत्य विस्तार्य, वर्णैः वयोभिः गुणैः तैः बालवत्सैः तुल्यानां कुमाराणां वत्सानां रूपं स्वरूपं यस्य तथाभूतः अभूत् । पूर्णोपमालङ्कारः ॥ ४९ ॥

सायन्तने ता ननयद् गृहाणि पूर्वं यथा मातृमुदे मुरारिः ।
दृष्ट्वा शिशून् पीनपयोधरा स्ताः संप्राप्तगेहा न्मुद मापु रुत्काः ॥५०॥

सायन्तन इति ॥ मुरारिः श्रीकृष्णः, सायन्तने सायंकाले मातॄणां मुदे, तान् वत्सबालान् स्वसृष्टान्, गृहाणि पूर्वं यथा पूर्ववत । अनय त्प्रापयामास ।

पीनाः पयोधराः स्तना यासां ताः, ताः मातरः, संप्राप्तानि गेहानि यै स्तान् गृहागता नित्यर्थः । शिशून् दृष्ट्वा उत्का उन्मनसः सत्यः । 'उत्क उन्मना' इति निपातनात् साधुः । 'उत्क उन्मना' इत्यमरः । मुद मापुः । प्रापुः आप्लृधातोः कर्तरि लिट् । इन्द्रवज्रावृत्तम् ॥ ५० ॥

सर्वात्मकोऽसौ परिगूढमायः मुरारि राब्दं निजवत्ससंघान् ।
गृहाद् बहि स्सद्म पुनर्नयंश्च निनाय कालं वनकेलिकामः ॥ ५१ ॥

सर्वात्मक इति ॥ सर्वात्मकः सर्ववत्सबालरूपकः । परितः गूढा गुप्ता माया येन सः । वनस्य केलौ कामेऽभिलाषो यस्य सः । असौ मुरारिः श्रीकृष्णः । अब्द मभिव्याप्य आब्दं अब्दपर्यन्तं, निजवत्ससंघान् स्वस्वरूप वत्ससंघान् प्रातःकाले गृहाद् बहिः 'अपपरिबहि' रिति पञ्चमी । सायं-काले पुनश्च सद्म एवं नयन् कालं निनायानयत् । नीङ् धातोः कर्तरि लिट् ॥ ५१ ॥

दिनत्रयोने सति हायने बलो दृष्ट्वा वने वत्सशिशू निहाद्भुतान् ।
क्षणेन पीताम्बर शङ्खचक्रभृ द्विष्णू ननेकान् पर माप विस्मयम् ॥५२॥

दिनेति ॥ इह वने बलः बलरामः हायनेऽब्दे । 'संवत्सरो वत्स-रोऽब्दो हायन' इत्यमरः । दिनानां त्रयं तेन ऊने सति वत्सशिशून्, क्षणेन क्षणकालेन, अद्भुतान् आश्चर्यकरान् अनेकान् बहून्, पीताम्बराणि च शंखांश्च चक्राणिच तानि बिभ्रतीति तथाभूतान् विष्णून् दृष्ट्वा, परं विस्मयं आश्चर्यं आप प्राप । आङ्पूर्वक आप्लृधातोः कर्तरि लिट् । अर्धसमवृत्तम् ॥५२॥

ब्रह्मेन्द्रशर्वादिमरुद्गणानां मुनीश्वराणां मम मोहदा स्म ।
मायेय माभाति कृता त्वयेति स रौहिणेयो जगदीश माह ॥५३॥

ब्रह्मेति ॥ ब्रह्मेन्द्रशर्वा आदि र्येषां तेषां मरुद्गणानां देवानां मुनीश्वराणां ममापि मोहं ददातीति तथाभूता इयं माया त्वया कृता आभाति इति स रौहिणेयो बलरामः जगदीशं श्रीकृष्ण माह स्म ॥ ५३ ॥

इमां नु मायां मिह शीरपाणे मया कृतां वत्सशिशुस्वरूपाम् ।
आब्दं प्रवृत्तां द्रुहिणस्य गर्वभङ्गाय जानीहि स इत्युवाच ॥५४॥

इमा मिति ॥ शीरपाणे बलराम! इहात्र, आब्दं अब्द मभिव्याप्य प्रवृत्तां वत्सशिशुस्वरूपां इमां नु मायां द्रुहिणस्य ब्रह्मणः । 'धाताब्जयोनि द्रुहिण' इत्यमरः । गर्वभङ्गाय मया कृतां जानीहि अवेहि । ज्ञाधातोः कर्तरि लोट् । इना प्रत्यये जादेशे 'ई हल्यघो' रिति ईकारः । इति स श्रीकृष्णः उवाच । अत्र इमां माया मिति हेतोः द्रुहिणस्य गर्वभङ्गायेति हेतुमता सार्धं वर्णनात् हेत्वलङ्कारः । तदुक्तं—'हेतो र्हेतुमता सार्धं वर्णनं हेतुरुच्यत' इति ॥ ५४ ॥

अथाब्जयोनि र्हृतबालवत्स श्चक्राङ्गवाह स्समवेक्ष्य तत्र ।
बालान् सवत्सां श्चरत स्समीपे मोहान्धकारे नितरां न्यमज्जत् ॥५५॥

अथेति ॥ अथ संवत्सरानन्तरं, हृता अपहृताः बालवत्साः येन सः । चक्राङ्गो हंसः । 'हंसास्तु श्वेतगरुत श्चक्राङ्गा मानसौकसः' इत्यमरः । वाहः वाहनं यस्य सः । अब्जयोनिः ब्रह्मा । तत्र पुरोभागे समीपे चरतः संचरतः, वत्सैः सहितान् बालान् समवेक्ष्य । मोह एवान्धकार स्तस्मिन् नितरां न्यमज्जत् ममज्ज । निपूर्वक मज्जधातोः कर्तरि लङ् ॥ ५५ ॥

मद्योगमायामयतल्पसुप्ता अद्यापि बालाः किल शेरते स्म ।
ते वा न वैतेऽप्यतिचित्र मेत दित्यात्मभू स्संशय माप मोहात् ॥५६॥

मदिति ॥ मम योगमायामये योगमायाविकारे तल्पे शय्यायां 'तल्पं शय्याट्टदारे' ष्वित्यमरः । सुप्ताः सवत्साः बालाः । अद्यापि शेरते स्म । शीङ् धातोः कर्तरि लटि 'शीङो रुडिति रुडागमे 'शीङः सार्वधातुक' इति गुणः । अत्रास्मिन् देशे । एते बालाः । ते वा मदपहृता वा न वा अन्ये वा इति आत्मभूः ब्रह्मा एतच्चित्र मिति मोहात् संशय माप प्राप ।

आप् धातोः कर्तरि लिट् । ब्रह्माऽपि कृष्णस्य माया मज्ञात्वा संशय मापेत्येत दतिचित्रम् । अत्र ते वा न वेति संशयवर्णनात् सन्देहालङ्कारः । तदुक्तं--‘स्या त्स्मृतिभ्रान्तिसन्देहै स्तदङ्कालङ्कृतित्रयम्’ इति । इन्द्र-वज्रावृत्तम् । ॥ ५६ ॥

मायाविना मप्यतिमोहकारिणो बालस्य मायाहिममण्डलाचितः ।
किमप्यजानन् समतिष्ठतात्मभू श्चतुर्मुखी दारुमयीव पुत्तिका ॥५७॥

मायाविना मिति ॥ माया येषा मस्तीति मायाविनः । ‘अस्माये’-त्यादिना विनिप्रत्ययः । तेषा मपि अतिमोहं करोतीति तथोक्तस्य बालस्य श्रीकृष्णस्य मायैव हिममण्डलं तुहिनसमूहः तेन आचितः व्याप्तः । आत्मभू ब्रह्मा किमपि अजानन् चतुर्मुखी दारुमयी दारुविरचिता पुत्रिका प्रतिमेव ‘पाञ्चालिका पुत्रिका स्यात् वस्त्रदन्तादिभिः कृता’ इत्यमरः । समतिष्ठत निश्चेष्ट मवर्तते’ त्यर्थः । संपूर्वकष्ठाधातोः कर्तरि लङ् । ‘समवप्रविभ्य’ इत्यात्मनेपदम् । पूर्णोपमालङ्कारः ॥ ५७ ॥

अथ षड्भिः श्लोकैः ब्रह्मण श्शरणप्राप्तिं कुलकेनाह —

कथंचि दस्मा त्परिलब्धसंज्ञो निशाम्य तत्रैव हरिं रमेशम् ।
बालान् सवत्सान् हरितुल्यरूपा निरापति स्तं शरणं प्रपेदे ॥५८॥

कथ मिति ॥ इरा सरस्वती तस्याः पति र्ब्रह्मा । कथंचि दतिप्रयासेन अस्मात् भगवतः परिलब्धा संज्ञा येन तथा भूतस्सन् । तत्रैव पुरोभागे रमेशं हरिं श्रीकृष्णं, हरिणा तुल्यं रूपं येषां तान् पीताम्बरशंखचक्रधारिण इत्यर्थः । सवत्सान् बालांश्च निशाम्य दृष्ट्वा तं श्रीकृष्णं शरणं प्रपेदे । प्रपूर्वकपद्धातोः कर्तरि लिट् ॥ ५८ ॥

भजन्त माद्यं व्रजदेववंशशिशुत्वनाट्यं नववत्सपत्वम् ।
निजेच्छया जाङ्गलिकं जनानां भवासदाशीविषपीडितानाम् ॥५९॥

भजन्त मिति ॥ आद्यं सर्वकारणरूपं निजेच्छया स्वेच्छयैव व्रजदेवस्य नन्दस्य वंशे शिशुत्वनाट्यं नववत्सपत्वं नूतनवत्सपालभावं च भजन्तं भवः संसार एव असदाशीविषो दुष्टसर्पः तेन पीडितानां जनानां जाङ्गलिकं विषवैद्यं 'विषवैद्यो जांगलिक' इत्यमरः । जीवनकारण मिति यावत् ॥ ५९ ॥

समुल्लस न्मञ्जुनमत्किरीटकोट्यन्तरालग्नसुहीरपुष्पैः ।
संपूजितं बाल ममुं सुराणां गणैश्च कार्यस्य वरस्य सिद्ध्यै ॥६०॥

समुल्लस दिति ॥ सुराणां देवानां गणैश्च समुल्लसतां मञ्जु नमतां किरीटानां कोटेः अन्तरा मध्ये लग्नैः सुहीरपुष्पैः सुहीराण्येव वज्राण्येव पुष्पाणि तैः । वरस्य कार्यस्य कंसादिहननकार्यस्य सिद्ध्यै सिद्ध्यै संपूजितं अमुं पुरः स्थितं बालं बालरूपं, अत्र कार्यसिद्ध्यै पूजित मिति वर्णनात् हेत्वलङ्कारः ॥ ६० ॥

यस्यांघ्रिरेणुस्पृहया रमा सा तेपे तप स्तं स्पृहणीयपादा ।
ब्रह्मादिशर्वेन्द्रसुरैः प्रकाम मैश्वर्यकामै रजयात्तमोहैः ॥ ६१ ॥

यस्येति ॥ अजया मायया आत्तः प्राप्तः मोहो येषां तैः । ऐश्वर्यं कामयन्त इति तथाभूतैः । ब्रह्मा आदि र्येषां तैः शर्वेन्द्रसुरैः प्रकामं स्पृहणीयौ प्रार्थनीयौ पादौ यस्या स्सा रमा यस्य भगवतः अंघ्रिरेणुस्पृहया पादरेणुवहनेच्छया तप स्तेपे कृतवती तं कृष्णं । इन्द्रवज्रावृत्तम् ॥ ६१ ॥

यन्निर्गताऽभू त्सरितां वरिष्ठा लोकत्रयस्यामितसंचितस्य ।
अघस्य विध्वंसपटीयसी च तत्पादपद्मं सरसं वहन्तम् ॥ ६२ ॥

यदिति ॥ यस्मा त्पादपद्मा न्निर्गता जाता सरितां वरिष्ठा, अतिशयेन श्रेष्ठा गङ्गा, लोकानां त्रयस्य अमितं यथा तथा संचितस्य बहुजन्मार्जितस्य अघस्य पापस्य विध्वंसने नाशे पटीयसी अतिशयेन पट्वी 'द्विवचने' त्यादिना 'ईयसुन् प्रत्यये इष्ठेमेयःसु' इति टिलोपे उगित्वात् ङीप् । अभूत तत्पादपद्मं वहन्तं सरसं सदयं अपराधिना मप्यनुग्रहीतारम् ॥ ६२ ॥

उक्त मेवार्थं भंग्यन्तरेणाह—

सन्तर्तुकामा दिवि देवसंघा दलद्वियन्मार्गगता विमानैः ।
दृष्ट्वा यदङ्गुष्ठनखाग्रजातां गङ्गां त्रिलोकीतिलकं वितेरुः ॥ ६३ ॥

समिति ॥ सम्यक् तर्तुं कामो येषां ते । विमानै र्दलन्तं स्फुटन्तं वियन्मार्गं आकाशमार्गं गताः प्राप्ताः देवसंघाः दिवि अन्तरिक्षे यस्य भगवतः अंगुष्ठनखाग्रजातां अत एव त्रयःणां लोकानां समाहारस्त्रिलोकी । 'तद्धितार्थे' त्यादिना समासे 'द्विगो' रिति ङीप् । तस्यां तिलकं भूषणं, 'तमालपत्रतिलक-चित्रकाणि विशेषकं' मित्यमरः । गङ्गां दृष्ट्वा वितेरुः विपूर्वक तॄधातोः कर्तरि लिट् ॥ ६३ ॥

अब्दो मनुष्यस्य पितामहस्य यस्य प्रवृत्त स्तुटिकाल आसीत् ।
हरिं रमेशं कबलैकपाणिं तदा स चक्रे मति मीडितुं तम् ॥ ६४ ॥

अब्द इति ॥ मनुष्यस्य संबन्धी प्रवृत्तः पूर्णः अब्दः संवत्सरः यस्य पितामहस्य ब्रह्मण स्तुटिकाल आसीत । स ब्रह्मा तदा तस्मिन् काले कबलः एकपाणौ यस्य तं रमेशं हरिं श्रीकृष्णं ईडितुं स्तोतुं मतिं चक्रे । कृधातोः कर्तरि लिट् ॥ ६४ ॥

य श्चन्द्रशेखर सुरेश विचिन्तनीयां
लीलावतारसुकथा कणिकां शृणोति ।
भित्त्वा जलं वरसरोज मिवाशु विष्णोः
पादरविन्द मतुलं भजतेऽभवं सः ॥ ६५ ॥

य इति ॥ यः चन्द्रशेखरसुरेशैः शिवेन्द्रादिभिः विचिन्तनीयां मनन-योग्यां लीलावतारस्य भगवतः सुकथायाः कणिकां शृणोति । सः जलं भित्त्वा वरसरोजं श्रेष्ठपद्म मिव, अज्ञानं भित्त्वा अभवं न विद्यते भवः उत्पत्ति र्यत्र, तद्विष्णोः अतुलं पादारविन्दं आशु भजते प्राप्नोति । भजधातोः कर्तरि

लट् । पूर्णोपमालङ्कारः। वसन्ततिलकावृत्तम् । 'उक्ता वसन्ततिलका तभजा जगौग' इति लक्षणात् ॥ ६५ ॥

नादादिसंस्थितिपरोत्पतितोदरस्थ-
पश्यन्त्यनर्गलविनिर्गतमध्यमाजा ।
सद्वैखरीपिकनिकूजितसुन्दरेऽस्मिन्
सर्गे ऽवतारनुतिलक्षणिकाऽस्य रेजे ॥ ६६ ॥

नादेति ॥ **अस्य** कवेः पुण्यकोटेः नादस्य आदिना संस्थितेः आद्यावस्था रूपायाः पराख्यायाः सकाशात् उत्पतिता उद्भूता उदरस्था चेत् पश्यन्त्याख्या भवति । तस्याः सकाशात् अनर्गल मप्रतिहतं यथा तथा विनिर्गतायाः मध्यमाख्यायाः सकाशाज्जायत इति तथा। सद्वैखरी पिकस्य कोकिलस्य 'कोकिलः पिक इत्यपी' त्यमरः । निकूजनं पञ्चमस्वरः । 'पिकः कूजति पञ्चम' मित्यमरः । तद्वत् सुन्दरे श्लाघ्ये । पञ्चमस्वरसादृश्यवर्णनेन सर्गस्य पञ्चमत्वं गम्यते । अस्मिन् सर्गे अस्य अकारवाच्यस्य श्रीकृष्णस्य अवतारस्य नुतिः स्तुतिः । 'स्तवः स्तोत्रं स्तुति र्नुति' रित्यमरः । लक्षणं रूपं यस्याः तथाभूता सती रेजे राजृधातोः कर्तरि लिट् । वसन्ततिलकावृत्तम् ॥

अत्रेदं बोध्यं— नादस्य चत्वारि स्थानानि । तत्र मूलाधारे विद्यमानः नित्यो नादः परेत्युच्यते, स एव उदरस्थो यदि पश्यन्तीत्युच्यते । स एव कण्ठस्थो यदि मध्यमेत्युच्यते, स एव वाग्रूपेण यदि निर्गच्छति तदा वैखरी-युच्यते । तथा च श्रुतिः—चत्वारि वाक् परिमिता पदानि तानि विदु र्ब्राह्मणाः ये मनीषिणः गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्तीति ।

इति श्रीपुण्यकोटिकृते कृष्णविलासे सव्याख्याने पञ्चमस्सर्गः

————

षष्ठस्सर्गः

———

अथ दशभिः ब्रह्मा श्रीकृष्णं स्तौति—

यज्जन्मना शम्भुकनज्जटातटप्रपातसंरम्भपटीयसी वरा ।
स्वर्वाहिनी लोकविशुद्धिकारिणी क स्तं न सेवेत विनाऽविपश्चितः ॥१॥

यज्जन्मनेति ॥ वरा श्रेष्ठा स्वर्वाहिनी गङ्गा यस्मा द्भगवतः जन्मना उत्पत्त्या, शम्भोः शिवस्य कनत् उल्लसत् जटाया स्तटे प्रदेशे प्रपातस्य प्रपतनस्य यस्संरम्भः आवेशः तस्मिन् पटीयसी अतिशयेन समर्था । 'द्विवचने' त्यादिना ईयसुनि 'टे'रिति टिलोपः । लोकानां जनानां, 'लोकस्तु भुवने जने' इत्यमरः । विशुद्धिं पवित्रतां करोतीति तथो अभू दिति शेषः । तं भगवन्तं अविपश्चितः अपण्डितान् विना 'पृथ ग्विने' त्यादिना द्वितीया । को न सेवेत न भजेत । षेवृधातोः कर्तरि लिङ् ॥ १ ॥

भगवत्सेवायाः तपोलभ्यत्व माह—

त्वां सेवितुं श्रीरपि दुश्चरं महत् तप्त्वा तपस्त्वं फल माप भृत्यताम् ।
अनन्यलभ्या मनपायिनीं तदा यदा यदा मानुषदेहमा गसि ॥ २ ॥

त्वा मिति ॥ श्रीः लक्ष्मीरपि, यदा यदा यस्मिन् काले । 'सर्वैकान्यकिं-यत्तदः काले दा' इति दाप्रत्ययः । त्वं मानुषं देहं भजतीति तथा भूतोऽसि । तदा त्वां सेवितुं दुश्चरं दुष्करं महत्तपः तप्त्वा । अन्यस्य लभ्या न भवतीति अनन्यलभ्या तां अनपायिनीं अपायरहितां विश्लेषरहिता मित्यर्थः । भृत्यतां भार्यात्वं फल माप प्राप । आप्लृधातोः कर्तरि लिट् ॥ २ ॥

अपरिमितमहिमानमाह —

यदीक्षणक्षुब्धगुणतया सती मायाऽसृजत्सा महदादिरूपकम् ।
विश्वं तमीशं यदुवंशसागरक्षपाकरं त्वां शरणं भजाम्यहम् ॥ ३ ॥

यदिति ॥ सा जगत्कारणत्वेन प्रसिद्धा माया प्रकृतिः यस्य तव ईक्षणेन क्षुब्धं विषमावस्थापन्नं गुणानां सत्त्वादीनां त्रयं यस्या स्तथाभूता सती महदादयः महत्तत्त्वादयः रूपं स्वरूपं यस्य तद्विश्वं जगत् असृजत् ससर्ज । तमीशं प्रभुं, यदुवंश एव सागरः तस्य क्षपाकरं चन्द्रम् । 'नक्षत्रेशः क्षपाकर' इत्यमरः । त्वा महं शरणं रक्षकं; 'शरणं गृहरक्षित्रो' रित्यमरः । भजामि । भजधातोः कर्तरि लट् ॥ ३ ॥

त्वदङ्घ्रिसेवाऽस्तु सदैव मे मुदे योगीन्द्रसंप्रार्थ्यतमाऽघमर्दनी
कदाऽप्यहं मानुष मीदृशं जनुः पश्येय मत्रैव परस्य ते भुवि ॥४॥

त्वदिति ॥ योगीन्द्रैः योगिश्रेष्ठैः । अतिशयेन संप्रार्थ्या प्रार्थ्यतमा । अघमर्दनी पापहर्त्री तव अंघ्रिसेवैव मे मुदे सन्तोषाय सदा अस्तु भवतु । अस धातोः प्रार्थनायां लोट् । अहं ब्रह्मापि अत्रैव भुवि भूम्यां परस्य भगवतः ते ईदृशं अपरिमितमहिमोपेतं मानुषं जनुः जन्म । 'जनुर्जननजन्मानी' त्यमरः । कदा पश्येयं न कदाऽपीत्यर्थः । दृशिधातोः कर्तरि लिङ् । 'पाघ्रे' त्यादिना पश्यादेशः ॥ ४ ॥

स्वापराधं निवेदयन् क्षमापयति—

स्मयेन देवेऽखिललोकसाक्षिणि स्फुटावतारे सकलात्मरूपके ।
कृतापराधस्य ममात्मघातिनः क्षन्तुं त्वमेवार्हसि दोषसंचयान् ॥५॥

स्मयेनेति ॥ अखिलस्य लोकस्य साक्षिणि साक्षिभूते सकलात्मनां सर्वप्राणिनां रूपं स्वरूपं यस्य तस्मिन् स्फुटः व्यक्तः अवतारो यस्य तस्मिन् देवे

भगवति । त्वयीति शेषः । स्मयेन गर्वेण कृतः अपराधो येन तस्य । अत एवात्मानं घातयतीति तथा मम दोषसंचयान् अपराधसमूहान् क्षन्तुं सोढुं त्व मेवार्हसि योग्योऽसि । अर्हधातोः कर्तरि लट् ॥ ५ ॥

कृतापराधस्याप्रयोजकत्व माह—

मायाशिशौ कृष्ण यशस्विनीश्वरे मेधाविनि स्रग्विणि संप्रयोजिता ।
माया मयाद्याखिलदोषकारिणा खद्योतभाः किं न मयूखमालिनि ॥६॥

मायेति ॥ हे कृष्ण, यशस्विनि कीर्तिमति, मेधाविनि बुद्धिमति, स्रग्विणि वनमालिनि, मायाशिशौ कपटबाले ईश्वरे त्वयीति शेषः । अखिलान् दोषान् करोतीति तथोक्तेन मया अद्य संप्रयोजिता सम्यङ्नियोजिता माया मयूखमालिनि सूर्ये खद्योतानां भाः कान्तिः न किं? अत्र भगवद्विषयप्रवर्तित-मायामयूखमालिविषयप्रवर्तितखद्योतभारूपयोः वाक्यार्थयो रैक्यारोपा न्निदर्शना लङ्कारः । तदुक्तम्—'वाक्यार्थयो स्सदृशयो रैक्यारोपो निदर्शने'ति ॥ ६ ॥

कृतागसमात्मानं शोचति—

मन्येऽन्तरायस्त्वदनुग्रहस्य भो स्संप्रार्थनीयस्य भवेन्द्रनिर्जरैः ।
माया कृताऽस्मिन् मम जन्मकारणे मया कुबुद्ध्याप्यनघाल्पमेधसा ॥७॥

मन्य इति ॥ भो अनघ हे भगवन्! मम जन्मकारणे मज्जनके ऽस्मिन् त्वयि भगवति, अल्पमेधसा मन्दबुद्धिना मया कुत्सितबुद्ध्या माया कृता । भवः शिवः इन्द्रः निर्जरा देवाः । 'अमरा निर्जरा देवा' इत्यमरः । तै रपि सम्यक् प्रार्थनीयस्य तव भगवतः अनुग्रहस्य अन्तरायो विघ्नः । 'विघ्नोऽन्तरायः प्रत्यूह' इत्यमरः । इति मन्ये । मनुधातोः कर्तरि लट् ॥ ७ ॥

गुणाना मानन्त्या त्स्तोतु मशक्त इत्यमु मर्थं कैमुत्येनाह—

चतुर्मुखः स्तोतुमतोऽहमीशिता गुणोत्तरस्याच्युत ते गुणान् कथम् ।
सहस्रवक्त्रः फणिराडनीशिता यल्लज्जयाऽधःस्थलमाविशत्स्वयम् ॥८॥

चतुर्मुख इति ॥ हे अच्युत! यत् यस्मा त्कारणात् । सहस्रं वक्त्राणि यस्य सः फणिराट् शेषः । गुणैरुत्तरस्य श्रेष्ठस्य, ते तव, गुणान् स्तोतुं, अनीशिता असमर्थस्सन् लज्जया स्वयं अधःस्थलं पाताल माविशत् प्रविवेश । आङ्पूर्वक-विशधातोः कर्तरि लङ् । अतः कारणात् चत्वार्येव मुखानि यस्य सोऽहं कथं ईशिता समर्थः । अत्र सहस्रमुखस्यादिशेषस्यापि भगवद्गुणवर्णनाशक्तत्वेन चतु-र्मुखस्य ब्रह्मणः भगवद्गुणवर्णनाशक्तत्वस्य कैमुत्यन्यायतः सिद्धत्वा त्काव्यार्थापत्ति रलङ्कारः । तदुक्तम्—'कैमुत्येनार्थसंसिद्धिः काव्यार्थापत्तिरिष्यत' इति ॥८॥

कृतापराधप्रकटन मयुक्त मित्याह—

यत्त्वमसज्जनिकारणं विभो सुगोप्तुमर्हस्यखिलेश मेऽगुणान् ।
असद्गुणाः सन्ति सतीति विश्रुतौ कथं स्वनिन्दां विवरीतु मर्हसि ॥९॥

यदिति ॥ हे अखिलेश सर्वेश । यत् यस्मात् त्वं असज्जनिकारणं मदुत्पत्तिकारणं तत् तस्मात् मे अगुणान् दोषान् सुगोप्तुं सुष्ठु निगूहितुं अर्हसि योग्योऽसि । असद्गुणाः कारणगुणाः सति कार्ये सन्ति इति विश्रुतौ प्रसिद्धौ सत्यां, कारणगुणाः कार्ये संक्रामन्ति इति न्यायेनेति भावः । स्वनिन्दां आत्म-निन्दां विवरीतुं प्रकटयितुं, 'वृतो वे' ति दीर्घः कथ मर्हसि नार्हसीत्यर्थः । अर्हधातोः कर्तरि लट् । त्वत्तः उत्पन्नत्वात् मद्गुणाः त्वद्गुणा एवेति मद्दोष-प्रकटनं तवायुक्त मिति भावः ॥ ९ ॥

इतीशमाद्यं परिपूज्य विश्वसृट् यज्ञेन वाचा किल भारतीपतिः ।
प्रदक्षिणीकृत्य जगाम मन्दिरं नत्वा मुहु स्तं नरदेहधारिणम् ॥१०॥

इतीति ॥ विश्वं प्रपञ्चं सृजतीति तादृशः । भारत्याः सरस्वत्याः पति-र्ब्रह्मा । आद्यं श्रीकृष्णं वाचा यज्ञेन वाग्रूपयज्ञेन परिपूज्य संपूज्य स्तुत्वेत्यर्थः ।

नरदेहं धरतीति तथाभूतं ; ताच्छील्ये णिनिः । तं भगवन्तं मुहुः पुनः पुनः प्रदक्षिणीकृत्य नत्वा मन्दिरं सत्यलोकं जगाम ययौ किल । गम्लृधातोः कर्तरि लिट् ॥ १० ॥

गते स्वधामान मथाब्जसंभवे लोकं रमेशो निजवत्सबालकान् ।
निनाय लोकेशहृतान् गृहानिव व्रजेशजो भौमनिरुद्धभूपतीन् ॥११॥

गत इति ॥ अब्जे कमले संभव उत्पत्ति र्यस्य तस्मिन् ब्रह्मणि स्वस्य धामा निवेशः तं ; 'धाम निवेशश्शरणं क्षय' इत्यमरः । लोकं सत्यलोकं गते सति । व्रजेशजः नन्दपुत्रः रमेशः श्रीकृष्णः । लोकेशेन ब्रह्मणा, हृता नपहृतान् निजान् स्वीयान् वत्सान् बालकान् भौमेन नरकासुरेण निरुद्धा न्बन्दीकृतान् भूपतीनिव गृहान्निनाय अनयत् । नीङ्धातोः कर्तरि लिट् । दुह्यादित्वात् द्विकर्मकत्वम् । पूर्णोपमालङ्कारः ॥ ११ ॥

अथाष्टभि र्धेनुकासुरवधरूपलीला वर्ण्यते—

लोकेशसंरोधजरोगशान्तये बालान् समाधाय स वत्सपालकान् ।
ससीरपाणिः पृथुधेनुकाटवीं प्रावीविश द्वायुसुतो यथा वनम् ॥१२॥

लोकेशेति ॥ सीरपाणिना सहितः ससीरपाणिः स श्रीकृष्णः । लोकेशेन ब्रह्मणा कृतो य स्संरोधः निरोधनं तस्माज्जायत इति तथाभूतस्य रोगस्य संचाराभावप्रयुक्तोपद्रवस्य शान्तये अपनोदनाय वत्सपालकान् बालान् समाधाय अनुनीय पृथ्वीं विशालां धेनुकाटवीं धेनुकासुरवनं वायुसुतो हनूमान् वनं यथा मधुवन मिव प्रावीविशत् प्रविवेश । विशते र्णिजन्तात् कर्तरि लुङ् । 'दीर्घोलघो' रिति दीर्घः । उपमालङ्कारः ॥ १२ ॥

अमूमुदन् पक्वफलस्रवद्रसप्रगन्धसंवासितगन्धवाहकान् ।
प्रभारसीदद्दलतालपादपान् दृष्ट्वा फलाना मिव नन्दनोद्भवान् ॥ १३ ॥

अमूमुदन्निति ॥ गोपा इति शेषः कर्तारः । पक्वफलेभ्यः स्रवद्रसस्य प्रकृष्टगन्धेन संवासितः अधिवासितः गन्धवाहः अनिलः । 'गन्धवाहानिलाशुगा' इत्यमरः । येषां तान् नन्दने इन्द्रवने उद्भवः उत्पत्ति र्येषां ता निव स्थिता नित्युपमा । फलानां प्रभारेण सीदन्तः आनमन्तः गला उपरिभागा येषां तान् तालपादपान् तालवृक्षान् । 'वृक्षो महीरुह श्शाखी विटपी पादप स्तरुः' इत्यमरः । दृष्ट्वा अमूमुदन् मुमुदुः । मुदधातो र्णिजन्ता त्कर्तरि लुङ् ॥ १३ ॥

आज्ञां समाराध्य बलस्य बालकाः फलार्थिनोऽभ्रङ्कषतालपादपान् ॥
विचालयन्तो लिलिहुः फलद्रवान् कपीश्वरा वायुजचोदिता इव ॥१४॥

आज्ञामिति ॥ फलार्थिनः फलकामाः 'अर्थाच्चासन्निहित' इतीनिप्रत्ययः । बालका गोपाः । बलस्य बलरामस्य आज्ञा मनुज्ञां समाराध्य याचित्वा अभ्रङ्कषान् गगनस्पृशः 'सर्वकूलाभ्रकरीषेषु कषः' इति खचि 'अरुर्द्विषदि'ति मुम् । ताल-पादपान् विचालयन्तः सन्तः । वायुजेन हनुमता चोदिताः प्रेरिताः कपीश्वरा वानरश्रेष्ठा इव फलद्रवान् फलरसान् 'द्रवः प्रद्रावगमनरसविद्रुमनर्म' स्विति नानार्थरत्नमाला । लिलिहुः पपुः । लिहधातोः कर्तरि लिट् । पूर्णोपमा-लङ्कारः ॥ १४ ॥

न्यघ्नंस्तदापालनकर्मयोजितान् रक्षोगणान् धेनुकभृत्यदुर्मदान् ।
तदेव सुग्रीववने वनेचरान् हरीश्वरा रामहितैषिणो ऽर्भकाः ॥१५॥

न्यघ्नन्निति ॥ हरि रेव ईश्वरो येषां ते हरीश्वराः रामस्य हितं प्रियं इच्छन्तीति रामहितैषिणः अर्भका गोपा स्तस्य वनस्य आसमन्ता त्पालनकर्मणि पालनक्रियायां योजितान् धेनुकस्य धेनुकासुरस्य भृत्या स्ते च ते दुर्मदाश्च तान् रक्षोगणान् राक्षससंघान् रामहितैषिणः रामस्य हितैषिणः हरीश्वराः हनुमदादयः सुग्रीववने मधुवने वनेचरान् दधिमुखादी निव तदा न्यघ्नन् जघ्नुः । निपूर्वक हनधातोः कर्तरि लङ् । पूर्णोपमालङ्कारः ॥ १५ ॥

भूत्वा खरोऽयं पददन्तसाधनो दृष्ट्वा स्वदोःपालितभृत्यमृत्युदम् ।
हन्तुं पदाभ्यां हलपाणि मध्यगात् वृत्रासुरो वृत्रहणं यथाऽऽहवे ॥१६॥

भूत्वेति ॥ अयं धेनुकासुरः पदे दन्ताश्च तेषां समाहारः पददन्तम् । प्राण्यङ्गत्वादेकवद्भावः । तत् साधनं आयुधं यस्य सः, खरः खरस्वरूपो भूत्वा स्वस्य दोषा भुजेन, 'भुजबाहू प्रवेष्टो दो' रित्यमरः । पालितानां भृत्यानां मृत्यु ददातीति तथाभूतम् । हलं पाणौ यस्य तं बलरामं, 'प्रहरणार्थेभ्य' इति सप्तम्यन्तस्य परनिपातत्वम् । दृष्ट्वा पादाभ्यां हन्तु आहवे युद्धे, वृत्रासुरः वृत्रहणं यथा इन्द्र मिव अध्यगात् अधावत् । अधिपूर्वकइण्धातोः कर्तरि लुङ् । 'इणो गा लुङी' ति गादेशः । पूर्णोपमालङ्कारः ॥ १६ ॥

आयान्तमत्यन्तमसह्यरूपिणं पादेऽग्रही त्तं मुसली स्वपाणिना ।
महात्मनामप्युरुकार्यसिद्धये काले हि युक्तं खलपादपीडनम् ॥१७॥

आयान्तमिति ॥ मुसली बलरामः, आयान्त मागच्छन्तं अत्यन्त मसह्यं, रूप मस्यास्तीति तं खरासुरं पादे पाश्चात्ये स्वस्य पाणिना हस्तेन अग्रहीत् जग्राह । ग्रहधातोः कर्तरि लुङ् । उक्त मर्थ मर्थान्तरेण द्रढयति — महात्मना-मिति । उरुकार्यस्य महाकार्यस्य सिद्धये । तादर्थ्ये चतुर्थी । महात्मना मपि काले समयविशेषे खलानां नीचानां पादपीडनं युक्तं हि उचितं किल । अत्र सामान्येन विशेषसमर्थना दर्थान्तरन्यासालङ्कारः । तदुक्तम्—'उक्तिरर्थान्तरन्यासः स्या त्सामान्यविशेषयो' रिति ॥ १७ ॥

संभ्राम्य भूमौ विनिपात्य पुष्करे कृत्वा खरं तं व्यसु माशु राक्षसम् ।
बालान् स रामो निजभृत्यगोपकान् न्यपाययत् माक्षिक माक्षिपद्रसम् ॥१८॥

संभ्राम्येति ॥ स रामो बलरामः, खरं खररूपं तं राक्षसं धेनुकासुरं पुष्करे व्योम्नि, 'व्योम पुष्कर मम्बर' मित्यमरः । संभ्राम्य भ्रामयित्वा भूमौ विनिपात्य, आशु विगताः असवो यस्मा त्तं गतप्राणं कृत्वा, बालान्निजान्

स्वीयान् भृत्यान् गोपकान् माक्षिकं मधु आक्षिपन्तं तिरस्कुर्वन्तं फलरसं न्यपाययत् पाययामास। पाधातोः णौ 'शाच्छे'ति युक्। कर्तरि लङ्। 'गतिबुद्धी' त्यादीना 'आशयच्चामृतं देवा'नितिवत् द्विकर्मकत्वम् ॥ १८ ॥

सन्तुष्टुवु दीनजनार्तिहारिणं गोपा बलं तद्रसपानमोदिताः ।
यज्ञेषु सर्वेषु नियुक्तसोमपाः देवा इवेन्द्रं त्रिदशारिशिक्षकम् ॥१९॥

संतुष्टुवुरिति ॥ गोपाः कर्तारः तेषां तालफलानां रसपानेन मोदिताः सन्तः। दीनजनाना मार्ति पीडां हरतीति तथाभूतं बलं बलरामं सर्वेषु यज्ञेषु नियुक्ताः नियोजिता स्सोमपा देवाः त्रिदशाः देवा स्तेषा मरीणां शिक्षक मिन्द्र मिव सन्तुष्टुवुः अस्तौषुः। ष्टुञ्धातोः कर्तरि लिट्। पूर्णोपमालङ्कारः ॥ १९ ॥

अष्टाविंशतिश्लोकैः कालियमर्दनरूपलीला वर्ण्यते। तत्र बालानां प्रोत्साहपूर्वकह्रदगमनं श्लोकचतुष्टयेनाह—

अतीतपत्सौरि रयं सहार्भकै स्स्वान्तेन गन्तुं ह्रदमाविघूर्णितम् ।
कालीयनिर्मुक्तविषाविलोदकं मुखानिलेनास्य विषाभियोगिना ॥२०॥

अतीतपदिति ॥ अयं श्रीकृष्णः, कालीयेन निर्मुक्तविषेण आविलं कलुषं 'कलुषोऽनच्छ आविल' इत्यमरः। उदकं यस्मिन् तम्। विषाभियोगिना विषयुक्तेन। अस्य कालीयस्य मुखानिलेन मुखमारुतेन। आसमन्तात् विघूर्णितं उल्लोलितं ह्रदं, अर्भकै र्बालै स्सह गन्तुं स्वान्तेन मनसा 'स्वान्तं ह्न्मानसं मन' इत्यमरः। अतीतपत् आलोचितवान्। तप आलोचन इति धातोः कर्तरि लुङ् ॥ २० ॥

प्रोत्साहप्रकारमेवाह—

इतोऽविदूरे यवसानि बालकाः फलानि वन्यानि जलानि सन्ति हि ।
तत्राद्य यामो वयमाशु तद्वनं वदन्निनीशः पृथुकानसौ ययौ ॥ २१ ॥

इत इति ॥ हे बालका गोपाः, इतः अस्माद्वनात् अविदूरे समीपे यवसानि तृणानि 'यवसं तृण मर्जुन' मित्यमरः। वन्यानि वने भवानि फलानि जलानि च सन्ति। हि प्रसिद्धौ। तत्र वयमद्य आशु यामो गच्छामः इति असौ ईशः श्रीकृष्णः पृथुकान् शिशून् प्रति। 'पृथुक श्शावक शिशु' रित्यमरः। वदन् तद्वनं कालियवनं ययौ जगाम। यातेः कर्तरि लिट् ॥ २१ ॥

तमन्वगुर्माधव माशु गोपकाः गच्छन्तमीशं सह वत्सगोगणैः।
मुदाऽनघं कृष्ण महेर्जयोत्सुकं पुरन्दरं देववरं सुरा यथा ॥ २२ ॥

तमिति ॥ गोपकाः कर्तारः। अहेः कालियस्य जये उत्सुक मुद्युक्तं अनघ मीशं प्रभुं माधवं, गच्छन्तं श्रीकृष्णं वत्सानां गवां च, गणैः सह। अहे वृत्रस्य, 'व्यूहोवृन्देऽप्यहिर्वृत्रे' इत्यमरः। जयोत्सुकं देवानां वरं श्रेष्ठं पुरन्दरं यथा इन्द्र मिव मुदा आशु अन्वगु रनुजग्मुः। अनुपूर्वक इण् धातोः कर्तरि लुङि गादेशः। पूर्णोपमालङ्कारः ॥ २२ ॥

संप्राप्य तीरं त्वरया समाधवा ह्रदस्य कालीयविषाभियोगिनः।
अमूमुहन् केचन गोपका भृशं स्पृष्ट्वा जलं सर्वे इमे विमोहिताः ॥२३॥

संप्राप्येति ॥ माधवेन सहिताः समाधवाः गोपकाः कालीयस्य विषेण अभियोगस्संयोगोऽस्यास्तीति तादृशस्य ह्रदस्य तीरं तटं त्वरया संप्राप्य केचन कतिपयगोपाः अमूमुहन् मुमूर्छुः। मुहधातोः णिजन्तात्कर्तरि लुङि चङि सन्वद्भावे दीर्घः। तदितरे सर्वे इमे जलं स्पृष्ट्वा भृशं विमोहिताः। मृता इत्यर्थः ॥ २३ ॥

अहिं विजेतुं परिचिन्त्य माधव स्तदा तरुं तत्र सपुष्पपल्लवम्।
आरुह्य तं मध्यनिबद्धमेखलो रेजे तटिद्गर्भ इवाभ्रनीरदः ॥ २४ ॥

अहिमिति ॥ तदा तस्मिन् समये। मध्ये निबध्दा मेखला यस्य स माधवः श्रीकृष्णः अहिं कालियं विजेतुं परिचिन्त्य समालोच्य। तत्र जलसमीपे,

अमृताहरणसमये सामृतेन गरुत्मता योऽय मधिष्ठित स्त मित्यर्थः । अत एव पुष्पैः पल्लवैश्च सहितं सपुष्पपल्लवं, विषाग्नितप्तजलसमीपस्थस्यास्य अमृतसंबन्धात् सपल्लवत्वमिति भावः । यद्वा भगवन्महिम्ना तथाविध स्तरु रभूदितिभावः । तरुं वृक्षमारुह्य, तटित् गर्भे यस्य सः, अभ्रे व्योम्नि 'अभ्रं व्योमपुष्करमम्बर' मित्यमरः । नीरदो मेघ इव रेजे रराज । राजृधातोः कर्तरि लिट् । पूर्णोपमालङ्कारः ॥२४॥

अपीपतत् सोऽशनिव ज्जलाशये नयन्नु यादांसि जलान्तराद् बहिः ।
स विद्युदानीलपयोदविभ्रम स्सुपीतनीलाम्बरदेहभा गसौ ॥ २५ ॥

अपीपतदिति ॥ सुपीतनीलौ अम्बरदेहौ भजतीति तथा । अत एव स विद्युतः आसमन्तात् नीलपयोदस्य नीलमेघस्येव विभ्रमः विलासो यस्य तादृशः असौ श्रीकृष्णः यादांसि जलजन्तून् 'यादांसि जलजन्तव' इत्यमरः जलान्तरात् जलमध्यात् । बहिः 'अपपरिबहि' रिति समासविधानात् ज्ञापकात् बहिर्योगे पञ्चमी । नयन् प्रापयन् जलाशये ह्रदे अशनिवत् अपीपतत् पपात । नु निश्चयः । पत धातोः कर्तरि लुङि चङि इत्वे दीर्घः । उपमालङ्कारः । यथासंख्यालङ्कारश्च ॥ २५ ॥

भगवत्कटाक्षस्यापरिमितमहिमान माह—

उन्निद्रमञ्ज्वक्षिगलद्विषादहृद्वीक्षामृतेनाशु निजा नजीवयत् ।
सद्यस्स बालानपि वत्सगोगणान् कृपानिधिर्भूमिगतान् व्यसूनसौ ॥२६॥

उन्निद्रेति ॥ कृपानिधि र्दयासमुद्रः असौ स श्रीकृष्णः उन्निद्रे विकसिते मञ्जुनी मनोज्ञे अक्षिणी ताभ्यां गलता स्रवता विषादं खेदं हरतीति तथाभूतेन वीक्षैव अमृतं तेन व्यसून् गतप्राणान् भूमिगतान् निजान् स्वकीयान् बालान् गोपान् वत्सानां गवां च संघानपि सद्यः तत्क्षण एव । 'सद्यः सपदि तत्क्षण' मित्यमरः । आशु अजीवयत् जीवयामास । जीवधातोः णिचि कर्तरि लङ् ॥ २६ ॥

कालियस्य कोपपूर्वकदंशनमाह श्लोकद्वयेन –

जले चरन्तं पृथुपीनदोषणी प्रसार्य सर्वत्र विघूर्णिते हरिम् ।
रुषा समालक्ष्य विषाग्निसङ्गिना मुखानिलेनाशु समावृणोदहिः ॥२७॥

जल इति ॥ अहिः कालियः विषाग्निसङ्गिना विषानलयुक्तेन मुखानिलेन मुखमारुतेन घूर्णिते उल्लोलकल्लोलिते जले पृथुनि दीर्घे, पीने पीवरे दोषणी बाहू । 'भुजबाहू प्रवेष्टो दोः' इत्यमरः । 'पद्दन्' इत्यादिना दोश्शब्दस्य दोषन्नादेशः । प्रसार्य सर्वत्र चरन्तं हरि मालक्ष्य दृष्ट्वा रुषा कोपेन समावृणोत् समावचार । समाङ्पूर्वकवृणुधातोः कर्तरि लङ् ॥ २७ ॥

अथादशदावसमानदुर्विषप्रवृद्धदंष्ट्राग्रनितान्तभीषणः ।
दन्तोत्तमै स्तं परिवेष्ट्य पक्षिणा मिन्द्रं यथा कृष्ण मसौ विषह्रदे ॥२८॥

अथेति ॥ अथानन्तरं दावेन वनाग्निना ; 'दवदावौ वनारण्यवह्नी' इत्यमरः । समानेन तद्वद्दुस्सहेनेत्यर्थः । दुष्टेन विषेण प्रवृद्धयो र्दंष्ट्रयो रग्राभ्यां नितान्तं भीषणो भयङ्करः । असौ कालियः विषह्रदे तं श्रीकृष्णं, परिवेष्टय आवृत्य, पक्षिणामिन्द्रं यथा गरुडमिव दन्तोत्तमै रदशत् ददंश । गरुडस्येवास्य सर्पदंशन मकिंचित्करमिति भावः । दंशधातोः कर्तरि लङ् । 'दंशसञ्जस्वञ्जा' मिति नलोपः । उपमालङ्कारः ॥ २८ ॥

बभूव तूष्णी मथ नन्दनन्दनो मुहूर्त मेकं विवशो यथा हरिः ।
तस्मिन्मुहूर्तेऽखिलनन्दगोपका दृष्ट्वा महोत्पातचयान् शशङ्किरे ॥ २९ ॥

बभूवेति ॥ अथानन्तरं नन्दनन्दनो नन्दसूनुर्हरिः श्रीकृष्णः एकं मुहूर्तं 'अत्यन्तसंयोगे द्वितीया' । विवशो यथा परवश इवेत्युपमा तूष्णीं बभूव तूष्णीं स्थितवान् । तस्मिन्नेव मुहूर्ते अखिलनन्दगोपकाः महोत्पातचयान् अशुभसूचकान् दृष्ट्वा शशङ्किरे शङ्का मवापुः । शकिधातोः कर्तरि लिट् ॥२९॥

अन्वेषणपूर्वकं ह्रदगमनमाह—

विनाऽपि रामेण गतस्स यत्र वा जानीत तं व्यंसक माशु मा चिरम् ।
इतीरयन्तो ध्वजवज्रचिह्नितं पदं विचिन्वन्त इदं समाययुः ॥ ३० ॥

विनेति ॥ स श्रीकृष्णः रामेण बलरामेण विनाऽपि । 'पृथग्विने' त्यदिना तृतीया । यत्र वा गतः । व्यंसकं धूर्तं तं श्रीकृष्णं आशु जानीत वित्त, मा चिरं कालविलम्बोऽभूदिति ईरयन्तो वदन्तः गोपा इति शेषः । ध्वजवज्रचिह्नितं ध्वजवज्ररेखाङ्कितं पदं भगवत्पदं विचिन्वन्तस्सन्तः मृगयन्तः इदं सरः कालियह्रदं ययुः प्रापुः । याधातोः कर्तरि लिट् ॥ ३० ॥

स्वमहिमान मजानतां शोकापनोदाय कालियमर्दन मियेषेत्याह—

अरूरुदन् कृष्ण मवेक्ष्य सङ्कटे विनाऽपि रामात्किल सर्वजन्तवः ।
इयेष तं मर्दितु मन्तरे विभु स्तस्मिन् क्षणे भक्तजनार्तिहा हरिः ॥३१॥

अरूरुदन्निति ॥ रामात् बलरामाद्विना । 'पृथग्विने' त्यादिना पञ्चमी । सर्वजन्तवः सर्वप्राणिनः । सङ्कटे कृच्छ्रे, कृष्ण मवेक्ष्य । अरूरुदन् रुरुदुः किल । रुदिर् धातोः णिजन्तात् कर्तरि लुङि चङि 'दीर्घो लघो' रिति दीर्घः । तस्मिन्नेव क्षणे विभुः प्रभुः भक्तजनाना मार्तिं पीडां हन्तीति तादृशो हरिः अन्तरे जलमध्ये तं कालियं मर्दितुं संघट्टितुं इयेष ऐच्छत् । इषधातोः कर्तरि लिट् ॥ ३१ ॥

अथ मर्दनप्रकार मेव चतुर्भिः कुलकेनाह—

पदा तमाक्रम्य शिरांसि मर्दयन् रक्तं तदास्यै र्वमतोऽनिशेपथोः ।
अनीनटद्भुग्नशिरश्शतान्तरे सौधोत्तमेऽसौ नटव द्रमाधवः ॥ ३२ ॥

पदेति ॥ असौ रमाधवः श्रीकृष्णः पदा चरणेन तं कालिय माक्रम्य शिरांसि मर्दयन् तदा आस्यै र्मुखैः, रक्तं क्षतजं 'रक्तं क्षतजशोणिते'

इत्यमरः । वमतः उद्गिरतः अनि अत्यन्तं वेपथुः कंपो यस्य, कालियस्येति शेषः । भुग्नाना माविद्धानां, 'आविद्धं कुटिलं भुग्न' मित्यमरः । शिरसां शतस्य, अन्तरे मध्ये, सौधोत्तमे नटवन्नर्तकवत् अनीनटत ननर्त । नटधातोः णिजन्तात् कर्तरि लुङि चङि 'दीर्घोलघो' रिति दीर्घः । पूर्णोपमालङ्कारः ॥ ३२ ॥

स्वपादसंघट्टनतेजनोल्लसन्माणिक्यसन्दोहमरीचिमण्डिते ।
गंभीरकासारजलोद्गतप्रभाकरोल्लसत्कोकनदायितानने ॥ ३३ ॥

स्वपादेति ॥ स्वपादाभ्यां संघट्टन मेव तेजनं शाणोल्लेखनं तेन उल्लसन्माणिक्यसन्दोहानां मरीचिभि र्मण्डिते प्रकाशिते गंभीरे अगाधे कासारे सरसि जलादुद्गतानि प्रभाकरेण सूर्येण उल्लसन्ति विकसन्ति कोकनदानि रक्तोत्पलानि 'रक्तोत्पलं कोकनद' मित्यमरः । तद्वदाचरन्ति; आचारार्थक्यजन्तात् क्तः; आननानि यस्य तस्मिन् ॥ ३३ ॥

अलातचक्रभ्रमदुग्रलोचनक्षतस्रवद्रक्तभयङ्करानने ।
मुखोद्गतोदग्रविषाग्निसंमिलत्समीरभस्मीकृततीरकानने ॥३४॥

अलातेति ॥ अलातचक्रवत् भ्रमतां उग्रलोचनानां क्षतेभ्यः स्रवता रक्तेन भयङ्कराण्याननानि यस्य तस्मिन् । मुखेभ्यः उद्गतेन विनिर्गतेन उदग्रेण बहुलेन विषाग्निना संमिलता समीरेण वायुना भस्मीकृतानि तीरकानननानि यस्मिन् ॥ ३४ ॥

समीपभाजां च तदीयसुभ्रुवां सुदृष्टिपातै रतिसाध्वसाकुलैः ।
समीरणप्रेरितनीलनीरज च्छदै रिवार्द्रै र्गतिमात्रसेचके ॥ ३५ ॥

समीपेति ॥ समीपभाजां तदीयसुभ्रुवां कालियस्त्रीणां अतिसाध्वसेन अतिभयेन 'भीति र्भी स्साध्वसं भय' मित्यमरः । आकुलैश्चञ्चलैः आर्द्रै रम्लानैः

समीरेण वायुना प्रेरितानां नीलनीरजानां नीलोत्पलानां दलैरिव स्थितैः 'दलं पर्णं छदः पुमान्' इत्यमरः । शोभनैः दृष्टिपातैः अतिमात्रं अत्यन्तं मेचकं श्यामले 'कालश्यामलमेचका' इत्यमरः । ॥ ३५ ॥

तन्मूर्च्छामाह—

तत्पादसंघट्टनभिन्नविग्रहो वमन्विषं रक्तमसौ मुखालिभिः ।
चक्षुःश्रवा श्रोत्रकुनेत्रकन्दरैः गतासुतुल्योऽप्यभवद्विसंज्ञया ॥३६॥

तदिति ॥ तस्य भगवतः पादसंघट्टनेन भिन्नो विग्रहः यस्य सः । 'शरीरं वर्ष्म विग्रहः' इत्यमरः । असौ चक्षुःश्रवाः कालियनामकः फणी । 'चक्षुःश्रवाः काकोदरः फणी' इत्यमरः । श्रोत्रभूतकुनेत्रकन्दरैः । मुखालिभिर्मुखपंक्तिभिः । विषं रक्तं च वमन् विसंज्ञया विगतसंज्ञया गतासुतुल्यः मृततुल्यो निश्चेष्ट इति यावत् । अभवत् बभूव । भूधातोः कर्तरि लङ् । धर्मलुप्तोपमालङ्कारः ॥ ३६ ॥

कालियरक्षणाय श्रीकृष्णमस्तौषुरित्याह—

विलोक्य भर्तारमथास्य दुर्गतिं पत्न्यस्तदा तत्परिरक्षणेच्छया ।
बालं फणाग्रे परितापसंयुताः नाथं नटन्तं वरमस्तुवन् भयात् ॥ ३७ ॥

विलोक्येति ॥ अथानन्तरं अस्य कलियस्य पत्न्यः दुः कष्टा गतिर्यस्य तं मृतप्रायमित्यर्थः । भर्तारं प्रियं, 'धवः प्रियः पतिर्भर्ता' इत्यमरः । विलोक्य परितापेन संयुताः सत्यः, भयात् तस्य कालियस्य परिरक्षणे संरक्षणे इच्छया फणाग्रे नटन्तं नृत्यन्तं नाथं प्रभुं वरं श्रेष्ठं बालं श्रीकृष्णं अस्तुवन् तुष्टुवुः । ष्टुञ्धातोः कर्तरि लङ् । ॥ ३७ ॥

स्तुतेः प्रकारमेवाह चतुर्भिः—

जात्या वयं माधव रोषदूषिताः नूनं तदाऽस्माकमिदं प्रशासनम् ।
अनुग्रहायैव विदुष्टचेतसां भव त्वत स्वसाधुजनान्तकारिणाम् ॥३८॥

जात्येति ॥ हे माधव, वयं जात्या सर्पजात्या रोषेण कोपेन 'कोप क्रोधामर्षरोष' इत्यमरः । रूषिताः व्याप्ताः । अतो हेतोः विशेषेण दुष्टं चेतः चित्तं येषां तेषां अत एव साधुजनानामन्तं नाशं कुर्वन्तीति तथाविधाना मस्माकं सर्पाणां, इदं तव प्रशासनं दण्डनं अनुग्रहायैव भवति । नूनं निश्चयः । भूधातोः कर्तरि लट् । अत्र दण्डनरूपहेतोः अनुग्रहरूपहेतुमता सार्धं वर्णनात् हेत्वलङ्कारः । तदुक्तम्—हेतो र्हेतु मता सार्धं वर्णनं हेतु रुच्यत इति ॥३८॥

अजानत स्त्वत्पदवीं दुरात्मनो दुरन्तपापस्य मदान्धचेतसः ।
कृतापराधस्य खलस्य चक्रिणः क्षन्तुं त्व मर्हं स्यखिलेश दुष्क्रियाम् ॥३९

अजानत इति ॥ हे अखिलेश सर्वेश । दुरन्तपापस्य अनन्तपापस्य दुरात्मनो दुर्बुद्धेः । 'आत्मा यत्नो धृति र्बुद्धि' रित्यमरः । मदेन गर्वेण 'गर्वः स्या द्विसयो मद' इत्यमरः । अन्धं जडं चेतः यस्य तस्य । अत एव त्वत्पदवीं त्वन्मार्गं त्वन्महिमान मिति भावः । अजानतः अत एव कृतापराधस्य खलस्य दुष्टस्य चक्रिणः कालियस्य । 'चक्री व्याल स्सरीसृप' इत्यमरः । दुष्क्रियां क्षन्तुं त्वमेवार्हसि । अर्हधातोः कर्तरि लट् । अपराधिना मेव रक्षणं महत्त्वाय भवतीति भावः ॥ ३९ ॥

त्वन्मायया मोहितचेतसो वयं जात्या सदा निन्दितकर्मकारिणः ।
तदप्यहो देव तवाज्ञया विना यस्मा त्व मन्त र्यमय स्यतो न हि ॥४०॥

त्वदिति ॥ हे देव भगवन् तव मायया मोहितं चेतो येषां ते । वयं जात्या सर्पजात्या सदा निन्दितानि कुत्सितानि कर्माणि कुर्वन्तीति तथा यस्मा त्त्वं अन्तः हृदि यमयसि प्रेरयसि । यमधातो र्णिजन्ता त्कर्तरि लट् । अतो हेतो स्तदपि निन्दितकर्माचरण मपि तवाज्ञया विना नहि । आहो आश्चर्यम् । अत्र निन्दितकर्माचरणे आज्ञाहेतुकत्वस्य समर्थनीयस्य अन्तर्यमयसीति समर्थनात् वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः' तदुक्तम्—'समर्थनीयस्यार्थस्य काव्यलिङ्ग समर्थन' मिति ॥ ४० ॥

कटाक्षलेशेन निरीक्ष्य नः प्रभो! क्रीडासु संसक्त धिया विमोहिताः ।
अर्ह स्यमूः कर्तु मवाप्तवल्लभाः दानेन पत्युः पतिदेवताः स्त्रियः ॥४१॥

कटाक्षेति ॥ हे प्रभो त्वं क्रीडासु संसक्ता धीः यासां ताः । अत एव मोहिताः अमूः नः अस्मान् कटाक्षलेशेन निरीक्ष्य पत्युः दानेन अवाप्तः वल्लभः प्रियः याभिः । 'दयितं वल्लभं प्रिय' मित्यमरः । तथाभूताः कर्तु मर्हसि । अर्हधातोः कर्तरि लट् । उक्त मर्थं अर्थान्तरन्यासेन द्रढयति । स्त्रियः पतिरेव देवता यासां तथाविधा हि । अत्र समर्थनीयस्य धवप्राप्तिकरणस्य पतिदेवताः स्त्रियः इति समर्थनात् वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥ ४१ ॥

कालियः त्रिभिः स्तौति—

तदन्तरा स्तोतु महि स्त मादिमं प्रचक्रमे पापविनाशकारणम् ।
भावेन पूर्णेन निरस्ततामसः स्वस्मिन् वसन्तं फणिरा डिवाच्युतम् ॥४२॥

तदन्तरेति ॥ तदन्तरा तस्मिन् काले निरस्तं तामसं तमोगुणकार्यं यस्मात् सः । अहिः कालियः । पूर्णेन भावेनाभिप्रायेण । 'भाव स्सत्तास्वभावाभिप्रायचेष्टात्मजन्मसु' इत्यमरः । पापस्य विनाशे कारणं आदिमं पुराणं स्वस्मिन् वसन्तं तमच्युतं श्रीकृष्णं फणिराट् शेष इव स्तोतुं प्रचक्रमे उपक्रान्तवान् । प्रपूर्वकक्रमुधातोः कर्तरि लिट् । पूर्णोपमालङ्कारः ॥ ४२ ॥

स्वभावदोषाधिकदुष्टबुद्धयः स्मयेन सम्पद्भलजाक्षिरोगिणः ।
वयं न विद्म स्तव देव सत्पथान् दुष्टेन्द्रियाः स्वात्मगती रिवाधमाः ॥४३॥

स्वभावेति ॥ हे देव भगवन् स्वभावदोषेण अधिका दुष्टा बुद्धि र्येषां ते संपद्भलाभ्यां जायत इति तज्जः अक्षिरोगो येषामस्तीति तथोक्ताः वयं स्मयेन गर्वेण तव सत्पथान् विषयलौल्येन दुष्टानि अवश्यानि इन्द्रियाणि येषां ते अधमाः स्वात्मगतीरिव तरणोपायानिव न विद्मः न जानीमः । विदधातोः कर्तरि लट् । पूर्णोपमालङ्कारः ॥ ४३ ॥

मन्ये सदानुग्रह मेव दण्डनं त्वया कृतं मेऽञ्जन माद्य दृग्भुजः ।
गुणोहि दुष्टस्य मह त्प्रशासनं शिक्षेव शिष्यस्य गुरोः प्रशाधि माम् ॥४४॥

मन्य इति ॥ हे आद्य भगवन्! दृग्भुजः मदान्धस्य मे त्वया कृतं दण्डनं निग्रहं सदा अञ्जनरूपं अनुग्रहमेव मन्ये निश्चिनोमि । तथा हि—दुष्टस्य दुर्जनस्य महतां महात्मनां प्रशासनं निग्रहः शिष्यस्य गुरोः शिक्षेव, गुणो हि विवेकसंपादको हि । अतो मां प्रशाधि शिक्षय । प्रपूर्वकशास्धातोः प्रार्थनायां कर्तरि लोटि 'शा हौ' इति शादेशः । 'हु झल्भ्यो हेर्धि' रिति धित्वम । अत्र दण्डन मनुग्रह मेवेति विशेषमुक्त्वा तत्समर्थनाय महतां प्रशासनं गुण इति सामान्य मभिधाय तत्प्रसिद्ध्यर्थं शिष्यस्य गुरुशिक्षेव इति विशेषान्तर मुपमानीकृत्य अर्थान्तरस्य वर्णनात् विकस्वरालङ्कारः । तदुक्तम्—'यस्मिन् विशेषसामान्यविशेषा स्स विकस्वर' इति ॥ ४४ ॥

सन्तुष्य कालीयविमर्दनो हरि र्जायापतिस्तोत्रवचस्सुपूजनैः ।
अवीवदत्तान्मधुराभिभाषणो यूयं त्विह स्थातु मनर्हथे त्यसौ ॥ ४५ ॥

सन्तुष्येति ॥ कालीयविमर्दनः कालियभञ्जनः मधुर मभिभाषणं यस्य सः । असौ हरिः श्रीकृष्णः जायापत्योः स्तोत्रवचांस्येव सुपूजनानि तैस्सन्तुष्य यूयं तु इह ह्रदे स्थातुं वस्तुं अनर्हथ न अर्हथ । अर्हधातोः कर्तरि लटि नञ्समासे 'नञो नलोप स्तिङि क्षेपे' इति नलोपे 'तस्मान्नुडची'ति नुडागमः । इति तान् कालियादीन् अवीवदत् उवाच । वदधातोः कर्तरि लुङ् ॥ ४५ ॥

विशिष्य अनुग्रहवशात् कालियं प्रत्याह—

याह्यद्य हित्वा पवनाशन ह्रदं देशं स्वकं सागरनिर्मितं पुरा ।
खगेश्वरा द्भद्रय मस्ति मत्पदा विचिह्नितस्योपरि मूर्ध्नि तं न ते ॥४६॥

याहीति ॥ हे पवनाशन कालिय! अद्य, ह्रदं हित्वा त्यक्त्वा पुरा सागरे निर्मितं स्वकं स्वीयं 'अव्ययसर्वनाम्ना मकच्' । रमणकं नाम तं देशं याहि । खगानामीश्वरात् गरुत्मतः यद्भयमस्ति विद्यते । मूर्ध्नि उपरि

शिरसि मत्पदा विशेषेण चिह्नितस्य ते तव तद्भयं पूर्वोक्तभयं न नास्ति । इति अवीवददिति पूर्वेण संबध्यते ॥ ४६ ॥

सर्पा स्समाराध्य सुमाल्यनूतनप्रकृष्टवस्त्राभरणै रनर्घकैः ।
अयासिषु स्तं हरिचोदिता स्स्वकं देशं परीवारयुताः प्रमोदिताः ॥४७॥

सर्पा इति ॥ हरिणा श्रीकृष्णेन चोदिताः अत एव प्रमोदिताः सर्पाः कालियादयः । अनर्घकै रमूल्यैः 'मूल्ये पूजाविधा वर्घ' इत्यमरः । सुमाल्यानि च नूतनानि प्रकृष्टानि वस्त्राभरणानि च तैस्तैः ! श्रीकृष्ण माराध्य संपूज्य । तं पूर्वोक्तं स्वकं देशं परीवारयुताः सपरिवारास्सन्तः । 'उपसर्गस्य घञ्यमनुष्ये बहुल' मिति दीर्घः । अयासिषु रगच्छन् । याधातोः कर्तरि लुङि 'यमरमे'ति सगागमः, सिच इडागमश्च ॥ ४७ ॥

सुनिर्मलं निर्विषमेष सत्वरं कृत्वा ह्रदं विश्वजनीन मच्युतः ।
सुपात्र मस्मात् बहिरभ्यवर्तत प्रतोषयन् गोपकुमारगोगणान् ॥४८॥

सुनिर्मलमिति ॥ एष अच्युतः श्रीकृष्णः, शोभनं पात्रं उभयकूल-मध्यं यस्य तं 'पारावारे परार्वाची तीरे पात्रं तदन्तर' मित्यमरः । निर्गतं विषं यस्मात्तं, अत एव सुनिर्मलं ह्रदं विश्वजनीनं विश्वस्मै जनाय विश्वजनाय हितम् । 'आत्मन्विश्वजने' त्यादिना खप्रत्ययः । 'आयनेयी,' त्यादिना ईनादेशः । कृत्वा । गोपकुमाराणां गवां च गणान् प्रतोषयन् सन्तोषयन् सत्वरं अस्मात् ह्रदाद् बहिः अभ्यवर्तत अगच्छत् । अभिपूर्वकवृतुधातोः कर्तरि लङ् ॥ ४८ ॥

अमूमुद न्नन्दमुखा व्रजौकसः प्राप्येव तं पद्मनिधिं धनार्थिनः ।
प्रिया इवान्यत्र चिरोषितं प्रियं चकोरसंघा इव शर्वरीपतिम् ॥४९॥

अमूमुदन्निति । नन्दमुखाः नन्दप्रमुखाः व्रजौकसः गोपाः धनार्थिनः धनकामाः 'अर्थाच्चासन्तीहित' इति इनिप्रत्ययः । पद्माख्यं निधिमिव, प्रियाः स्त्रियः, अन्यत्र विदेशे चिरोषितं प्रियं भर्तार मिव । चकोराणां संघाः शर्वरीपतिं चन्द्रमिव, तं श्रीकृष्णं प्राप्य अमूमुदन् मुमुदुः । मुदधातोः णिचि कर्तरि लुङ् । मालोपमालङ्कारः ॥ ४९ ॥

स्वीयान् समाश्वास्य सुदुःखितानसावध्युष्य तां तत्र निशां विजित्य तम् ।
हरिर्ययौ गोपगणैः स्वमालयं जित्वा खलं वृत्र मिवामराधिपः ॥ ५० ॥

स्वीयानिति ॥ जित्वा जयशीलः नान्तः । असौ हरिः श्रीकृष्णः अमराधिप इन्द्रः वृत्रमिव खलं तं कालियं विजित्य सुदुःखितान् । स्वीयान् नन्दादीन् समाश्वास्य तत्र तीरे तां निशां गोपगणैः सह अध्युष्य व्युषित्वा अधि-पूर्वक वसधातोः ल्यपि 'वचिस्वपी' ति संप्रसारणे 'शासि वसी' ति षत्वं ; 'उपान्वध्याङ्वस' इत्याधारस्य कर्मत्वम् । स्वमालयं घोषं ययौ जगाम । यातेः कर्तरि लिट् । पूर्णोपमालङ्कारः ॥ ५० ॥

अथ दवपानरूपलीला त्रिभि र्वर्ण्यते—

अतीत्य मार्गं बहुदूरमन्तरे सुप्तास्तदा श्रान्तिगता निशीथके ।
दिशासु सर्वासु समागतं दवं विलोक्य गोपा हरि मस्तुवन् भयात् ॥५१॥

अतीत्येति ॥ बहुदूरं मार्गमतीत्य गत्वा श्रान्तिं गताः क्लान्ताः अत एव अन्तरे मार्गमध्ये सुप्ताः गोपाः । तथा निशीथकेऽर्धरात्रे । 'अर्धरात्रनिशीथौ द्वा' वित्यमरः । सर्वासु दिशासु दिक्षु समागतं दवं वनाग्निं 'दवो वनहुताशन' इत्यमरः । विलोक्य भयात् हरिं श्रीकृष्णं अस्तुवन् तुष्टुवुः । ष्टुञ्धातोः कर्तरि लङ् ॥ ५१ ॥

निमीलयन् सर्वजनाक्षिपङ्कजं हस्ते गृहीत्वा हरि राशु पावकम् ।
अपा दयं तं जलधिं घटोद्भवो मुनिर्यथा विन्ध्यसमुन्नतिप्रहा ॥५२॥

निमीलयन्निति ॥ अयं हरिः श्रीकृष्णः सर्वेषां जनानां अक्षिपङ्कजं नेत्रपद्मं । जातावेकवचनम् । निमीलयन्मुकुलयन् तं पावकं वनाग्निं हस्ते आशु गृहित्वा विन्ध्यस्य विन्ध्यपर्वतस्य समुन्नतिमौन्नत्यं प्रहन्तीति तथोक्तः । घटोद्भवः मुनिरगस्त्यः जलधिं यथा समुद्रमिव । अपात् पपौ । पाधातोः कर्तरि लुङ् । 'गातिस्थे' ति सिचो लुक् । उपमालङ्कारः ॥ ५२ ॥

**तान्मोचयित्वा ऽऽत्मजना नपासीत् हरि र्दवा त्सोऽखिललोकबान्धवः ।
भक्तानिव ध्यानविशुद्धचित्तान् संसारदावा दधिकं भयार्दितान् ॥५३॥**

तान्निति ॥ अखिलानां लोकानां जनानां, 'लोकस्तु भुवने जने' इत्यमरः । बान्धवः स हरिः श्रीकृष्णः । आत्मजनान् स्वीयान् तान् गोपान् दवात् वनाग्ने र्मोचयित्वा संसार एव दाव स्तस्मा दधिकं भयार्दितान् भयपीडितान् । अत एव ध्यानेन विशुद्धं चित्तं येषां तान् प्रसिद्धान् भक्तानिव अपासीत् ररक्ष । पाधातोः कर्तरि लुङि 'यमरमेति' सगागमः । पूर्णोपमालङ्कारः ॥ ५३ ॥

अथ प्रलम्बासुरवधरूपलीला वर्ण्यते—

**गत्वा गृहं गोपगणै स्समं हरि स्सन्तोष्य सर्वानपि गोपिकाजनान् ।
ससीरपाणि र्वनकेलिकामुको ययौ वनान्तं सवयोभि रावृतः ॥ ५४ ॥**

गत्वेति ॥ हरिः श्रीकृष्णः गोपगणै स्समं गृहं स्वभवनं गत्वा सर्वान् गोपिकाजनानपि सन्तोष्य तोषयित्वा वनकेलौ वनक्रीडायां कामुक आसक्तः । कमुधातोरुकञ् प्रत्ययः । सीरपाणिना बलरामेण सहितः सवयोभि र्वयस्यैः 'स्निग्धो वयस्य स्सवया' इत्यमरः । आवृतस्सन् वनान्तं वनमध्यं ययौ जगाम । यातेः कर्तरि लिट् ॥ ५४ ॥

**विभज्य पक्षद्वयवाह्यवाहका नस्मिन् हरौ खेलति बालकेलिभिः ।
प्रलम्बदैत्यो धृतबालकाकृति र्विवेश तन्मध्य मलक्ष्यवक्रिमा ॥ ५५ ॥**

विभज्येति ॥ पक्षयोः द्वयं तस्मिन् वाह्यान् वाहकांश्च विभज्य अस्मिन् हरौ कृष्णे बालकेलिभिः खेलति विहरति सति प्रलम्बदैत्यः प्रलम्बासुरः । धृता बालकाकृतिः येन । अलक्ष्यः वक्रिमा कौटिल्यं यस्य तथाभूतस्सन् तेषां बालकानां मध्यं विवेश । प्रविष्टवान् । विशधातोः कर्तरि लिट् ॥ ५५ ॥

बलरामहरणरूपलीला वर्ण्यते—

वहन् बलं संहरणेच्छयाऽसुरो भाण्डीरवृक्षं समतीत्य सीमतः ।
कूप्तं खमाक्रम्य ययौ विभीषयन् पाश्चात्यभागेऽग्नि मिव स्वरूपतः ॥ ५६ ॥

वहन्निति ॥ असुरः प्रलम्बासुरः, संहरणेच्छया, पाश्चात्यभागे पृष्ठभागे 'दक्षिणापश्चात्पुरस स्त्य' गिति त्यक् प्रत्ययः । अग्निमिवेत्युपमा । बलं बलरामं वहन्, सीमतः विहारावधित्वेन कूप्तं निर्णीतं भाण्डीरवृक्षं समतीत्य विलंघ्य स्वरूपतः राक्षसरूपतः, विभीषयन् सन् ख माकाशं आक्रम्य ययौ जगाम । याधातोः कर्तरि लिट् ॥ ५६ ॥

भगवत्पादारविन्दस्मरणमहिमान माह—

रामोऽपि तत्पृष्ठगतो भयातुर स्संस्मृत्य मोहेन पदाम्बुजद्वयम् ।
कृष्णस्य तस्या प्यविषह्यरूपिणं हन्तुं प्रलम्बं बल माप राक्षसम् ॥५७॥

रामोऽपीति ॥ तस्य प्रलम्बस्य पृष्ठगतः रामोऽपि मोहेन भयातुरः भयविह्वलस्सन्, तस्य कृष्णस्यपदाम्बुजद्वयं संस्मृत्य अविषह्यं दुस्सहं रूपं स्वरूपमस्यास्तीति तथाभूतमपि प्रलम्बं राक्षसं हन्तुं बलं वीर्यं आप प्राप । आपॢ धातोः कर्तरि लिट् ॥ ५७ ॥

प्रलम्बबाहुं पिशिताशनं खलं प्रलम्बनासाग्र मबद्धमूर्धजम् ।
लम्बोदरं घोरतनुं प्रलम्बकं रुषाऽनयत्तं यमसादनं हली ॥ ५८ ॥

प्रलम्बेति ॥ हली बलरामः, प्रलम्बौ लम्बमानौ बाहू यस्य तं, प्रलम्बं लम्बमानं नासाग्रं यस्य तं, अबद्धा असंयताः । 'बद्धे कीलितसंयता' वित्यमरः । मूर्धजाः केशाः यस्य तं, लम्बोदरं । घोरा भयानका तनु र्यस्य तं 'घोरं भीमं भयानक' मित्यमरः । खलं दुष्टं तं प्रलम्बकं, पिशिताशनं राक्षसं, यमसादनं, रुषा अनयत् निनाय । नीङ्धातोः कर्तरि लङ् । दुह्यादित्वाद् द्विकर्मकत्वम् ॥ ५८ ॥

अवाकिरन् देवगणा स्सुमै रमुं हलायुधं युद्धविशारदं तदा ।
गोपाः प्रणेमुः पिशिताशनाशकं नारायणं देवगणा इवाहवे ॥ ५९ ॥

अवाकिरन्निति ॥ तदा देवगणा देवसंघाः युद्धे विशारदं विचक्षणं, पिशिताशस्य प्रलम्बस्य नाशकं अमुं हलायुधं बलरामं सुमैः कुसुमैः । 'प्रसूनं कुसुमं सुम' मित्यमरः । अवाकिरन् ववृषुः । गोपा स्तं बलरामं आहवे युद्धे, देवगणाः नारायणं विष्णुमिव प्रणेमुः प्रणाम मकुर्वन् । प्रपूर्वकणमुधातोः कर्तरि लिट् । पूर्णोपमालङ्कारः ॥ ५९ ॥

वयस्यगोपर्त्विगुरूक्तिसामभिः स्वबाहुपात्रैर्वनभूमिवेदिभिः ।
बकादिरक्षःपशुभि र्मृधक्रियामखै स्स ईजे किल कृष्णसोमपाः ॥ ६० ॥

वयस्येति ॥ स प्रसिद्धः कृष्ण एव सोमपाः सोमपीथी । 'सोमपीथी तु सोमपाः' इत्यमरः । वयस्यगोपा एव ऋत्विजः तेषां उरूक्तयः प्रबल-वचांस्येव सामानि येषां तैः । स्वबाहव एव पात्राणि येषां तैः । वनभूमय एव वेदयो येषां तैः । 'वेदिः परिष्कृता भूमि' रित्यमरः । बकादिरक्षांस्येव पशवो येषां तैः । मृधक्रिया युद्धक्रिया एव मखा स्तैः ईजे इष्टवान् किल । यजधातोः कर्तरि लिट् । रूपकालङ्कारः ॥ ६० ॥

अगोचरानन्दपयोनिधौ गिरां निवर्त्य यज्ञावभृथं विनिर्मले ।
गोपा ययु र्गोपकुलं हरीश्वराः सवज्रिणो देवपुरं यथा सुराः ॥ ६१ ॥

अगोचरेति ॥ हरिः ईश्वरो येषां ते गोपाः । विनिर्मले गिरां वाचां अगोचरानन्द एव पयोनिधि स्तस्मिन् । यज्ञस्यावभृथं मज्जनं निर्वर्त्य कृत्वा सवज्रिण, सेन्द्राः सुरा देवाः देवपुरं यथाऽमरावती मिव गोपकुलं व्रजं ययुः जग्मुः । याधातोः कर्तरि लिट् । उपमालङ्कारः ॥ ६१ ॥

एवं व्यरंसीत् किल शैशवं हरे र्हरं विरिञ्चादिसुपर्वचेतसाम् ।
अनुत्तमं गोपकुमारतोषदं रक्षोगणाना मपि दुष्प्रमोषदम् ॥ ६२ ॥

एवमिति ॥ विरिञ्चादीनां ब्रह्मादीनां सुपर्वणां सुराणां चेतसां कर्मणि षष्ठी । हरं गोपकुमाराणां तोषं सन्तोषं ददातीति तथोक्तं ; रक्षोगणानां राक्षससंघानामपि । अपिना दुष्प्रसहत्वं द्योत्यते । दुष्प्रमोष मपायं ददातीति तथाभूतं अनुत्तमं सर्वोत्तमं हरेः श्रीकृष्णस्य शैशवं बाल्यं, 'शिशुत्वं शैशवं बाल्य' मित्यमरः । एवं पूर्वोक्तप्रकारेण व्यरंसीत्किल विरराम । विपूर्वक रमुधातोः कर्तरि लुङ् यमरमेति सगागमः । सिच इडागमः । व्याङ्परिभ्यो रम इति परस्मैपदम् ॥ ६२ ॥

यौवनप्रादुर्भाव माह—

हरिं तमीशं रतिकेलिकौतुकं कन्दर्पदं भावजसंप्रचोदिताः ।
दृष्ट्वा समासादितयौवनं मुहु र्न्यमूमुहन् मुग्धकुलाङ्गनाजनाः ॥६३॥

हरिमिति ॥ मुग्धा उदयद्यौवनाः कुलाङ्गनाजनाः कर्तारः समासादितं यौवनं येन तं संप्राप्ततारुण्यं 'तारुण्यं यौवनं समे' इत्यमरः । अत एव रतिकेलौ सुरतक्रीडायां कौतुकं कुतूहलं यस्य तं; 'कौतूहलं कौतुकं च कुतुकं च कुतूहलं' इत्यमरः । कन्दर्पदं कामदं ईशं प्रभुं तं हरिं श्रीकृष्णं दृष्ट्वा, भावजेन मन्मथेन संप्रचोदिताः प्रेरितास्सत्यः मुहुः न्यमूमुहन् । मुहुः अनुरक्ता बभूवु रित्यर्थः । मुहधातो र्णिचि कर्तरि लुङि चङि सन्वद्भावे दीर्घः ॥ ६३ ॥

अथ पञ्चभिः वर्षऋतु र्वर्ण्यते—

वियति नीलघन स्तपात्यये जयति केकिकुलानि विनादयन् ।
सपदि शिष्यकुलानि विधूदये गुरु रिव प्रतिवाक्यनिबोधकः ॥६४॥

वियतीति ॥ अथानन्तरं तपात्यये ग्रीष्मावसाने विधो श्चन्द्रस्य उदयः उत्पत्ति र्यस्मिन् । श्रावणप्रतिपदित्यर्थः । नीलघनो नीलमेघः, वाक्यं वाक्यं प्रतिवाक्यम्; वीप्साया मव्ययीभावः । निबोधकोऽध्यापकः गुरुः । विधोश्चन्द्रस्य, उदयो दर्शनं यस्मिन् । तिथौ शुक्लपक्षे द्वितीयाया मित्यर्थः । शिष्यकुलानि शिष्यसंघा निव सपदि सद्यः । 'सद्यः सपदि तत्क्षणे' इत्यमरः ।

केकिकुलानि मयूरसंघान्, विनादयन् ध्वनयन् वियति आकाशे जयति सर्वोत्कर्षेण वर्तते। जिधातोः कर्तरि लट्। द्रुतविलंबितं वृत्तम्। तल्लक्षणंतु—द्रुतविलंबितमाह नभौ भरा' विति। (पूर्णोपमालङ्कारः।) ॥ ६४ ॥

प्रावृट् सिषेवे भुवि कृष्ण मादरात् पूर्णप्रवाहै रखिलप्रमोददैः।
सतीव संपूर्णमनोरथै र्धवं सर्वेषु कालेषु मुदं प्रियं प्रिया ॥ ६५ ॥

प्रावृडिति ॥ प्रावृट् वर्षकालः। अखिलानां सर्वेषां प्रमोददैः सन्तोषप्रदैः पूर्णप्रवाहैः सती पतिव्रता प्रिया भार्या। संपूर्णमनोरथैः सर्वेषु कालेषु प्रियं धवमिव भुवि भूम्यां आदरात् मुदा कृष्णं सिषेवे असेवत। सेव् धातोः कर्तरि लिट्। पूर्णोपमालङ्कारः ॥ ६५ ॥

सकलजन्तुसमुद्भवदायिनी शिखिकुलस्य सुमुत्परिदायिनी।
परमहंसविचारघातिनी परमहंसविचारवहा जनि ॥ ६६ ॥

सकलेति ॥ सकलानां जन्तूनां समुद्भवं उत्पत्तिं ददातीति तथा। शिखिकुलस्यमयूरसंघस्य सुष्ठु मुदं सन्तोषं परिददातीति तथा। परमाः ये हंसाः राजहंसाः वयः पक्षिणः। 'विविष्किर पतत्त्रय' इत्यमरः। तेषां चारं संचारं विघातयतीति तथा परमहंसानां यतीनां विचारस्य ब्रह्मविचारस्य वहाः संचाराभावात्। यतीनां ब्रह्मविचारयोग्योऽयं काल इति भावः। प्रावृडिति पूर्वतनं विशेष्य मूह्यम्। अजनि आविर्बभूव। जनिधातोः कर्तरि लुङि 'दीपजने' त्यादिना चिण् ॥ ६६ ॥

तटि त्तटित्वत्क्षणबद्धसौहृदा प्रदर्शयन्ती कुटिला तिरोहिता।
ककुप्सु सर्वास्वनुलक्षिता सती स्त्रीणां हि योगः क्षणिकोनरे-
ष्विति ॥ ६७ ॥

तटिदिति ॥ तटित्वति मेघे 'तसौ मत्वर्थे' इति भसंज्ञायां जश्त्वाभावः। क्षणं क्षणकालं बद्धं सौहृदं स्नेहः; संम्बन्ध इति यावत्, यया सा कुटिला

वक्रा तटित् विद्युत् 'तटित्सौदामिनी विद्युत्' इत्यमरः। कर्त्री। सर्वासु ककुप्सु दिक्षु। 'दिशस्तु ककुभः काष्ठा' इत्यमरः। अनुलक्षिता परिदृश्यमाना सती। नरेषु पुरुषेषु स्त्रीणां योगः क्षणिक श्चञ्चलः। इति प्रदर्शयन्ती ज्ञापयन्ती तिरोहिता हि अन्तर्दधे। अत्र तिरोहिता तटित् स्वतिरोधानक्रियया परान् प्रति पुरुषेषु स्त्रीणां संबन्धः क्षणिको नश्वरः इति बोधयन्ती सती निबद्धे त्यसदर्थनिदर्शनालङ्कारः। तदुक्तम्—अपरां बोधनं प्राहुः क्रियया ऽसत्सदर्थयो' रिति ॥ ६७ ॥

नद्युत्तमाः पूर्णजलौघसंपदः संक्षोभ्य कूलं दृढमूलपादपम्।
ऊहुः सधैर्यं हृदयं तदा नृणां संपन्नरूपाः प्रमदोत्तमा इव ॥६८॥

नदीति ॥ तदा प्रावृषि, पूर्णानां जलौघानां उदकप्रवाहानां 'ओघः प्रवाहजवयो' रित्यमरः। संपदः समृद्धयो यासां ताः। नद्युत्तमाः। दृढमूलाः रूढमूलाः पादपा वृक्षा यस्मिंस्तत्। कूलं तीरं 'कूलं रोधश्च तीरं चे' त्यमरः। संपन्नं रूपं सौन्दर्यं यासां, 'अथ रूपं नपुंसकम् स्वभावाकृतिसौन्दर्यवपुष्षु' इति विश्वः (?)। ताः प्रमदोत्तमाः स्त्रियः नृणां पुरुषाणां 'नृ चेति' वैकल्पिकत्वात् दीर्घाभावः। सधैर्यं धैर्ययुक्तं; हृदयमिव संक्षोभ्य प्रमथ्य, ऊहुः प्रवहन्ति स्म। वहधातोः कर्तरि लिट्। पूर्णोपमालङ्कारः ॥ ६८ ॥

अथ षड्भिः शरद् वर्ण्यते—

कान्ता शरच्चन्द्रमसं पतिं प्रियं संभासयन्तीं विगताभ्रराजिका।
स चन्द्रमा स्तामपि भासयन् प्रियां रराज रात्र्या मातिमञ्जुलैः करैः ॥ ६९ ॥

कान्तेति ॥ शरत्कान्ता विगताः अभ्रराजयः मेघपङ्क्तयः यस्याः सा। अत एव प्रिय मिष्टं पतिं धवं चन्द्रमसं संभासयन्ती सम्यक् प्रकाशयन्ती सती रराज रेजे। स चन्द्रमा अपि अतिमञ्जुलैः मनोज्ञैः करैः किरणैः रात्र्यां प्रियां तां शरत्कान्तां संभासयन् सन् रराज। राजृधातोः कर्तरि लिट्। अन्योन्यालङ्कारः। तदुक्तम्—'अन्योन्यं नाम यत्र स्या दुपकारः परस्पर' मिति ॥ ६९ ॥

जलेचराः सर्वजलाशयान्तराद् ग्रसन्तमम्बूनि मयूखमालिनम् ।
विदु र्न कालं सकुटुम्बका इव स्वायूंषि संसारमहोदधौ चराः ॥७०॥

जलेचरा इति ॥ जले चरन्तीति जलेचरा जलजन्तवः । 'तत्पुरुषे कृती' ति सप्तम्या अलुक् । सर्वेषां जलाशयानां तटाकाना मन्तरात् मध्यात् अम्बूनि जलानि ग्रसन्तं शोषयन्तं मयूखमालिनं सूर्यं, संसार एव महोदधिः, तत्र चरन्तीति तथाभूताः । सकुटुम्बकाः कुटुम्बिनो जनाः, स्वायूंषि ग्रसन्तं अपहरन्तं कालमिव न विदुः । विद्धातोः कर्तरि लटि, विदो लटो वेति झेर्जुस् । पूर्णोपमालङ्कारः ॥ ७० ॥

स्त्रिय स्तदा नूतनयौवनोदितस्तना नवोत्पन्नसरोजकुट्मलाः ।
गभीरनिष्पङ्क मनोजलोज्ज्वलाः रेजु र्नलिन्यः कमलै र्मुखै रिव ॥७१॥

स्त्रिय इति ॥ तदा शरत्काले गभीरं निम्नं, 'निम्नं गभीरं गंभीर' मित्यमरः । निष्पङ्कं कर्दमरहितं । 'पङ्कोऽस्त्री शादकर्दमा' वित्यमरः । मनस्सदृशं यज्जलं तेन उज्ज्वलाः प्रकाशमानाः । अन्यत्र गभीरं दुर्ज्ञेयं, निष्पङ्कं पापरहितं, 'अस्त्री पङ्कं पुमा न्पाप्मे' त्यमरः । यन्मनः तदेव जलं; मयूरव्यंसकादित्वात्समासः । तेन उज्ज्वलाः । नवं यथा तथा । उत्पन्नाः सरोजकुट्मलाः । कमलकुट्मलाः । 'कुट्मलो मुकुलोऽस्त्रिया' मित्यमरः । नलिन्यः कमलिन्यः । कमलैः नूतनेन यौवनेन उदिताः उत्पन्नाः स्तनाः यासां ताः स्त्रियः । मुखै रिव रेजुः । राजतेः कर्तरि लिट् । पूर्णोपमालङ्कारः ॥ ७१ ॥

नक्तं नभोऽचक्षत वीतवारिदं धाराभि रालीनपरागसञ्चयम् ।
सचन्द्रतारं वरहीरहारभावक्त्रां तनुं नास्य जनाः किमादरात् ॥७२॥

नक्तमिति ॥ जनाः कर्तारः । नक्तं रात्रौ धाराभि र्वर्षधाराभिः । आसमन्तात् लीनः परागसंचयः यस्य तत् । वीता गताः वारिदा मेघाः यस्मात्तत् । चन्द्रेण तारैश्च सहितं सचन्द्रतारं नभ आकाशं वरहीरहारस्य भाः

कान्तिः यस्य तादृशं वक्त्रं यस्यास्तां ; अस्य श्रीकृष्णस्य तनुं आदरात् नाचक्षत किं नापश्यन्किम्? किन्तु अपश्यन्नेवेत्यर्थः । चक्षधातोः कर्तरि लङ् । (अयं दर्शनेऽपीति वचना द्दर्शनार्थकत्वम्) आकाशे श्रीकृष्णतनुभ्रान्तिवर्णनात् भ्रान्तिमदलङ्कारः ॥ ७२ ॥

सदा नलिन्यः कुमुदाकराश्च ते शरत्सुयोगेन विनिर्मलं जलम् ।
वहन्त आभासिषु रत्र कानने ध्यानेन सच्चित्त मिवाथ योगिनः ॥७३॥

सदेति ॥ अथानन्तरं ; अत्र कानने ; शरदः सुयोगेन ; विशेषेण निर्मलं जलं वहन्तः ; नलिन्यः कमलिन्यः ; कुमुदाकराश्च ते ध्यानेन । सत् परिशुद्धं ; चित्तं वहन्तः योगिन इव । सदा आभासिषुः बभुः । भासतेः कर्तरि लुङ् । पूर्णोपमालङ्कारः ॥ ७३ ॥

अथ त्रयोदशभिः हेमन्तवर्णनपूर्वकगोपीवस्त्रापहरणरूपलीला वर्ण्यते—

हिमागमेऽस्मिन् नवकञ्जलोचने वनं मुदा गच्छति गोपबालकैः ।
मुखश्रियाऽमुष्य जितानि किं गलद्दलान्यभूवन् जलजानि लज्जया ॥७४॥

हिमागम इति ॥ हिमागमे हेमन्तर्तौ । नवे नूतने कञ्जे इव लोचने यस्य तस्मिन् अस्मिन् श्रीकृष्णे गोपबालकैः सह वनं मुदा गच्छति सति अमुष्य श्रीकृष्णस्य ; मुखश्रिया मुखकान्त्या ; जलजानि पद्मानि जितानि सन्ति ; लज्जया गलन्ति दलानि येभ्यः तथाविधा न्यभूवन् आसन् किं? भूधातोः कर्तरि लुङ् । 'भुवो वुगि' दिति उगागमः । तत्र पद्मेषु असिद्धैव लज्जा दलगलनहेतुत्वेनोत्प्रेक्षिता इति असिद्धहेतूत्प्रेक्षा ॥ ७४ ॥

***कलिन्दकन्यामिव शीतलोदके तदा विगाह्यानुदिनं कुमारिकाः ।**
समेत्य कृष्णं पति माप्तु मञ्जसा कात्यायनी मर्चितु मभ्ययु र्मुदा ॥७५

---

*व्याख्या असमग्रा ;

कलिन्देति ॥ तदा हेमन्ते ; कुमारिकाः गोपकन्यकाः । 'कन्या-कुमारी' त्यमरः । समेत्य संघीभूय । शीते शीतले ; 'तुषारः शीतलः शीति' इत्यमरः । अर्चितुं पूजितुं ; मुदा अभ्ययुः जग्मुः । या धातोः कर्तरि लङ् । 'लङः शाकटायनस्ये' ति झेर्जुस् ॥ ७५ ॥

गौर्यर्चनप्रकार मेवाह—

आदौ समारभ्य दिनेऽम्बिकाव्रतं हिमागमे चान्वह मत्र यामुने ।
स्नात्वा जले सैकत माशु देवतां कृत्वा समानर्चु रमू हरिप्रियाः ॥७६॥

आदाविति ॥ हरिः प्रियो यासां ताः । हरिं पतिं प्राप्तुकामा इत्यर्थः । अमू गोपकन्यकाः, हिमागमे हेमन्ते ; आदौ दिने प्रथमदिने । अम्बिकाव्रतं सम्यगारभ्य । अत्र यामुने यमुनासंबन्धिनि जले अन्वहं अहन्य-हनि । वीप्सायामव्ययीभावः । स्नात्वा सैकतं सिकतासमूहं आशु देवतां कृत्वा, समानर्चुः अर्चयामासुः । संपूर्वकार्चधातोः कर्तरि लिट् । 'तस्मान्नुट् द्विहल' इति नुडागमः ॥ ७६ ॥

ज्ञात्वा तदा मुग्धवधूजनाशयं झडित्यगात् साधु कुमारिकाकृतम् ।
व्रतं चिकीर्षुः सफलं रमाधवः कलिन्दकन्यातट मन्तरात्मकः ॥ ७७ ॥

ज्ञात्वेति ॥ अन्तरात्मकः अन्तर्यामी रमाधवः श्रीकृष्णः ; तदा तस्मिन् समये ; मुग्धानां उद्यद्यौवनानां वधूजनाना माशय मभिप्रायं 'अभिप्राय श्छन्द आशयः' इत्यमरः । ज्ञात्वा, साधु सम्यक् । कुमारिकाभिः गोप-कन्यकाभिः कृतं व्रतं सफलं फलयुक्तं चिकीर्षुः कर्तुमिच्छुः । कृञ्धातोः सन्नन्तादुप्रत्ययः । कलिन्दकन्यातटं यमुनातीरं झटित्यगात् प्राप । इण्धातोः कर्तरि लुङि गादेशः । अत्र अन्तरात्मक इति साभिप्रायविशेषणात् परिकरा-लङ्कारः । तदुक्तम् — 'अलङ्कारः परिकरः साभिप्राये विशेषण' इति ॥ ७७ ॥

कुमारिका श्शीतजले विवाससो दृष्ट्वा कदम्बं फलपुष्पयुक्तम् ।
वस्त्राणि संमुष्य तदङ्गसौष्ठवं विलोकितुं सैष समारुरोह ॥ ७८ ॥

कुमारिका इति ॥ स एष श्रीकृष्णः । 'सोऽचि लोपे चेत् पादपूरण' मिति सुलोपः । शीतजले कुमारिका गोपकन्यकाः । विवाससो विगतवसनाः । 'वास श्चेलं वसन मंशुक' मित्यमरः । दृष्ट्वा । वस्त्राणि तीरस्थवस्त्राणि । सम्मुष्यापहृत्य । तासां मङ्गसौष्ठवं अवयवसौन्दर्यं ; विलोकितुं ; फलैः पुष्पैश्च युक्तं कदम्बं नीपवृक्षं ; 'नीपप्रियकदम्बास्तु हलिप्रिय' इत्यमरः । समारुरोह आरूढवान । संपूर्वकरुहधातोः कर्तरि लिट् । अत्र वस्त्रापहरणरूपहेतोः अङ्गसौष्ठवविलोकनरूपहेतुमता सार्धं वर्णनात् हेत्वलङ्कारः । तदुक्तम् — 'हेतोर्हेतुमता सार्धं वर्णनं हेतु रुच्यत' इति ॥ ७८ ॥

तदैव कण्ठद्वयसे जले स्थिता कुमारिकाः कृष्ण मवेक्ष्य सुन्दरम् ।
कदम्बमध्ये निजवस्त्रहारिणं त मूचु रित्थं भृश माशु लज्जिताः ॥७९॥

तदेति ॥ तदैव तस्मिन् समये । कण्ठद्वयसे कण्ठप्रमाणे । 'प्रमाणे द्वयसच्' इत्यादिना द्वयसच् प्रत्ययः । जले स्थिताः वर्तमानाः कुमारिकाः गोपकन्यकाः । निजानि स्वीयानि वस्त्राणि हरतीति तथोक्तम् । 'सुप्यजाता' विति ताच्छील्ये णिनिः । सुन्दरं कृष्णं ; कदम्बमध्ये कदम्बवृक्षमध्ये अवेक्ष्य भृशं लज्जिताः सत्यः, इत्थं वक्ष्यमाणप्रकारेण । आशु ऊचुः । वचधातोः कर्तरि लिट् ॥ ७९ ॥

वक्ष्यमाणप्रकार मेवाह —

रे रे हरे कृष्ण विवाससो जले सुशीतलं नो हिम मद्य बाधते ।
नताः स्म तान् दापय वस्त्रसंचयान् वदाम राज्ञे यदि न
प्रयच्छसि ॥ ८० ॥

रे र इति ॥ हे कृष्ण! विवाससो वस्त्रहीनाः । नः अस्मान् जले सुशीतलं हिमं तुहिनं अद्य बाधते । वयं नताः नमस्कृतवत्यः । तान् अपहृतान् वस्त्रसञ्चयान् दापय देहि! स्वार्थे णिच् । न प्रयच्छसि यदि न ददासि यदि राज्ञे नन्दाय वदाम । वदधातोः कर्तरि लोट् ॥ ८० ॥

कृतापराधाः कृतदेवहेलनाः यूयं प्रवेशेन विवाससो जले ।
तच्छान्तये चीर्णतपःकुमारिकाः समीप मागत्य नमेत मां मुदा॥ ८१॥

कृतेति ॥ हे चीर्णतपःकुमारिकाः चीर्णमाचरितं तपो याभिः तथाविधाः कुमारिका गोपकन्यकाः यूयं विवाससो विगतवस्त्राः जले प्रविष्टाः । अत एत कृतं देवहेलनं देवतानादरः याभिस्ताः । अत एव कृतापराधाः कृतागसः । 'आगोऽपराधो मन्तुश्चे' त्यमरः । तस्य दोषस्य शान्तये समीपमागत्य मां मुदा नमेत नमत । णमुधातोः कर्तरि विधिलिङ् ॥ ८१ ॥

इत्यालपन्तं प्रहसन्तमच्युतं शीता त्समुत्तीर्य जलाद् बहि र्ह्रिया ।
एकेन हस्तेन निगूह्य मान्मथं गेहं मुदान्येन तदा नतिं व्युधुः ॥८२॥

इतीति ॥ इति पूर्वोक्तप्रकारेण । आलपन्तं वदन्तं प्रहसन्त मच्युतं श्रीकृष्णं प्रति शीतात् शीतलात् जलाद् बहिः समुत्तीर्य निर्गत्य । तदा तस्मिन् समये ह्रिया लज्जया एकेन हस्तेन मान्मथं गेहं मन्मथमन्दिरं निगूह्य आच्छाद्य मुदा अन्येन हस्तेन आनतिं नमस्कारं व्यधुः अकुर्वन् । विपूर्वक धाधातोः कर्तरि लुङि 'गातिस्थे' ति सिचो लुक् ॥ ८२ ॥

निषिद्धरूपां नति मद्य सेहिरे पूर्वे किमेकेन शयेन गोपिकाः ।
तस्मा त्कराभ्यां कुरुतानतिं सतीं दास्यामि वासांसि विधातु-
मर्चनाम् ॥ ८३ ॥

निषिद्धेति ॥ हे गोपिकाः पूर्वे वृद्धाः । 'पूर्वपरे' त्यादिना सर्वनाम संज्ञायां जसः शीभावः । निषिद्धरूपां निषिद्धस्वरूपां; नतिं नमस्क्रियां एकेन शयेन सेहिरे किं? तस्मात्कारणात् अद्य कराभ्यां हस्ताभ्यां सतीं श्रेष्ठां आनतिं कुरुत अर्चनां पूजां विधातु कर्तुं वासांसि दास्यामि प्रदास्ये । दाधातोः कर्तरि लृट् ॥ ८३ ॥

**एवं गदन्तं विगतत्रपा हरिं नेमुः शिरोभि र्धृतबाहुभिः स्त्रियः ।
स्मित्वा स तानाह स कन्यकाजनान् वस्त्राणि दत्वा पति माप्नुतेति माम् ॥ ८४ ॥**

एवमिति ॥ स्त्रियो गोपकन्यकाः ; एवं पूर्वोक्तप्रकारेण ; गदन्तं वदन्तं ; विगतत्रपाः निर्लज्जाः सत्यः ; धृता बाहवो यै स्तैः शिरोभिः ; नेमु रनमन् । णमुधातोः कर्तरि लिट् । स श्रीकृष्णः ; स्मित्वा प्रहस्य ; वस्त्राणि दत्वा ; मां पति माप्नुत प्राप्नुत, इति तान् कन्यकाजनान् गोपकन्यकाः आह स्म उवाच ; ब्रूञ् धातोः कर्तरि लट् । स्मयोगाद्भूतार्थकत्वम् । आहादेशः ॥ ८४ ॥

**यूयं मयाऽऽरंस्यथ शोभनक्षपाः वनेऽत्र काश्चित् परया मुदा रहः ।
निर्वर्त्य पूजां गृह मद्य गोपिकाः यातेति वाचं व्यसृज द्रमाधवः ॥८५॥**

यूयमिति ॥ हे गोपिकाः यूयं अत्र वने काश्चित् कतिचित् शोभनाः क्षपा रात्रीः । 'अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्य' मिति वार्तिकात् कर्मसंज्ञायां द्वितीया । रह एकान्ते ; परया मुदा मया सह आरंस्यथ क्रीडिष्यथ । रमुधातोः कर्तरि लृट् । 'व्याङ् परिभ्यो रम' इति परस्मै पदम् । अद्य पूजां आरब्धपूजां । निर्वर्त्य समाप्य ; गृहं यात इति रमाधवः श्रीकृष्णः । वाचं व्यसृजत् अवोचत् । सृजतेः कर्तरि लङ् ॥ ८५ ॥

**तथा समाराध्य ययुः कुमारिकाः नत्वा शिवां पूर्णमनोरथा गृहान् ।
हरि र्ययौ गोपगणा नथ प्रियान् वने तदा चारयितुं स्वगोगणान् ॥८६॥**

तथेति । कुमारिका गोपकन्यकाः । तथा भगवदुक्तिप्रकारेण, शिवा-मम्बिकाम्, समाराध्य संपूज्य, नत्वा पूर्णमनोरथास्सत्यः, गृहान् ययु र्जग्मुः । यातेः कर्तरि लिट् । अथानन्तरं हरिः श्रीष्णः स्वगोगणान् गवां संघान् ; वने ; तदा वस्त्रापहरणसमये ; चारयितुं ; प्रियान् सखीन् गोपगणान् गोपसंघान् प्रति ययौ ; यातेः कर्तरि लिट् ॥ ८६ ॥

गाश्चारयन्तः शिशिरे वनान्तरे निरस्तशीते मुदमाप्य गोपिकाः ।
कदाचिदर्के क्षुधिता स्तप त्यमुं प्रभुं वनेऽन्नानि ययाचिरेऽर्भकाः ॥८७॥

गा इति ॥ शिशिरे शिशिरर्तौ ; निरस्तं शीतं हिमः यस्मिंस्तत तस्मिन् वनान्तरे ; गाः चारयन्तः सञ्चारयन्तोऽर्भकाः गोपकाः ; मुदमाप्य ; कदाचिदर्के तपति सति क्षुधिताः बुभुक्षिताः सन्तः ; अमुं प्रभुं श्रीकृष्णं वने अन्नानि ययाचिरे याचितवन्तः । याचतेः कर्तरि लिट् ॥ ८७ ॥

याहि त्व मद्यैव कुमार मद्गिरा भोज्यार्थिना नन्दसुतेन सत्वरम् ।
संप्रेषितोऽस्मीति वदान्तरात्मको विप्रान् समीपे यजतोऽवद-
द्धरिः ॥ ८८ ॥

याहीति ॥ हे कुमार गोपबालक । त्वं मद्गिरा अद्यैव याहि । भोज्यार्थिना अन्नार्थिना नन्दसुतेन श्रीकृष्णेन ; सत्वरं संप्रेषितोऽस्मि इति समीपे यजतः यजमानान् विप्रान् वद ; इति अन्तरात्मकः अन्तर्यामी हरिः श्रीकृष्णः अवदत् उवाच । वद्धातोः कर्तरि लङ् । अत्र अन्तरात्मक इति साभिप्रायविशेषणात् परिकरालङ्कारः ॥ ८८ ॥

श्रुत्वाऽपि गोपेरितमद्भुतं वचो यज्वान इष्टि ष्वतिलग्नबुद्धयः ।
तूष्णी मवर्तन्त विमूढचेतसो द्विजातयः पश्चिमबुद्धयः किल ॥ ८९ ॥

श्रुत्वेति ॥ इष्टिषु यागेषु 'इष्टिर्यागेच्छयो' रित्यमरः । अतिलग्ना बुद्धिर्येषां ते । विमूढं चेतो येषां ते । यज्वानः विधिना इष्टवन्तः 'सुयजो र्ङ्वनिप्' इति । 'यज्वा तु विधिनेष्टवानि' त्यमरः । गोपेन ईरित मुक्त मद्भुतं वचः श्रुत्वाऽपि तूष्णी मवर्तन्त तूष्णीं स्थिताः । तथाहि । द्विजातयो विप्राः पश्चिमा कार्यानन्तरभाविनी बुद्धि र्येषां तथाविधाः किल । अत्र यज्वनां तूष्णीं भावरूपस्य विशेषस्य द्विजातयः पश्चिमकार्यबुद्धय इति सामान्येन समर्थनादर्थान्तरन्यासालङ्कारः ॥ ८९ ॥

आलक्ष्य तेषां स्मयजातदुर्नयं द्रुतं ततः कृष्ण मुपेत्य बालकः ।
जगाद तद्वाक्य मिति स्म शुश्रुवुः हितं न दुष्टा इव ते द्विजाधमाः ॥९०॥

आलक्ष्येति ॥ तत स्तूष्णींभावानन्तरं; बालको गोपः; **तेषां** विप्राणां; स्मयात् गर्वात्, 'गर्वः स्या द्विस्मयो मद' इत्यमरः । जातं दुर्नयं दौष्ट्यं आलक्ष्य दृष्ट्वा; द्रुतं कृष्ण मुपेत्य; ते द्विजाधमाः; तत् त्वदुक्तं वाक्यं दुष्टाः हितमिव न शुश्रुवुः नाश्रौषुः । इति जगाद । स्म आश्चर्यम् । गदधातोः कर्तरि लिट् । पूर्णोपमालङ्कारः ॥ ९० ॥

कृष्ण स्तदाकर्ण्य वचो विषह्य निरस्तमानोत्तमनीचसाम्यः ।
तमेव बालं पुनरप्युदारान् दारान्प्रति प्रेषितवान् द्विजानाम् ॥ ९१ ॥

कृष्ण इति ॥ निरस्तो मानो यस्मात् । 'गर्वोऽभिमानोऽहङ्कारो मान' इत्यमरः । स चासौ उत्तमेषु श्रेष्ठेषु नीचेषु अधमेषु च साम्यं समभावो यस्य तथोक्तः । स श्रीकृष्णः । तत् बालोक्तं वचः आकर्ण्य विषह्य सोढ्वा । पुनरपि तमेव पूर्वं प्रेषितमेव बालं; द्विजानां उदारान् श्रेष्ठान् दारान् भार्याः प्रति; 'भार्या जायाऽथ पुंभूम्नि दारा' इत्यमरः । प्रेषितवान् ॥ ९१ ॥

त मागतं मोक्षदकार्यसूचकं हरे स्सकाशा दतिथिं विलोक्य ताः ।
स्वाविष्टचित्ता भगव त्यधोक्षजे रमाधवे प्रीति मतीव लेभिरे ॥ ९२ ॥

तमिति ॥ ता विप्रपत्न्यः मोक्षदस्य भगवतः कार्यस्य भोजनकार्यस्य सूचकं ज्ञापकं हरेः कृष्णस्य सकाशात् आगतं प्राप्तं अतिथिं 'अतिथि र्ना गृहागते' इत्यमरः । तं बालं विलोक्य अधःकृतं अक्षज मिन्द्रियज्ञानं येन तस्मिन् अधोक्षजे इन्द्रियज्ञानाविषये रमाधवे भगवति कृष्णे । सुष्ठु आविष्टं चित्तं यासां तथोक्ताः सत्यः अतीव प्रीतिं लेभिरे प्रापुः । लभतेः कर्तरि लिट् ॥ ९२ ॥

तदर्पिता नन्नचयान् समध्वरे पात्रेषु संयोज्य वसन्तमण्डिते ।
वने वसन्तं सह गोपगोगणैः द्रष्टुं मुदा तं त्वरया ययुः स्त्रियः ॥ ९३ ॥

तदर्पितानिति ॥ स्त्रियो विप्रपत्न्यः समध्वरे यागे । तस्मै भगवते अर्पिता नन्नचयान् । पात्रेषु संयोज्य निक्षिप्य । वसन्तेनर्तुना मण्डितेऽलङ्कृते वने गोपानां गवां च गणैः संघैः सह वसन्तं तं श्रीकृष्णं द्रष्टुं मुदा त्वरया आययु राजग्मुः । आङ्पूर्वकयातेः कर्तरि लिट् ॥ ९३ ॥

पीताम्बरालङ्कृतचारुमेखलं लसन्नखाग्रप्रभया वसुन्धराम् ।
संभासयन्तं चलकर्णकुण्डलं मुकुन्द मारु र्गतकल्मषाः स्त्रियः ॥९४॥

पीताम्बरेति ॥ गतकल्मषा निष्पापाः स्त्रियः । पीताम्बरेणालङ्कृता चारु मेखला यस्य तम् । लसतां नखाग्राणां पादनखाग्राणां प्रभया कान्त्या वसुन्धरां भुवं संभासयन्तं प्रकाशयन्तं; सञ्चरन्तमित्यर्थः । चलती कर्णकुण्डले यस्य तं; मुकुन्दं श्रीकृष्णं आरुः प्रापुः । ऋधातोः कर्तरि लिट् ॥ ९४ ॥

अद्राक्षु रेताः परमं रमाधवं मुनीन्द्रसच्चित्तसरोजषट्पदम् ।
वने वसन्तं गतकल्मषाश्रयं सरित्तटे मन्मथमन्मथं हरिम् ॥ ९५ ॥

अद्राक्षुरिति ॥ एता विप्रपत्न्यः । मुनीन्द्राणां सच्चित्तमेव सरोजं तस्य षट्पदं भ्रमरभूतं; गतकल्मषाणां निष्पापाना माश्रयं आश्रयभूतं; वने सरित स्तटे तीरे 'कूलं रोधश्च तीरं च प्रतीरं च तट' मित्यमरः । मन्मथस्यापि मन्मथं मन्मथादपि सुन्दर मित्यर्थः । परम मुत्कृष्टं रमाधवं हरिं श्रीकृष्णं अद्राक्षु-रपश्यन् इति श्लोकचतुष्टयपर्यन्तं कुलकम् । दृशिधातोः कर्तरि लुङ् ॥ ९५ ॥

अपाङ्गवीक्षामृतवर्षणेन संसारदावानलकीलजालैः ।
सन्तप्यमाना नभिषिच्य लोकान् कुर्वन्त मिष्टान् परितुष्टचित्तान् ॥९६॥

अपाङ्गेति ॥ संसार एव दावानलः तस्य कीलजालैः ज्वालामालाभिः । 'ज्वालकीला' वित्यमरः । सन्तप्यमानान् परितप्यमानान् । इष्टान् लोकान् जनान् । अपाङ्गेन नेत्रान्तेन 'अपाङ्गौ नेत्रयोरन्ता' वित्यमरः । वीक्षा वीक्षणं तदेवामृतं तस्य वर्षेण अभिषिच्य सिक्त्वा । परितुष्टचित्तान् सन्तुष्टमनसः कुर्वन्तम् ॥ ९६ ॥

झङ्कारनादान्वित पुष्पलिट्छ्रिया
श्रीवत्सचिह्नाद्भुत कान्तियुक्तया ।
अम्लानराजद्वनमालया लस-
द्विशालवक्षःस्थल मम्बुजेक्षणम् ॥ ९७ ॥

झङ्कारेति ॥ झङ्कारनादेन अन्वितानां युक्तानां पुष्पलिहां भृङ्गाणाम् । 'द्विरेफ पुष्पलिट् भृङ्ग—' इत्यमरः । श्रीः यस्या स्तया । श्रीवत्साख्यचिह्नस्य लक्षणस्य च 'चिह्नं लक्ष्म च लक्षणम्' इत्यमरः । अद्भुतकान्त्या युक्तया अम्लानया अग्लानया राजन्त्या प्रकाशमानया वनमालया वैजयन्त्या । लसत्प्रकाशमानं विशालं वक्षःस्थलं यस्य तम् । अम्बुजे इव ईक्षणे चक्षुषी यस्य तम् ॥ ९७ ॥

मन्दस्मितोद्भासिदयावलोकनं मनो हरन्तं मृदुमञ्जुभाषणम् ।
फणीन्द्रभोगाभसुगन्धरूषितस्वबाहुबद्धाङ्गदकान्तिमण्डितम् ॥ ९८ ॥

मन्दस्मितेति ॥ मन्दस्मितेन उद्भासीनि दयावलोकनानि यस्य तम् । मृदूनि मञ्जुभाषणानि यस्य तम् । फणीन्द्रस्य शेषस्य भोगस्य देहस्य आभेव आभा ययोस्तयोः सुगन्धेन रूषितयो र्लिप्तयोः स्वबाह्वो र्बद्धयोरङ्गदयोः केयूरयोः । 'केयूर मङ्गदं तुल्ये' इत्यमरः । कान्तिभि र्मण्डितं मनः हरन्तं मनोज्ञम् ॥ ९८ ॥

मन्दाक्षमन्दाक्षरया गिरा युताः प्रेम्णा हरिं स्तोतु मशक्तिसंयुताः ।
नेमु श्शिरोभि र्हरिचक्रभीतमःप्रलोलवेणीशतकान्तिभिः
स्त्रियः ॥ ९९ ॥

मन्दाक्षमिति ॥ स्त्रियः मन्दाक्षेण ह्रिया । 'मन्दाक्षं ह्री स्त्रपा व्रीडे' त्यमरः । मन्दानि अक्षराणि यस्यास्तया गिरा युताः । अत एव स्तोतुं अशक्तिसंयुताः । असमर्थाः सत्यः । हरेश्चक्रं तस्माद् भीः भीतिः यस्य तादृशः । तम इव राहुरिव । 'तमस्तु राहुः स्वर्भानुः' इत्यमरः । प्रलोला वेण्यः

चलशीर्षण्याः । 'वेणिः प्रवेणी शीर्षण्य' इत्यमरः । तासां शतस्य । शत-मित्युपलक्षणम् । कान्ति येषां तैः शिरोभिः । हरिं प्रेम्णा नेमुः अनमन् । नम् धातोः कर्तरि लिट् ॥ ९९ ॥

मोहा द्धरिं निजपतिं परिलब्धुकामाः
तं देहसङ्ग मथ ताः प्रमदा व्यनाथन् ।
अल्पं सुखं मृगदृशो हि मदङ्गसङ्गात्
पारोक्ष्यमेव भजनं भवमुक्तिदं वः ॥ १०० ॥

मोहादिति ॥ अथानन्तरं ताः प्रमदाः विप्रपत्न्यः । मोहात् । हरिं श्रीकृष्णं; निजपतिं स्वपतिं परिलब्धुं कामो यासां तथाभूतास्सत्यः । तं श्रीकृष्णं; देहसङ्गं अङ्गसङ्गं व्यनाथन् ययाचिरे । विपूर्वकनाथृधातोः कर्तरि लङ् । 'आशिषि नाथ' इति नियमात् अत्र आत्मनेपदम् न । हे मृगदृशः स्त्रियः! मदङ्गसङ्गात् मम देहसङ्गात् वो युष्माकं सुखमल्पं हि । पारोक्ष्यं परोक्षकृतं भजनं ध्यानमेव भवमुक्तिदं संसारनिवर्तकं; मोक्षप्रदमित्यर्थः । वैषयिकसुखं प्रार्थयमानाना मङ्गनानां अनुग्रहात् अतिशयेन मुक्तिसाधनमुपदिष्टवा निति भावः ॥ १०० ॥

इत्यालपद्धरिवचो विनिशम्य विप्र-
दाराः प्रणम्य जगदीश मनन्त माद्यम् ।
पीत्वाऽस्य देहघनकान्ति मथाक्षियुग्मै-
र्यातुं मनां स्यमनसोऽपि दधुः प्रियांस्तान् ॥ १०१ ॥

इतीति ॥ अथानन्तरं; इति पूर्वोक्तप्रकारेण; आलपतो वदतः; हरेः श्रीकृष्णस्य; वचो विनिशम्य विप्रदारा विप्रपत्न्यः । जगदीशं जगन्नियन्तारं; आद्यं पुराणं; अनन्तं श्रीकृष्णं; प्रणम्य; अस्य भगवतः; देह एव घन-स्तस्य कान्तिं; अक्षियुग्मै नेत्रयुगलैः; पीत्वा आदरेण दृष्ट्वेत्यर्थः । तान्-

प्रियान् विप्रान् प्रति यातुं अमनसोऽपि न विद्यते मनो यासां तथा भूता अपि मनांसि दधुः गन्तु मैच्छ न्नित्यर्थः । धाधातोः कर्तरि लिट् ॥ १०१ ॥

एवं वद त्यखिललोकनमस्कृतस्य
विष्णो रमोघसुकथामृतसारपूर्णः ।
षष्ठोऽगल न्मृदुलसुन्दरपादपद्म-
भृङ्गायमानहृदये कविपुण्यकोटौ ॥ १०२ ॥

एवमिति ॥ मृदुलयोः कोमलयोः सुन्दरयोः पादपद्मयोः भृङ्गवदाचरतीति भृङ्गायमानम् । आचारार्थे क्यङ् । तादृशं हृदयं यस्य तस्मिन् । कविपुण्यकोटौ । एवं पूर्वोक्तप्रकारेण वदति सति । अखिललोकैः जनैः नमस्कृतस्य विष्णोः श्रीकृष्णस्यामोघा या सुकथा सैवामृतं तस्य सारेण पूर्णः षष्ठः सर्गः अगलत् पूर्णोऽभवत् ॥ १०२ ॥

इति श्रीकृष्णविलासे सव्याख्याने पुण्यकोटिकृतौ

षष्ठः सर्गः समाप्तः ॥

सप्तमस्सर्गः

नत्वा हरिं तं कमनीयविग्रहं विमुक्तयेऽन्नं रुचिरं चतुर्विधम् ।
दत्त्वा च तस्मै विततं ययुः स्त्रिय स्ता यज्ञवाटं हरिलग्नबुद्धयः ॥ १ ॥

नत्वेति ॥ ताः स्त्रियो विप्रपत्न्यः; कमनीयो मनोज्ञः विग्रहः देहो यस्य तं हरिं; विमुक्तये मुक्त्यर्थं; तादर्थ्ये चतुर्थी । नत्वा नमस्कृत्य । तस्मै कृष्णाय; रुचिरं स्वादु चतुर्विधं भक्ष्य भोज्य लेह्य चोष्यात्मकमन्नं दत्त्वा च; विततं विस्तृतं, यज्ञवाटं यज्ञशालां । हरौ लग्ना बुद्धि र्यासां तथाविधा स्सत्यः ययु र्जग्मुः । यातेः कर्तरि लिट् ॥ १ ॥

भार्योपदेशै रनुतप्तबुद्धयः परात्मविद्यागुरवोऽपि भूसुराः ।
धिगस्तु न स्तत्कृतमन्तवो यतः निन्दावमानैरिति सम्बभाषिरे ॥२॥

भार्येति ॥ भूसुरा द्विजाः । परा था आत्मविद्यायाः । गुरवोऽपि भार्याणा-मुपदेशा स्तैः हरिगुणकथनैः; अनु पश्चात् तप्ता बुद्धि र्येषां ते तथाविधा स्सन्तः । यतः, अयमिति शेषः । निन्दाभि रवमानैश्च । तस्मिन् भगवति कृष्णे कृतो मन्तुरपराधः 'आगो ऽपराधो मन्तुश्चे' त्यमरः । यै स्तथाविधाः । अतो नः अस्मान् प्रति धिक् निन्दा अस्तु । असधातोः कर्तरि विधौ लोट् । इति सम्बभाषिरे । संपूर्वक भाषतेः कर्तरि लिट् ॥ २ ॥

***संद्रष्टुकामा अपि तं पुराविदं यज्ञेश्वरं यज्ञहविर्भुजं द्विजाः ।**
द्रष्टुं समर्था न बभूवु रर्दिता स्वराजकंसा द्भयशङ्कया भृशम् ॥ ३ ॥

---

* Full commentary for this verse is not available in the Mss.

अथ षड्विंशतिश्लोकैः मघवन्महोत्सवनिराकरणपूर्वकं गोवर्धनोद्धरणं वर्ण्यते—

वने तथा नन्दमुखान् स गोपकान् प्रति प्रवृत्तान् मघवान मध्वरे ।
समृद्धसम्भारचयैः सुसंभृतान् कस्या इदं कार्य मिति स्म पृच्छति ।।४।।

वन इति ॥ अथानन्तरं; वने स श्रीकृष्णः । मघवान मिन्द्र मुद्दिश्य; अध्वरे यागे प्रवृत्तान्;समृद्धानां संभाराणां यागसाधनद्रव्याणां; चयैः समूहैः; सुसंभृतान् युतान् नन्दमुखान् गोपकान्, इद मारब्धं कार्यं कस्यै देवतायै इति पृच्छति स्म पप्रच्छ । प्रच्छधातोः कर्तरि लट् । स्मयोगा द्भूतार्थकत्वम् ।।४।।

आह स्म सूनुं परया मुदा हरिं नन्द स्सदानन्दमयो महोत्सवः ।
इन्द्राय नो गोकुलगोपरक्षको यागोऽय मस्माभि रिति प्रयोजितः ।।५।।

आहेति ॥ सदानन्दमयः आनन्दप्रचुरः । प्राचुर्यार्थे मयट् । नन्दः अस्माकं गोकुलस्य गोसङ्घस्य गोपानां च रक्षकः । यागो यागरूपः, अयं महोत्सवः, अस्माभि रिन्द्राय इन्द्रार्थं प्रयोजितः प्रयुक्तः । इति सूनुं हरिं श्रीकृष्णं प्रति परया मुदा आह स्म उवाच । ब्रूञ्धातोः कर्तरि लट् । 'ब्रुवः पञ्चाना' मित्याहादेशः ॥ ५ ॥

अथ द्वाभ्यां इन्द्रायारब्धमहोत्सवं निराकर्तुं मीमांसकमतमवलम्ब्याह—

गर्वस्य भङ्गाय मरुत्वतः पुमा नाद्यः स्म गोपा निति वाक्य माह तान् ।
कर्तव्य मार्या यदि देवताऽस्ति भो तदा तदुद्देश्यककर्म गोपकाः ।।६।।

गर्वस्येति ॥ भो आर्याः पूज्याः गोपकाः । देवता अस्ति यदि तदा सा देवता उद्देश्यं यस्य तत् तदुद्देश्यकं कर्म कर्तव्यं आचरणीय मिति आद्यः

पुमान् श्रीकृष्णः मरुत्वत इन्द्रस्य 'इन्द्रो मरुत्वा' नित्यमरः । गर्वस्य भङ्गाय तान् गोपान् वाक्य माह स उवाच । ब्रूञ्धातोः कर्तरि लट् । आहादेशः । देवताया अभावात् तदुद्देशेन न कर्तव्य मिति भावः ॥ ६ ॥

ननु देवतानङ्गीकारे फलप्रदातु रभावे कर्मणो नैष्फल्यं स्यादित्याशङ्कां कर्मणि एव फलसिद्धौ निरपेक्षाहेतुत्वव्यवस्थापनेन परिहरति—

कर्मैव हेतु र्लयजन्मसंस्थितिप्रवाहकार्येषु जनस्य विष्टपे ।
अकर्त्रनीशेन कि मत्र त त्पित र्नाहं समाराध्दु मिहेन्द्र मुत्सहे ॥७॥

कर्मैवेति ॥ हे पितः नन्द । विष्टपे जगति । 'विष्टपं भुवनं जगदि' त्यमरः । जनस्य लयो नाशः, जन्म उत्पत्तिः, स्थिति र्वर्तमानता । तासां प्रवाहरूपकार्येषु कर्मैव हेतुः कारणम् । तत् तस्मात् कारणात् । अत्र लयादिषु अकर्त्रा अनीशेन अस्वतन्त्रेण किं? साध्यं नास्तीत्यर्थः । इह यागे इन्द्रं समाराद्धुं पूजितु महं नोत्सहे नेच्छामि । उत्पूर्वकसहधातोः कर्तरि लट् ॥७॥

ननु देवतोद्देशेन द्रव्यत्यागात्मकत्वा त्कर्मणः, कथं देवतां विना तत्सिद्धि रित्याशङ्कायां कर्माङ्गमात्रं देवते त्यङ्गीकृत्य, येषां येन जीवनं तदेव तेषां देवतेति हेतुवाद माश्रित्य गवादीनामेव प्रकृतयागदेवतात्वं व्यवस्थापयति —

विप्रान् समाराध्दु मिहाह मुत्सहे गोवर्धनं जीवनहेतुगोगणान् ।
कुर्वन्तु वाक्यं मम रोचते यदि स्वयं नग स्त्वत्ति च नो बलिं बली ॥८॥

विप्रानिति ॥ अहं तु इह मखे विप्रान् गोवर्धनं, जीवने अस्मज्जीवने हेतवो या गाव स्तेषां गणान् संघान् समाराद्धुं संपूजितु उत्सहे इच्छामि । सहतेः कर्तरि लट् । नगो गोवर्धनगिरिः नः अस्माकं बलिं स्वय मत्ति भक्षयति । इदं रोचते यदि मम वाक्यं कुर्वन्तु । कृञ्धातोः कर्तरि विधौ लोट् ॥ ८ ॥

ननु गवादीनामपि वृत्ति रिन्द्राधीनैवे त्याशङ्क्य निरीश्वरसांख्यमतानुसारेण रजोगुणप्रेरितमेघजन्यवृष्टिभि रेव सस्यादयो भवन्ति किं मिन्द्रेणे त्याशयेन परिहरति —

स्थित्यादयः सत्त्वगुणादिहेतुका रजोगुणप्रेरितमेघसम्भवैः ।
वर्षैस्तु सस्यादिसमृद्धयो जना भवन्ति किं तेन तदेति सोऽब्रवीत् ॥९॥

स्थित्यादय इति । हे जनाः यतः स्थित्यादयः स्थित्युत्पत्तिनाशाः । सत्त्वगुणादिहेतुकाः सत्त्वरजस्तमोगुणकारणकाः । अतो रजोगुणेन प्रेरितेभ्यो मेघेभ्यः सम्भव उत्पत्तिर्येषां तैः । वर्षैस्तु वर्षैरेव, सस्यादीनां, आदिपदेन प्रजादय उच्यन्ते । समृद्धयो भवन्ति । तदा तेन इन्द्रेण किं? तेन किमपि साध्यं नास्तीत्यर्थः । इति स श्रीकृष्णः अब्रवी दवोचत् । ब्रूञ्धातोः कर्तरि लङ् । ईडागमः ॥ ९ ॥

संमानयन्त स्तदुदीरितं वचो नन्दादयो गोपकुलोत्तमा स्तदा ।
विनिश्चितार्थाश्च तथैव पूजितुं प्रवर्तयामासु रहो मखं गिरेः ॥ १० ॥

संमानयन्त इति । तदा तेन कृष्णेन, उदीरितमुक्तं वचः संमानयन्तः अङ्गीकुर्वन्तः । गोपकुलोत्तमाः गोपकुलश्रेष्ठाः नन्दादयः । विनिश्चितः अर्थो यै स्तथाभूता स्सन्तः । तथैव कृष्णोक्तिप्रकारेणैव । पूजितुं, गिरेः गोवर्धनस्य; मखं प्रवर्तयामासु रारेभिरे । प्रपूर्वक वृतु धातो र्णिजन्तात् आमि अनुप्रयोगे कर्तरि लिट् । अहो आश्चर्यम् ॥ १० ॥

सम्पूज्य शैलं विधिव द्वने प्रियं वाक्यं हरे रस्य निशम्य ते ययुः ।
गृहानिव ब्रह्ममुखाः पयोनिधौ नारायणं देवगणा स्त्रिविष्टपम् ॥११॥

सम्पूज्येति । ते नन्दमुखाः, प्रियमिष्टं, अस्य हरेः श्रीकृष्णस्य; वाक्यं निशम्य श्रुत्वा; वने शैलं गोवर्धनं; विधिवत् शास्त्रोक्तप्रकारेण;

'तदर्ह' मिति वतिप्रत्ययः । संपूज्य पूजयित्वा; ब्रह्ममुखाः ब्रह्मादयः देवगणाः; पयोनिधौ क्षीरसागरे; नारायणं संपूज्य; त्रिविष्टपं स्वर्गमिव; गृहान् ययु र्जग्मुः। याधातोः कर्तरि लिट्। पूर्णोपमालङ्कारः ॥ ११ ॥

चुकोप तेभ्योऽथ स मेघवाहनो विनष्टयज्ञोत्सवजातसम्भ्रमः ।
नन्दादिघोषोत्तमबुद्धिदोषत स्समृद्धिमद्गोकुलसंप्लवाशयः ॥ १२ ॥

चुकोपेति ॥ अथानन्तरं नन्दादीनां गोपोत्तमानां बुद्धेर्दोषात् विनष्टः यज्ञरूप उत्सवो यस्य सः । अत एव जातः संभ्रमः संवेगो यस्य तथोक्तः । 'समौ संवेगसंभ्रमौ' इत्यमरः । मेघवाहन इन्द्रः । समृद्धिमतो गोकुलस्य घोषस्य । संप्लवे जलैः प्लावने । आशयोऽभिप्रायो यस्य तथाभूतस्सन् । तेभ्यो नन्दादिभ्यः चुकोप अकुप्यत् । 'क्रुध द्रुहे' त्यादिना चतुर्थी । कुपधातोः कर्तरि लिट् ॥ १२ ॥

आहूय शक्रः प्रलयाभ्रसञ्चया नाज्ञापयामास विमुच्य बन्धनात् ।
आसारनष्टं कुरुतेति गोकुलं यूयं रुषाऽनर्गलवायुनेरिताः ॥ १३ ॥

आहूयेति ॥ शक्र इन्द्रः कर्ता । प्रलयाभ्रसञ्चयान् प्रलयकालमेघसंघान्; आहूय बन्धना द्विमुच्य; यूयं अनर्गलवायुना ईरिताः प्रेरितास्सन्तः; 'आविद्धक्षिप्तेरितास्समा' इत्यमरः । गोकुलं घोषं आसारै र्वर्षधाराभिः; 'धारासम्पात आसार' इत्यमरः । नष्टं कुरुत इति रुषा आज्ञापयामास आज्ञप्तवान् ॥ १३ ॥

स्वयं समारुह्य चतुर्भिरुत्तमै र्दन्तै स्त मैरावण मभ्ययाद् द्रुतम् ।
भ्राजन्त मत्यन्त मसा वुमापते र्गिरेः करीन्द्रं तुलनां वहत्तमम् ॥१४॥

स्वयमिति ॥ असाविन्द्रः । उत्तमै श्चतुर्भि र्दन्तै रत्यन्तं भ्राजन्तं प्रकाशमानं । उमापते श्शिवस्य संबन्धिनो गिरेः कैलासस्य । तुलनां साम्यं वहत्तमं

अतिशयेन वहन्तं ; ऐरावणं नाम करीन्द्र मारुह्य । तं श्रीकृष्णं स्वयं द्रुत मभ्ययात् आययौ । अभिपूर्वकयातेः कर्तरि लङ् ॥ १४ ॥

आश्रित्य सैरावणकुम्भलक्षणं दुर्गं परीवारयुतः पुरन्दरः ।
गर्वात्मकं कञ्चुकमाविभाव्य खा दवातरद् भूमि मसौ सुरोत्तमः ॥१५॥

आश्रित्येति ॥ सुरोत्तमः सुरश्रेष्ठः, सः असौ पुरन्दरः इन्द्रः । 'पुरुहूतः पुरन्दर' इत्यमरः । गर्वात्मकं गर्वस्वरूपं, कञ्चुकमाविभाव्य धृत्वा । अतीव गर्वाविष्ट इत्यर्थः । ऐरावणस्य ऐरावतस्य । कुम्भलक्षणं कुम्भस्थलात्मकं दुर्ग माश्रित्य । परीवारै रनुचरै र्देवै र्युतः । 'उपसर्गस्य घञ्यमनुष्य' इति दीर्घः । खा दम्बरात् भूमिं प्रति अवातरत् अवततार । अवपूर्वक तॄधातोः कर्तरि लङ् ॥ १५ ॥

आकस्मिकाभ्राणि परीत्य विस्फुरत्सौदामिनीसङ्घयुतानि पुष्करम् ।
रेजु स्समन्ता दरविन्दतारकं नक्तंदिवं सञ्चरवातवृष्टिभिः ॥ १६ ॥

आकस्मिकेति ॥ विस्फुरन्तीनां सौदामिनीनां विद्युतां ; 'तडि त्सौदामिनी विद्यु' दित्युमरः । संघै र्युतानि संयुक्तानि । अकस्माद् भवानि आकस्मिकानि ; निर्हेतुकानीत्यर्थः । प्रलयकालमेघाना मप्रसक्तेरिति भावः । अभ्राणि मेघाः । 'अभ्रं मेघो वारिवाह' इत्यमरः । पुष्कर मम्बरं ; 'व्योम पुष्करमम्बर' मित्यमरः । नक्तंदिवं अरविन्दतारकं यथा तथा । समन्तात् परीत्य आवृत्य । सञ्चरद्वातवृष्टिभिः प्रलयकालवायुवर्षैः सह रेजुः । अहोरात्रं ववृषु रित्यर्थः । राजृधातोः कर्तरि लिट् ॥ १६ ॥

अतिवृष्ट्यार्दिताः हरिं शरणं प्रापु रित्याह—

आसारपातप्रणतोत्तमाङ्गकाः प्रशीतवाताहतरोमराजयः ।
कृशीभवत्कुक्षिविलीनकन्धरा गाव स्सगोपा श्शरणं हरिं ययुः ॥१७॥

आसारेति ॥ आसाराणां वर्षधाराणां ; 'धारासम्पात आसार' इत्यमरः । पातेन प्रणतानि नम्राणि उत्तमाङ्गानि शिरांसि । 'उत्तमाङ्गं शिर श्शीर्ष' मित्यमरः । यासां त ः । प्रशीतेन वातेन वायुना आहताः रोम्णां राजयः पंक्तयः यासां ताः । कृशीभवत्सु कुक्षिषु विलीनाः कन्धरा यासां ताः । गोपै स्सहिता स्सगोपाः गावः । हरिं शरणं ययुः प्रापुः । याधातोः कर्तरि लिट् ॥ १७ ॥

मत्वेन्द्रसञ्चोदितमेघमेदुरं तदाऽम्बरं रक्षितु मात्मवैभवैः ।
सगोगणान् गोकुलबालवृद्धकान् गोवर्धनोद्धार मथैहतादिमः ॥ १८ ॥

मत्वेति ॥ अथानन्तरं । आदिमः श्रीकृष्णः । अम्बर माकाशं ; इन्द्रेण सञ्चोदितै मेघै मेदुरं निबिडं मत्वा । तदा सगोगणान् गोगणसहितान् । गोकुले व्रजे ; स्थितान् बालान् वृद्धांश्च आत्मनो वैभवैः महिमभिः रक्षितुं । गोवर्धनस्य गिरेः उद्धारं उद्धरणं ऐहत ऐच्छत । ईह धातोः कर्तरि लङ् ॥ १८ ॥

उद्धृत्य शैलेन्द्र मथो शयेन तं दधार सैकेन सुलीलया वनम् ।
गत्वा निकुञ्जद्रुमपंक्तिशोभितं छत्राक मेना नवितुं यथा शिशुः ॥१९॥

उद्धृत्येति ॥ अथानन्तरं स श्रीकृष्णः । वनं गत्वा ; एकेन शयेन पाणिना ; 'पञ्चशाख श्शयः पाणि' रित्यमरः । निकुञ्जानां लतागृहाणां द्रुमाणां वृक्षाणां ; पंक्तिभि श्शोभितं प्रकाशमानं तं शैलेन्द्रं गोवर्धनं ; शिशुः छत्राकं यथा (उत) शिलीन्ध्र मिव सुलीलया उद्धृत्य ; एनान् व्रजस्थान् ; अवितुं रक्षितुं ; दधार धृतवान् । धृञ्धातोः कर्तरि लिट् ॥ १९ ॥

बालोऽयं दुर्भरं गिरिं कथं धरिष्यतीत्याशङ्कां निरस्य न्नाह—

मद्देवता यूय मिहैव कामतो वसेत सर्वे मम बान्धवा स्तदा ।
इत्याह तान् निर्गतभीतयो नखं धरां सशैला मपि धर्तु मर्हति ॥२०॥

मद्देवता इति । हे बान्धवाः ; अहं देवता येषां ते मद्देवताः । सर्वे यूयं ; निर्गता भीति र्येभ्यः तथा भूता स्सन्तः इहैव पर्वताधोभाग एव ; कामतो यथेच्छं ; वसेत निवसत ; मम नखं सशैलां सपर्वतां धरा मपि धर्तु मर्हति । अर्हधातोः कर्तरि लट् । इति ता नब्रवीत् अवोचत् । ब्रूञ्धातोः कर्तरि लङ् ॥ २० ॥

भगवन्महिमानमाह—

आसप्तरात्रं स्वजनावनोद्यमः करेण शैलेन्द्र मसौ हरि र्दधौ ।
इभीसमूहेट् स वने सुलीलया मुदा वरं पद्म मिवोन्मदोत्कटः ॥२१॥

आसप्तरात्रमिति ॥ स्वजनस्य अवने रक्षणे उद्यमो यस्य सः । असौ हरिः श्रीकृष्णः । वनेऽरण्ये । शैलेन्द्रं गोवर्धनगिरिम् । करेण हस्तेन । उन्मदोत्कटः मदाधिकः । इभीसमूहस्य करेणुसमूहस्य । ईट् प्रभु र्गजश्रेष्ठः । वने सलिले सुलीलया विलासेन । मुदा सन्तोषेण । वरं श्रेष्ठं प्रद्म मिव । आसप्तरात्रं सप्तरात्र मभिव्याप्य । 'अहस्सर्वैकदेशे' त्यादिना अच् । दधौ दाधातोः कर्तरि लिट् ॥ उपमालङ्कारः ॥ २१ ॥

महाश्रयेषु कृतदौष्ट्यं ह्रियै भवतीत्याह —

जलै र्यदेकार्णव माविलं जगत् कुर्व न्ननीशोऽभव देष वासवः ।
तान् धर्षितुं दुष्टधिया विलज्जया निवारयामास तदाऽभ्रसञ्चयान्
॥ २२ ॥

जलैरिति ॥ एष वासव इन्द्रः । दुष्टधिया दुष्टबुद्ध्या । जगत् जले एकार्णवं, अत एव आविलं कलुषं कुर्वन्नपि यदा तान् गोपान् धर्षितु मनीशः असमर्थः अभवत् । तदा विलज्जया अभ्रसञ्चयान् निवारयामास निवारितवान् । वृञ्धातोर्णिचि आमि अनुप्रयोगे कर्तरि लिट् ॥ २२ ॥

**नभो रराजाऽथ सतारकाधिपं दिशश्च सर्वा विगताभ्रसञ्चयाः ।
स्वान्तं विराजद्धरिसङ्गि बुद्धयो विध्वस्तकामा इव सिद्धयोगिनाम्* ॥ २३ ॥**

नभ इति ॥ अथ मेघनिवारणानन्तरं, सतारकाधिपं तारकाधिपसहितं नभः, सिद्धयोगिनां विराजतोऽभिव्यक्तस्य । हरेः सङ्गः अस्यास्तीति तथोक्तं । स्वान्तं मनः । 'स्वान्तं हृन्मानसं मनः' इत्यमरः । तदैव रराज । विगताः अभ्राणां मेघानां संचया स्संघाः याभ्य स्ताः । सर्वा दिशश्च । विध्वस्ताः कामा यासां ताः । बुद्धय इव । विरेजुः इति विभक्तिविपरिणामः । राजृ-धातोः कर्तरि लिट् । पूर्णोपमालङ्कारः ॥ २३ ॥

**गते ऽतिवर्षे गिरिगर्ततो जनाः विनिर्गता गोधनभाण्डसञ्चयैः ।
जीवा इवास्योदरतः पुन र्बहिः कल्पोदये स्वार्जितकर्मसञ्चयैः ॥ २४ ॥**

गत इति ॥ जना गोपाः । अतिवर्षेऽतिवृष्टौ गते सति । गिरेर्गोवर्धनस्य गर्ततः स्थानभूतगर्तात् गोधनेन गोसमूहेन । 'गोधनं स्या द्गवां व्रजे' इत्यमरः । भाण्डानां समूहैश्च कल्पोदये सृष्टिकाले । अस्य श्रीकृष्णस्य उदरतः स्वार्जितानां कर्मणां सञ्चयै स्सह जीवा इव बहिः पुन र्विनिर्गताः । पूर्णोपमालङ्कारः ॥ २४ ॥

**संप्रापयामास नगं नगोद्धरः स लीलयाऽऽशु प्रकृतिं समुद्धृतम् ।
मोहं समाद्यन् भगवान् समक्षतः सन्तोषमेषां जनयन् मुहुर्मुहुः ॥२५॥**

समिति ॥ नगोद्धरः स भगवान् श्रीकृष्णः । मोहं बाल इति बुद्धिं; समाद्यन् सम्यक् खण्डयन् । दो अवखण्डने इति धातोः कर्तरि शतृप्रत्ययः ।

---

* 'ख' पुस्तके २३, २४, २५ अङ्काङ्कितं श्लोकत्रयं नास्ति ।

एषां गोपानां सन्तोषं मुहुर्मुहु र्जनयन् समुद्धृतं नगं पर्वतं समक्षतः प्रत्यक्षतः । आशु शीघ्रं लीलया विलासेन । प्रकृतिं पूर्वस्थितिं संप्रापयामास अनयत् । सं प्र पूर्वक आप्लृधातोः कर्तरि लिट् ॥ २५ ॥

शक्रः श्रीकृष्णं ह्रिया रहः शरणं प्रापे त्याह —

तदा ऽवरुह्याशु स गर्वपर्वता द्रहोऽहिहा तस्य पदाब्जयो र्व्यधात् ।
स हीरमाणिक्यमृगाङ्कभास्करप्रभालसन्मञ्जुकिरीटसन्नतिम् ॥ २६ ॥

तदेति ॥ तदा तस्मिन् समये। स अहिहा इन्द्रः । 'प्राचीनबर्हि रहिहा' इत्यमरः । गर्व एव पर्वत स्तस्मात् । आशु अवरुह्य । अहङ्कारं त्यक्त्वेत्यर्थः । रह एकान्ते, तस्य कृष्णस्य, पदाब्जयोः, सहीराणि माणिक्यानि, तानि मृगाङ्कभास्करा इवेत्युपमितसमासः । तेषां प्रभाभि र्लसतः प्रकाशमानस्य मञ्जुकिरीटस्य सन्नतिं नमनं व्यधा दकरोत् । विपूर्वकधाधातोः कर्तरि लुङ् ॥ २६ ॥

अथ द्वाभ्यां स्वापराधकथनपूर्वकं स्तौति —

यत्पादपङ्केरुहसेवया वयं तरेम संसार मतीव दुस्तरम् ।
तत्तादृशे त्वय्यगुणे विभो कृपां कृतागसि त्वं मयि कु र्वचेतसि ॥२७॥

यदिति ॥ विभो हे भगवन् । वयं यस्य पादपङ्केरुहयोः सेवया भजनेन, अतीव दुस्तरं तर्तु मशक्यं संसारं तरेम तराम । तॄ धातोः कर्तरि लिङ् । तत्तादृशे प्रसिद्धे, अगुणे गुणरहिते, त्वयि विषये कृत मागोऽपराधः येन । 'आगोऽपराधो मन्तु श्चे' त्यमरः । तस्मिन्, अत एव अचेतसि बुद्धिशून्ये मयि त्वं कृपां दयां कुरु । कृधातोः कर्तरि लोट् ॥ २७ ॥

ज्येष्ठेन कृतोऽपराधः कनिष्ठेनावश्यं सोढव्य इति सदृष्टान्त माह—

इन्द्रानुज स्त्वं तव सोदरं गुरुं कृतापराधं सहसा सहाद्य माम् ।
विधिं सनन्दप्रमुखा विषेहिरे स्वसृष्टवाणीकृतचापलं न किम् ॥२८॥

इन्द्रेति ॥ इन्द्रस्य मे अनुज स्त्वं, तव सोदरं ज्येष्ठभ्रातरं, अत एव गुरुं पूज्यं, कृतोऽपराधो येन तथाविधं मां, अद्य सहसा शीघ्रं सह क्षमस्व । णिजभावे चुरादिगणपतितत्वात् परस्मैपदम् । गुरुमपि कृतापराधं कथं सहन्तीत्यत आह विधिमिति । सनन्दप्रमुखाः सनन्दादयः । स्वसृष्टायां वाण्यां सरस्वत्यां कृतं चापलं लौल्यं येन तथाभूतं गुरुं विधिं ब्रह्माणं न विषेहिरे किं? सेहिर एवेत्यर्थः । सह धातोः कर्तरि लिट् । अतो ज्येष्ठेन कृतोऽपराधः सोढव्य इति भावः । व्यतिरेकदृष्टान्तालङ्कारः । तदुक्तम् — चेद् बिम्बप्रतिबिम्बत्वं दृष्टान्त स्तदलङ्कृति रिति ॥ २८ ॥

स्तुत्वैव मीशं वरदं हरि र्हरिं नत्वा मुहु स्तं नरदेहधारिणम् ।
अवीविश द्धाम निजं स्वकै र्मुदा तदैव कृष्णो गृह मञ्जसा ययौ ॥२९॥

स्तुत्वेति ॥ हरि रिन्द्रः । 'इन्द्रो दुश्च्यवनो हरि' रिति हलायुधः । 'यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु । शुकाहिकपिभेकेषु हरि र्ना कपिले त्रिषु' इत्यमरश्च । ईशं प्रभुं । वरदं अभीष्टदं । नरदेहं धरतीति तथोक्तं, तं हरिं श्रीकृष्णं । एवं पूर्वोक्तप्रकारेण स्तुत्वा । मुहुः पुनः पुनः । नत्वा नमस्कृत्य । स्वकै रनुचरै, र्दैवै स्सह । मुदा निजं स्वकीयं धाम स्थान मवीविशत् विवेश । विशधातो र्णिचि कर्तरि लुङ् । तदैव तस्मिन्नेव समये कृष्णः; अञ्जसा तरसा गृहं स्वभवनं ययौ जगाम । यातेः कर्तरि लिट् ॥ २९ ॥

अथ नन्दापहरण माह—

हरेः कदाचित् समुपोष्य वासरे प्रभातबुद्ध्या निशि नन्दगोपकम् ।
मज्जन्त मार्यं यमुनाजलेऽमले समाहर द्वारुणराक्षसाधमः ॥ ३० ॥

हरेरिति ॥ कदाचित् कस्मिंश्चित् काले । हरे र्वासरे एकादश्यां । समुपोष्य । निशि अर्धरात्रे । प्रभातबुद्ध्या उषःकालबुद्ध्या । अमले यमुनाजले, मज्जन्तं स्नानं कुर्वन्तं । आर्यं पूज्यं नन्दगोपकं नन्दं । वारुणः वरुणसम्बन्धी राक्षसाधमः । समाहरत् जहार । सं आङ् पूर्वक हृञ्धातोः कर्तरि लङ् ॥३०॥

अनागतं नन्द मसौ तदा हृतं ज्ञात्वा ययौ वारुणगेह मच्युतः ।
दृष्ट्वा त मायान्त मपां पतिः प्रभुं पूजां चकाराय मतीव तत्प्रियः ।।३१।।

अनागतमिति ।। असा वच्युतः श्रीकृष्णः । तदा तस्मिन् काले अनागतं नन्दं हृतं, वरुणदूतेनेति शेषः । ज्ञात्वा वारुणगेहं वरुणगृहं ययौ । स श्रीकृष्ण एव प्रियो यस्य सोऽयं अपांपति र्वरुणः । आयान्तं प्रभुं श्रीकृष्णं दृष्ट्वा अतीव पूजां चकार । कृधातोः कर्तरि लिट् ।। ३१ ।।

अजानता मामकदुष्टरक्षसा प्रागस्कृताऽऽनीत मिमं व्रजेश्वरम् ।
नन्दं गुरुं ते निजमन्दिरं नय प्रसीद भृत्येषु दयां कुरु प्रभो ।। ३२ ।।

अजानतेति ।। हे प्रभो स्वामिन्! अजानता अज्ञानेन । अत एव प्रकर्षेण आगः अपराधं करोतीति तथोक्तेन । 'आगोऽपराधो मन्तुश्चे' त्यमरः । मामकेन मत्सम्बन्धिना दुष्टरक्षसा । आनीतं । व्रजस्य घोषस्य ईश्वरं ते गुरुं । 'गुरू गीष्पति पित्राद्या' वित्यमरः । इमं नन्दं । निजमन्दिरं स्वगृहं । नय प्रापय । प्रसीद प्रसन्नो भव । भृत्येषु अस्मासु दयां कुरु । कृञ्धातोः कर्तरि संप्रार्थनायां लोट् ।। ३२ ।।

इतीडित स्तेन स लोकपालकश्रेष्ठेन पित्रा सह गेह मायर्यौ ।
दृष्ट्वा हरिं मन्मथतुल्यरूपिणं न्यमूमुहन् वृत्तपयोधराः स्त्रियः ।। ३३ ।।

इतीति ।। स श्रीकृष्णः । लोकपालकश्रेष्ठेन तेन वरुणेन । इति पूर्वोक्तप्रकारेण ईडितः स्तुत स्सन् । पित्रा नन्देन सह । गेहं गृहं । आययौ आजगाम । आङ्पूर्वकयातेः कर्तरि लिट् । वृत्ताः पयोधराः वर्तुलाः स्तनाः यासां ताः । 'वर्तुलं निस्तलं वृत्तं', 'स्त्रीस्तनाब्दौ पयोधरा' वित्यमरः । स्त्रियो गोपिकाः । मन्मथेन तुल्यं रूप मस्यास्तीति तथाभूतम्; मन्मथसुन्दर मित्यर्थः । अत एव प्रियं युवानं श्रीकृष्णं दृष्ट्वा न्यमूमुहन् मुमुहुः । मुहधातोः णिचि कर्तरि लुङि च्ले श्लङि सन्वद्भावे दीर्घः ।। ३३ ।।

संवीक्ष्य सायाह्नि पयोधरोन्नतिं संप्राप्तवां स्ते शरणं सुमध्यमे ।
मां पालय त्वं रतिकेलिवाञ्छया प्रोवाच कृष्णो ललना मिति प्रभुः
॥ ३४ ॥

संवीक्ष्येति ॥ हे सुमध्यमे गोपिके । सायाह्नि सायंकाले ; 'संख्या विसाय पूर्वस्याह्नस्याहन्नन्यतरस्यां ङौ' इति वैकल्पिकाह्नादेशः । पयोधराणां मेघानां, उन्नतिं मौन्नत्यं, वीक्ष्य दृष्ट्वा, ते तव, शरणं गृहं । 'शरणं गृहरक्षित्रो' रित्यमरः । संप्राप्तवान् आगतवानस्मि । तस्मा न्मां त्वं पालयेति प्रभुः कृष्णः । रतिकेलिवाञ्छया ललनां गोपिकां प्रोवाच जगाद । प्रपूर्वकवचधातोः कर्तरि लिट् । अत्र स्तनोन्नतिं दृष्ट्वा शरणं प्राप्तोऽस्मीति श्लिष्टगुप्तार्थस्य वाञ्छयेति कविनाऽऽविष्कृतत्वात् विवृतोक्त्यलङ्कारः । तदुक्तम् – 'विवृतोक्तिः श्लिष्टगुप्तं कविनाऽऽविष्कृतं यदी' ति ॥ ३४ ॥

अथ सस्त्री॰वृन्दारकाणां .... श्रीभागवत .... पञ्चाध्यायी प्रतिपाद्यां रासक्रीडाकथा मासर्गं वर्णयति —

प्राच्यङ्गनैरावतकुम्भकैतवस्तनद्वयं कुङ्कुमपङ्किलं करैः ।
स्वकैः प्रकुर्वन् तरुणारुणै र्दिवि व्यभा न्निशायाः कुमुदप्रियः प्रभुः ॥३५॥

प्राचीति ॥ कुमुदानां श्वेतोत्पलानां प्रियः, निशायाः प्रभु श्चन्द्रः । तरुणै र्नवैः । अत एवारुणैः स्वकैः स्वीयैः करैः किरणैः । प्राच्येवाङ्गना तस्याः ऐरावतकुम्भाविति कैतवं ययो स्तयोः स्तनयो र्द्वयं । कुङ्कुमेन पङ्किलं प्रकुर्वन् । दिवि आकाशे । व्यभात् बभौ । विपूर्वकभातेः कर्तरि लङ् । कैतवापह्नुत्यलङ्कारः ॥ ३५ ॥

वेणुगानेन गोपिकानां मन्मथोद्दीपनं वर्णयति पञ्चभिः—

तदा सुधांशुं नवकुङ्कुमारुणं कुमुद्वतीसख्य मखण्डमण्डलम् ।
नवं वनोत्फुल्लरुचं वनान्तगो दृष्ट्वा जगौ सर्वविमोहनं हरिः ॥ ३६ ॥

तदेति ॥ तदा तस्मिन् समये, हरिः श्रीकृष्णः; नवकुङ्कुम मिवारुणं। कुमुद्वत्यां कुमुदिन्यां सख्यं यस्य तं। 'कुमुद नड वेतसेभ्यो ड्मतुप्'। 'उगित-श्चे' ति ङीप्। अखण्डं संपूर्णं, मण्डलं बिम्बं यस्य तं। नवं नूतनं। वनोत्फुल्लरुचं। सुधांशु चन्द्रं; दृष्ट्वा; वनान्तगः उपवनमध्यगतः सन्; सर्वेषां विमोहनं यथा तथा। जगौ अगायत्। गैधातोः कर्तरि लिट् ॥ ३६ ॥

स्वसप्तरन्ध्रोद्गतमञ्जुनादसम्पूरिताशेषदिगन्तरालम् ।
वेणु र्वने कृष्णभुजङ्गदष्ट स्सर्वा मुमूर्च्छु र्भवनेषु गोप्यः ॥ ३७ ॥

स्वेति ॥ वेणुः, स्वस्य सप्तभ्यो रन्ध्रेभ्य उद्गतेन उत्पन्नेन मञ्जुनादेन, सम्पूरितं अशेषदिगन्तरालं मध्यं यथा तथा। वने कृष्ण एव भुजङ्गो विटः कृष्णसर्पश्च। 'भुजङ्गो विटसर्पयो' रिति विश्वः, नानार्थरत्नमाला च। तेन दष्टः, अधरे निवेशितः सन्दष्टश्च। सर्वा गोप्यो गोपिकाः। भवनेषु गृहेषु। मुमूर्छु र्मूर्छां प्रापुः। मुर्छाधातोः कर्तरि लिट्। कार्यहेत्वो भिन्नदेशवृत्तित्वा-दसङ्गत्यलङ्कारः। तदुक्तम्—विरुद्धं भिन्नदेशत्वं कार्यहेत्वो रसङ्गति' रिति ॥३७॥

श्रुत्वा ऽबला स्तत् कलगीत माययु र्हरे र्वनं त्यक्तगृहोचितक्रियाः ।
व्यत्यस्तवस्त्राभरणै रलङ्कृताः स्वान्तोल्लसन्मन्मथसंप्रचोदिताः ॥ ३८ ॥

श्रुत्वेति ॥ अबला गोप्यः। हरे स्तत् कलं मधुरं। गीतं गानध्वनिं। श्रुत्वा। त्यक्ताः गृहेषूचिताः क्रिया याभि स्तथोक्ताः। व्यत्यस्तै र्विपर्यस्तैः। वस्त्रै राभरणै श्चालङ्कृताः। स्वान्ते मनसि। उल्लसितेन मन्मथेन। सम्प्रचो-दिताः प्रेरितास्सत्यः। वनं कृष्णाधिष्ठितमुपवनं। आययु राजग्मुः। आङ्-पूर्वकयातेः कर्तरि लिट् ॥ ३८ ॥

अधिश्रितान् स्वादुचणान् सुसौरभान् पयोघटा नप्यनधिश्रितान् जवात् ।
त्यक्त्वा पतिभ्रातृसुतै र्निवारिता अयासिषु स्तं व्रजगोपिका अपि ॥३९॥

अधिश्रितानिति ॥ व्रजगोपिकाः । स्वादुना माधुर्येण ; प्रसिद्धान् स्वादुचणान् । 'तेन वित्त श्चुंचुप् चणपा' विति चणप् प्रत्ययः । रसाधिकानिति यावत् । शोभनं सौरभं गन्धो येषां तान् । अधिश्रिता नग्नावारोपितान् । अनधिश्रितानपि पयोघटान् क्षीरघटान् । 'पयः क्षीरं पयोऽम्बु च' इत्यमरः । त्यक्त्वा । पतयः भ्रातरः सुताश्च तै निवारिता अपि । जवात् तं हरि मयासिषुः । यातेः कर्तरि लुङ् ॥ ३९ ॥

सवेगगत्या प्रचलत्सुकुन्तलाः गलद्रणन्नूपुरपादपङ्कजाः ।
भ्रश्यत्प्रसूना स्स्वकचा न्मनोभुवा क्षिप्ता ययु स्तं वनकेलिलालसाः ॥४०॥

सवेगेति ॥ मनोभुवा मन्मथेन । क्षिप्ताः प्रेरिताः । 'आविद्धक्षिप्तेरिता स्समा' इत्यमरः । गोप्य इति शेषः । सवेगया वेगसहितया । गत्या गमनेन । प्रकर्षेण चलन्तः सुकुन्तलाः अलका यासां ताः । 'अलका श्चूर्णकुन्तला' इत्यमरः । गलन्ति रणन्ति च नूपुराणि येषां तानि पादपङ्कजानि यासां ताः । स्वकचात् भ्रश्यन्ति गलन्ति प्रसूनानि कुसुमानि यासां तथाभूता स्सत्यः । वनकेल्यां लालसा उत्सुकाः । 'लालसौत्सुक्यतृष्णातिरेकयाच्ञासु च द्वयो' रिति विश्वमेदिन्यौ । तं कृष्णं । ययुः प्रापुः । यातेः कर्तरि लिट् ॥ ४० ॥

अथ तासा माशां विविदिषुः श्रीकृष्णः भयं दोषायापादयति चतुर्भिः—

समागता मन्मथकेलिलोलुपाः दृष्ट्वाऽप्यमौ मञ्जुवचां स्यवोचत् ।
नक्तं सुदत्यो वदतागताः कथं करोमि किं भीमवनं प्रतीदृशम् ॥४१॥

समागता इति ॥ असौ श्रीकृष्णः । मन्मथस्य केलौ लोलुपा आसक्ताः अत एव समागताः गोप्य इति शेषः । दृष्ट्वा इति मञ्जु वचांसि अवोचत् हे सुदत्यः ! ईदृशं भीमवनं प्रति नक्तं रात्रौ कथ मागताः । किं कार्यं ; किं करोमि वदत । वद धातोः कर्तरि लोट् ॥ ४१ ॥

भयङ्करत्वमेवोपपादयति —

राकेशसञ्जातकराभिमर्शितं वनं जलौघै स्तरुपल्लवै र्युतम् ।
सुदुश्चरं घोरमृगद्विजावृतं स्त्रीणां नितान्तं भयदं निशीदृशम् ॥ ४२ ॥

राकेशेति ॥ राकेशस्य पूर्णचन्द्रस्य सकाशात् सञ्जातै र्नवैः करैः किरणै-रभिमर्शितं व्याप्तं । जलौघैः, तरुपल्लवैश्च युतं । घोरै र्भयङ्करै मृगै श्शार्दूलादिभिः, द्विजै रुलूकादिभिश्च आवृतं । अत एव सुदुश्चर मीदृशं वनं । निशि रात्रौ । स्त्रीणां नितान्तं भयदं भयप्रदं हि ॥ ४२ ॥

दोषा नापादयति —

अस्वर्ग्य मत्यन्तभयावहं यतो निन्द्यं ततो जारसुखं यशोपहम् ।
किंचित्फलं च प्रमदाः पती न्निजान् संप्राप्य गेहं भजताधुना
सुखम् ॥ ४३ ॥

अस्वर्ग्यमिति ॥ हे प्रमदा गोप्यः । जारसुखं यतः कारणात् निन्द्यं गर्हितं अस्वर्ग्यं च । स्वर्गस्य निमित्तं स्वर्ग्यं न स्वर्ग्यं अस्वर्ग्यं; नरकहेतु-रित्यर्थः । 'तस्य निमित्तं संयोगोत्पाता' वित्यधिकारे 'गोद्व्यचः' इति यत्प्रत्ययः । अत्यन्तं भयावहं भयजनकं । यशोपहं कीर्तिनाशकं । किञ्चित्फलं क्षणिकफलरूपं । ततः अधुना गेहं स्वभवनं । प्राप्य । निजान् स्वीयान् पतीन् । सुखं यथा तथा भजत । भजधातोः कर्तरि विधौ लोट् ॥ ४३ ॥

अथ वाग्बाणताडिता अपि अतिमन्मथावेशेन तमेव प्रार्थयन्ते दशभिः —

वचश्शरै रेव ममुष्य ताडिताः पुन र्मनोभूशरताडिता अपि ।
इत्थं प्रियं वञ्चक मूचु रच्युतं भुवं लिखन्त्यः प्रमदा नखोत्तमैः ॥४४॥

वचश्शरैरिति । प्रमदा गोप्यः । अमुष्य श्रीकृष्णस्य । एवं पूर्वोक्त-प्रकारेण । वचश्शरै र्वाग्बाणैः । ताडिता अपि । विचारेणेति शेषः । पुन र्मनो-

भूशरताडिता स्सत्यः। नखोत्तमै र्नखाग्रैः, भुवं भूमिं लिखन्त्यस्सत्यः। प्रियं वञ्चकं धूर्तं मच्युतं श्रीकृष्णं। इत्थं वक्ष्यमाणप्रकारेण। ऊचुः ययाचिर इत्यर्थः। वचधातोः कर्तरि लिट् ॥ ४४ ॥

स्वाभिप्रायं निवेदयन्त्यो गोप्य आहुः —

रतिप्रसङ्गाय समागमो नो हरे भवन्तं प्रति कामुकीनाम्।
वियोगिनीना मभिवल्लभं हि संप्रापणं केलिसमागमाय ॥ ४५ ॥

रतीति ॥ हे हरे श्रीकृष्ण! रतिप्रसङ्गाय रतिप्राप्तये। भवन्तं प्रति कामुकीनां सुरतेच्छावतीनां। जानपदेत्यादिनाङीप्। 'इच्छावती कामुका स्यात् वृषस्यन्ती तु कामुकी' इत्यमरः। नः अस्माकं। समागमः आगमनम्। तथा हि — केलिसमागमाय सुरतप्राप्तये। अभिवल्लभं वल्लभं प्रति। 'लक्षणेनाभिप्रती आभिमुख्य' इति अव्ययीभावः। 'अभिरभाग' इति कर्मप्रवचनीयत्वे तद्योगाद्-द्वितीया। वियोगिनीनां विरहस्त्रीणां। संप्रापणं समागमः। अत्र गोपीसमा-गमवियोगिवधूसंप्रापणयोः रतिप्रयोजनवत्त्वरूपसामान्यध र्मस्य वाक्यद्वयेऽपि पदान्तरेण पृथङ्निर्दिष्टत्वात प्रतिवस्तूपमालङ्कारः। तदुक्तम् — 'वाक्ययो रेकसामान्ये प्रतिवस्तूपमा मते' ति ॥ ४५ ॥

आत्मदे त्वयि कृताशयः कालविलम्बं न सहत इत्याहुः —

पतित्व मस्मत्सुखदं प्रियोत्तमे त्वय्येव देवास्तु तवोपदेशिता।
आत्माऽऽत्मदोऽसीति वयं भजामहे कार्ये किल स्थैर्यसहे विचारिता
॥ ४६ ॥

पतित्वमिति। हे देव भगवन्! अस्माकं सुखदं पतित्वं तव उपदेशिता उपदेशश्च, प्रियोत्तमे प्रियश्रेष्ठे त्वय्येवास्तु। वयं आत्मा आत्मस्वरूपः आत्मानं स्वरूपं ददातीति तथोक्तः। 'आत्मा कलेबरे यत्ने स्वभावे परमात्मनि। चित्ते धृतौ च बुद्धौ च परव्यावर्तनेऽपि च' इति धरणिः। असि इति हेतोः भजामहे। त्वामिति शेषः। विचारिता विचारः। स्थैर्यसहे विलम्बसहे कार्ये किल। अस्मदीयं कार्यं विलम्बं जातु न सहत इति भावः ॥ ४६ ॥

नास्माक मन्यैः कार्य मित्याहुः —

जनस्य किं सोदरभर्तृसूनुभि स्त्वत्पादसेवारहितस्य मानद ।
मनो मनीषेव सदानुयोगिनां त्वय्यस्तु न स्सर्वफलप्रदातरि ।।४७।।*

जनस्येति ।। हे मानद हे भगवन् ! तव पादसेवया रहितस्य हीनस्य जनस्य सोदरैः भर्तृभिः सूनुभिश्च किं ? न किमपीत्यर्थः । अतो नोऽस्माकं । मनः अनुयोगिनां मनीषा बुद्धि रिव । 'बुद्धि र्मनीषा धिषणा' इत्यमरः । सर्वेषां धर्मादीनां फलानां प्रदातरि त्वयि सदा अस्तु । असधातोः कर्तरि प्रार्थनायां लोट् ।। ४७ ।।

सर्वफलप्रदातरि जाता माशां सफलीकुरुष्वेत्याहुः —

आशां त्वयि त्वं विफलीकुरुष्व मा चिराय जातां मुनिमानसेप्सिते ।
नताः स्म पादावरविन्दलोचन ! प्रसीद नः पीतदुकूलमध्यम ! ।।४८।।

आशामिति ।। अरविन्दे इव लोचने यस्य तस्य संबुद्धिः । पीतं दुकूलं मध्यमे मध्ये यस्य तस्य सम्बुद्धिः । 'मध्यमं चावलग्नं च मध्योऽस्त्री' इत्यमरः । त्वं मुनीनां मानसै रीप्सिते त्वयि, चिराय जातां चिरकालजातां । नः अस्माक माशां मा विफलीकुरुष्व विफलां मा कुरु । पादौ नताः नमस्कृतवत्यः । स्मेत्यव्ययम् । प्रसीद प्रसन्नो भव ।। ४८ ।।

त्वं अनृतवादी मा भूरित्याहुः —

सत्यां श्रुतिं किं प्रजयेति सम्मतां त्वयोदितां योगिजनानुमोदिताम् ।
त्वां लोचनासेचनकं विलोक्य नः कुरुष्व संमुह्यति भो मनो विभो
।। ४९ ।।

सत्यामिति ।। भो विभो हे भगवन् ! त्वया उदितां उक्तां । 'उक्तं भाषित मुदितं जल्पित' मित्यमरः । योगिजनै रनुमोदितां श्लाघितां सर्वसंमतां । किं प्रजयेति 'किं प्रजया करिष्यामो येषां सोऽयमात्माऽयं लोक' इति श्रुतिं । सत्यां तथ्यां 'सत्यं तथ्य मृतं सम्य' गित्यमरः । कुरुष्व पतिपुत्रादिंतेति

---

* (ख) Omits this stanza No. 47 and its commentary.

भावः । लोचनानां नेत्राणां । आसेचनकं अतितृप्तिकरं । 'त दासेचनकं तृप्ते र्नास्त्यन्तो यस्य दर्शनात्' इत्यमरः । आसिच्यते आप्याय्यते अनेनेत्या-सेचनः । करणे ल्युट् । स एवासेचनकः इति स्वार्थे कः । त्वां विलोक्य । नः अस्माकं । मनः संमुह्यति मोहं प्राप्नोति । संपूर्वकमुहधातोः कर्तरि लट् ॥ ४९ ॥

सर्वेन्द्रियहर्तारं त्वां विना अन्यं न जानीम इत्याहुः—

चित्तं त्वयैव हृत मीश करः करोति
पादो न सञ्चलति याम बत क्व कार्यम् ।
त्वत्पादपद्ममकरन्दजुषां विना त्वां
यद्यस्ति नो वद शरण्य शरण्य मन्यत् ॥ ५० ॥

चित्तमिति ॥ हे ईश ! त्वयैव, चित्तं हृतं अपहृतं । करः कार्यं व्यापारं न करोति । पादश्च न सञ्चलति । क्व याम क्व गच्छाम । बत इति खेदे । हे शरण्य । तव पादपद्मयोः मकरन्दं जुषन्ति सेवन्त इति तथोक्तानां नः अस्माकं । त्वां विना । 'पृथग्विने' त्यादिना द्वितीया । अन्यत् शरण्यं रक्षणार्हं । 'शरणं गृह रक्षित्रो' रित्यमरः । अस्ति यदि वद । वद धातोः कर्तरि लोट् ॥ ५० ॥

अधरामृतं विना कामाग्नितापः शान्तिं नोपयातीत्याहुः —

कान्तामृतं त्वधरजं रमयेप्सितं त्वं
अद्यैव नो यदि न यच्छसि पानपात्रम् ।
सप्रेमहासकलवेणुसुगीतजात -
कामाग्निसंज्वर उपैति कथं नु शान्तिम् ॥ ५१ ॥

कान्तेति ॥ हे कान्त हे प्रिय ! त्वं रमया लक्ष्म्या । ईप्सितं अभिलषितं । पानस्य पात्रं योग्यं । 'योग्य भाजनयोः पात्र' मित्यमरः । अधरजं अमृतं नः असाकं । अद्यैव न यच्छसि न ददासि यदि । प्रेम्णा हासः तेन सह वर्तत इति सप्रेमहासं ; कल मव्यक्तमधुरं ; वेणुसुगीतं वेणुनादः । तेन जातस्य

कामाग्नेः संज्वरः सन्तापः । 'सन्तापः संज्वरः समा' वित्यमरः । शान्ति-मुपशमं कथं नु उपैति प्राप्नोति । उपपूर्वक इण् धातोः कर्तरि लट् ॥ ५१ ॥

तमेव संसारतारकत्वात् न तत्याजेत्याहुः —

श्री रम्बुजाक्ष विकसद्वदनारविन्द
यां सिंहसंहनन ते चकमेऽनुसेवाम् ।
संसारवारिधिनिमग्नजनौघमोक्षां
सेवां त्यजेम कथ माशु गताशुभास्तम् ॥ ५२ ॥

श्रीरिति ॥ हे अम्बुजाक्ष! विकसद् वदनारविन्दं यस्य तस्य संबुद्धिः । हे सिंहसंहनन सर्वांगसुन्दर! 'वराङ्गरूपोपेतो यः सिंहसंहननो हि सः' इत्यमरः । श्रीः लक्ष्मी रपि ते तव । यां अनुसेवां परिचर्यां । चकमे कामयते स्म । हे ईश! गत मशुभं याभ्य स्ताः वय मिति शेषः । संसार एव वारिधिः तस्मिन्निमग्नानां जनाना मोघस्य मोक्षो यस्या स्तां सेवां कथं त्यजेम त्यजधातोः कर्तरि लिङ् ॥ ५२ ॥

दासभावं प्राप्ता वयं अमू अवश्य मङ्गीकर्तव्या इत्याहुः —

भावेन न स्तव निरीक्षणतीव्रकामतप्तात्मन श्चरणपङ्कजदास्यभाजः ।
अर्ह स्यमूः परममङ्गल मङ्गलेन संमन्तु मेव मखिलेश गुणेश
भूमन् ॥ ५३ ॥

भावेनेति ॥ अखिलेश सर्वेश्वर! गुणाना मीश हे भूमन् व्यापक! परममङ्गल! तव निरीक्षणेन दर्शनेन, तीव्रो दुस्सहः, यः काम स्तेन तप्ताः आत्मनः देहाः यासां ताः । चरणपङ्कजयोः दास्यं दासभावं भजन्तीति तथोक्ताः । अमूः नः । मङ्गलेन शुभेन । 'कल्याणं मङ्गलं शुभ' मित्यमरः । भावेनाभिप्रायेण । एवं पूर्वोक्तप्रकारेण । संमन्तु मङ्गीकर्तु मर्हसि । अर्हधातोः कर्तरि लट् ॥ ५३ ॥

दासभावप्राप्तौ कारण माहुः—

वीक्ष्यालकावृतमुखं सुकपोलकान्ति
लक्ष्मीप्सिताधररसं सरसावलोकम् ।
दत्ताभयं भुजगभोगसमानबाहुं
वक्षश्श्रिया विलसितं तव दास्य आस्म ॥ ५४ ॥

वीक्ष्येति ॥ अलकैः कुन्तलैः आवृतं मुखं यस्य तम् । शोभना कपोल-कान्ति र्यस्य तम् । लक्ष्म्या ईप्सितोऽभिलषितः अधररसोऽधरामृतं यस्य तम् । सरसः रसेन युक्तोऽवलोको वीक्षणं यस्य तम् । दत्त मभयं येन तम् । भुजगस्य भोगेन देहेन समानौ बाहू यस्य तम् । वक्षश्श्रिया कान्त्या । विलसितं त्वा मिति शेषः । वीक्ष्य दृष्ट्वा । तव दास्यः किङ्कराः । आस्म अभूम । असधातोः कर्तरि लङ् ॥ ५४ ॥

निपीतदवत्वाद्धेतोः दवानलतप्तस्तनेषु पाणिनिक्षेपेण तापं हर्तुं त्वमेव योग्य इत्याहुः —

तुङ्गेषु नः स्तनसुवर्णघटेषु देव! भावेन मन्मथदवानलतापितेषु ।
संक्वाथितेष्वपि सुगन्धविलेपितेषु वृत्ते ष्वमुं कुरु निपीतदव
स्वपाणिम् ॥ ५५ ॥

तुङ्गेष्विति ॥ हे निपीतदव भक्षितवनाग्ने! हे देव! तुङ्गेषु उन्नतेषु । त्वयीति शेषः । भावेन आशयेन । मन्मथ एव दवानलो वनाग्नि स्तेन तापितेषु । अति अत्यन्तं । सुगन्धेन विलेपितेषु रूषितेषु । संक्वाथितेषु सम्यक् पक्वेषु । वृत्तेषु वर्तुलेषु । नः अस्माकं । स्तना एव सुवर्णघटाः तेषु । अमुं स्वपाणिं । कुरु निधेहि । दुस्सहं स्तनतापं हरेति भावः । कृधातोः कर्तरि संप्रार्थनायां लोट् । अत्र कामाग्नितप्तस्तनेषु कर्तव्यस्य समर्थनीयस्य स्वहस्त-निक्षेपस्य निपीतदवेति समर्थनात वाक्यार्थहेतुकं काव्यलिङ्ग मलङ्कारः ॥ ५५ ॥

निपीय तासां मुखपङ्कजच्युतं मधुप्रियं कर्णपुटेन भाषितम् ।
अशीरम ताभि रसौ रमापति स्ताराभि रेणाङ्क इव प्रियङ्करः ॥ ५६ ॥

निपीयेति ॥ प्रियं करोतीति प्रियङ्करः । 'क्षेम प्रिय मद्रेऽण् चे' ति खच् । 'अरु र्द्विषदि' त्यादिना मुमागमः । असौ रमापतिः श्रीकृष्णः । तासां गोपीनां मुखं पङ्कज मिव तस्मात् च्युतं गलितं । मधु मकरन्दं । 'मधु मद्ये पुष्परसे क्षौद्रेऽपी' त्यमरः । तद्वत् प्रियं भाषितं वचनं । कर्णपुटेन निपीय श्रुत्वेत्यर्थः । ताराभि र्नक्षत्रै रश्विन्यादिभिः । एणाङ्क श्चन्द्र इव । ताभि र्गोपीभि ररीरमत् रेमे ॥ रमुधातोः कर्तरि लुङ् । पूर्णोपमालङ्कारः ॥ ५६ ॥

क्रीडाप्रकारमेवाह द्वाभ्याम् —

उदारहासाधरपूतचुम्बनैः संभावयं स्ता मदनप्रकेलिषु ।
विमत्तगोपीसुकरेणुयूथपो जले वनान्ते रमयाञ्चकार ॥ ५७ ॥

उदारेति ॥ विमत्ता गोप्य एव सुकरेणव स्तासां यूथपः स श्रीकृष्णः । ता गोपीः । मदनप्रकेलिषु मन्मथक्रीडासु । उदारः श्रेष्ठो हासः येषां तेषामधराणां । संपूतचुम्बनैः पवित्रीभूतपानैः । सम्भावयन् बहुमानयन् । जले वनान्ते च रमयाञ्चकार क्रीडयामास । रमुधातोर्णिचि आमि अनुप्रयोगः कर्तरि लिट् । अधरपूतेत्यत्र 'रतिकाले मुखं स्त्रीणां शुद्धं ………………… इति वचनात् अधरस्य पवित्रता ॥ ५७ ॥

सप्रेमहासपरिरम्भकरावमर्शै र्नीवीविमोचननखाग्ररदक्षतैश्च ।
वक्रावलोकपरिहासमनोज्ञवाक्यै स्ता स्वच्युतो रतिपतिं कलयाञ्चकार ॥ ५८ ॥

सप्रेमेति ॥ अच्युतः श्रीकृष्णः । सप्रेम्णा प्रीतियुक्तेन हासेन । परिरम्भणेन आलिङ्गनेन । करावमर्शैः । नीवीनां वस्त्रबन्धानां विमोचनेन । नखाग्राणां रदानां दन्तानां क्षतै र्व्रणैः 'रदना दशना दन्ता रदा' इत्यमरः । वक्रैः कुटिलैरवलोकै र्दर्शनैः कटाक्षै रिति यावत् । परिहासै र्नर्मवचनैः, मनोज्ञवाक्यै र्मृदुभाषणैश्च । तासु गोपीषु । रतिपतिं मन्मथं कलयाञ्चकार वर्धयामास । कलधातो र्णिचि आमि अनुप्रयोगः कर्तरि लिट् ॥ ५८ ॥

आसां मनोभाव मवेक्षितुं मुदा वनान्तरे तत्र स पश्यतोहरः ।
उन्मत्तगोपीजनचेतसां प्रिय स्तदैव देवोऽन्तरधत्त माधवः ॥ ५९ ॥

आसामिति ॥ उन्मत्तानां विवशानां गोपीजनानां चेतसां पश्यतो हर श्चोरः । पश्यन्तमनादृत्य हरतीति पश्यतोहरः । अनादरे षष्ठी । 'वाग्दिक् पश्यद्भ्यो युक्तिदण्डहरेषु' इत्यलुक् । प्रियो देवः प्रभुः । स माधवः श्रीकृष्णः । आसां गोपिकानां; मनोभाव मभिप्रायं अवेक्षितुं ज्ञातुं । तत्र वनान्तरे वनमध्ये । मुदा तदैव तस्मिन्नेव काले । अन्तरधत्त अन्तर्दधे । धा धातोः कर्तरि लङ् ॥ ५९ ॥

अथाष्टभिः कृष्णसंदर्शनाभावेन उन्मत्तानां गोपीनां चरित माह —

तिरोहितं तं त्वनवेक्ष्य माधवं वना द्वनं संप्रविशन्त्य आशु ताः ।
रसाल हे चम्पक मल्लिके विभुं जानासि वेत्यस्य गवेषणं व्यधुः ॥६०॥

तिरोहितमिति ॥ ता गोप्यः । तिरोहित मन्तर्हितं । तं माधवं श्रीकृष्णं । अनवेक्ष्य । वना द्वन माशु संप्रविशन्त्यः । हे रसाल चूत! चम्पक! हे मल्लिके! माधवीलते! विभुं श्रीकृष्णं । जानासि वा इति, अस्य श्रीकृष्णस्य । गवेषणमन्वेषणं । व्यधु श्चक्रुः । विपूर्वकधाधातोः कर्तरि लुङ् ॥ ६० ॥

पुन्नाग हे बिल्व कदम्ब निम्ब हे चोरस्य कृष्णस्य शठस्य दुर्नयम् ।
पश्याद्य मार्गं वद वेत्सि चे द्रहः कथं सहामास्य वियोगजां रुजम्
॥ ६१ ॥

पुन्नागेति ॥ हे पुन्नाग! बिल्व! कदम्ब! हे निम्ब! चोरस्य शठस्य गूढविप्रियकृतः, कृष्णस्य दुर्नयं दौष्ट्यं । पश्य । अद्य । अस्य कृष्णस्य मार्गं वेत्सि चेत् जानासि चेत् । रहो रहसि । वद भण । अस्य कृष्णस्य वियोगात् जायत इति तथाभूतां रुजं उपतापं । 'स्त्री रु ग्रुजा चोपताप' इत्यमरः । कथं सहाम! सोढुं न शक्नुम इत्यर्थः । सहधातोः कर्तरि लोट् । चुरादिपाठात परस्मैपदम् ॥ ६१ ॥

बभूव याऽन्या किल पूतनायिता
कृष्णायिताऽन्या स्तन मञ्जसाऽधयत ।

अवातवर्षाय वहामि पर्वतं
तदेति चाभ्रेऽम्बर मादधेऽपरा ॥ ६२ ॥

बभूवेति ॥ तदा या गोपिका पूतनायिता पूतनावदाचरन्ती बभूव किल । आचारार्थे क्यप् । कृष्णायिता कृष्णवदाचरन्ती अन्या गोपिका स्तन मञ्जसा अधयत् पपौ । धयतेः कर्तरि लङ् । अपरा च गोपिका; **अवात-वर्षाय** वातवर्षाभावाय; अर्थाभावे नञ्समासः । **पर्वतं** गोवर्धनं । **वहामीति** **अभ्रे** । आकाशे **अम्बरं** उत्तरीयं । **आदधे** दधार । धा धातोः कर्तरि लिट् ॥ ६२ ॥

कृष्णपदानि मृगयन्त्यो गोप्यः अङ्गनापदैः सह तस्य पदानि दृष्ट्वा सस्त्रीकस्सन् तिरोहित इति चुकुपु रित्याह---

सरोजवज्राङ्कुशभाञ्जि सैकते कृष्णस्य मञ्जूनि पदानि तत्र च ।
दृष्ट्वाऽङ्गनायाः पद मात्तहृद्रुजः कुप्यन्ति ताः साप्रियकारिणे मुहुः ॥ ६३ ॥

सरोजेति ॥ **ता** गोप्य **स्तत्र** वने । **सैकते** सिकतामयप्रदेशे । **सरोज-वज्राङ्कुशादीनि** चिह्नानि भजन्तीति तथोक्तानि । **मञ्जूनि** मनोज्ञानि । **कृष्णस्य** **पदानि** । **अङ्गनायाः पदं च दृष्ट्वा** । **आत्ता हृद्रुक्** मनोरोगो याभि स्ता स्तथा-विधा स्सत्यः । **अप्रियकारिणे** **कृष्णाय**; 'क्रुधद्रुहे' त्यादिना चतुर्थी । **मुहुः** **कुप्यन्ति स्म** चुकुपुः । कुपधातोः **कर्तरि लट्** । स्मयोगाद् भूतार्थ-कत्वम् ॥ ६३ ॥

क्वचित् स्थले अङ्गनापदरहितं कुचभारेण सैकतेऽत्यन्तं निमग्नं कृष्णपदं दृष्ट्वा ता मुवाहेति निश्चितधिय श्चुक्रुशु रित्याह—

क्वचिच्च तत्रैव विनापि तत्पदं कृष्णस्य वज्राङ्कुशचिह्नितं पदम् ।
दृष्ट्वास्य गोपीकुचभारसन्नतं सोवाह ता मित्यखिला विचुक्रुशुः ॥ ६४ ॥

क्वचिदिति ॥ अखिला गोप्यः, तत्रैव प्रदेशे । क्वचिच्च कस्मिंश्चित् स्थले । तस्याः पदं पादविन्यासं विनापि, कस्याश्चित् गोप्याः राधिकायाः कुचभारेण सन्नतं मग्नं । अस्य श्रीकृष्णस्य । वज्राङ्कुशैः रेखाकारैः । चिह्नितं पदं दृष्ट्वा ; स कृष्णः ; 'सोऽचि लोपे चे' दिति सोर्लोपः । तां राधां ; उवाह अवहदिति विचुकुशु आक्रोशितवत्यः । विपूर्वक्रुशधातोः कर्तरि लिट् ॥ ६४ ॥

मेने तदात्मान मसौ मृगीदृशां गरीयसीं कृष्णपरिग्रहा द्यदा ।
त्यक्त्वाऽपि ता मन्तरधत्त माधवः ध्यानेन चित्तप्रशमाय योषितम्
॥ ६५ ॥

मेन इति ॥ असौ राधिका । कृष्णस्य परिग्रहात् वहनात् । यदा आत्मानं मृगीदृशां योषितां मध्ये ; गरीयसीं अतिशयेन श्रेष्ठां । मेने अमन्यत । मनधातोः कर्तरि लिट् । तदा माधवः श्रीकृष्णः । ध्यानेन चित्तप्रशमाय उपशान्तये । तां योषित मपि त्यक्त्वा । अन्तरधत्त अन्तर्दधे । धाधातोः कर्तरि लङ् ॥ ६५ ॥

तया समेत्य प्रियदर्शनातुराः निकुञ्जपुञ्जान्तरसैकतेऽमले ।
निरन्तरध्यानवशेन मोहिताः गोप्यो बभूवुः परितापसंयुताः ॥ ६६ ॥

तयेति ॥ प्रियस्य कृष्णस्य । दर्शनेन आतुरा व्यग्राः । अत एव परितापेन संयुताः गोप्यः । तया राधया समेत्य । अमले निर्मले । निकुञ्जानां लतागृहाणां । पुञ्जस्य समूहस्य । अन्तरे मध्ये । सैकते सिकतामयप्रदेशे । निरन्तरस्याविच्छिन्नस्य । ध्यानस्य वशेन मोहिता मूर्छिता बभूवुः । भूधातोः कर्तरि लिट् ॥ ६६ ॥

एवं प्रचिन्ताकुलचित्तसंयुताः तं दर्शनीयं च मृगीदृशां दृशाम् ।
रूपं दधानं नवमन्मथोपमं बहिश्चरं प्राण मिव व्यलोकयन् ॥ ६७ ॥

एवमिति ॥ एवं पूर्वोक्तप्रकारेण। प्रकृष्टचिन्तया आकुलेन व्याकुलेन। चित्तेन संयुता गोप्यः। नवमन्मथस्य उपमा सादृश्यं यस्य तत्। रूपं स्वरूपं। दधानं अत एव मृगीदृशां स्त्रीणां। दृशां नेत्राणां। दर्शनीयं दर्शनयोऽग्यं। तं बहिश्चरं प्राण मिव व्यलोकयन् ददृशुः। विपूर्वकलोकृधातोः कर्तरि लङ्। उक्तवस्तूत्प्रेक्षालङ्कारः ॥ ६७ ॥

दर्शनमात्रेणातितृप्तानां मुग्धानां चरितमाह त्रिभिः —

निपीय कृष्णस्य मुखाम्बुजं दृशा काप्यत्र नाविन्दत तृप्तिमात्मनि।
आकृष्य हस्तद्वय मस्य भामिनी स्तनद्वये मन्मथतापिते न्यधात् ॥६८॥

निपीयेति ॥ कृष्णस्य मुखाम्बुजं, दृशा निपीय पीत्वा। आदरेण दृष्ट्वा। कापि काचित् गोपिका। आत्मनि चित्ते। तृप्तिं नाविन्दत नैव प्राप। तत्र भामिनी काचित् गोपिका। अस्य श्रीकृष्णस्य; हस्तद्वयं पाणिद्वयं; आकृष्य मन्मथेन तापिते संतप्ते, स्तनद्वये न्यधात् निदधौ। निपूर्वकधाधातोः कर्तरि लुङ्। 'गातिस्थे' ति सिचो लुक् ॥ ६८ ॥

तच्चर्वितं गन्धचणं मुखे ऽवह त्ताम्बूल मेलाकुसुमान्वितं परा।
काचित् पदे तस्य तथाद्युरोजयोः व्यजिघ्र दन्याऽगरुरूषितौ करौ
॥ ६९ ॥

तच्चर्वितमिति ॥ परा अन्या गोपिका; एलाभिः, कुसुमै र्लवङ्गकुसुमैः अन्वितं। गन्धेन प्रसिद्धं गन्धचणं। 'तेन वित्त श्चुञ्चुप्चणपा' विति चणप् प्रत्ययः। तेन कृष्णेन चर्वितं ताम्बूलं मुखे अवहत् वहति स्म। वहतेः कर्तरि लङ्। काचि देका गोपिका; कृष्णस्य पदे पादौ। उरोजयोः स्तनयोः। दधौ दधार। अन्या परा गोपिका। तस्य कृष्णस्य। अगरुरूषितौ अगरुगन्धविलेपितौ करौ व्यजिघ्रत् जिघ्रौ। घ्राधातोः कर्तरि लङ्। पाघ्रेत्यादिना जिघ्रादेशः ॥ ६९ ॥

अन्या त मन्त हृदि नेत्ररन्ध्रतः कृत्वा मनोव्याधि मिमं जहौ मुदा।
तदेतरा तस्य पदाम्बुजद्वयं निपीड्य वस्त्रेण मुहु र्न्यवीविजत् ॥७०॥

अन्येति ॥ अन्या गोपिका; त मिमं कृष्णं; नेत्ररन्ध्रतः नेत्रगोलकद्वारा; हृदि अन्तः कृत्वा; मुदा मनोव्याधिं मनोव्यथां जहौ तत्याज। जहातेः कर्तरि लिट्। तथा तेनैव प्रकारेण; इतरा; अस्य श्रीकृष्णस्य पदाम्बुजद्वयं निपीड्य संवाह्य; वस्त्रेण मुहुः; न्यवीविजत् वीजयामास। निपूर्वकवीजधातोः णिचि कर्तरि लुङ् ॥ ७० ॥

अथ पञ्चविंशतिश्लोकै रतिचतुराः प्रौढाः गोपिकाः दुस्सह मपि मनोजतापं सोढ्वा चाटूक्तिभि स्तं श्रीकृष्णं वशीकुर्वन्तीत्याह—

विलासभाजां विपिने मनोभूमदेभसंक्षोभितमानसानाम् ।
बभु र्लताना मिव पुष्पशोभा श्चटूक्तय स्तं प्रति कामिनीनाम् ॥७१॥

विलासेति ॥ विपिने वने; विलासान् भजन्तीति तथोक्तानां; मनोभूः मन्मथ एव मदेभः मत्तगजः तेन संक्षोभितं आकुलीकृतं मानसं मनः यासां तासां कामिनीनां; तं श्रीकृष्ण मुद्दिश्य चटूक्तयः सरसालापाः; लतानां पुष्पशोभाः पुष्पश्रिय इव बभुः। भाधातोः कर्तरि लिट्। धर्मलुप्तोपमालङ्कारः ॥ ७१ ॥

स्वस्मि न्ननुरक्तजन मनादृत्य तिरोहितं कृष्णं अतिकठोरमानसं मन्यमानाः गोपिका अन्यापदेशप्रश्नव्याजेन तं कृष्णं पृच्छन्ति स्मे त्याह—

त्वं कृष्ण न स्संशय मत्र सर्ववित् संछेत्तु मर्ह स्यचिरा त्परस्परम् ।
भजन्ति केचित् भजनानपेक्षका नैवोभया मित्यवदन् प्रियं स्त्रियः ॥७२॥

त्वमिति ॥ हे कृष्ण! केचित् परस्पर मन्योन्यं भजन्ति। केचित् भजनानपेक्षकाः प्रत्युपकारानपेक्षिणः सन्तः भजन्ति। केचित् उभयां भजमाना मभजमानां च नैव भजन्ति। सर्ववित् त्वं अत्रास्मिन्नर्थे नः अस्माकं अचिरात्

शीघ्रं संशयं संछेत्तुं निराकर्तुं मर्हसि। इति स्त्रियो गोपिकाः; प्रियं कृष्ण मवदन् अवोचन्। वद्धातोः कर्तरि लङ्॥ ७२॥

अथ कृष्णः प्रत्युत्तर माह द्वाभ्याम्—

जानीत ये तत्र जनान् परस्परं भजन्ति तान् स्वार्थपरान् व्रजाङ्गनाः।
कुटुम्बिनो घासजलादिभि र्गवां क्षीरार्थिनः पोषणतत्परा निव॥७३॥

जानीतेति॥ हे व्रजाङ्गना गोप्यः; तत्र केषुचिन्मध्ये; ये जनाः परस्परं अन्योन्यं भजन्ति, तान् क्षीरार्थिनः घासजलादिभिः गवां पोषणे तत्परा नासक्तान्। 'तत्परे प्रसितासक्ता' वित्यमरः। कुटुम्बिनः संसारिण इव स्वार्थपरान् स्वार्थैकपरान्। जानीत अवगच्छथ। ज्ञाधातोः कर्तरि विधौ लोट्। पूर्णोपमालङ्कारः॥ ७३॥

भजन्ति पुत्रान् पितरो यथाङ्गनाः धर्मेण रक्त्या भजतश्च नोभयान्।
भजन्ति ये तानपि वित्त योगिनः मूर्खान् विकामांश्च कठोरमानसान्
॥ ७४॥

भजन्तीति॥ हे अङ्गना गोपिकाः; ये अभजन्तः भजन्ति ते पुत्रान् शिशून्, पितरो यथा पितर इव। धर्मेण 'वृद्धौ च मातापितरौ साध्वी भार्या सुतः शिशुः। अप्यकार्यशतं कृत्वा भर्तव्या मनु रब्रवीत्।' इति शास्त्रोक्तधर्मेण; रक्त्या प्रीत्या च भजन्ति। ये च उभयान् भजमानान् अभजमानानपि न भजन्ति तान् योगिनः। मूर्खान् मूढान्; विकामान् विरक्तान्। कठोरमानसान् कठिनचित्तांश्च वित्त जानीत। विद्धातोः कर्तरि विधौ लोट्॥ ७४॥

दत्तोत्तरं कृष्ण मवेक्ष्य योषितः तत्रैन मत्यन्त कठोरमानसम्।
मत्वा तदाऽक्षिभ्रुवभङ्गसूचनां परस्परां चक्रु रतीव विस्मिताः॥७५॥

दत्तोत्तरमिति॥ योषितो गोप्यः। एवं पूर्वोक्तप्रकारेण दत्तमुत्तरं येन तं कृष्ण मवेक्ष्य। तत्र तेषु योगिप्रभृतिषु मध्ये। एनं कृष्णं। अतिकठोर-

मानसं मत्वा । तदा अतीव विस्मिताः सत्यः । परस्परा मन्योन्यं *। अक्षी च भ्रुवौ चाक्षिभ्रुवं। 'अचतुरे' त्यादिना निपातनात्साधुः। तस्य भङ्गेन चलनेन सूचनां अथ मतिकठोरमानस इति ज्ञापनां चक्रु रकुर्वन् । कृधातोः कर्तरि लिट् ॥ ७५ ॥

आसां मनोभाववि दब्रवी द्धसन् मय्येव भावाय दुरन्तचिन्तया ।
तिरोहितोऽस्मिन् प्रणयप्रणापनव्याजेन मानं त्यजतेति गोपिकाः ॥७६॥

आसामिति ॥ आसां गोपिकानां। मनोभाव माशयं वेत्तीति तथा। अत एव हसन् श्रीकृष्ण इति शेषः । दुरन्तया अनन्तया चिन्तया । हेतु-तृतीया। मय्येव भावाय प्रणयप्रणापनव्याजेन रतिकलहव्याजेन। तिरो-हितोऽन्तर्हितः. अस्मिन् हे गोपिकाः! मानं ईर्ष्याकोपं। त्यजत; इत्यब्रवीत् अवोचत्। ब्रूञ्धातोः कर्तरि लङ्। कैतवापह्नुत्यलङ्कारः। तदुक्तम् — 'कैतवापह्नुति र्व्यक्तौ व्याजाद्यै र्निह्नुतेः पदै' रिति ॥ ७६ ॥

त्वयि काठिन्यमात्र (न?) चातुर्य मपि तथैवेत्याह—

हे कृष्ण काठिन्य मिव प्रभूत्तमे चातुर्य मस्म द्विषये प्रपूरितम् ।
हे कान्त चातुर्य मिव त्वयीश्वरे काठिन्य मस्तीति जगाद काप्यमुम्
॥ ७७ ॥

हे कृष्णेति ॥ हे कृष्ण! प्रभूतमे प्रभुश्रेष्ठे त्वयि। अस्मद्विषये। काठिन्य मिव चातुर्य मपि प्रपूरितं। हे कान्त! ईश्वरे त्वयि। चातुर्यं वैदग्ध्य-मिव काठिन्य मस्तीति; काऽपि चतुरा गोपिका; अमुं श्रीकृष्णं जगाद उवाच। गदधातोः कर्तरि लिट्। अत्र उपमेयोपमालङ्कारः। तदुक्तम्--- 'पर्यायेण द्वयो स्तच्चे दुपमेयोपमा मता' ॥ ७७ ॥

---

* अत्र प्रक्रिया प्रथमसर्गे व्याख्याता ।

अन्या कृष्णं सत्यं वदसीत्याह—-

अद्यैव हे कृष्ण! खलोक्तिखेलनै र्विना विभान्ति प्रियसूक्तय स्तव ।
मुहु र्मुहु र्म य्यनुरक्तचेतसी त्युवाच गोपी वरवर्णिनी परा ॥७८॥

अद्यैवेति ॥ मुहु र्मुहु रत्यन्त मनुरक्तं चेतो मनो यस्याः तस्यां मयि विषये। तव प्रियसूक्तयः [खलोक्तिखेलनै र्विना अद्यैव विभान्ति इति परा वरवर्णिनी गोपी उवाच ।] वचधातोः कर्तरि लिट् । खलोक्ती र्विना सूक्तयो भान्तीति वर्णनात् विनोक्ति रलङ्कारः । तदुक्तम्—'तच्चेत् किञ्चिद् विना रम्यं विनोक्ति स्साऽपि कथ्यत' इति ॥ ७८ ॥

निस्त्रपोऽसीत्याह—-

चतुर्भुजोऽर्थांश्चतुरो नृणां भवान् ददाति कृष्णेति निशम्य संश्रिता ।
कुतो वदान्येदृशबद्धमुष्टिता दधीचिकर्णात्मदत स्त्रपा न किम् ॥७९॥

चतुर्भुजेति ॥ हे कृष्ण! चत्वारो भुजा यस्य सः भवान् नृणां पुरुषाणां। चतुरः अर्थान् धर्मार्थकाममोक्षान्; ददातीति निशम्य; संश्रिता आश्रिताऽस्मि । हे वदान्य! दानशौण्ड! 'स्यु र्वदान्यस्थूललक्ष्यदानशौण्डा बहुप्रद' इत्यमरः । ईदृशबद्धमुष्टिता दृढमुष्टिबन्धः कुतः कस्माद्धेतोः समागता? दधीचिः अस्थिदः महर्षिः; कर्णः सहजकर्णकुण्डलदः राधेयः; आत्मानं जीवं ददातीति तथोक्तः, जीमूतवाहन इति गन्धर्वराजः; 'कर्ण स्त्वचं शिबि र्मांसं जीवं जीमूतवाहनः । ददौ दधीचि रस्थीनि कि मदेयं महात्मनाम्' इति वचनात् । सार्वविभक्तिक स्तसिः । तेभ्यः त्रपा लज्जा न किं न विद्यते किं? इत्युवाचेति पूर्वेणान्वयः । परिकराङ्कुरालङ्कारः । तदुक्तम्—'साभिप्राये विशेष्ये तु भवेत्परिकराङ्कुरः' इति ॥ ७९ ॥

अवयवसौन्दर्यं दृष्ट्वा संमोहितास्मीत्याह—-

तवेश नेत्रे श्रवणान्तविस्तृते कर्णौ च मुग्धौ भुजमध्यगामिनौ ।
दृष्ट्वा भुजौ जानुविलम्बिनौ च विमोहितासीति जगाद मेनका ॥८०॥

तवेति ॥ हे ईश हरे! तव श्रवणान्तविस्तृते कर्णान्तव्याप्ते नेत्रे। मुग्धौ सुन्दरौ भुजमध्यं गच्छत इति तथोक्तौ कर्णौ च। जान्वोः विलम्बिनौ विलम्बमानौ भुजौ च दृष्ट्वा विमोहिता मोहं प्राप्ता अस्मि इति मेनका नाम गोपिका जगाद उवाच। गदधातोः कर्तरि लिट्। एकावल्यलङ्कारः। तदुक्तम्—'गृहीत मुक्तरीत्यार्थश्रेणि रेकावलि र्मते' ति ॥ ८० ॥

अत्यन्तं वञ्चक इति स्वदृष्टान्त माह—

वनान्तरे वेणुनिनादजाल मेकं हि मुक्त्वा मृगयु र्मृगीव।
जहर्थ नो मानद चित्तवृत्तिः त्व मित्युवाच प्रमदा तदा परा ॥८१॥

वनान्तर इति ॥ हे मानद! त्वं वनान्तरे वनमध्ये; एकं वेणुनादः वेणुध्वनि रेव जालं 'आनायः पुंसि जालं स्या' दित्यमरः। मुक्त्वा प्रसार्य; मृगान् यातीति मृगयुः व्याधः; 'मृगय्वादयश्चे' ति औणादिकः कुप्रत्ययान्तो निपातः; 'व्याधो मृगवधाजीवो मृगयु र्लुब्धकोऽपि स' इत्यमरः। मृगीव हरिणीव; नः अस्माकं चित्तवृत्तीः जहर्थ अपहृतवा नसि किल इति तदा तस्मिन् समये; अपरा प्रमदा गोपिका; उवाच। वचधातोः कर्तरि लिट्। परिवृत्त्यलङ्कारः। तदुक्तम् – 'परिवृत्ति र्विनिमयो न्यूनाभ्यधिकयो र्मिथ' इति ॥ ८१ ॥

वञ्चके त्वयि स्मरहेतुना परिमिताशयं कृतवत्यस्मीत्याह—

अतनुना मम चञ्चलमानसे गिरिमहत्तर वार्धिगरीयसि।
भुवनसुन्दर तेन मनोहरे त्वयि कृता स्थितिरित्यपराऽ वदत् ॥८२॥

अतनुनेति ॥ हे भुवनसुन्दर! अतनुना मन्मथेन गिरेः पर्वतादपि; अतिशयेन महतो महत्तरात् वार्धेः समुद्रादपि, अतिशयेन गुरुणि गरीयसि; मम चञ्चलमानसे; स्थितिः कृता; तेन मानसेन; मनोहरे त्वयि स्थितिः कृता इति अपरा गोपिका अवदत् अवोचत्। वदधातोः कर्तरि लङ्। अत्र स्थिति-रिति पद मेकं .... गृहीतमुक्तरीति

सद्भावा देकावली चेति दीपकैकावलीयोगः । अतो मालादीपकालङ्कारः । तदुक्तम्—'दीपकैकावलीयोगा न्मालादीपक मुच्यत' इति ॥ ८२ ॥

स्वाज्ञाना मतिमार्दवं ज्ञापयन्ती संकल्पलतानाम गोपी तत्प्राप्त्यभावे मरिष्यामीत्याह—

कान्ताद्य मे त्वं शरणं प्रियाथवा कृतान्त एवोन्मथिताङ्गचेतसः ।
स्मरस्य मध्वक्तसुमेषुभिः परं जगाद संकल्पलतेति तं परा ॥८३॥

कान्तेति ॥ हे कान्त! स्मरस्य मन्मथस्य; मधुना मकरन्देन 'मधु मद्ये पुष्परसे क्षौद्रेऽपी' त्यमरः । अक्तानि सिक्तानि; सुमानि पुष्पाणि; 'पुष्पं प्रसूनं कुसुम' मित्यमरः । तान्येव इषवो बाणाः तैः परं मत्यन्तं उन्मथितानि विदीर्णानि अङ्गानि चेतश्च यस्या स्तस्याः मे मम; अद्य त्वमेव शरणं रक्षिता । 'शरणं गृहरक्षित्रो' रित्यमरः । हे प्रिय कृष्ण! अथवा कृतान्तो यम एव शरण मिति परा अपरा संकल्पलताख्या गोपी तं भगवन्तं जगाद उवाच । गद धातोः कर्तरि लिट् । विकल्पालङ्कारः । तदुक्तम्— 'विरोधे तुल्यबलयो र्विकल्पालंकृति र्मता' ॥ ८३ ॥

झडिति रन्तु मिच्छावती मल्लिकाख्या गोपी स्वरिपुमन्मथजयव्याजेन कृष्णं प्रार्थयते—

त्वयाऽधुनाहं बहुमानिता यदि क्रीडासु हे मानद निर्दयो रिपुः ।
पुष्पेषु रुद्गच्छति नश्यति क्षणा त्पलायते चेति जगाद मल्लिका ॥८४॥

त्वयेति ॥ हे मानद कृष्ण! त्वया अधुना; क्रीडासु सुरतक्रीडासु; अहं बहुमानिता यदि संमानिता; निर्दयो दयारहितः; रिपु श्शत्रुः; पुष्पेषु मन्मथः । क्षणा दुद्गच्छति उड्डीयान्यत्र गच्छति, नश्यति पलायते च । इति मल्लिकाख्या गोपी जगाद । अत्र भिन्नकालीनाना मपि उद्गमनादीनां संमानातिशयद्योतनाय विवक्षितयौगपद्यानां गुम्भनवर्णनात् समुच्चयालङ्कारः । तदुक्तम्— 'बहूनां युगपद्भावभाजां गुम्फ स्समुच्चय' इति ॥ ८४ ॥

द्रष्टु मुत्कण्ठिताया मम प्रतिगमनाय चन्द्रदर्शनं वेणुनादश्रवणं च झडि त्यभू दहो मे भाग्य मिति मालत्याख्या गोपिका आह—

उत्कण्ठिता ऽहं तव सुन्दराननं द्रष्टुं यदा चन्द्रमसं व्यलोकयम् ।
वेणुस्वनः श्रोत्रगत स्तदैव मे समागताऽस्मीति जगाद मालती ॥ ८५ ॥

उत्कण्ठितेति ॥ हे सुन्दर ! यदाऽहं तवाननं मुखं; द्रष्टु मुत्कण्ठिता उत्सुकाऽस्मि । तदैव चन्द्रमसं व्यलोकयं विलोकितवत्यस्मि । वेणुस्वनः वेणुनादः ; श्रोत्रगतः श्रुतिलग्नः ; अतः समागताऽस्मि ; शीघ्र मिति शेषः । इति मालतीनाम गोपिका जगाद । अत्र मुखदर्शनरूपकार्यस्य पुष्कलकारणं उत्कण्ठादिरेव । दैवादुत्पन्नचन्द्रदर्शनवेणुनादश्रवणाभ्यां कार्यस्य सौकर्यमात्रं कृतमिति समाध्यलङ्कारः तदुक्तम्—'समाधिः कार्यसौकर्यं कारणान्तरसन्निधे" रिति ॥ ८५ ॥

परा नेत्राञ्चलेन सूचितं भगवदाशयं ज्ञात्वा पुष्पाहरणव्याजेन कानने सूचितं रहस्यस्थानं गतेत्याह—

विलोक्य साकूतविलोकनं परा चकोरनेत्री करलोलकन्दुकम् ।
सरोरुहाक्षं कुसुमानि सादरं विचिन्वतीव प्रविवेश काननम् ॥८६॥

विलोक्येति ॥ परा अन्या चकोरनेत्री ; साकूतं साभिप्रायं विलोकनं वीक्षणं यस्य तं ; करे लोलः कन्दुकः यस्य तम् ; सरोरुहाक्षं पुण्डरीकाक्षं ; विलोक्य ; कुसुमानि पुष्पाणि ; सादरं विचिन्वतीव मार्गमाणेव ; काननं प्रविवेश अविशत् । विशधातोः कर्तरि लिट । सूक्ष्मालङ्कारः । तदुक्तम्— 'सूक्ष्मं पराशयाभिज्ञेतरसाकूतचेष्टित' मिति ॥ ८६ ॥

वनादागतं कृष्णं तत्क्षणमेव रतिकेलिश्रान्तिगतं ज्ञात्वा रोषेणाद्य मया इदमेव कार्यमिति वस्त्रव्यजनेन तं वीजयन्ती अस्मीत्याह—

कृशोदरी काचन काननान्तरा दुपागतं रोषकषायितेक्षणा ।
झणंझणत्कङ्कणभूषणं चलद्वक्षोजवस्त्रेण मुहु र्न्यवीजयत् ॥८७॥

कृशोदरीति ॥ काचन कृशोदरी गोपिका; काननान्तरात् वनमध्यात्। उपागतं; हरि मिति शेषः। रोषेण कोपेन कषायिते रक्ते ईक्षणे नेत्रे यस्याः तथोक्ता सती; झणंझणत्शब्दं कुर्वन्ति कङ्कणभूषणानि यस्मिन् कर्मणि तद्यथा भवति तथा; चलद्वक्षोजयोः वस्त्रेण मुहुः न्यवीजयत् वीजयामास। वीजधातोः कर्तरि लुङ्। पिहितालङ्कारः। तदुक्तम् — 'पिहितं परवृत्तान्तज्ञातुः साकूतचेष्टितम्' इति ॥ ८७ ॥

विरह मसहमाना काचित् गोपिका मन्मथं निन्दति—

जगत्त्रयं हंस्यबलाकटाक्षबाणै रनङ्ग त्व मिमं न शेकिथ ।
शक्या महान्तो न हि धर्षितुं का शैला इवेति प्रमदाऽप्यवीवदत् ॥८८॥

जगत्त्रयमिति ॥ हे अनङ्ग मन्मथ! त्वं अबलानां स्त्रीणां कटाक्षा एव बाणा स्तैः; जगत्त्रयं लोकत्रयं हंसि संहरसि। इमं कृष्णं धर्षितुं न शेकिथ। शक्लृधातोः कर्तरि लिट्। तथा हि महान्तः शैलाः पर्वता इव धर्षितुं चालयितुं न शक्याः, शक्या न भवन्ति इति कापि प्रमदा गोपिका अवीवदत्। वदधातोः कर्तरि लुङ्। विकस्वरालङ्कारः। तदुक्तम्—'यस्मिन् विशेषसामान्यविशेषाः स विकस्वर' इति ॥ ८८ ॥

भगवदङ्गमार्दवं स्तौति—

अनूपसंरूढशिरीषपुष्पमृदूनि तेऽङ्गानि भुजालताभ्याम् ।
हरे परिष्वक्तु मह धृताशा चिरा दिति प्राह वचः स्म काचित् ॥८९॥

अनूपेति ॥ हे हरे श्रीकृष्ण! अनूपे जलप्रायस्थले; जलप्राय मनूपं स्यादित्यमरः। संरूढस्य प्ररूढस्य; शिरीषवृक्षस्य पुष्पाणीव मृदूनि कोमलानि; तेऽङ्गानि; भुजे लते इव ताभ्यां परिष्वक्तु मालिङ्गितुं; चिरात् बहुकालात्; धृताशा धृतमनोरथा इति काचित् गोपी वचः प्राहस्म उवाच। ब्रूञ्धातोः कर्तरि लट्। अत्र स्वभावसिद्धशिरीषपुष्पमार्दवे अहेतोरनूपसंरूढत्वहेतुत्व-

कल्पनात् प्रौढोक्त्यलङ्कारः । तदुक्तम्—'प्रौढोक्ति रुत्कर्षाहेतौ तद्धेतुत्वप्रकल्पन'-मिति ॥ ८९ ॥

नेत्रसूचनेन भगवदाशयं ज्ञात्वा या भगवता रमिता सां तं स्तौति—

करै स्सहस्रेण लिखे द्विभावसुः कृता धरा लेखनपत्रिका यदि ।
सहस्रवक्त्रः पठिता च सर्पराट् तदा गुणा स्ते कथिताः स्यु रच्युत ॥९०॥

करैरिति ॥ विभावसुः सूर्यः; सहस्रेण करैः किरणैः 'बलिहस्तांशवः करा' इत्यमरः । लिखेद्यदि धरा भूमिः लेखनपत्रिका कृता यदि; सहस्रं वक्त्राणि मुखानि यस्य सः । सर्पराट् आदिशेषः । पठिता वक्ता यदि; हे अच्युत! तदा तव गुणाः कथिता स्युः । असधातोः कर्तरि लिङ् । संभावनालङ्कारः । तदुक्तम्— 'संभावना यदीत्थं स्या दित्यूहो ऽन्यस्य सिद्धय' इति ॥ ९० ॥

श्रीकृष्णः द्वाभ्यां वक्रोक्त्या गोपिकाः परिहसति—

गतोऽसि जैवातृक कुत्र न न्वयं नभस्स्थले पश्य विराजति प्रिये ।
हरे भवान् वञ्चक एव केसरी सफेरु रित्थं प्रजहास सोऽपराम् ॥९१॥

गतोऽसीति ॥ हे जैवातृक आयुष्मन्! 'जैवातृकः स्या दायुष्मा' नित्यमरः । एतावन्तं कालं ननु कुत्र गतोऽसीति गोपिकोक्तीः कृष्णो वक्रोक्त्या प्रत्युत्तरमाह —'हे प्रिये गोपिके अयं जैवातृकः सोमः; 'अब्जो जैवातृकः सोम' इत्यमरः । नभस्स्थले आकाशे विराजति पश्येति । पुन र्गोपिकोक्तिः — हे हरे कृष्ण सिंह! भवान् वञ्चक एव वञ्चनापरः जम्बुकश्च; केसरी सवञ्चकः सफेरुः सजम्बुक इत्यर्थः । 'सृगालवञ्चककोष्टुफेरुफेरवजम्बुकाः' इत्यमरः । इत्थं स श्रीकृष्णः अपरां गोपिकां प्रजहास परिहसितवान् । प्रपूर्वकहसधातोः कर्तरि लिट् । अभङ्गश्लेषवक्रोक्त्यलङ्कारः । तदुक्तम्— 'वक्रोक्तिः श्लेषकाकुभ्यां अपरार्थप्रकल्पन' मिति ॥ ९१ ॥

मानं त्यज प्रिय रतिं सफलीकुरुष्व
मा सा कथं चिरभृता च विलङ्घनीया ।
त्याज्या मयेति विपरीतपदार्थवाक्यैः
गोपाङ्गनाः परिहसन् रमते स्म कृष्णः ॥ ९२ ॥

मानमिति ॥ हे प्रिय कृष्ण! मान मीर्ष्याकोपं; त्यज मुञ्च; मा मां त्वयि रतिं चानुरागं च सफलीकुरुष्व फलवतीं कुरु । इति गोपिकोक्तिः । अस्यैव पदस्य उत्तरं – प्रिये! त्वयि या रतिः अनुराग स्तां मा सफलीकुरुष्व फलवतीं मा कुरु । मया सह रतिकेलिं मा कुर्वित्यर्थः । तत्रोत्तरमाह – चिर-भृता बहुकालं मया रमिता मा लक्ष्मीः मया कथं विलंघनीया कथं त्याज्या इति कृष्णः । विपरीताः अन्यथा कल्पिताः पदानि अर्थाश्च एषु तै र्वाक्यैः गोपाङ्गनाः परिहसन् रमते स्म रेमे । रमुधातोः कर्तरि लिट् । अत्र सभङ्ग-श्लेषानुप्राणितवक्रोक्त्यलङ्कारः । लक्षणं पूर्वश्लोकोक्तमेव ॥ ९२ ॥

स्त्रीणां कटाक्षवैदग्ध्यातिशयमाह—

निबद्धखेलास्वबलासु माधवं विमोहयन्तीषु विमुग्धवीक्षणैः ।
चरन्त्य आभ्य स्सविधे मृगाङ्गना अध्येतु मैच्छन् सरसावलोकनम्
॥ ९३ ॥

निबद्धेति ॥ विमुग्धै र्विशेषेण सुन्दरैः वीक्षणै र्विलोकनै र्माधवं कृष्णं; विमोहयन्तीषु अबलासु स्त्रीषु; निबद्धाः खेलाः याभि स्तथोक्तासु सतीषु सविधे समीपे; चरन्त्यः मृगाङ्गना हरिण्यः; आभ्यः स्त्रीभ्यः; सरसं शृङ्गार-युक्तं अवलोकनं वीक्षणं; अध्येतु मभ्यस्तुं; ऐच्छन् इच्छन्ति स्म । इषधातोः कर्तरि लङ् । उल्लासालङ्कारः । तदुक्तम्–'एकस्य गुणदोषाभ्या मुल्लासोऽन्यस्य तौ यदी' ति ॥ ९३ ॥

सर्वा स्त मेवं परिलभ्य मान्मथी मात्तां व्यथां तं प्रजहुः सुनिर्वृताः ।
तत्कानने शीतसुगन्धमारुते वदान्य माश्रित्य जना इव प्रभुम् ॥९४॥

सर्वा इति ॥ शीतः शोभनो गन्धो यस्य स मारुतः यस्मिन् तस्मिन् कानने, सर्वा स्ता गोपिकाः, तं श्रीकृष्ण मेवं पूर्वोक्तप्रकारेण, परिलभ्य संप्राप्य, वदान्यं बहुप्रदं, 'स्यु र्वदान्यस्थूललक्ष्यदानशौण्डबहुप्रदा' इत्यमरः। प्रभु माश्रित्य, जना इव सुनिर्वृताः सुखिताः सत्यः, मान्मथीं मन्मथसम्बन्धिनीं, आत्तां प्राप्तां, व्यथां पीडां, 'पीडा बाधा व्यथा दुःख' मित्यमरः। प्रजहुः तत्यजुः। प्रपूर्वकजहातेः कर्तरि लिट्। पूर्णोपमालङ्कारः ॥ ९४ ॥

अचीक्लृपन् तस्य वरासनं स्त्रियः रन्तु तदा तेन मनोहरेण ताः।
सुकुङ्कुमालिप्तकुचच्छलोच्चलत्प्रचक्रवाकालिनिरोधकैः पटैः ॥ ९५ ॥

अचीक्लृपन्निति ॥ तदा ताः स्त्रियः, मनोहरेण तेन कृष्णेन सह, रन्तुं क्रीडितुं सुकुङ्कुमेन आसमन्तात् क्लृप्ताः कुचा इति छलं व्याजो येषां तेषां उच्चलतां उड्डीयमानानां प्रकृष्टचक्रवाकानां आलीनां पंक्तीनां निरोधकैः निवारकैः, पटैः रुत्तरीयैः, तस्य कृष्णस्य, वरासनं श्रेष्ठासनं अचीक्लृपन् कल्पितवत्यः। क्लृपधातोः णिचि कर्तरि लङ्। 'कृपो रो ल' इति लत्वम्। अत्र छलपदेन कुचत्वापह्नवे कैतवापह्नुत्यलङ्कारः ॥ ९५ ॥

लावण्यातिशयवता भगवता कृष्णेन जितो मन्मथः अस्मिन् लोके स्त्रीकृतनिन्दापेक्षया मरण मेव वरं मन्यमान स्सन् ता एव सहकारीकृत्य तं जेतुं युद्धसन्नद्धोऽभूदित्याह त्रिभिः —

युद्धाय तेनैव रतेः पति स्तदा स्त्रीणां कथं तत्र मनोरथं व्यधात्।
तन्नेत्रदन्तास्यकरोत्तमाधरं सुतीक्ष्णबाणानपि तद्भ्रुवो धनुः ॥ ९६ ॥

युद्धायेति ॥ तदा तस्मिन् समये, रतेः पति र्मन्मथः। तेनैव कृष्णेन, युद्धाय युद्धार्थं, तत्र वने, स्त्रीणां मनोरथ मभिप्रायं, तासां गोपिकानां नेत्राणि दन्तान् आस्यानि मुखानि करान् उत्तमा नपरानपि। प्राण्यङ्गत्वादेक-

वद्भावः । तीक्ष्णबाणान् भ्रुवोऽपि धनुः कार्मुकं, व्यधात् विदधौ । विपूर्वक धा धातोः कर्तरि लुङ् । अनुभयाभेदरूपकालङ्कारः ॥ ९६ ॥

कुचद्वयान्तोत्तमदुर्ग माश्रितो विचित्रपत्रावलिसद्गृहाङ्गणः ।
कटाक्षमन्दस्मितवाक्यचातुरी लावण्यसेनाभि रमुं व्यधर्षयत् ॥ ९७ ॥

कुचद्वयेति ॥ कुचद्वयस्य अन्त एव उत्तमदुर्गं, तदाश्रितः विचित्रा नानारूपाः पत्रावलयः मकरिकापत्रपंक्तयः एव सद्गृहाणि अङ्कणानि यस्य सः । मन्मथ इति शेषः । कटाक्षा अपाङ्गवीक्षणानि मन्दस्मितानि वाक्यचातुरी लावण्यं च तान्येव सेना स्ताभिः ; अमुं श्रीकृष्णं ; व्यधर्षयत् धर्षितवान् धृषधातोर्णिजन्तात्कर्तरि लङ् । अनुभयाभेदरूपकालङ्कारः ॥ ९७ ॥

शरासनं भ्रूयुगमाप्य मन्मथ स्तासां गुणज्या मधिकृत्य माधवम् ।
अलक्ष्यरूपं च शरव्य माहवे कृत्वा च नासाविशिखांश्च संबभौ ॥९८॥

शरासनमिति ॥ आहवे युद्धविषये ; मन्मथ स्तासां गोपिकानां भ्रूयुगं शरासनं कार्मुकं ; आप्य प्राप्य, तासां गुणा एव ज्या तां, अधिकृत्य आकृष्य, अलक्ष्यं रूपं स्वरूपं यस्य तं माधवं श्रीकृष्णं शरव्यं च लक्ष्यं, 'लक्ष्यं लक्षं शरव्यं चे' त्यमरः । नासाविशिखांश्च कृत्वा, संबभौ रराज, संपूर्वकभातेः कर्तरि लिट् । पूर्णोपमालङ्कारः । ॥ ९८ ॥

मन्मथजयव्याजेन रासोत्सव मियेषेत्याह—

याभि र्विजेतुं स्व मियेष मन्मथ स्ताभि र्जिगीषु स्तरसा त मङ्गजम् ।
रासोत्सवं सर्वसुरोत्सवं मनः कर्तुं चकाराय मधिस्त्रि माधवः ॥ ९९ ॥

याभिरिति ॥ मन्मथः याभिः साधनभूताभिः स्त्रीभिः; स्व मात्मानं ; 'स्वो ज्ञातावात्मनि स्व' मित्यमरः । विजेतु मियेष ऐच्छत् । इषधातोः कर्तरि लिट् । अयं माधवः श्रीकृष्णोऽपि ; त मङ्गजं मन्मथं ; ताभि रेव स्त्रीभिः,

तरसा जिगीषुः जेतु मिच्छुः सन् । अधिस्त्रि स्त्रीषु, विभक्त्यर्थेऽव्ययीभावः । सर्वेषां सुराणां ब्रह्मादीनां प्रार्थनीयं, उत्सवं रासोत्सवं रासक्रीडां, रासो नाम अनेकनर्तकीयुक्तनृत्यविशेषः । कर्तुं मन श्चकार । अत्र याः स्त्रियः मन्मथस्य साधनभूताः ता एव माधवसाधनभूता इति वर्णनात् व्याघातालङ्कारः । तदुक्तम्—'स्याद्व्याघातेऽन्यथाकारि तथाकारि क्रियेत चे' दिति ॥ ९९ ॥

अथ सप्तदशभिः रासक्रीडामहोत्सवो वर्ण्यते—

प्रवृद्धरासोत्सवविभ्रमान्वितः प्रमत्तगोपीजनमण्डलावृतः ।
योगीश्वरत्वेन समस्तयोषितां प्रत्येक मेकः प्रमदाय सोऽभवत् ॥१००॥

प्रवृद्धेति ॥ प्रवृद्धस्य रासोत्सवस्य विभ्रमै र्विलासै रन्वितः युक्तः । प्रमत्तानां गोपीजनानां मण्डलेन वलयेन आवृतः स श्रीकृष्णः । योगीश्वरत्वेन हेतुना समस्तयोषितां प्रमदाय हर्षाय, प्रत्येकं एकः एकैकस्याः स्त्रियाः एकैकः अभवत् । भूधातोः कर्तरि लङ् ॥ १०० ॥

तत्प्रकारमेवाहः—

योषिद्द्वयान्तःस्फुरदेककृष्णं कृष्णद्वयान्तःस्फुरदेकगोपिकम् ।
अन्योन्यकण्ठार्पितबाहुमण्डलं तदा विरेजे भुवि रासमण्डलम् ॥१०१॥

योषिदिति ॥ तदा तस्मिन् समये; योषिद्द्वयस्य अन्त र्मध्ये; स्फुरन् सन् एकः कृष्णो यस्मिन् तत्तथा । कृष्णद्वयस्यान्त र्मध्ये स्फुरन्ती लसन्ती एका गोपिका यस्मिन् तत्; अन्योन्यं कण्ठे अर्पितयोः बाह्वो र्मण्डलं समूहः यत्र तत् रासमण्डलं भुवि विरेजे रराज । विपूर्वकराजतेः कर्तरि लिट् ॥ १०१ ॥

अंसान्तरालम्बि समीरसञ्चलद्दुकूलकान्ता स्तनुयष्टयो बभुः ।
प्रद्युम्नराजस्य मनोहरोत्सवे मृगीदृशां केतुवरा इवोच्छ्रिताः ॥ २०२ ॥

अंसेति ॥ अंसान्तरेषु भुजमध्येषु; आलम्बीनि लम्बमानानि समीरेण वायुना सञ्चलन्ति दुकूलानि क्षौमाणि तैः कान्ता मनोज्ञाः; मृगीदृशां स्त्रीणां; तनवो यष्टय इवेत्युपमितसमासः । प्रद्युम्नराजस्य मन्मथप्रभोः । 'राजाह' इति टच् । मनोहरे उत्सवे । उच्छ्रिता उन्नताः; केतुवरा ध्वजश्रेष्ठा इव; बभुः; भातेः कर्तरि लिट् । उक्तवस्तूत्प्रेक्षालङ्कारः ॥ १०२ ॥

पद्मानि सर्वाणि वने रमाधवं जगत्पतिं सेवितु मत्र योषिताम् ।
करांघ्रिनेत्राननकैतवेन तं समागतानि व्रजसुन्दरीप्रियम् ॥ १०३ ॥

पद्मानीति ॥ अत्र वने, सर्वाणि पद्मानि, व्रजसुन्दरीणां गोपिकानां प्रियं जगत्पतिं तं रमाधवं श्रीकृष्णं सेवितुं योषितां गोपिकानां कराणा मंघ्रीणां नेत्राणा माननानां च कैतवेन व्याजेन समागतानि ॥ १०३ ॥

मेघोडुताराधिपमण्डलानि खे नीलालकस्वेदमुखानि योषिताम् ।
भूत्वा त्रिलोकीतिलकोत्तमेन किं कृष्णेन रन्तुं सुसमीयु रञ्जसा
॥ १०४ ॥

मेघेति ॥ खे आकाशे विद्यमानानि मेघाश्च उडूनि च ताराधिपमण्डलं चन्द्रबिम्बं च । 'बिम्बोऽस्त्री मण्डलं त्रिषु' इत्यमरः । एतानि योषितां गोपिकानां यथाक्रमं, नीलालकस्वेदमुखानि भूत्वा, त्रयाणां लोकानां समाहारस्त्रिलोकी । 'अकारान्तोत्तरपदो द्विगुः स्त्रिया मिष्टः' इति स्त्रीत्वे' 'द्विगो' रिति ङीप् । एतस्या स्तिलकोत्तमेन तिलकश्रेष्ठेन कृष्णेन रन्तुं अञ्जसा सुसमीयुः किं समागतानि किं? संपूर्वक इण् धातोः कर्तरि लिट् । उक्तवस्तूत्प्रेक्षालङ्कारः । यथासंख्यालङ्कारश्च ॥ १०४ ॥

सस्त्रीक वैमानिक संघमेदुरं नभःस्थलं चारु सरो यथा बभौ ।
योषिद्गणस्यास्य सरोजशोभितं नेत्रोत्पलानां प्रभया विमण्डितम् ॥१०५॥

सस्त्रीकेति ॥ सस्त्रीकाणां स्त्रीभि स्सहितानां वैमानिकानां देवानां संघै मेंदुरं निबिडं, योषिद्गणस्यामरसुन्दरीसमूहस्य, आस्यानि मुखान्येव सरो-

जानि पद्मानीति रूपकं तै श्शोभितम् । नेत्राण्येवोत्पलानि इन्दीवराणीति रूपकम् । तेषां प्रभया विमण्डित मलंकृतं नभःस्थलं चारु सरो यथा सर इव बभौ भातिस्म । भातेः कर्तरि लिट् । रूपकानुप्राणितोपमालङ्कारः ॥ १०५ ॥

दिवि स्थितो निर्जरयोषितां गणः व्यमंस्त गोपीकुचकञ्चुकं तदा ।
पयोधरव्याज सुचक्रवाकयो रुड्डीनशंकाकृतबन्धनं भुवि ॥ १०६ ॥

दिवीति ॥ तदा तस्मिन् समये, दिवि अन्तरिक्षे स्थितः निर्जरयोषितां देवस्त्रीणां गणः भुवि गोपीनां कुचकञ्चुकं जात्येकवचनं, पयोधराविति व्याजः ययो स्तयोः सुचक्रवाकयोः उड्डीनस्य 'प्रडीनोड्डीनसंडीना न्येताः खगगतिक्रियाः' इत्यमरः । शङ्कया कृतं बन्धनं व्यमंस्त मेने हि । मनधातोः कर्तरि लुङ् । अपह्नवगर्भोक्तिवस्तूत्प्रेक्षालङ्कारः ॥ १०६ ॥

सस्त्रीकगन्धर्ववरेण्यगायकाः जगु र्व्यनृत्यन् गगनेऽप्सरोगणाः ।
निपेतु रुर्व्या मपि पुष्पवृष्टयो योगीश्वरे क्रीडति रासकेलिभिः ॥१०७॥

सस्त्रीकेति ॥ योगीश्वरे श्रीकृष्णे, रासकेलिभिः क्रीडति सति गगने स्त्रीभि स्सहिताः सस्त्रीकाः गन्धर्ववरेण्याः गन्धर्वश्रेष्ठा एव गायकाः जगु रगायन् अप्सरसां गणाः व्यनृत्यन् विशेषेण ननृतुः। उर्व्यां भूम्यां; पुष्पवृष्टयो निपेतुः । निपूर्वकपतधातोः कर्तरि लिट् ॥ १०७ ॥

गातुं न शेकुः सुरसुन्दरीगणाः दृष्ट्वा तमीशं च्युतवस्त्रबन्धनाः ।
कुचद्वयान्तर्भरखिन्नमध्यत स्तदा पतिप्रान्तिक एव मोहिताः ॥१०८॥

गातुमिति ॥ सुरसुन्दरीगणाः; तं रासमण्डलगतं; ईशं कृष्णं दृष्ट्वा मोहिताः, अतएव तदा तस्मिन् समये, पतिप्रान्तिक एव पतिसमीप एव, कुचद्वयान्तस्य स्थनद्वयान्तस्य भरेण भारेण खिन्नात् नम्रात्, मध्यतः वलग्नाच्च, च्युतानि गलितानि वस्त्रबन्धनानि यासां तथाविधा स्सत्यः, गातुं न शेकुः न न समर्था बभूवुः । शकधातोः कर्तरि लिट् ॥ १०८ ॥

नितम्बसंलम्बिसुवर्णमेखलाप्रकिङ्किणीजालनिनादमण्डितम् ।
रेजे तदा नूपुरहंसनादितं महोत्सवे तस्य हि रासमण्डलम् ॥ १०९ ॥

नितम्बेति ॥ नितम्बेषु कटिपश्चद्भागेषु, 'पश्चान्नितम्बः स्त्रीकट्याः' इत्यमरः । संलम्बिनीनां सुवर्णमेखलानां काञ्चीनां, 'स्त्रीकट्यां मेखला काञ्ची' त्यमरः । प्रकृष्टेन किङ्किणीजालस्य निनादेन मण्डितं नूपुरा एव हंसा स्तै र्नादितं – रासमण्डलं, तत्र महोत्सवे रेजे रराज । हि प्रसिद्धौ । राजतेः कर्तरि लिट् ॥ १०९ ॥

तदा चलत्कैश्यपयोधरालकं विलोलताटङ्कयुगं व्रजाङ्गनाः ।
चलद्रणन्नूपुरपादपद्मयोः न्यासै रनृत्यन् ध्रुवतालसङ्गताः ॥११०॥

तदेति ॥ तदा तस्मिन् समये व्रजाङ्गना गोप्यः; ध्रुवतालसङ्गता रनृत्यः; चलन्तः केशानां समूहः कैश्यं, 'केशाश्वाभ्यां यञ्छा वन्यतरस्या' मिति यञ् । पयोधरौ कुचौ; अलकाः कुन्तलाः यस्मिन् कर्मणि तत्तथा, विलोलं ताटङ्कयुगं यस्मिन् कर्मणि तत्तथा, 'ध्रुवो मठ्यो रूपकश्च झम्पा त्रिपुटकस्तथा; अटतालैकतालौ च सप्त तालाः प्रकीर्तिताः' इति सङ्गीतरत्नाकरः । चलन्ति रणन्ति नूपुराणि ययो स्तयोः पादपद्मयोः, न्यासै र्विन्यासै रनृत्यन् ननृतुः । नृतीधातोः कर्तरि लङ् ॥ ११० ॥

हरेः सुखस्पर्शकराभिमर्शनात् विस्रस्तनीवीकुचचोलबन्धनाः ।
तं जग्धताम्बूलजिघृक्षयेव ताः चुचुम्बु रस्याधरबिम्ब मङ्गनाः ॥१११॥

हरेरिति ॥ ताः गोप्यः, हरेः कृष्णस्य, सुखस्पर्शस्य कोमलस्य करस्याभिमर्शनात विस्रस्ताः नीव्यश्च कुचानां चोलानां बन्धनानि च नीवीकुचचोलबन्धनानि यासां ताः । "चोलः कूर्पासकोऽ स्त्रिया' मित्यमरः ! तथाविधा स्सत्यः तेन कृष्णेन जग्धस्य चर्वितस्य ताम्बूलस्य जिघृक्षयेव ग्रहीतु मिच्छयेव अस्य श्रीकृष्णस्य, अधरं बिम्ब मिवेत्युपमितसमासः । अधरबिम्बं चुचुम्बुः चुम्बन्ति स्म । चुम्बधातोः कर्तरि लिट् ॥ १११ ॥

तदा सुदत्यः कुचलम्बिमालिकाप्रमत्तभृङ्गाल्यनुनादसंयुताः ।
नाट्ये प्रियस्यास्य च दत्ततालिकाः बभूवु रेता ध्रुवमट्यरूपकैः ॥११२॥

तदेति ॥ तदा तस्मिन् समये, एताः कुचेषु लम्बिनीषु लम्बमानासु मालिकासु विद्यमानानां प्रमत्तभृङ्गानां आलीनां पंक्तीनां नादेन संयुताः सुदत्यो गोपिकाः, ध्रुवमट्यरूपकैः तालविशेषैः । तल्लक्षणं तु पूर्वं व्याख्यातम् । अस्य प्रियस्य कृष्णस्य । नाट्ये दत्ततालिकाः दत्ता स्तालाः याभि स्तथाविधाः बभूवुः । भूधातोः कर्तरि लिट् ॥ ११२ ॥

सोत्कण्ठ मालिंग्य धवस्य कन्धरा मेताः परं तद्विवशा विरेजिरे ।
गलत्स्रजः स्वेदयुता नखक्षतै र्विमर्दितापीनपयोधरा रतौ ॥११३॥

सोत्कण्ठमिति ॥ एता गोप्यः, धवस्य श्रीकृष्णस्य, कन्धरां ग्रीवां, सोत्कण्ठं सानुरागं यथा तथा आलिंग्य, नखक्षतैः, रतौ केल्यां विमर्दिताः। आसमन्तात् पीनपयोधराः यासां ताः । अत एव स्वेदयुता । गलन्ति स्रजः मालिकाः याभ्य स्ताः । अत एव परं तस्य भगवतः रतौ क्रीडायां रतिकेलौ विवशाः परवशा स्सत्यः विरेजिरे बभुः । विपूर्वकराजृधातोः कर्तरि लिट् ॥११३॥

ताराधिपे तत्र विलोकनोत्सुके शीते सतारग्रहमण्डले दिवि ।
अरीरमत् चित्रविचित्रकेलिभिः हरि र्निशाया मतिदैर्घ्यभाज्यसौ ॥ ११४ ॥

ताराधिप इति ॥ असौ हरिः श्रीकृष्णः । तत्र वने । सतारग्रह मण्डले ताराणि अश्विन्यादीनि, ग्रहाः सूर्याङ्गारकादयः तेषां मण्डलेन समूहेन सहिते तस्मिन् विलोकने उत्सुके उद्युक्ते ताराधिपे चन्द्रे । दिवि आकाशे स्थिते सति । कालस्य सूर्यादिगत्या ज्ञेयत्वात् । तेषां गत्यभावेन कालो न गत इति भावः । अत एवातिदैर्घ्यं भजतीति तथभूतायां निशायां चित्राभिः नानाबन्धन-रूपाभिः केलिभिः रतिकेलिभिः । अरीरमत् रेमे । रमुधातोः णिजन्तात् कर्तरि लुङ् ॥ ११४ ॥

प्रतिश्रुतं गर्हित मप्यधिस्त्रि यत् स्थिते निषेधेऽपि न कार्य मित्यसौ ।
संपूरयामास मनोरथान् स्वयं तासा मति प्रेमदयापरो यतः ॥ ११५ ॥

प्रतिश्रुतमिति ॥ असौ श्रीकृष्णः । अधिस्त्रि स्त्रीषु । विभक्त्यर्थे ऽव्ययीभावः । यूयं मया रंस्यथेति प्रतिश्रुतमपि प्रतिज्ञातमपि । गर्हितं निन्दितं न कार्यं न कर्तव्यमिति निषेधे स्थितेऽपि यतोऽतिप्रेम्णा दयापरः दयावान् । अतो हेतोः तासां गोपिकानां मनोरथान् कामान् स्वयं संपूरयामास अपूरयत । संपूर्वकपूरीधातोः णिजन्ता दामि अनुप्रयोगे कर्तरि लिट् ॥ ११५ ॥

एवं व्यरंसी द्वनकेलिवैभवे निशा हरौ क्रीडति रासमण्डले ।
निशाकरे पूर्णकरै र्हरे स्सुखं वितन्वतीशे परया मुदा तदा ॥११६॥

एवमिति ॥ वनकेलीनां वैभवं यस्मिन् तस्मिन् । रासमण्डले । ईशे हरौ श्रीकृष्णे । एवं पूर्वोक्तप्रकारेण परया मुदा तदा तस्मिन् समये । निशाकरे चन्द्रे । पूर्णैः करैः किरणैः । हरेः श्रीकृष्णस्य । सुखं वितन्वति निशा रात्रिः । व्यरंसीत् विरराम । प्रभात कल्पा अभवत् । विपूर्वक रम धातोः कर्तरि लुङ् । 'यमरमे' ति सगागमः । 'व्याङ्परिभ्यो रम' इति परस्मैपदम् ॥ ११६ ॥

अथ पञ्चमी रासक्रीडाशान्तिनिवारिकां जलकेलिरूपलीला माह—

इभेडिवायं जलकेलिलोलुपः स्त्रीणां गणै स्साक मथोऽविश जले ।
स्नाने विवस्त्रे परिदूषिते श्रुतौ तेजस्विनां तेज इतीदृगावदन् ॥११७॥

इभेडिति ॥ अथानन्तरं; जलकेलौ जलक्रीडायां लोलुप आसक्तः । अयं श्रीकृष्णः । श्रुतौ वेदे । विवस्त्रे वस्त्ररहिते स्नाने परिदूषिते । 'न विवसनः स्नाया' दिति निषिद्धेऽपि । तेजस्विनां महात्मनां तेजः प्रभावः । ईदृक् एवंभूतं; 'निषिद्धाचरणेऽपि प्रत्यवायाना मापादकं तेषां तेजोविशेषेण प्रत्यवायो न विद्यते' इति स्मरणात् भगवद्विषये कैमुत्यन्यायसिद्धः इति आवदन्

सन् । इभीनां करेणूनां ईट् प्रभुः गजश्रेष्ठ इव । स्त्रीणां गणे स्साकं जले अविशत् प्रविवेश । विशधातोः कर्तरि लङ् । अत्र तेजस्विनां तेज ईदृगिति वदन् बोधयन् इत्युक्तत्वात् सदर्थनिदर्शनालङ्कारः । पूर्णोपमालङ्कारश्च । तयोर्मिथो नैरपेक्ष्यात् संसृष्टिः ॥ ११७ ॥

तत्प्रकारमेवाह—

निमज्जनोन्मज्जनवारिताडनैः विवाससो वारिचरा इवाचरन् ।
मधुव्रतोन्नेयसरोरुहाङ्गना मुखे जले माधवगोपिका मुदा ॥११८॥

निमज्जनेति । विवाससो वस्त्ररहिताः । माधवेन सहिता गोपिकाः । मधुव्रतै र्मधुकरैः । 'मधुव्रतो मधुकर' इत्यमरः । उन्नेयानि अनुमेयानि । सरोरुहाणि कमलानि अङ्गनामुखान्येव यस्मिन् तस्मिन् । जले मुदा । निमज्जनै रन्तःप्रवेशनैः । उन्मज्जनैः, वारिताडनै र्जलप्रहारैः । वारिचरा जलचरा इवाचरन् संचेरुः । चरधातोः कर्तरि लङ् । पूर्णोपमालङ्कारः । मधुव्रतोन्नेयकमलमुखानीति वर्णनात् विशेषालङ्कारश्च अनेन संसृष्टिः । तदुक्तम् — 'भेदवैशिष्ट्ययोः स्फूर्ता वुन्मीलितविशेषका' विति ॥ ११८ ॥

जले प्रविष्टानां मुखसौन्दर्यमाह—

विहारभाजां सरसीजले तदा विलासिनीनां मदलोलचक्षुषः ।
मुखस्य पद्मस्य सुदुर्ग्रहाभवत् भिदा भ्रमद्भृङ्गकुलाकुलस्य ॥ ११९ ॥

विहारेति ॥ सरसीजले विहारं क्रीडां भजन्तीति तथोक्तानां विलासिनीनां स्त्रीणां भ्रमता भृङ्गकुलेन भ्रमरसमूहेन आकुलस्य संकुलस्य पद्मस्य मदेन लोले चक्षुषी यस्य तस्य मुखस्य च भिदा भेदः । सुदुर्ग्रहा ग्रहीतु मशक्या अभवत् । भूधातोः कर्तरि लङ् । सामान्यालङ्कारः । 'सामान्यं यदि सादृश्या द्विशेषो नोपलक्ष्यते' इति ॥ ११९ ॥

कटाक्षातिशयमाह—

कटाक्षपातै श्चपलै र्मृगीदृशां नवाम्बुदश्यामतनु र्बलानुजः ।
बभूव रक्तोऽतितरां सरोवरे नवोत्पलाभानि सिताम्बुजान्यहो ॥१२०॥

कटाक्षेति ॥ सरोवरे सरश्श्रेष्ठे ; चपलै श्चञ्चलैः । मृगीदृशां स्त्रीणां कटाक्षपातैः नवाम्बुदः नूतनमेघः स इव श्यामा तनु र्यस्य । सोऽपि बलानुजः श्रीकृष्णः । अतितरा मत्यन्तं रक्तः लोहितः । बभूवेति विरोधः । अनुरक्त इति परिहारः । सिताम्बुजानि पुण्डरीकानि नवोत्पलानां नूतननीलोत्पलाना माभेवाभा येषां तथाभूतानि बभूवुः । भूधातोः कर्तरि लिट् । अहो आश्चर्ये । विरोधाभासालङ्कारः । तद्गुणलङ्कारश्च । तदुक्तम्—'तद्गुणः स्वगुणत्यागा-दन्यदीयगुणग्रहः'। 'आभासत्वे विरोधस्य विरोधाभास इष्यते' इति च ॥१२०॥

जलात्समुत्तीर्य बहि स्समाधवाः दुकूलपीताम्बररत्नभूषिताः ।
सिषेविरे शीतलमन्दमारुतं पद्मोत्पलानां शुभसौरभावहम् ॥१२१॥

जलादिति ॥ माधवेन सहिताः समाधवाः गोप्यः, जलाद् बहि-स्समुत्तीर्य निर्गत्य, दुकूलैः क्षौमैः पीताम्बरै रत्नैश्च विभूषिता स्सत्यः, पद्माना-मुत्पलानां कुवलयानां, शुभं मनोहरं, सौरभं परिमलं आवहतीति तथोक्तं शीतलं मन्दमारुतं सिषेविरे असेवन्त । षेवृधातोः कर्तरि लिट् ॥ १२१ ॥

वनान्तरा द्गेह मसौ हरि र्मुदा समाययौ मन्द मथाङ्गनाजनैः ।
साकं प्रभातेन समीप एव ता न्न मेनिरे किं पतयः स्थिता न्निशि ॥१२२॥

वनान्तरादिति । अथानन्तरं, असौ हरिः श्रीकृष्णः, वनान्तराद्वन-मध्यात्, अङ्गनाजनै स्सहित स्सन् । मन्दं यथा तथा, मुदा गेहं प्रभातेन साकं अहर्मुखेन सह, समायया वाजगाम । समाङ्पूर्वकयातेः कर्तरि लिट् । पतयः, तेषा मिति शेषः, ता नङ्गनाजनान् निशि रात्रौ, समीप एव स्थितान् न मेनिरे किं? मेनिर एवेत्यर्थः । मनुधातोः कर्तरि लिट् । सहोक्त्यलङ्कारः । तदुक्तम्—'सहोक्तिः सहभावश्चेद् भासते जनरञ्जन' इति ॥ १२२ ॥

श्रीकृष्ण गोपीजन रासमण्डल-
क्रीडाकथाक्षीरसरस्वदाश्रया ।
श्रीपुण्यकोटे बुधचित्ततोषिणी
सर्गे सुवाक्श्रीः जयतीह सप्तमे ॥ १२३ ॥

श्रीकृष्णेति ॥ श्रीकृष्णस्य गोपिकाजनानां च रासमण्डलस्य क्रीडाकथैव क्षीरसरस्वान् क्षीरसागरः, स आश्रयो यस्या स्सा। बुधानां विदुषां देवादीनां च, चित्तं मनः तोषयति सन्तोषयतीति बुधचित्ततोषणीति तथोक्ता। श्रीपुण्यकोटेः सुवाक्श्रीः रागलक्ष्मीः, इह सप्तमे सर्गे, जयति सर्वोत्कर्षेण वर्तते। अत्र कथाक्षीरसरस्वदाश्रया वाक्श्री रित्यनेन प्रस्तुतरासक्रीडाकथावर्णनरूपवाक्श्रीः लक्ष्म्यां अप्रस्तुतक्षीरोदधिस्थितिसमारोपात् समासोक्तिः। सा च क्रीडाकथा क्षीरसरस्वदिति रूपकोत्थापितेति तयो रङ्गाङ्गिभावेन सङ्करः ॥ १२३ ॥

॥ इति श्रीकृष्णविलासे सव्याख्याने पुण्यकोटि विरचिते
सप्तम स्सर्गः ॥

अष्टमस्सर्गः

अथ पञ्चभि र्वृषासुरवधरूपलीला वर्ण्यते—

मत्वा हरिं शत्रु मिमं स भोजरा डरिष्ट मामन्त्र्य वृषासुरं रुषा ।
हन्तुं तदा नारदवाक्यचोदितः तं प्रेषयामास रमाधवं प्रति ॥ १ ॥

मत्वेति ॥ स भोजराट् कंसः । नारदस्य वाक्येन, 'यशोदायाः पुत्रत्वेन प्रसिद्धः कृष्णः देवक्या अष्टमगर्भजः स मृत्यु' रिति वाक्येन चोदितः प्रेरितस्सन् । इमं हरिं श्रीकृष्णं, हन्तुं मत्वा, रुषा रोषेण; अरिष्टं अरिष्टाख्यं वृषासुर मामन्त्र्य आहूय; रमाधवं कृष्णं प्रति, प्रेषयामास प्रेषितवान् । प्रपूर्वक इषधातो र्णिजन्ता दामि कर्तरि लिट् ॥ १ ॥

दर्शनमात्रेण भीषयतीत्याह—

महाककुत्कायविषाणकन्धराप्रलम्बलाङ्गूलखुरै र्विभीषणः ।
नदन् समाधाव दलं स गोकुलं गोपालगोपीकुल माविघूर्णयन् ॥ २ ॥

महेति ॥ महान्तः ककुत् कायः शरीरं, विषाणे श्रृङ्गे; 'विषाणं पशुश्रृङ्गे स्यात् क्रोडद्विरददन्तयो' रिति विश्वः *। 'अथ त्रिषु विषाणं स्या त्पशुश्रृङ्गेभदन्तयो' रित्यमरः । कन्धरा ग्रीवा; प्रलम्बमानं लाङ्गूलं, खुराः शफानि च तै र्विभीषणः भयंकरः स वृषासुरः । नदन् वृषभजातिशब्दं कुर्वन् । गोपालानां गोपीनां च कुलं समूहं; अलं, आविघूर्णयन् आकुलीकुर्वन् सन् । गोकुलं घोषं । समाधावत् दधाव । धावृ धातोः कर्तरि लङ् ॥ २ ॥

---

* 'विषाणं तु क्रोडद्विरददन्तयोः, पशो श्शृङ्गे'

एवंभूतं वृषासुरं युद्धाय समाह्वय दित्याह—

**दृष्ट्वा त मायान्त मयं समाह्वयत् सन्त्रासयन्तं पशुबालगोपकान् ।
प्रकोपयन् रात्रिचरं रणाङ्गणे तलप्रहारेण च बाहुदण्डयोः ॥ ३ ॥**

दृष्ट्वेति ॥ अयं श्रीकृष्णः । आयान्त मागच्छन्तं । पशून् बालान् गोपकांश्च संत्रासयन्तं तं रात्रिचरं राक्षसं । दृष्ट्वा, बाहू दण्डाविवेति उपमित-समासः । तयो स्तलस्य करतलस्य प्रहारेण, रणाङ्गणे युद्धप्रदेशे, प्रकोपयन्, समाह्वयत् आह्वयति स्म । ह्वेञ्धातोः कर्तरि लङ् ॥ ३ ॥

**नमच्छिरोऽत्युच्चविषाणभीषणं समुद्यदभ्रभ्रमदग्रवालधिम् ।
विदारयन्तं खुरशातनै र्भुवं जग्राह वेगा द्धरि रेष शृङ्गयोः ॥ ४ ॥**

नमदिति ॥ एष हरिः श्रीकृष्णः, नमता नम्रेण शिरसा अत्युच्चाभ्यां विषाणाभ्यां शृङ्गाभ्यां भीषणं समुद्यतः उन्नमितः, अभ्रे आकाशे, भ्रमन् अग्रश्चासौ वालधिश्चाग्रवालधि र्यस्य तम् । 'हस्ताग्राग्रहस्तादयो गुणगुणिनो र्भेदाभेदा' दिति वामनसूत्रात् समानाधिकरणसमासः । 'वालहस्तश्च वालधि' रित्यमरः । खुरैः शातनैः प्रहारैः, भुवं विदारयन्तं वृषासुरं, शृङ्गयो र्वेगात् जग्राह । ग्रहधातोः कर्तरि लिट् ॥ ४ ॥

**कंसस्य भीतिं जनयन् स माधवो व्रजेशसूनु र्व्रजगोपभीषणम् ।
संभ्राम्य खे कंसनियोगकारिणं व्यनीनय त्तं यमसादनं रुषा ॥५॥**

कंसस्येति ॥ व्रजेशस्य नन्दस्य सूनु र्माधवः श्रीकृष्णः, कंसस्य भीतिं जनयन् उत्पादयन् । व्रजे विद्यमानानां गोपानां भीषणं भयङ्करं । कंसस्य नियोगं आज्ञां करोतीति तथोक्तं । तं वृषासुरं; खे आकाशे, रुषा, संभ्राम्य भ्राम-यित्वा, यमसादनं, व्यनीनयत् निनाय । णीञ्धातो र्णिजन्तात्कर्तरि लुङ् । च्ले श्चङि द्वित्वेऽभ्यासदीर्घः ॥ ५ ॥

कलहविशारदो नारदः देवकीवसुदेवबन्धनपूर्वकश्रीकृष्णरामानयनाय कंसं प्रेरयति—

आगत्य तं कंस मशेषवि त्तदा स नारदः प्राह सुतां च नन्दजाम् ।
श्रीकृष्णदेवं वसुदेवदेवकीसुतं स्म रामं वसुरोहिणीसुतम् ॥ ६ ॥

आगत्येति ॥ अशेषवित् सर्वज्ञः स प्रसिद्धो नारदः । तं कंसं प्रति । आगत्य, सुतां देवकीवसुदेवयोः सुतात्वेन प्रतीतां शक्तिं । नन्दजां नन्दपुत्रीं । वसुदेवसहितदेवक्याः सुतं पुत्रं श्रीकृष्णदेवं ; वसु वसुदेवः, 'नामैक-देशे नामग्रहणं' ; रोहिणी तस्य भार्या तयोः सुतं पुत्रं, रामं बलभद्रं च प्राह स्म उवाच । ब्रूञ्धातोः कर्तरि लट् । 'ब्रुवः पञ्चाना' मित्याहादेशः । रामकृष्णयोरानयने सति कंसवधोऽचिरा द्भविष्यतीति नारदाभिप्राय इति भावः ॥ ६ ॥

आदौ देवकीवसुदेवौ बन्धयति—

निशम्य तौ भोजपति स्सुतौ तयोः रुषाऽऽततायी मुनिना निवारितः ।
देव्या सहैनं वसुदेव मञ्जसा बबन्ध दुष्टो निगलै रयोमयैः ॥ ७ ॥

निशम्येति ॥ आततायी दुष्टः, भोजपतिः कंसः । तौ रामकृष्णौ तयोः देवकीवसुदेवयोः सुतौ पुत्रौ निशम्य, रुषा कोपेन, मुनिना नारदेन, निवा-रित स्सन् ; देव्या देवक्या सह एनं वसुदेवं, अयोमयै रयोविकारैः निगलैः शृंखलै रञ्जसा बबन्ध बध्नाति स्म । बन्धधातोः कर्तरि लिट् ॥ ७ ॥

अथ कंसो रामकृष्णयो रानयनयाक्रूरं प्रेषयिष्यन् मनसि मन्त्रयति द्वाभ्याम्—

संप्रेष्य चाक्रूर मितो व्रजं द्रुतं समानयिष्ये मम पद्गुणं शिशू ।
रथेन ता वानकदुंदुभे स्सुतौ मृत्यू ममैतौ समदेवसम्मतौ ॥ ८ ॥

संप्रेष्येति ॥ इतो नगरात् । रथेन अक्रूरं, व्रजं घोषं प्रति । द्रुतं संप्रेष्य । समेषां सर्वेषां देवानां । समः सर्वपर्यायः । संमतौ अभिमतौ । मम मृत्यू तावेतौ । आनकदुन्दुभे र्वसुदेवस्य, 'वसुदेवोऽस्य जनकः स एवानकदुन्दुभि' रित्यमरः । सुतौ पुत्रौ । शिशू रामकृष्णौ, मम पट्टणं समानयिष्ये प्रापयिष्ये, सं आङ् पूर्वक णीञ्धातो र्णिजन्ता त्कर्तरि लृट् ॥ ८ ॥

तौ घातयिष्ये निजहस्तिनाऽमुना मुक्तौ यदीमौ मम मल्लनायकैः ।
आयोधने पश्यति राजमण्डले रङ्गस्थले भावि दिने चतुर्दशे ॥९॥

ताविति ॥ चतुर्दशे भाविदिने भविष्यद्दिने । रङ्गस्थले मल्लरङ्गप्रदेशे । राज्ञां मण्डले समूहे, पश्यति सति । आयोधने मल्लयुद्धे, 'युद्ध मायोधनं जन्य' मित्यमरः । अमुना निजहस्तिना कुवलयापीडाख्येन । तौ रामकृष्णौ । घातयिष्ये मारयिष्ये । मुक्तौ गजेन मुक्तौ यदि । तथा मल्लनायकैः मल्लश्रेष्ठैः, चाणूरादिभि र्घातयिष्ये । हनधातो र्णिजन्ता त्कर्तरि लृट् । 'हनस्तचे' ति तकारः ॥ ९ ॥

एवं समालोच्य मनस्यसौ जवा दक्रूर मामन्त्र्य जनस्य संसदि ।
समानयात्रेति विलोकनाय तौ पफाण वाचं भयतोषदां हृदि ॥१०॥

एवमिति ॥ असौ कंसः, एवं पूर्वोक्तप्रकारेण । मनसि समालोच्य । जनस्य संसादि सभायां, 'सभा समिति संसद' इत्यमरः । अक्रूरं जवादामन्त्र्य आहूय । विलोकनाय दर्शनार्थं । तौ व्रजस्थौ रामकृष्णौ । अत्र गृहे गृहाभ्यान्तर मिति शेषः । समानय प्रापय । इति हृदि अक्रूरस्य हृदये । भय तोषं च ददातीति तथोक्तां । कंससमीपानयनप्रेरणा द्भयं, भगवद्दर्शनं भविष्यतीति सन्तोषश्च । वाचं पफाण उवाच । फणधातोः कर्तरि लिट् ॥ १० ॥

अथाक्रूरः श्रीकृष्णहननचिन्तायुक्तं कंसं प्रति दैवयोगात् कृष्ण एव त्वां हनिष्यतीति सूचयन् गच्छामीत्याह द्वाभ्याम्—

विचारितं सम्य गहो महीपते त्वयाऽधुना सिद्धि मभीप्सता विभो ।
कार्यस्य सिद्धौ विपरीत एव वा त्वाज्ञाह्यमोघा नियते र्बलीयसी ॥११॥

विचारितमिति ॥ भो विभो ! हे महीपते राजन् ! सिद्धिं कार्यसिद्धिं अभीप्सता आप्तु मिच्छता । आप्लृधातोः सन्नन्तात् शतृप्रत्ययः । त्वया अधुना । सम्यक् विचारितं आलोचित मिति काकुः । अहो इत्याश्चर्ये । किंतु कार्यस्याभीप्सितस्य सिद्धौ विपरीते तद्वैपरीत्ये वा अमोघा अलंघ्या । नियते-र्विधेः, 'भाग्यं स्त्री नियति र्विधि' रित्यमरः । आज्ञा बलीयसी बलवत्तरा हि ॥ ११ ॥

अहं करोम्येष यथा नियुक्तवा नानेतु मेतौ व्रजमद्य यामि भो ।
उक्त्वैव मामन्त्र्य ययौ स्वमालयं कंस स्तदान्तर्गृहमध्यगान्मुदा ॥१२

अहमिति । भो कंस ! यथा नियुक्तवा नाज्ञप्तवान् स एषोऽहं अक्रूरः । तथा करोमि । अद्य एतौ रामकृष्णौ । आनेतुं, व्रजं घोषं, यामि गच्छामि । एव मुक्त्वा अमन्त्र्य ; आपृच्छ्य ; स्व मालयं स्वभवनं, ययौ जगाम । तदा कंसः ; अन्तर्गृहं गेहमध्यं, मुदा सन्तोषेण; अध्यगात् प्राप । अधिपूर्वक इण् धातोः कर्तरि लुङि गादेशः ॥ १२ ॥

अथ चतुर्भिः हयासुरवधरूपलीला वर्ण्यते ।

हेषारवै र्घोष मतीव भीषयन् सटाजटामृष्ट घनसौ हयासुरः ।
खुरप्रहारै रवनीं विदारयन् संत्रासयन् गोपगणा नगा दसौ ॥१३॥

हेषेति । सटाजटाभिः केसरपंक्तिभिः । 'सटा जटा केसरयो' रिति विश्वः । घना मेघाः ; आमृष्टाः परामृष्टाः असौ केश्याख्यः हयासुरः अश्व-रूपोऽसुरः । खुरप्रहारै रवनीं भूमिं । विदारयन् भेदयन् । गोपगणान्, संत्रासयन् । हेषारवै रश्वजातीयध्वनिभिः । 'हेषा ह्रेषा च निस्वनः' इत्य-

मरः । अतीव भीषयन् घोषं व्रजं, अगा ज्जगाम । इण् धातोः कर्तरि लुङि गादेशः । अत्र सटाजटानामसंबन्धेऽपि संबन्धोक्ते रतिशयोक्त्यलङ्कारः ॥ १३ ॥

तं केशिनं वीक्ष्य तुरङ्गरूपिणं दुरासदं कंससखं भयङ्करम् ।
करालनेत्रास्य मसह्यविक्रमं हरि र्हरे र्नाद मयं व्यधात् क्रुधा ॥१४॥

तमिति । अयं हरिः श्रीकृष्णः ; नेत्रे च आस्यं च तेषां समाहारो नेत्रास्यं ; प्राण्यङ्गत्वादेकवद्भावः । करालं भीषणं नेत्रास्यं यस्य तं ; अत एव भयङ्करं ; असह्यः सोढु मशक्यः विक्रमः पराक्रमो यस्य तं ; अत एव दुरासदं दुष्प्रापं ; तुरङ्गस्य रूप मस्यास्तीति तुरङ्गरूपिणं ; कंसस्य सखा कंससखः 'राजाहस्सखिभ्य' इति टच् । तं केशिनं वीक्ष्य । क्रुधा कोपेन हरेः सिंहस्य नादं व्यधात् विदधौ । धाधातोः कर्तरि लुङ् ॥ १४ ॥

व्यादाय वक्त्रं विनदन् हयासुरो ग्रस न्निवागत्य तदाऽम्बरं रुषा ।
ददंश तस्यागरुपङ्करूषितं करं चरद्वालविधूतवारिदः ॥ १५ ॥

व्यादायेति ॥ चरता वालेन पुच्छेन विधूता उद्धूताः वारिदा मेघा येन स हयासुरः । वक्त्रं व्यादाय विवृत्य, विनदन् । अम्बर माकाशं, ग्रसन्निवागत्य । तदा रुषा रोषेण । अगरुपङ्केन रूषितं लिप्तं तस्य श्रीकृष्णस्य । करं ददंश दशति स्म । दंशधातोः कर्तरि लिट् ॥ १५ ॥

प्रगृह्य हस्तेन त माशु पादयोः संभ्राम्य दुष्टं हरि रेष लीलया ।
तारापथे राक्षस मश्ववेषिणं कृत्वा गतासुं क्षिपति स्म भूतले ॥ १६ ॥

प्रगृह्येति । एष हरिः, दुष्टं, अश्ववेषं अस्यास्तीति तथोक्तं, तं राक्षसं, आशु हस्तेन लीलया । पादयोः प्रगृह्य गृहीत्वा, तारापथे आकाशे । संभ्राम्य भ्रामयित्वा । गतासुं गतप्राणं । कृत्वा, भूतले क्षिपति स्म चिक्षेप । क्षिपधातोः कर्तरि लट् ॥ १६ ॥

अथ नारदः कृतकार्यं भगवन्तं स्तुतिव्याजेन समित्रकंसवधाय प्रोत्साहयति चतुर्भिः —

हत स्म दिष्ट्याऽखिललोककण्टक स्त्वयाखिलेशाद्भुतकर्मणाऽसुरः ।
सुरर्षि रित्याह तवावतीर्णता वधाय दुष्टासुररक्षसां भुवि ॥१७॥

हत इति । हे अखिलेश सर्वेश्वर! अद्भुतानि आश्चर्यकराणि कर्माणि यस्य तेन त्वया । अखिलस्य लोकस्य जनस्य । 'लोकस्तु भुवने वन' इत्यमरः । कण्टकः क्षुद्रः शत्रुः । 'कण्टकः क्षुद्रशत्रौ च कर्मस्थानकदोषयोः' इति विश्वः 'सूच्यग्रे क्षुद्रशत्रौ च रोमहर्षे च कण्टक' इत्यमरः । सोऽसुरः केशी, दिष्ट्या दैवेन हतः । भुवि तवावतीर्णता अवतारः । दुष्टाना मसुराणां रक्षसां च । वधाय संहाराय ।इति सुरर्षि र्नारदः । आह स्म उवाच ॥ १७ ॥

प्रोत्साहप्रकारमेवाह—

अक्रूर एषोऽद्य समेष्यति व्रजं गन्ता विभो श्वः खलकंसपट्टणम् ।
इभं च चाणूर मसह्यमल्लपं कंसं च हन्तासि परश्व एव हि ॥१८॥

अक्रूर इति ॥ हे विभो भगवन् । एष मार्गस्थः अक्रूरः । अद्य व्रजं समेष्यति । त्वं श्वः । खलस्य दुर्जनस्य । कंसस्य, पट्टणं गन्ता गमिष्यसि । परश्व एव इभं कुवलयापीडं नाम गजं । चाणूरनामकं असह्यमल्लपं दुरासदमल्लनायकं च, कंसं च हन्तासि हनिष्यसि हि ॥ १८ ॥

द्रक्ष्यामि तस्यापि सखीन् हतां स्त्वया ततो जरासन्ध मजादि राक्षसान् ।
अथाष्टभार्याहरणं हरे सुमं नीतं च देवाञ्चितपारिजातजम् ॥१९॥

* द्रक्ष्यामीति ॥ अथानन्तरं ; अष्टभार्याहरणं रुक्मिण्याद्यष्टमहिष्याहरणम् । देवै रञ्चितं पारिजातं पारिजातवृक्षजातं सुमं पुष्पं च नीत मानीतं द्रक्ष्यामि इति सुरर्षि राहेति श्लोकद्वयस्यापि पूर्वेणान्वयः ॥ १९ ॥

---

* Commentary is incomplete in both the copies.

आमन्त्र्य कृष्णं निजधाम नारदो ययौ मुदा तस्य कथासु लोलुपः ।
व्योमासुरः काल मवेक्ष्य गोपकान् बिले निधाय व्यनदद् रुषा तदा ॥ २० ॥

आमन्त्र्येति ॥ तस्य श्रीकृष्णस्य। कथासु लोलुपः आसक्तः। नारदः । कृष्ण मामन्त्र्य आपृच्छ्य । मुदा सन्तोषेण। निजधाम देवलोकं । ययौ । तदा नारदकृष्णसँल्लापसमये ; व्योमासुरः यमपुत्रः कश्चिदसुरः । कालं छिद्रं समय मिति यावत् । अवेक्ष्य रुषा कोपेन । गोपकान् गोपालान् । बिले कुहरे 'सुषिरं बिल' मित्यमरः । निधाय स्थापयित्वा। व्यनदन् ननाद । विपूर्वक-नदधातोः कर्तरि लङ् ॥ २० ॥

तदा समालोच्य बिलप्रवेशितान् गोपान् त मादौ परिगृह्य बाहुना ।
भूमौ निपात्याशु रिपुं यमात्मजं हरि र्हरि र्नाग मिवावधी द्रुषा ॥२१॥

तदेति ॥ तदा तस्मिन् समये। हरिः कृष्णः । गोपान् बिलप्रवेशितान् समालोच्य ज्ञात्वा। आदौ यमात्मजं रिपुं तं व्योमासुरं । बाहुना परिगृह्य, रुषा आशु भूमौ निपात्य, हरिः सिंहः। नागं गज मिव । अवधीत् जघान । हन-धातोः कर्तरि लुङि वधादेशः । उपमालङ्कारः ॥ २१ ॥

नीत्वा बिलद्वारि शिलामयं बहिः तस्मा त्स्वगोपैः परिनिस्सृतै र्मुदा
समेत्य तै स्साक मथो गृहं ययौ संचिन्तयन् भाविसमागमं गुरोः ॥ २२ ॥

नीत्वेति ॥ अथानन्तरं ; अयं श्रीकृष्णः , बिलस्य द्वारि द्वारे स्थितां शिलां। बहि र्नीत्वा ; तस्माद्बिलात् परिनिस्सृतैः तैः स्वगोपैः स्वीयगोपकैः साकं ; मुदा समेत्य ; गुरोः पितृव्यस्याक्रूरस्य। भाविसमागमं भाविसन्दर्शनं संचिन्तयन् गृहं ययौ । यातेः कर्तरि लिट् ॥ २२ ॥

कंस-प्रेषणेन भगवद्दर्शनलाभात् आत्मान मभिनन्दति---

चिराय तत्पादरजांसि मस्तके वहामि मे भाग्यमभीप्सितान्यहो ।
अक्रूर एवं मनसा विचिन्तयन् ययौ रथेन प्रियगोकुलं मुदा ॥२३॥

चिरायेति ॥ चिराय बहुकालात्, अभीप्सितानि प्रार्थितानि; तस्य भगवतः, पादरजांसि मस्तके शिरसि; वहामि धरिष्यामि । वर्तमानसामीप्ये लट् । मे भाग्यं; अहो आश्चर्यम् । एवं पूर्वोक्तप्रकारेण, अक्रूरो मनसा विचिन्तयन्; रथेन प्रियं गोकुलं, मुदा ययौ । यातेः कर्तरि लिट् ॥ २३ ॥

अथ पञ्चभि रक्रूरस्य मार्गे भगवद्विषयिणीं चिन्ता मेवाह --

तं बालकं मत्तगजेन्द्रचंक्रमं नन्दस्य सूनुं च कदा नु चक्षुषा ।
द्रक्ष्यामि तत्पादसरोजचिह्नितां गां सर्वदेवै रपि सर्वदेप्सिताम् ॥२४॥

तमिति ॥ मत्तगजेन्द्रस्य गजश्रेष्ठस्य; चंक्रम इव चंक्रमो गमनं यस्य तं; नन्दस्य सूनुं पुत्रं, तं बालकं श्रीकृष्णं । तस्य भगवतः पादसरोजाभ्यां । उपमितसमासः । चिह्निता मङ्किताम् । सर्वदेवै ब्रह्मादिभि रपि सर्वदा ईप्सितां द्रष्टु मभिलषितां, गां भूमिं च, चक्षुषा कदा नु द्रक्ष्यामि । दृशि-धातोः कर्तरि लृटि 'सृजि दृशो' रित्यमागमः ॥ २४ ॥

दिष्ट्याऽमुना नेतु ममुं दुरात्मना संप्रेषितोऽस्मि प्रियदर्शनोत्सुकः ।
तद्दर्शनं वेद इवापि दोषिणः शूद्रस्य मे स्मर्तु मशक्य मन्यथा ॥२५॥

दिष्ट्येति ॥ दुरात्मना दुष्टबुद्धिना । अमुना कंसेन । संप्रेषितेऽस्मि । अन्यथा संप्रेषणाभावे । दोषिणो दोषवतः मे । तद्दर्शनं कृष्णदर्शनं । शूद्रस्य वेद इव, स्मर्तु मपि अशक्यं साध्यं न भवति । पूर्णोपमालङ्कारः ॥ २५ ॥

सुहृत्तमं सर्वमनःप्रवर्तकं नमस्करिष्यामि विलोचनप्रियम् ।
दोर्भ्यां बृहद्भ्यां परिरभ्य मां तं प्रियोक्तिभि र्वक्षसि वक्ष्यते
तमाम् ॥ २६ ॥

सुहृत्तममिति । सर्वेषां मनसां प्रवर्तकं; विलोचनयोः प्रिय मिष्टम्; अतिशयेन सुहृदं सुहृत्तमं; तं श्रीकृष्णं; नमस्करिष्यामि । हरिः श्रीकृष्णः; प्रियोक्तिभिः प्रियवचनैः; बृहद्भ्यां पीवराभ्यां, दोर्भ्यां भुजाभ्यां, मां परिरभ्य आलिंग्य; वक्ष्यतेतमां अतिशयेन भरिष्यति । वहधातोः कर्तरि लृटि 'तिङश्चे' ति तमप् । 'किमेत्तिङव्ययें' त्यांप्रत्ययः ॥ २६ ॥

हृदन्तरस्थः समलोकलोचनः स्वपादमूले प्रणतं विरोधिना ।
कंसेन संप्रेषित मप्यनात्मना सहिष्यतीश प्रतिनन्द्य सादरम् ॥२७॥

हृदिति ॥ हृदन्तरे हृदयमध्ये तिष्ठतीति तथोक्तः । अत एव समं सर्वलोकं लोचयति पश्यतीति समलोकलोचनः । ईशः श्रीकृष्णः । स्वपादमूले प्रणतं नतं । अनात्मना दुर्बुद्धिना । विरोधिना शत्रुणा कंसेन प्रेषित मपि मां । सादरं प्रतिनन्द्य अभिनन्द्य; सहिष्यति अंगीकरिष्यति सहधातोः कर्तरि लृट् । चुरादिगणपाठात् परस्मैपदम् ॥ २७ ॥

अध्यध्व मेवं मनसा विचिन्तयन् श्वाफल्क एनं सति रश्मिमालिनि ।
अस्तं गतेऽसौ च जगाम गोकुलं रथेन योगीव मनोरथं द्रुतम् ॥२८॥

अध्यध्वमिति ॥ असौ श्वफल्कस्यापत्यं श्वाफल्कः अक्रूरः । 'ऋष्यन्धके' त्यादिना अण् । अध्वनि अध्यध्वं; विभक्त्यर्थेऽव्ययीभावः । 'अनश्चे' ति टचि 'नस्तद्धित' इति टिलोपः । मनसा एनं कृष्णं; एवं पूर्वोक्तप्रकारेण; विचिन्तयन्; रश्मिमालिनि सूर्ये । अस्तंगते सति । योगी मनोरथ मिव । रथेन, द्रुतं गोकुलं घोषं; जगाम । गम्लृधातोः कर्तरि लिट् । उपमालङ्कारः ॥ २८ ॥

ददर्श गोष्ठेऽस्य पदानि सर्वदा संप्रार्थनीयानि विधीन्द्रनिर्जरैः ।
पद्मादिरेखाभि रलंकृता न्यसौ करीषसंमिश्रितसैकतस्थले ॥ २९ ॥

ददर्शेति ॥ असा वक्रूरः । पद्मादीनां रेखाभि रलंकृतानि ; विधिर्ब्रह्मा इन्द्रः निर्जरा देवाः तैः । सर्वदा संप्रार्थनीयानि । अस्य श्रीकृष्णस्य । पदानि । गोष्ठे गोस्थाने । करीषैः शुष्कगोमयैः 'तत्तु शुष्कं करीषोऽस्त्री' इत्यमरः । सम्मिश्रिते सैकतस्थले सिकतामयप्रदेशे । ददर्श अपश्यत् । कर्तरि लिट् ॥ २९ ॥

तद्दर्शनाह्लादजनेत्रवारिभिः प्रक्लिन्नगात्राननपाणिकन्धरः ।

रथा दवप्लुत्य सरोमहर्षणो व्यललुठ त्तत्र पदाब्जपांसुषु ॥ ३० ॥

तदिति ॥ रोमहर्षणेन रोमाञ्चेन ; 'रोमाञ्चो रोमहर्षण मित्यमरः । सहितः सरोमहर्षणः अक्रूरः , तेषां पदानां दर्शनेन य आह्लाद स्तस्मात् जातै र्नेत्रवारिभि रश्रुभिः , 'अश्रु नेत्राम्बु रोदनं चास्त्रमश्रु चे' त्यमरः । प्रकर्षेण क्लिन्न मार्द्रं ; 'अर्द्रं सार्द्रं क्लिन्नं तिमितं स्तिमित' मित्यमरः । गात्रं आननं पाणिः कन्धरा यस्य तथाभूतस्सन् । रथादवप्लुत्य , तत्र गोष्ठे । पदाब्जपांसुषु पादपद्मरेणुषु व्यललुठन् लुठति स्म । लुठधातोः णिजन्तात्कर्तरि लुङि सन्वद्भावे दीर्घः ॥ ३० ॥

पत्या गवां दोहनकर्मयोजिता वुत्फुल्लपङ्केरुहतुल्यलोचनौ ।
आनीलपीताम्बरधारिणौ गुरू बृहद्भुजौ केसरितुल्यविक्रमौ ॥३१॥

पत्येति । गवां पत्या नन्देन । दोहनकर्मणि योजितौ नियुक्तौ । उत्फुल्लाभ्यां विकसिताभ्यां पङ्केरुहाभ्यां तुल्ये लोचने ययो स्तौ । आसमन्तात् नीलपीने अम्बरे वस्त्रे भरत इति तथोक्तौ । गुरू लोकगुरू । बृहन्तौ पीवरौ भुजौ ययो स्तौ । केसरिणा सिंहेन तुल्यो विक्रमः पराक्रमो ययो स्तौ तौ । दाशपति र्ददर्शेति चतुर्थश्लोकेनान्वयः ॥ ३१ ॥

लक्ष्मीनिकेता वतिसुन्दराननौ विशालवत्सौ द्विरदेन्द्रगामिनौ ।
वज्राङ्कुशाद्यै रतिचिह्नितक्षिती स्मितेक्षणाभ्यां व्रजयोषितां
प्रियौ ॥ ३२ ॥

लक्ष्मीति । लक्ष्म्याः निकेतौ निवासभूतौ; अतिसुन्दरे आनने ययो स्तौ । विशाले वत्से वक्षसी ययो स्तौ । 'उरो वत्सं च वक्षश्च' त्यमरः । द्विरदेन्द्रौ गजश्रेष्ठाविव गच्छत इति तथोक्तौ; वज्राङ्कुशाद्यैः पदरेखारूपैः अति अत्यन्तं चिह्निता क्षितिः याभ्यां तौ । स्मितेक्षणाभ्यां हासदर्शनाभ्यां । व्रज-योषितां गोपिकानां प्रियौ मनोहरौ ॥ ३२ ॥

उदारगम्भीरगुणोत्तरौ शिशू विराजमानौ वनमालया श्रिया ।
स्रक्चन्दनापीडविमण्डिताङ्गका वुशत्तमौ श्यामलधौतवर्ष्मकौ ॥३३॥

उदारेति ॥ उदारै र्लोकोत्तरैः, गम्भीरै र्ज्ञातु मशक्यैः गुणै रुत्तरौ श्रेष्ठौ; शिशू बालौ । वनमाल्या श्रिया कान्त्या च विराजमानौ । स्रग्भि र्माल्यै-श्चन्दनेन गन्धेन आपीडेन शिरोभूषणेन विमण्डितानि अङ्गानि ययो स्तौ । उशत्तमौ कमनीयौ । श्यामलधौते वर्ष्मणी देहे ययो स्तौ ॥ ३३ ॥

प्रधानदेवेश्वरलोकसम्मतौ जगत्प्रवीरा वसदन्तकारिणौ ।
ददर्श तौ दानपति र्महामति र्दिश श्चतस्रः प्रभया जयत्तमौ ॥३४॥

प्रधानेति ॥ प्रधानदेवौ आदिदेवौ । ईश्वरौ कर्तारौ । लोकसम्मतौ च; विशेषणानां समासः । जगति प्रवीरौ । असतां दुष्टानां अन्तं नाशं कुरुत इति तथोक्तौ । चतस्रः दिशः प्रभया अतिशयेन जयन्तौ जयत्तमौ तौ रामकृष्णौ । महती मति र्यस्य सः । दानपति रक्रूरः । ददर्श । दृशिधातोः कर्तरि लिट् ॥ ३४ ॥

अक्रूरस्य भगवति प्रेमातिशयमाह —

तयो स्समीपे प्रणिपत्य दण्डवत् तद्दर्शनानन्दजबाष्पपूरितः ।
औत्कण्ठ्यरोमाञ्चविकुण्ठगद्गद स्स्वाख्यां समाख्यातु मसौ
शशाक नो ॥ ३५ ॥

तयोरिति ।। असौ स अक्रूरः । तयो रामकृष्णयोः । समीपे दण्डवत् प्रणिपत्य निपत्य । तयोः पूर्वोक्तयोः । दर्शना ज्जातः य आनन्दः तस्माज्जातै र्बाष्पैः पूरितः स्नपितः । औत्कण्ठ्येन रोमाञ्चेन रोमहर्षणेन ; विशेषेण कुण्ठो मन्दः । 'कुण्ठो मन्दः क्रियासु यः' इत्यमरः । गद्गदः गद्गदस्वरस्सन् । स्वस्य आख्यां नामधेयं । 'आख्याह्वे अभिधानं च नामधेयं च नाम चे' त्यमरः । समाख्यातुं वक्तुम् । नो शशाक समर्थो नाभवत् । शकधातोः कर्तरि लिट् ।। ३५ ।।

अक्रूरे भगवतः प्रेमातिशय माह —

अक्रूर माहूय समागतं स्वकं झडि त्यभिप्रेत्य मुदा स्वपाणिना ।
उद्धृत्य दोर्भ्यां परिरभ्य माधवो व्यनीनय द्गेह मसौ सहाग्रजः ।।३६।।

अक्रूरमिति ।। अग्रजेन रामेण सह वर्तत इति सहाग्रजः असौ माधवः श्रीकृष्णः । समागतं, स्वकं स्वीयं । अक्रूरं मुदा झडिति अभिप्रेत्याभिगम्य । स्वपाणिना उद्धृत्य । दोर्भ्यां बाहुभ्यां । परिरभ्य आलिंग्य च । गेहं स्वगृहं । व्यनीनयत् निनाय । नीङ् धातो र्णिजन्ता त्कर्तरि लुङि चङि सन्वद्भावे दीर्घः ।। ३६ ।।

तं पूजयामास मुरारि रागतं सदन्नपानादिभि रञ्जसाऽतिथिम् ।
प्रियं पितृव्यं निजवैरिचोदितं स्रग्गन्धदिव्याम्बरभूषणै रपि ।।३७।।

तमिति ।। मुरारिः श्रीकृष्णः । आगतं प्रिय मतिथिं । तं पितृव्यं पितृभ्रातर मक्रूरं । 'पितृव्य मातुल मातामह पितामह' इति निपातनात्साधुः । निजवैरिणा कंसेन, चोदितं प्रेषित मपि । सदन्नपानादिभिः, स्रग्भि र्माल्यै र्गन्धै र्दिव्याम्बरै र्भूषणै रपि । अञ्जसा पूजयामास । पूजधातो र्णिजन्तादामि कर्तरि लिटि अनुप्रयोगः ।। ३७ ।।

पृच्छन्त मक्रूर ममुं सुखं तदा जगाद नन्दो भयजातसंभ्रमः ।
यस्या स्सुतान् भोजपति र्गृहेऽवधी त्तस्या स्सुतानां कुशलं कथं न्विति ॥ ३८ ॥

पृच्छन्तमिति ॥ तदा तस्मिन् समये । अक्रूरागमनात् भयात् जातः संभ्रमो यस्य स नन्दः। सुखं कुशलं। पृच्छन्त ममुं अक्रूरं। भोजपतिः कंसः। यस्या देवक्याः। सुतान्, गृहे सूतिकागृहे। अवधीत् जघान। तस्या स्सुतानां। कुशलं कथं नु कथं भवेत् इति जगाद। गद्धातोः कर्तरि लिट् ॥ ३८ ॥

अथाय मक्रूरकथासुधारसा न्निपीय नन्दो गतशोकसंज्वरः ।
निनाय रात्रिं निजबालकै स्समं विचिन्तयन्नागमनप्रयोजनम् ॥३९॥

अथेति ॥ अथानन्तरं। अयं नन्दः। अक्रूरस्य कथा एव सुधारसा स्तान् निपीय; श्रुत्वेत्यर्थः। गतौ शोकसंज्वरौ दुःखसन्तापौ यस्मात्तथाभूतः। निजबालकै स्समं रामकृष्णादिबालै स्सह। आगमनस्य प्रयोजनं। विचिन्तयन् सन्। रात्रिं, निनाय अनयत्। नीङ्धातोः कर्तरि लिट् ॥ ३९ ॥

अक्रूर मामन्त्र्य रहो रमाधवः स देवकीजानिसुखं विचारयन् ।
कंसे रिपौ मातुलनाम्नि मातरि स्वानामयं तस्य जनेषु पृच्छति ॥ ४० ॥

अक्रूरमिति ॥ स रमाधवः श्रीकृष्णः। रह एकान्ते। अक्रूर मामन्त्र्य आहूय। देवकी जाया यस्य तस्य वसुदेवस्य; 'जायाया नि' ङिति निङादेशः। सुखं कुशलं विचारयन्। स्वस्य मातुल इति नाम यस्य तस्मिन् रिपौ कंसे। मातरि देवक्यां। तस्य जनेषु भृत्येषु। अनामयं कुशलं। पृच्छति स पप्रच्छ। पृच्छधातोः कर्तरि लट्। स्मयोगाद् भूतार्थकत्वम् ॥ ४० ॥

भगवान् श्रीकृष्णः स्वात्मानं शोचयति—

यन्मन्निमित्तादधिसूतिकागृहं कंसोऽवधीत् बालकषट्क मेतयोः ।
पित्रो रसौ तौ निगलै र्बबन्ध तत्कारागृहे तेन मया कृतं तयोः
॥ ४१ ॥

यदिति ॥ असौ कंसः । यत् यस्मात्कारणात्, मन्निमित्तात् मद्धेतोः एतयो र्बुद्धिस्थयोः पित्रो र्मातापित्रोः ; 'पिता मात्रे' त्येकशेषः । बालकषट्कं पुत्रषट्कं । अधिसूतिकागृहं सूतिकागृहे ; विभक्त्यर्थेऽव्ययीभावः । अवधीत् जघान । हनधातोः कर्तरि लुङि वधादेशः । तौ च पुत्रशोककर्शितौ देवकी-वसुदेवौ । कारागृहे निगलैः शृंखलैः । बबन्ध । तत्तस्मात्कारणात्, तयो र्मातापित्रोः । तेन निमित्तभूतेन मया कृतं पर्याप्तम् । बहुतरक्लेशसंपादकत्वा-दिति भावः । 'युगपर्याप्तयोः कृत' मित्यमरः ॥ ४१ ॥

अक्रूरः भक्तिपारवश्यात् कंसचिकीर्षितं स्वयं वक्तु मशक्तस्सन् नारदात् श्रुतवानसीत्याह—

पृच्छन्त मत्रागमनप्रयोजनं हरिं बभाषेऽय मिति स्म नारदात् ।
त्वमेव जानासि कुमल्लसंगरे हे देव तां तस्य निजां प्रवर्तनाम्
॥ ४२ ॥

पृच्छन्तमिति ॥ अय मक्रूरः, अत्र घोषे आगमनस्य प्रयोजनं । पृच्छन्तं हरिं । हे देव भगवन् । कुमल्लाना दुष्टमल्लानां सङ्गरे युद्धे । तस्य कंसस्य । तां निजां स्वीयां । प्रवर्तनां प्रवृत्तिं । नारदात् त्वं जानास्येव वेत्सि । इति बभाषे उवाच किल । भाषधातोः कर्तरि लिट् ॥ ४२ ॥

एवं गदन्त मक्रूरं प्रति कृष्णः क्रियया प्रत्युत्तरं महापुरुषलक्षणमिति द्योतयन् उत्तरं वक्तीत्याह—

प्रहस्य भूजानि रयं यशोदाजानि ननाथाशु ससीरपाणिः ।
रङ्गोत्सवं द्रष्टुमना मुरारिः गन्तुं पुरीं कंसभुजप्रगुप्ताम् ॥ ४३ ॥

प्रहस्येति ॥ भूर्जाया यस्य सः भूजानि रथं मुरारिः । प्रहस्य स्मित्वा । रङ्गोत्सवं द्रष्टुं मनो यस्य तथाभूतः सन् । कंसस्य भुजाभ्यां प्रगुप्तां पालितां । पुरीं मधुरां । ससीरपाणिः बलरामेण सहितः । आशु गन्तुं यातुं । यशोदा-जानिं नन्दं । ननाथ ययाचे । नाथृ धातोः कर्तरि लिट् ॥ ४३ ॥

आज्ञापयामास सुतौ सगोपकौ द्रव्यै रनेकैः करदानसंमतैः ।
पूर्णै र्दधिक्षीरघृतै स्सवीवधप्रयोजितै र्भाण्डचयै स्सहातितुम् ॥४४॥

आज्ञापयामासेति । स नन्दः । गोपकैः सहितौ सगोपकौ । सुतौ रामकृष्णौ । करस्य राज्ञे देयस्य दानाय संमतैः । योग्यै रनेकै र्बहुभिः । द्रव्यैः । दधिक्षीरघृतैः, पूर्णैः, वीवधेषु शिक्येषु, प्रयोजितैः स्संयोजितैः । भाण्डचयै स्सह । अतितुं गन्तुं । आज्ञापयामास आज्ञप्तवान् । आङ्पूर्वकज्ञाधातोर्णिचि आमि कर्तरि लिट् ॥ ४४ ॥

अथ चतुर्भि र्भगवद्वियोग मसहमानानां गोपीना मवस्थामाह—

नन्देरितं कर्णकठोर माकुलाः श्रुत्वा वचो मोहयुता व्रजाङ्गनाः ।
शुष्यन्मुखाक्षिभ्रुवकंबुकन्थराः तस्थु र्यथा दारुकृताश्च पुत्रिकाः ॥४५॥

नन्देति ॥ व्रजाङ्गना गोप्यः । नन्देन ईरित मुक्तं । कर्णकठोरं निष्ठुरं । वचः श्रुत्वा । आकुलाः व्याकुलाः । मोहयुक्ता स्सत्यः । मुखानि च अक्षिभ्रुवं च ; 'अचतु' रेति निपातनात् साधुः । कंबुकन्थराश्च तेषां समाहारः मुखाक्षि-भ्रुवकम्बुकन्थरं ; प्राण्यंगत्वादेकवद्भावः । शुष्यत् मुखाक्षिभ्रुवकंबुकन्थरं यासां तथोक्तास्सत्यः । दारुकृता दारुनिर्मिता । पुत्रिका यथा प्रतिमा इव । तस्थु-रतिष्ठन् । ष्ठाधातोः कर्तरि लिट् । पूर्णोपमालङ्कारः ॥ ४५ ॥

कृष्णाग्र्यहस्तबहुताडितपीनवृत्त-
वक्षोजकैतवरतिप्रियकन्दुका स्ताः ।
कैश्या द्दलत्कुसुमपूजितपुष्पबाणा-
स्तच्चेतस स्समगमन् समलोकनाथम् ॥ ४६ ॥

कृष्णेति ॥ कृष्णस्य अग्र्याभ्यां श्रेष्ठाभ्यां हस्ताभ्यां बाहुभ्यां बहु भृशं ताडिता मर्दिताः पीनाः पीवराः वृत्ता वर्तुला वक्षोजाः स्तना इति कैतवं येषां तै रतिप्रियस्य मन्मथस्य कन्दुका यासां ताः । कैश्यात्केशपाशात् । गलद्भिः कुसुमैः पूजितः पुष्पबाणो मन्मथः याभि स्तथोक्ताः । तस्मिन् कृष्णे चेतो यासां ता गोप्यः । समलोकनाथं सर्वलोकनाथं कृष्णं । समगमन् अगच्छन् । संपूर्वकगम् धातोः कर्तरि लुङ् । कैतवापह्नुत्यलङ्कारः ॥ ४६ ॥

नेत्रद्वया दुद्गलिताश्रुबिन्दवो विचारखिन्ना नखमण्डलै भृशम् ।
भुवं लिखन्त्यो गलदंशुकाः स्थिताः भ्रश्यद्रणन्नूपुरपादपङ्कजाः
॥ ४७ ॥

नेत्रेति ॥ भृशं विचारेण खिन्नाः । अत एव भ्रश्यन्ति रणन्नूपुराणि येभ्य स्तानि पादपङ्कजानि यासां ताः । गलन्ति अंशुकानि यासां ताः । नेत्रद्वया दुद्गलिताः अश्रुबिन्दवः यासां ताः । नखमण्डलैः पादनखसमूहैः । भुवं लिखन्त्यः सत्यः स्थिताः ॥ ४७ ॥

तद्ध्यानसंछादितबाह्यगोचराः अकारि केनेदमिति स्त्रियोऽब्रुवन् ।
किं कारणं कंसपुरस्य दर्शने ह्याकस्मिकं कार्य महो न विद्यते ॥४८॥

तदिति ॥ तस्य भगवतः, ध्यानेन, सञ्छादिता विस्मारिता बाह्यगोचरा बाह्यविषया यासां ताः । स्त्रियः, इदं भगवत्प्रेरणं, केन अकारि कृतं । कंसपुरस्य दर्शने किं कारणं? आकस्मिक महेतुकं कार्यं लोके न विद्यते हि नास्ति किल । इति अब्रुवन् अहो इत्याश्चर्ये ॥ ४८ ॥

आसां कुचव्याजविमुक्तबन्धकप्रचक्रवाकावलयो मुरारिणा ।
सहैव गन्तुं मधुरां पुरः स्थिताः वितत्य पक्षान् वरकञ्चुकच्छलान्
॥ ४९ ॥

आसामिति ॥ आसां स्त्रीणां। कुचा इति व्याजो येषां तेषां विमुक्तानि बन्धनानि येभ्य स्तेषां प्रकृष्टचक्रवाकानां आवलयः पंक्तयः। मुरारिणा कृष्णेन सह। मधुरां गन्तुं। वराः श्रेष्ठाः कञ्चुका इति छलं येषां तान्। पक्षान् वितत्य प्रसार्य। पुरः स्थिताः। कैतवापह्नुत्यलङ्कारः ॥ ४९ ॥

अथाष्टभिः श्लोकै र्भगवद्विरहकातराः स्त्रियः अक्रूरं निन्दन्ति—

नेतुं हरिं कंसपुरी मिहागतं श्रुत्वैन मक्रूर मतीव दुर्णयम्।
मत्वा त माधर्षितु मेव गोपिकाः प्रचक्रिरे यत्न मवाच्यभाषणैः ॥५०॥

नेतुमिति ॥ गोपिकाः, अक्रूरं, हरिं कृष्णं। कंसपुरीं मधुरां। नेतुं प्रापयितुं। इह घोषे। आगतं श्रुत्वा, अतीव दुर्णयं दुष्टं, मत्वा, अवाच्यभाषणै रश्लीलवाक्यैः। त मक्रूरं। आधर्षितुं निग्रहीतुमेव। यत्नं प्रचक्रिरे। प्रपूर्वककृधातोः कर्तरि लिट् ॥ ५० ॥

निन्दाप्रकारमेवाह—

अयं कथं दारुणकर्मसाधकः सोऽक्रूरनामार्हति सौतिकोत्तमः।
प्रगृह्य न श्चित्तपतिं रमापतिं गन्तुं मुदा तिष्ठति तां विनश्वरः ॥५१॥

अयमिति ॥ दारुणस्य क्रूरस्य कर्मणः साधकः। अत एव सौतिकेषूत्तमः श्रेष्ठः। सोऽयं पुमान्; अक्रूरनाम अक्रूर इति नामधेयं। कथ मर्हति नार्हतीत्यर्थः। नोऽस्माकं। चित्तपतिं हृदयेशं। रमापतिं प्रगृह्य, तां मधुरां। गन्तु मुदा तिष्ठति; अयं विनश्वरः न भविष्यति ॥ ५१ ॥

न लज्जसेऽक्रूर! कथं तदीश्वरान् कुर्व न्ननीशान् व्रजसुन्दरीगणान्।
कुरुष्व भो मुग्धवधूवधोद्यमं ख्यातिस्तु लोके सुख मेधतां तव ॥५२॥

नेति ॥ हे अक्रूर! स श्रीकृष्णः ईश्वरो येषां तान् व्रजसुन्दरीगणान्। न विद्यत ईशो येषां तान्। कुर्वन्, कथं न लज्जसे न त्रपसे। भो

अक्रूर ! मुग्धानां वधूनां । वधोद्यमं हननप्रयत्नं । कुरुष्व कुरु । लोके तव ख्यातिः प्रथा तु । सुखं यथा तथा । एधतां वर्धताम् । एधधातोः कर्तरि संभावनायां लोट् ॥ ५२ ॥

एणाङ्कतुल्याननकञ्जलोचनं नयन्त मक्रूर मितः शपाम किं?
नये त्यमुं मा रुणधाम दुष्ट किं हनाम किं कान्तवियोगकारिणम्
॥ ५३ ॥

एणाङ्केति ॥ एणाङ्केन चन्द्रेण तुल्य माननं, कञ्जे इव लोचने च यस्य तं श्रीकृष्णं । इतो व्रजात् । नयन्तं नेतारं । अत एव कान्तेन कृष्णेन वियोगं करोतीति तथोक्तं । अमु मक्रूरं ; शपाम किं अधिक्षिपाम किं? हे दुष्ट क्रूर! मा नयेति, रुणधाम निरुद्धवत्यो भवाम किं? हनाम संहराम किम्? ॥ ५३ ॥

विशिष्य गोपान् निन्दन्ति —

वृद्धाश्च गोपाः किल मन्दबुद्धयः तेनैव यातुं कृतबुद्धयस्सह ।
मृत्यो र्न नो भीति रतीव दारुणे कर्मण्युपेक्षेदृशि न क्षमा खलु ॥५४॥

वृद्धाश्चेति ॥ तेनैवाक्रूरेण सह । यातुं कृतबुद्धयः निश्चितबुद्धयः । वृद्धा गोपाश्च । मन्दबुद्धयः किल । नः अस्माकं । मृत्यो र्मरणात् । भीति र्न नास्ति । अतीवदारुणे ईदृशि कृष्णनयनरूपे कर्मणि । उपेक्षा । क्षमा युक्ता न खलु ॥ ५४ ॥

कथं वसामात्र विनाऽमुना व्रजे यज्जीवनं रूप मपीच्यरूपिणः ।
मुखं हरे र्या दरहासमण्डितं द्रक्ष्यन्ति ता धन्यतराः पुरस्त्रियः ॥५५॥

कथमिति ॥ अपीच्यं सुन्दरं रूप मस्यास्तीति तथोक्तस्य भगवतो रूपं स्वरूपं । यासा मस्माकं जीवनं जीवहेतुः । ता वयं । अमुना विना श्रीकृष्णेन

विना। अत्र व्रजे। कथं वसाम। दरहासेन मन्दस्मितेन मण्डितं। हरेः श्रीकृष्णस्य। मुखं, याः पुरस्त्रियो द्रक्ष्यन्ति ता एव धन्यतराः ॥ ५५ ॥

कथं महास्मान् स्मरतीशिता पुरा नन्दस्य सूनू रतिकेलिपण्डितः।
संमोहयन् नो निजमायया रहो गन्ताऽधुना नागरिकीमुदे परम् ॥५६॥

कथमिति ॥ रतिकेलिषु सुरतक्रीडासु पण्डितः। निजमायया। रह एकान्ते। नः अस्मान्। संमोहयन् मोहं प्रापयन्। अधुना पर मत्यन्तं। नागरिकीणां पुरस्त्रीणां मुदे सन्तोषाय। गन्ता तृन्नन्तः गच्छन्। ईशिता प्रभुः। स नन्दस्य, सूनुः श्रीकृष्णः। कथ मस्मान्। पुरा स्मरति स्मरिष्यति। स्मृधातोः कर्तरि 'यावत्पुरे' ति लट् ॥ ५६ ॥

एवं ब्रुवन्त्यो विरहातुरा भृशं व्रजस्त्रियः कृष्णविषक्तबुद्धयः।
विसृष्टलज्जा रुरुदुश्च सुस्वरं गोविन्द दामोदर माधवेत्यहो ॥५७॥

एवमिति ॥ भृशं विरहेणातुराः पीडिताः। कृष्णे विषक्ता लग्ना बुद्धि र्यासां ताः, व्रजस्त्रियः। एवं पूर्वोक्तप्रकारेण ब्रुवन्त्यः। विसृष्टा त्यक्ता लज्जा याभि स्तथोक्ताः सत्यः। हे गोविन्द दामोदर माधवेति सुस्वरं मृदु। रुरुदुः रुदन्ति स्म। अहो इत्याश्चर्ये। रुदधातोः कर्तरि लिट् ॥ ५७ ॥

नेत्रद्वयात् बाष्पतरङ्गिणीझरे प्रवर्तमाने सति गान्दिनीसुतः।
रथं समारोप्य बलं बलानुजं ययौ पुरीं पूर्णमनोरथस्तदा ॥ ५८ ॥

नेत्रेति। तदा तस्मिन् समये। गान्दिनीसुतोऽक्रूरः। नेत्रद्वयात् स्त्रीणा मिति शेषः। बाष्पतरङ्गिण्याः अश्रुनद्याः, झरे प्रवाहे; 'प्रवाहो निर्झरो झर' इत्यमरः। प्रवर्तमाने सति। बलं बलरामं, बलानुजं श्रीकृष्णं, रथं समारोप्य। पूर्णमनोरथस्सन्। पुरीं मधुरां। ययौ जगाम। यातेः कर्तरि लिट् ॥ ५८ ॥

पन्थान माचेमु रमी हयोत्तमाः मनोजवा लोचनगोचरानिलाः ।
नन्दादय स्ता ननुसृत्य गोरथै र्ययू रसैः पूरितभाण्डवीवधाः ॥५९॥

पन्थानमिति ॥ मनोजवा मनोवेगाः, लोचनानां नेत्राणां गोचरा विषयाः अनिला वायवः । अमी हयोत्तमा अश्वश्रेष्ठाः । पन्थानं मार्गं । आचेमुः अतिक्रान्ता इत्यर्थः । आङ्पूर्वकचमुधातोः कर्तरि लिट् । नन्दादयो रसैः क्षीरादिभिः । पूरितानि भाण्डानि येषु ते वीवधाः शिक्यानि येषां तथोक्तास्सन्तः । गोरथै श्शकटै स्तान् रामकृष्णादी ननुसृत्य ययु र्जग्मुः । यातेः कर्तरि लिट् । अत्राश्वाः नेत्रगोचरा वायव इति वर्णनात् अधिकाभेदरूपकालङ्कारः ॥ ५९ ॥

हरौ प्रयाते सति गोपिकाजनाः तन्मार्गसंलग्नमनोऽक्षिपङ्कजाः ।
यावन्न तावत्परिलक्ष्यते दृशा तस्थू रथः कृत्रिमपुत्रिका इव ॥६०॥

हराविति ॥ गोपिकाजनाः गोपिकाङ्गनाः । हरौ प्रयाते सति । तस्य कृष्णस्य मार्गे संलग्नं मनः अक्षिपङ्कजानि च यासां तथाविधाः सत्यः । यावत् रथो दृशा न परिलक्ष्यते न दृश्यते, तावत्, कृत्रिमाः दार्वादिनिर्मिताः पुत्रिकाः पाञ्चालिका इव 'पाञ्चालिका पुत्रिका स्यात् वस्त्रदन्तादिभिः कृता' इत्यमरः । तस्थुः । ष्ठाधातोः कर्तरि लिट् । उपमालङ्कारः ॥ ६० ॥

श्रीकृष्णः चिरविरहशङ्काकुलाः गोपिकाः दूतमुखेन सान्त्वयति—

स्त्रिय स्सदाऽ त्यन्तरहस्यवादिनो मुखेन भो यूय मिहैव पश्यत ।
समागतं मा मिति माधवोऽ ब्रवीत प्रेमास्पदं वल्लवमुख्ययोषिताम् ॥६१॥

स्त्रिय इति ॥ वल्लवमुख्यानां गोपश्रेष्ठानां योषितां । प्रेम्ण आस्पदं स्थानं । माधवः श्रीकृष्णः कर्ता ; भो गोप्यः यूयं मां इह घोषे समागतमेव पश्यत । इति सदाऽत्यन्तं रहस्यं वदतीति तथा । तस्य मुखेन दूतस्य मुखेन स्त्रियो गोपी रब्रवी दुवाच । ब्रूञ्धातोः कर्तरि लङ् ॥ ६१ ॥

अक्रूर ! गारुत्मतकान्तिभाक्तृणक्षोणीतले मां शरणं गतं ह्रिया ।
पश्यामि वत्सै रिह तै स्सहेश्वरं ब्रह्माण मद्यापि सरोवरान्तिके ॥६२॥

अक्रूरेति ॥ हे अक्रूर! इहास्मिन् । सरोवरान्तिके तटाकसमीपे । गारुत्मतानां मरकतमणीनां कान्ति भजान्तीति तथोक्तानि तृणानि यस्मिं स्तथोक्ते क्षोणीतले भूप्रदेशे । मां ह्रिया तैः पूर्वमपहृतैः वत्सैस्सह मां शरणं गत मीश्वरं ब्रह्माण मद्यापि पश्यमि । दृशिधातोः कर्तरि लट् । 'पाघ्रे' त्यादिना पश्यादेशः । अत्र ब्रह्माणं वत्सै स्सह शरणप्राप्तिरूपभूतार्थस्य साक्षात्कारस्य वर्णनात् भाविकालङ्कारः । तदुक्त – 'भाविकं भूतभाव्यर्थसाक्षात्कारस्य वर्णन' मिति ॥६२॥

कलिन्दजां प्राप्य सुनिर्मलोदकां रवौ ललाटन्तपरश्मिमण्डले ।
संस्थाप्य बालौ च रथे स रोधसि व्यगाहतागाधजलेऽत्र यामुने ॥६३॥

कलिन्दजामिति ॥ स अक्रूरः । रवौ सूर्ये । ललाटन्तपं; 'असूर्यललाटयो र्दृशि तपो' रिति खशि 'अरुर्द्विष' दिति नुम् । रश्मीनां किरणानां मण्डलं समूहो यस्य तथाभूते मध्याह्ने सतीत्यर्थः । सुनिर्मल मतिस्वच्छ मुदकं यस्यां तां कलिन्दजां यमुनां प्राप्य; रोधसि तटे । रथे बालौ रामकृष्णौ । संस्थाप्य च । यामुने यमुनासम्बन्धिनि । अत्रास्मि न्नगाधे । जले । अगाहत जगाहे । गाहूधातोः कर्तरि लङ् ॥ ६३ ॥

तदन्तरालक्ष्य सहाग्रजं हरिं रथस्थ मत्यन्तविराजदाननम् ।
सोन्मज्ज्य दृष्ट्वा बहि रीश मन्तरा पुन र्न्यमज्ज द्भयजातसंभ्रमः ॥६४॥

तदन्तरेति ॥ सोन्मज्ज्येत्यत्र स उन्मज्ज्येति छेदः । 'सोऽचि लोपे चे' ति सोर्लोपः । सः अक्रूरः । अत्यन्तं, विराज त्प्रकाशमान माननं यस्य तम् । रथस्थं । सहाग्रजं सबलरामं । हरिं श्रीकृष्णं । तस्य जलस्यान्तः मध्ये । आलक्ष्य दृष्ट्वा । भयजातः संभ्रमो यस्य तथोक्तः सन्, । उन्मज्ज्य । उत्थाय । बहिस्तीरे । ईशं हरिं यावद्विशेषणविशिष्टं, दृष्ट्वा, पुन रन्तरा जलमध्ये । न्यमज्जत् ममज्ज । मज्जधातोः कर्तरि लङ् ॥ ६४ ॥

अथ चतुर्भिः श्लोकैः कुलकेनाह—

भूय स्स तत्रैव जलान्तरे वरै रमूल्यमाणिक्यसहस्रमूर्धभिः ।
विराजमाने भुजगासने हरिं ददर्श देवं पुरुषं पुरातनम् ॥ ६५ ॥

भूय इति ॥ सोऽक्रूरः, भूय स्तत्रैव जलान्तरे जलमध्ये । वरैः श्रेष्ठै-रमूल्यानि माणिक्यानि येषु तैः । सहस्रमूर्धभिः सहस्रशिरोभिर्विराजमाने । भुजगासने शेषासने । पुरातनं पुराणं । पुरुषं देव मादिदेवं । हरिं श्रीकृष्णं । ददर्श । दृशिधातोः कर्तरि लिट् ॥ ६५ ॥

उन्निद्रपङ्केरुहतुल्यलोचनं स्मेराननं तं मुचुकुन्दमुक्तिदम् ।
पीताम्बरालम्बिसुवर्णकिङ्किणीनिनादकाञ्चीमणिकान्ति
मण्डितम् ॥ ६६ ॥

उन्निद्रेति ॥ उन्निद्रेण विकसितेन पङ्केरुहेण तुल्ये लोचने यस्य तं । स्मेरं सुन्दरं आननं यस्य । मुचुकुन्दस्य राजर्षेः मुक्तिं ददातीति तथोक्तम् । पीताम्बरे आलम्बिनीनां स्वर्णकिङ्किणीनां निनादो यस्या स्तस्याः काञ्च्याः मेखलाया मणीनां कान्तिभि र्मण्डित मलङ्कृतं तम् ॥ ६६ ॥

विमुग्धमन्दस्मितसुन्दराननं सनन्दनन्दप्रमुखस्तवप्रियम् ।
रूपं दधानं रविकोटिभास्वरं सुभ्रूयुगं सुन्दरपादपङ्कजम् ॥ ६७ ॥

विमुग्धेति ॥ विमुग्धेन सुन्दरेण मन्दस्मितेन सुन्दर माननं यस्य तं । सनन्दनन्दप्रमुखानां तु यः स्तवः स प्रियः यस्य तं ; रविकोटिवत् भास्वरं रूपं दधानं । शोभनं भ्रूयुगं यस्य तं । सुन्दरे पादपङ्कजे यस्य तम् ॥ ६७ ॥

भक्तौघसन्दर्शितपादपल्लवं वन्दारुबृन्दारकबृन्दपूजितम् ।
विरिञ्चिकालाक्षविमोहदं परं श्रीवत्सचिह्नाङ्कितपीनवक्षसम् ॥ ६८ ॥

भक्तेति ॥ भक्तौघस्य सन्दर्शितं पादपल्लवं येन तं ; वन्दारूणां अभिवादकानां 'वन्दारु रभिवादके' इत्यमरः । बृन्दारकाणां देवानां बृन्देन

संघेन पूजितम् । विरिञ्चि ब्रह्मा, फालाक्ष शिवः तयोः विमोहं ददातीति तथोक्तम् । परं श्रेष्ठं श्रीवत्सचिह्नेन दक्षिणावर्तरोमसमूहेनाङ्कितं चिह्नितं । पीनं वक्षो यस्य तम् । एवंभूतं हरिं ददर्शेत्यन्वयः ॥ ६८ ॥

अथ त्रिभि रक्रूरो जले दृष्टं भगवन्तं स्तौति—

नमो नमः कारणमत्स्यमूर्तये कूर्माय मन्थाचलभारधारिणे ।
जितारये यज्ञवराहरूपिणे प्रह्लादभक्ताय नृसिंहरूपिणे ॥ ६९ ॥

नमो नम इति ॥ कारणेन निमित्तेन मत्स्यस्य मूर्ति र्यस्य तस्मै । मन्थाचलस्य मन्थपर्वतस्य भारं धरतीति तथोक्ताय कूर्माय । जिता अरयो येन तस्मै यज्ञवराहरूपिणे । प्रह्लादो भक्तो यस्य तस्मै नृसिंहरूपिणे । नमो नमः ॥ ६९ ॥

जेतुं बलिं वामनरूपधारिणे त्रिसप्तवारं हतराजकोटये ।
दुर्वृत्तलङ्काधिपरावणारये कृष्णाय ते बालकरूपधारिणे ॥ ७० ॥

जेतुमिति ॥ बलिं बलिचक्रवर्तिनं जेतुं, वामनरूपं धरतीति तादृशाय । त्रिसप्तवारं एकविंशतिकृत्वः हता राजकोटयो येन तस्मै । दुर्वृत्तस्य लङ्काधिपस्य रावणस्य, 'विश्रवसो विश्रवणरवणा' विति प्रकृतेः रवणादेशः । तस्यापत्यं रावणः; लोकान् रावयतीति वा रावण इति तस्य अरये शत्रवे । बालकस्य रूपं धरतीति तादृशाय । कृष्णाय । ते तुभ्यं । नमो नमः ॥ ७० ॥

बुद्धाय सर्वोत्तमबुद्धिधारिणे करिष्यमाणोत्तमकल्किरूपिणे ।
अनन्तभोगोत्तमतल्पशायिने दशावताराय रमाधवाय ते ॥ ७१ ॥

बुद्धायेति ॥ सर्वोत्तमां बुद्धिं धरतीति तथोक्ताय । बुद्धाय बुद्धावताराय । करिष्यमाण मुत्तमकल्किरूप मस्यास्तीति तथा तस्मै । अनन्तस्य

शेषस्य भोगो देह एवोत्तमं तल्पं शय्या तस्मिन् शेत इति तादृशाय। दशावतारा यस्य तस्मै। रमाधवाय। ते तुभ्यं। नमो नम इति सर्वत्रान्वयः ॥७१॥

स्तुत्वैव माद्यं जगदीश माह्निकं कृत्वा रुरोहाशु रथं महामतिः ।
श्वफल्कजं स प्रभु राह विस्मयो जले त्वया दृष्ट इवेति भाति मे
॥ ७२ ॥

स्तुत्वेति ॥ महामति रक्रूरः। आद्यं जगदीशं श्रीकृष्णं। एवं पूर्वोक्तप्रकारेण स्तुत्वा, आह्निकं अह्नि कर्तव्यं कर्म कृत्वा, आशु रथ मारुरोह। प्रभुः। श्रीकृष्णः जले, त्वया विस्मयो दृष्ट इव मे भातीति, श्वफल्कज मक्रूर माह स्म उवाच। ब्रूञ्धातोः कर्तरि लट् ॥ ७२ ॥

एवं पृच्छन्तं भगवन्तं प्रति अक्रूरः प्रत्युत्तर माह—

सर्वत्र कार्येषु विभो विभाससे त्वद्दर्शना दप्सु न चित्र मस्ति मे ।
न चित्र मेत त्त्वयि विश्वरूपिणि ज्ञातं मया सर्व मिदं त्वदात्मकम्
॥ ७३ ॥

सर्वत्रेति। हे विभो कृष्ण। सर्वत्र कार्येषु सर्वपदार्थेषु। त्वमेव विभाससे। अप्सु त्वद्दर्शनात् मे चित्रं नास्ति न विद्यते। विश्वरूपिणि एतत् बहि रन्तश्च दर्शनं न चित्रम्। इदं सर्वं प्रपञ्चजातं त्वदात्मकं त्वत्स्वरूप मिति मया ज्ञातम् ॥ ७३ ॥

तस्मा द्विनिर्गत्य ययु र्महारथा अस्तं गते तस्य मयूखमालिनि ।
पुरोपकण्ठं पुरुषोत्तम स्ततः प्राह स्म गच्छेति स गान्दिनीसुतम्
॥ ७४ ॥

तस्मादिति ॥ महारथाः कृष्णादयः। तस्मा द्यमुनातीरात्। विनिर्गत्य। मयूखमालिनि सूर्येऽस्तं गते सति, तस्य कंसस्य। पुरोपकण्ठं ययुः प्रापुः।

ततोऽनन्तरं। स पुरुषोत्तमः श्रीकृष्णो गान्दिनीसुत मक्रूरं। प्राह स्म उवाच। ब्रूञ्धातोः कर्तरि लट्॥ ७४॥

अक्रूरो भगवन्तं स्वभवन मानेतुं प्रार्थयते—

आगच्छ यामो गृह मद्य मे हरे पुनीहि पादाब्जरजोभि रित्यसौ
आहैनमिन्द्रादिभि रीप्सितैः स्म तै स्सहानुगै र्गोपगणै र्गुणोत्तरैः
॥ ७५॥

आगच्छेति॥ हे हरे! गुणोत्तरै र्गुणश्रेष्ठै रनुगै स्तै र्गोपगणै स्सह आगच्छ! यामः। इन्द्रादिभि रीप्सितैः प्रार्थितैः। पादाब्जरजोभि रद्य मे गृहं पुनीहि पवित्रीकुरु। इति असा वक्रूरः। एनं श्रीकृष्ण माह स्म उवाच॥७५॥

कंस(वध?)स्य आशु कर्तव्यत्वं प्रकटयन् उत्तरमाह—

संप्रार्थयन्तं हरिराह गान्दिनीसुतं प्रियोक्त्या स्म निहत्य भोजपम्।
समागमिष्यामि गृहं तवेति सद्भक्तेषु मे मैत्र मलं प्रदर्शयन्॥ ७६॥

संप्रार्थयन्तमिति॥ हरिः श्रीकृष्णः। पूर्वोक्तप्रकारेण संप्रार्थयन्तं। गान्दिनीसुत मक्रूरं प्रति। भोजपं कंसं। निहत्य हत्वा। सद्भक्तेषु, मे मैत्रं, अलं अत्यन्तं प्रदर्शयन्। तव गृहं। समागमिष्यामि इति, प्रियोक्त्या आहस्म उवाच॥ ७६॥

निवेद्य कंसाय सहाग्रजं हरिं समागतं दानपति स्सगोपकम्।
गृहं ययौ वच्युतपादमानसः कृष्णस्य तस्यागमनं विचिन्तयन्॥७७॥

निवेद्येति॥ दानपति रक्रूरः। कंसाय। गोपकै स्सहितं सगोपकं अग्रजेन बलरामेण सहितं सहाग्रजं। हरिं श्रीकृष्णं। समागतं निवेद्य। अच्युतस्य पादयो र्मानसं मनो यस्य तथोक्तः। अत एव तस्य श्रीकृष्णस्यागमनं विचिन्तयन् सन्। गृहं ययौ। यातेः कर्तरि लिट्॥ ७७॥

अथ द्वाभ्यां पौराणां भगवति प्रेमातिशयं वर्णयति —

पुरं स कंसस्य सहानुगै र्हरि र्विवेश सौधस्थजना न्विमोहयन् ।
विसृज्य बालां स्तनपायिनो जवाद् द्रष्टुं समाजग्मु रमुं मृगीदृशः ॥ ७८ ॥

पुरमिति ॥ स हरिः श्रीकृष्णः सौधस्थजनान् विमोहयन् संमोहयन् अनुगै रनुचरै स्सह । कंसस्य पुरं मधुरां विवेश प्रविवेश । मृगीदृशः पुरस्त्रियः स्तनपायिनो बालान् शिशून् । विसृज्य त्यक्त्वा अमुं श्रीकृष्णं । द्रष्टुं । जवा त्समाजग्मुः आगतवत्यः । समाङ् पूर्वक गम्लृधातोः कर्तरि लिट् । 'गम हने' त्युपधालोपः ॥ ७८ ॥

मृगीदृशां मानसलोचने तदा तस्मिन् शिशौ सर्वहृषीकदैवते ।
अदृष्टपूर्वे भवमोचके हरौ दृढं विलग्ने न निवृत्ति मीयतुः ॥७९॥

मृगीदृशामिति । तदा मृगीदृशां पुरस्त्रीणां । मानसलोचने सर्वेषां हृषीकाणा मिन्द्रियाणां दैवते प्रवर्तके । दृष्टपूर्वो न भवतीति अदृष्टपूर्व स्तस्मिन् । भवमोचके संसारहरे । तस्मिन् शिशौ हरौ श्रीकृष्णे । दृढं विलग्ने निवृत्तिं नेयतुः न प्रापतुः । इण् धातोः कर्तरि लिट् ॥ ७९ ॥

अथ चतुर्भिः रजकवधलीला वर्ण्यते—

सद्वस्त्रनिर्णेजक देहि सम्पदां पात्रं भव स्यम्बरसंचयां स्तव ।
अत्युत्तमा नम्बुजरागरञ्जिता नयाचतैनं वरदोऽप्यमा निति ॥८०॥

सद्वस्त्रेति ॥ हे सद्वस्त्रनिर्णेजक उत्तमवस्त्रनिर्णेजक रजक ! अत्युत्तमान् । अम्बुजानां पद्मानां राग इव रागो यस्य सः तेन रंजितान् । तव अम्बर सञ्चयान् देहि । सम्पदां पात्रं भवसीति असौ श्रीकृष्णः वरदोऽपि, एतं रजकं । अयाचत ययाचे । याचधातोः कर्तरि लङ् ॥ ८० ॥

रजकस्य मरणहेतुकं दुर्वृत्त माह—

वनेषु नित्यं नु भवद्विधै र्जनै रीदृक् सुवासांसि धृतानि किं पुरा ।
स्मेत्याह तं देव ममौ सुदुर्मदो दण्ड्या भवन्तः प्रभवेयु रञ्जसा ॥८१॥

वनेष्विति ॥ भवद्विधै र्जनैः गोपालै रित्यर्थः । वनेषु, ईदृशानि सुवासांसि पुरा नित्यं । धृतानि किं नु? भवन्तः अञ्जसा दण्ड्याः दण्डार्हाः प्रभवेयु रिति । सुदुर्मदः अतिमत्तः । असौ रजकः । तं देवं श्रीकृष्णं । आहस्म उवाच ॥८१॥

हस्तेन देवो रजकस्य विग्रहा च्छिरो ऽहर द्वस्त्रपरीप्सया विभुः ।
दिशो विदुद्राव विसृज्य वाससां कोशान् जन स्सानुचर स्तदाग्रहीत्
॥ ८२ ॥

हस्तेनेति ॥ देवः प्रकाशमानः विभुः श्रीकृष्णः । वस्त्रपरीप्सया वस्त्रग्रहणेच्छया । हस्तेन । रजकस्य विग्रहात् कायात् । शिरः अहरत् जहार । जनो रजकजनः । वाससां कोशान् विसृज्य दिशो विदुद्राव पलायत । तदा सानुचरः ता निति शेषः । तान् वस्त्रसञ्चयान् । अग्रहीत् जग्राह । ग्रहधातोः कर्तरि लुङ् ॥ ८२ ॥

अलङ्कृतौ मत्तगजेन्द्रचङ्क्रमौ सुवस्त्रभूषाभि रिमौ सुरोत्तमौ ।
समुल्लसन्नीलवलक्षदन्तिना विव स्थितौ सानुचरौ विचेरतुः ॥८३ ॥

अलङ्कृताविति ॥ सुवस्त्रै र्भूषाभि र्भूषणै श्चालंकृतौ । मत्तगजेन्द्रस्य चंक्रम इव चंक्रमो गमनं ययो स्तौ । सुरोत्तमौ । समुल्लसन्तौ नीलवलक्षौ (कृष्ण) गौरौ 'वलक्षो धवलोऽर्जुनः' इत्यमरः दन्तिनौ गजाविव स्थितौ, सानुचरौ इमौ रामकृष्णौ । विचेरतुः । चरधातोः कर्तरि लिट् ॥ ८३ ॥

मालाकारस्य भाग्यातिशय माह —

दृष्ट्वा सुदामान ममूल्यमाल्यदं तावग्रहीष्टां कुसुमोत्तमस्रजः ।
तत स्स तस्मा अचलां श्रियं ददौ मुदा हरिः कान्तियशोबलानि च
॥ ८४ ॥

दृष्ट्वेति ॥ तौ रामकृष्णौ । अमूल्यानि माल्यानि ददातीति तथोक्तं । सुदामानं मालाकारं । दृष्ट्वा । कुसुमोत्तमानां स्रजो मालिकाः । अग्रहीष्टां गृहीतवन्तौ । ततोऽनन्तरं हरिः श्रीकृष्णः । मुदा सन्तोषेण । तस्मै मालाकाराय । अचलां स्थिरां । श्रियं सम्पदं । कान्ति देहकान्तिः । यशः कीर्तिः । बल मन्तस्सारः तानि च । ददौ दत्तवान् । दाधातोः कर्तरि लिट् ॥ ८४ ॥

अथ षड्भिः कुब्जासमागम माह—

इत्याह कुब्जां वनिता मसौ ततः का त्वं वरार्हे कथय स्म भामिनि ।
क यासि मे देहि विलेपनं प्रियं श्रेयो भविष्यत्यचिरेण ते प्रिये ॥८५॥

इतीति ॥ ततोऽसौ कृष्णः । हे वरार्हे पूज्ये । भामिनि । का त्वं क्व यासि । कथय; प्रियं विलेपनं चन्दनं मे मह्यं देहि । हे प्रिये ! अचिरेण ते तव । श्रेयो भविष्यति । इति कुब्जां वनिता माह स्म । ब्रूञ्धातोः कर्तरि लट् ॥ ८५ ॥

इति ब्रुवन्तं त मुवाच साऽङ्गना दास्यस्मि भो भोजपतेः प्रियंकरा ।
मद्भावितं चन्दन मिन्दुसुन्दरं दास्यामि कोऽन्योऽर्हति तद्गृहाण ते ॥ ८६ ॥

इतीति ॥ साऽङ्गना कुब्जा कर्त्री । इति ब्रुवन्तं हरिं । भोः पुरुषोत्तम' अहं, भोजपतेः कंसस्य प्रियंकरा । 'क्षेम प्रिय मद्रेऽण् चे' ति खचि 'अरुर्द्विषत्!' दिति मुम् । दासी परिचारिका अस्मि । मया भावितं । निष्पादितं इन्दुसुन्दरं धावल्यशैत्याभ्यां इन्दुवन्मनोज्ञं । चन्दनं । ते तुभ्यं दास्यामि । अन्य स्त्वदन्यः कोऽर्हति त तस्मात्कारणात् ग्रहाण । ग्रहधातोः कर्तरि लोट् 'हलः श्न' इति शानजादेशः । इति उवाच ॥ ८६ ॥

तत स्त्रिवक्रार्पितचन्दनेन तौ सुरूषितौ माल्यविमण्डिताङ्गकौ ।
विरेजतू राजसुतौ महाबलौ महेन्द्रनीलस्फटिकाचलाविव ॥ ८७ ॥

तत इति ॥ ततोऽनन्तरं त्रिवक्रया कुब्जयाऽर्पितेन समार्पितेन, चन्दनेन सुष्ठु; रूषितौ लिप्तौ । माल्यै र्विमण्डितानि भूषितानि अङ्गानि ययो स्तौ । महाबलौ तौ राजसुतौ रामकृष्णौ । महेन्द्रनीलस्फटिकाचलाविव नीलश्वेतपर्वताविव । विरेजतुः बभतुः । विपूर्वकराजतेः कर्तरि लिट् । पूर्णोपमालङ्कारः ॥८७॥

आक्रम्य वक्रां प्रपदेन पादयोः समं गृहीत्वा चुबुके च पाणिना ।
क्षणेन कुब्जा मुदनीनम द्धरिः विद्योतयन् स्पर्शनपुण्यमाश्वसौ ॥८८॥

आक्रम्येति ॥ असौ श्रीकृष्णः । वक्रां त्रिवक्रां कुब्जां पादयोः प्रपदेन पादाग्रेण ; 'पादाग्रं प्रपदं पाद' इत्यमरः । आक्रम्य, चुबुके, अधरोष्ठस्य अधोभागे, पाणिना गृहीत्वा । स्पर्शनजं पुण्यं । आशु विद्योतयन्, क्षणेन समं यथा तथा उदनीनमत् उन्नमितवान् । ऋज्वीं चकारेत्यर्थः । उत्पूर्वक नम्धातोर्णिचि कर्तरि लुङ् ॥ ८८ ॥

नीलालका पीनपयोधरा वरा सम्पन्नबिम्बाधरकम्बुकन्धरा ।
प्रवृद्धरोमाञ्चविबोध्यहृच्छया रन्तुं तदा सा हरि माह्वय द्गृहे ॥८९॥

नीलेति ॥ नीला अलकाः कुन्तला यस्याः सा । पीनौ पयोधरौ स्तनौ यस्यास्सा । संपन्नं परिणतं बिम्बं बिम्बफल मिवाधरं यस्या स्सा । कम्बुः शङ्ख इव कन्धरा ग्रीवा यस्या स्सा । 'शङ्खः स्या त्कम्बु रस्त्रियौ' इत्यमरः । संपन्नबिम्बाधरा च सा कम्बुकन्धरा चेति विशेषणयो स्समासः । प्रवृद्धेन रोमाञ्चेन रोमहर्षणेन विबोध्योऽ नुमेयः हृच्छयो मन्मथो यस्या स्सा । वरा सा कुब्जा । तदा हरिं श्रीकृष्णं । गृहे रन्तुं, आह्वयत आहूतवती । आङ्पूर्वक ह्वेधातोः कर्तरि लङ् ॥ ८९ ॥

तां सान्त्ववादै र्विनिवर्त्य माधवो वणिक्पथेऽसौ धनुभङ्गचिन्तया ।
बभाज गच्छन् धनुषां गृहं मुदा राज्ञो भयं सञ्जनयन् सुरक्षितम्
॥ ९० ॥

तामिति ॥ असौ माधव स्तां कुब्जां सान्त्ववादैः कालान्तरे आगमिष्यामीति प्रियवचनै र्विनिवर्त्य, धनो श्चापस्य भङ्गचिन्तया 'भृमृशी' त्यादिना औणादिक उप्रत्ययः । 'धनुना च धनुं विदु'रिति', 'धनुरिवाजनि वक्र' इति च श्रीहर्षः । 'धनुश्चापो' इत्यमरः । वणिक्पथे गच्छन् । राज्ञः कंसस्य । भयं संजनयन् । सुरक्षितं धनुषां गृहं । मुदा बभाज भेजे । भजधातोः कर्तरि लिट् ॥ ९० ॥

दृष्ट्वा धनुं दर्शनमात्रभीतिदं प्रगृह्य हस्तेन स लीलया नदन् ।
बभञ्ज मध्ये मिषतां धराभृता मिवेक्षुकाण्डं कलभो रमापतिः ॥ ९१ ॥

दृष्ट्वेति ॥ स रमापतिः कृष्णः । दर्शनमात्रेण दर्शनेनैव । भीतिदं भयोत्पादकं । धनुं दृष्ट्वा, लीलया हस्तेन प्रगृह्य । मिषतां पश्यतां धराभृतां राज्ञां; अनादरे षष्ठी । पश्यतो राज्ञ अनादृत्येत्यर्थः । कलभो बालगजः 'त्रिंशद्वर्षस्तु कलभः' इत्यमरः । इक्षुकाण्डं इक्षुदण्डमिव । बभञ्ज । भञ्जधातोः कर्तरि लिट् । पूर्णोपमालङ्कारः ॥ ९१ ॥

श्रुत्वा धनुर्भङ्ग मसौ भयङ्करं हतावशेषाननतः परं त्रसन् ।
कंस स्तदाऽऽसन्नकृतान्तसेवकः प्रवर्तयामास स मल्लसङ्गरम् ॥९२॥

श्रुत्वेति ॥ तदा तत्क्षण एवासौ स कंसः । हतेभ्यः हततनूरक्षकेभ्यः ये अवशेषाः तेषा माननतः मुखात् । भयङ्करं धनुर्भङ्गं श्रुत्वा, परं त्रसन्, आसन्नाः, कृतान्तसेवकाः यमभटाः यस्य सः । मल्लसङ्गरं मल्लयुद्धं । प्रवर्तयामास । वृतुधातो र्णिजन्ता दामि अनुप्रयोगे लिट् ॥ ९२ ॥

समीयु रामोदयुताः पुरौकसः यानै र्मुरारिं शतशो विलोकितुम् ।
स्थानेषु योग्येषु सुराश्च पुष्करे विमानजालै रतुलै स्सयोषितः ॥९३॥

समीयुरिति ॥ पुरौकसः पौराः । मुरारिं श्रीकृष्णं । विलोकितुं द्रष्टुं । आमोदयुताः सन्तः । योग्येषु उचितेषु । स्थानेषु । शतशः यानै र्वाहनैः । समीयुः समवेता बभूवुः । सुरा देवाश्च । सयोषितः सस्त्रीका स्सन्तः । अतुलै रनुपमैः । विमानजालैः । पुष्करे आकाशे । समीयुः । संपूर्वकइण्धातोः कर्तरि लिट् । 'दीर्घः इणः किती' ति अभ्यासदीर्घः । प्रकृतविषयकतुल्ययोगितालङ्कारः । तदुक्तम्—'वर्ण्यानामितरेषां वा धर्मैक्यं तुल्ययोगिता' ॥ ९३ ॥

आजग्मु रुत्का रणभेरिकायुताः नन्दादय स्स्वाततकुञ्जकाश्च ते ।
अन्येऽन्धका स्सर्वविदेशवासिनो विलोकितुं राजसुतौ च सङ्गरे ॥९४॥

* ... .
उत्का उन्मनसः सन्तः । आजग्मुः । नन्दादयः वृष्णयः । अन्धकाः । स्वाततकुञ्जकाः स्वाततश्रेष्ठाः । अन्ये सर्वदेशवासिनश्च आजग्मुः । आङ्पूर्वकगम्लृधातोः कर्तरि लिट् । तुल्ययोगितालङ्कारः ॥ ९४ ॥

मञ्चं तदोत्तुङ्गसुवर्णमण्डितं स आरुरोहाशु दिवं व्रजन्निव ।
तौ रामकृष्णौ समलङ्कृताङ्गकौ समीयतू रङ्गमपीषतू रणम् ॥९५॥

मञ्चमिति ॥ तदा स कंसः । उत्तुङ्ग मुन्नतं । सुवर्णेन मण्डितं अलङ्कृतं । मञ्चं, आशु, दिवं स्वर्गं । व्रजन्निव आरुरोह आरूढवान् । रुह धातोः कर्तरि लिट् । तौ रामकृष्णौ । समलंकृताङ्गकौ सन्तौ रङ्गं समीयतुः प्रापतुः । रण मपि युद्ध मपि । ईषतु रैच्छताम् । इषधातोः कर्तरि लिट् । उक्तविषया स्वरूपोत्प्रेक्षा ॥९५॥

आधोरणाध्वप्रतिरोधकं हरि र्जगाद कोपा न्नय हस्तिनं त्विति ।
नागं चुचोदैन मसौ तमागतं जग्राह कृष्णं करलीलया करी ॥९६॥

आधोरणेति ॥ हरिः श्रीकृष्णः । हे आधोरण हस्तिपक ! 'आधोरणे हस्तिपक' इत्यमरः । अध्वप्रतिरोधक हस्तिनं कुवलयापीडाख्यं गजं न

---

*(ख) पुस्तकेऽपि असम्पूर्णा व्याख्या ।

अपनय । इति कोपात् जगाद । असौ हस्तिपकस्तु आगतं तं श्रीकृष्ण प्रति। एनं । नागं गजं चुचोद प्रेरयामास ! करी गजः । करलीलया हस्तलाघवेन । कृष्णं जग्राह अग्रहीत् । ग्रहधातोः कर्तरि लिट् ॥ ९६ ॥

प्रगृह्य नागं नगतुङ्ग मच्युतः नागं गरुत्मा निव लीलयैव सः ।
उत्पाटच दन्तौ व्यनयन्निकेतनं कालस्य सिंहो वनदन्तिनं यथा ॥९७॥

प्रगृह्येति ॥ सः अच्युतः कृष्णः । नगतुङ्गं पर्वतोन्नतं । नागं गजं गरुत्मान् नाग सर्पमिव । लीलयैव विलासेन । प्रगृह्य । दन्ता नुत्पाटच । सिंहो वनदन्तिनं यथा वनगज मिव । कालस्य निकेतनं गृहं । व्यनयत निनाय । नीङ् धातोः कर्तरि लङ् । पूर्णोपमालङ्कारः ॥ ९७ ॥

दन्तायुधौ तौ जयतां वरौ तदा रङ्गं समाजग्मतु रन्तकोपमौ ।
शृङ्गारवीरादिरसैकविग्रहो रङ्गोत्सवे काम इवाच्युतो बभौ ॥ ९८ ॥

दन्तेति ॥ जयतां वरौ । दन्ता वायुधौ ययोस्तौ । अत एव अन्तको-पमौ यमसदृशौ । रामकृष्णौ । रङ्गं रङ्गप्रदेशं । समाजग्मतुः । तदा अच्युतः श्रीकृष्णः । रङ्गोत्सवे । रसैकविग्रहो शृंगारवीरौ आदिर्येषां ते रसा एव एको मुख्यः विग्रहो यस्य सः । काम इव बभौ । भातेः कर्तरि लिट् ॥ ९८ ॥

अद्राक्षु रेनं शठमल्लनायकाः नारीनृगोपोत्तमभूपभोजपाः ।
असङ्गिन श्चाशनिकामपूरुषस्वसूनुशास्तान्तकमोक्षदं हरिम् ॥९९॥

अद्राक्षुरिति ॥ शठा वञ्चकाः मल्लनायकाः मल्लश्रेष्ठाः । नार्यः, नरः पुरुषाः, गोपोत्तमो नन्दः, भूपा राजानः, भोजपः कंसः । असङ्गिनश्च विरक्ताः योगिनश्चेत्यर्थः । एनं हरिं श्रीकृष्णं । अशनिं दम्भोलिं, 'दम्भोलि रशनि र्द्वयो' रित्यमरः । कामं मन्मथं, पूरुषं पुरुषोत्तम, स्वसूनुं शास्तारं शिक्षकं, अन्तकं यमं; मोक्षदं विष्णु । अद्राक्षुः ददृशुः । दृशि-धातोः कर्तरि लुङ् । उल्लेखालङ्कारः । यथासंख्यालङ्कारश्च । तथा च विजातीयसङ्करः ॥ ९९ ॥

सभ्या इति द्वौ प्रसमीक्ष्य बालकौ परस्परं तथ्य महो बभाषिरे ।
जाता विमा वानकदुन्दुभेः सुतौ नीतौ रहस्यं प्रति नन्दगोकुलम्
॥ १०० ॥

सभ्या इति ॥ सभ्याः सभासदः । द्वौ बालकौ रामकृष्णौ । प्रसमीक्ष्य दृष्ट्वा । इमौ आनकदुन्दुभेः सुतौ जातौ जातमात्रौ सन्तौ । नन्दगोकुलं प्रति रहस्य मप्रकाशं यथा तथा नीतौ इति परस्परं । तथ्यं यथार्थं । बभाषिरे । अहो आश्चर्यम् । भाष धातोः कर्तरि लिट् ॥ १०० ॥

अनेन कृष्णेन हतेति पूतना दैत्या स्तृणावर्तबकादय स्तथा ।
कालीय ऊचुश्च विवासितो ह्रदात् प्रलम्बधेनू हलपाणिना हतौ ॥१०१॥

अनेनेति ॥ अनेन पुरोवर्तिना । कृष्णेन । पूतना हता । तथा तृणावर्तबकौ आदी येषां ते दैत्याश्च हताः । कालीयश्च ह्रदात् विवासितः निष्कासितः । प्रलम्बश्च धेनुकश्च तौ हलपाणिना रामेण हता विति ऊचुः । वचधातोः कर्तरि लिट् ॥ १०१ ॥

श्रीकृष्णदेवपदपद्ममरन्दपान-
मत्तालिना रचितकाव्यकथासुधासु ।
श्रीपुण्यकोटिविदुषा विदुषां मुदे न
सर्गोऽष्टमः शुकनिकूजनवत् कि मेषः ॥ १०२ ॥

श्रीकृष्णेति ॥ श्रीकृष्णदेवस्य पदमेव पद्मं, तस्य मरन्दपानेन मत्तेन अलिना भ्रमरेण । पुण्यकोटिना विदुषा । रचितस्य काव्यस्य कथा एव सुधास्तासु । एष अष्टमः सर्गः । शुकस्य निकूजनवत् । विदुषां मुदे न किं ? सन्तोषायैवेत्यर्थः ॥ १०२ ॥

॥ इति श्रीकृष्णविलासे सव्याख्याने पुण्यकोटिविरचिते
अष्टमस्सर्गः ॥

नवमस्सर्गः

भव्यं ब्रुवाणेषु सभासदादिषु प्रोवाच चाणूरकमल्लनायकः ।
तौ रामकृष्णाविति मल्लसङ्गरे वयं प्रियं नः करवाम भूपतेः ॥ १ ॥

भव्यमिति ॥ सभासदः सभ्याः आदि येषां तेषां जनेषु । भव्यं कृष्णाय मङ्गलं भूयादिति शुभं ब्रुवाणेषु सत्सु । चाणूरकमल्लनायकः चाणूरनामको मल्लश्रेष्ठः मल्लसङ्गरे मल्लयुद्धे । नः अस्माकं भूपतेः राज्ञः कंसस्य । वयं प्रियं करवाम कुर्याम इति । तौ रामकृष्णौ । प्रोवाच जगाद । प्रपूर्वकवचधातोः कर्तरि लिट् ॥ १ ॥

युध्यस्व हे कृष्ण मया त्व मेककः स मुष्टिकोऽसौ हलिनेति युध्यताम् ।
गदन्त माह स्म त मच्युतो मृधे नावां समर्थौ पर मत्र बालकौ ॥ २ ॥

युध्यस्वेति ॥ हे कृष्ण! एककः एकाकी । 'एकादाकिनिच्चासहाये' इत्याकिनिच् प्रत्ययः । 'एकाकी त्वेक एककः' इत्यमरः । त्वं मया सह युध्यस्व । सः असौ मुष्टिकः हलिना बलरामेण सह यु यता मिति गदन्तं तं चाणूरं बालकावावां अत्र मृधे मल्लयुद्धे । परम त्यन्तं न समर्थाविति अच्युतः आह स्म उवाच । ब्रूञ्धातोः कर्तरि लिट् ॥ २ ॥

अधर्म एना न्न विशे द्यथा तथा सभ्यानिहामुत्र कुरुष्व मल्लप ।
इत्यालपन्तं भगवन्त मासुरो हत स्त्वया कुञ्जर इत्यभाषत ॥ ३ ॥

अधर्म इति ॥ हे मल्लप चाणूर । एनान् सभ्यान् । इहामुत्र, इहलोके अधर्मः अयशस्करः । अमुत्र परलोके अस्वर्ग्यः । एवंभूतोऽधर्मः यथा न विशेत् न प्राप्नुयात् । तथा सभ्यान् कुरुष्व । अधर्मः प्राप्नोत्येवेति भावः ।

इति आलपन्तं भगवन्तं श्रीकृष्णं प्रति । त्वया कुञ्जरः कुवलयापीडाख्यो गजः । हत इति आसुरः चाणूरः । अभाषत बभाषे । अतो हेतो र्न बालोऽसीति भावः । भाषधातोः कर्तरि लङ् ॥ ३ ॥

चाणूरमल्लं हरि रग्रही न्मृधे स्वास्फोट्य हस्ता वरिमर्दनो बली ।
स रौहिणेयो रिपुमुष्टिकं तथा बाहूरुदेशेषु पुनः पुन र्नदन् ॥ ४ ॥

चाणूरेति ॥ बली अरिमर्दनः हरिः श्रीकृष्णः । मृधे मल्लयुद्धे बाहूरु-देशेषु हस्तौ सुष्ठु आस्फोट्य संताड्य । पुनः पुन र्नदन् । चाणूरमल्ल मग्रहीत् जग्राह । स रौहिणेयो बलरामः । तथा तेनैव प्रकारेण । रिपुमुष्टिक मग्रहीत् इति शेषः । ग्रहधातोः कर्तरि लुङ् । तुल्ययोगितालङ्कारः ॥ ४ ॥

परस्परं हस्तभुजोरुमुष्टिना घ्नन्तौ मुहु र्वीरवरौ विरेजतुः ।
परिभ्रमावेक्षणरंभणादिभि र्निस्सर्पणापक्षरणप्रधावनैः ॥ ५ ॥

परस्पर मिति ॥ हस्तौ भुजौ ऊरू मुष्टी च तेषां समाहारः हस्तभुजोरु-मुष्टि । प्राण्यङ्गत्वादेकवद्भावः । तेन मुहुः परस्परं घ्नन्तौ वीरवरौ वीरश्रेष्ठौ । परिभ्रमाः परितो भ्रमणानि । अवेक्षणानि अवकाशदर्शनानि रंभणानि[1] ग्रहणानि आदिर्येषां तैः, निस्सर्पणैः पुरोगमनैः, अपक्षरणैः पश्चाद्गमनैः प्रधावनैश्च विरेजतुः । राजृधातोः कर्तरि लिट् ॥ ५ ॥

सर्वाङ्गनिष्पेषणवाञ्छया तयोः परस्परं कोमलनिष्ठुराङ्गयोः ।
आयोधने रन्ध्र मवेक्षमाणयो र्भया ज्जजल्पु स्सदया इति स्त्रियः ॥ ६ ॥

सर्वेति ॥ कोमले मृदुले निष्ठुरे कठिने च अङ्गे शरीरे ययो स्तथोक्तयोः तयोः । आयोधने मल्लयुद्धे । परस्परं सर्वाङ्गानां निष्पेषणस्य पिण्डीकरणस्य । वाञ्छया इच्छया । रन्ध्र मवकाशं । अवेक्षमाणयोः प्रतीक्षमाणयो स्सतोः । स्त्रियः तत्रस्थाः । सदया स्सत्यः । भयात् इति वक्ष्यमाणप्रकारेण जजल्पुः ऊचुः । जल्पधातोः कर्तरि लिट् ॥ ६ ॥

वक्ष्यमाणप्रकार मेवाह—

क्वेमौ शिशू कोमलसुन्दराङ्गकौ क्व मल्लपौ वज्रकठोरविग्रहौ ।
इदन्नु शक्यं शरमल्लयोजितं ह्यधर्मयुद्धं कथ मीक्षितं जनैः ॥ ७ ॥

क्वेति ॥ कोमले मृदुले सुन्दरे च अङ्गे ययो स्तथोक्तौ । इमौ शिशू रामकृष्णौ क्व ? वज्र इव कठोरौ कठिनौ विग्रहौ शरीरे ययो स्तथोक्तौ । मल्लपौ मल्लनायकौ क्व ? शराभ्यां मल्लाभ्यां योजितं इद मधर्मयुद्धं ; जनै रीक्षितुं कथं नु शक्यं, शक्यं न भवतीत्यर्थः । हि प्रसिद्धौ । अत्रातिमृदुशरीरत्वेन वज्रकठिनशरीरत्वेन चाननुरूपयोः बालयो र्मल्लयोश्च घटनावर्णनाद्विषमालङ्कारः । तदुक्तम् — 'विषमं वर्ण्यते यत्र घटनाऽ ननुरूपयोः' इति ॥ ७ ॥

पिपेष चाणूर मधोक्षज स्तदा पदेन भूमौ विनिपात्य मल्लपम् ।
बलोऽवधी न्मुष्टिक मन्तरा तथा सर्वा न्प्रमल्ला नपि दुष्टचेतसः ॥८॥

पिपेषेति ॥ तदा अधोक्षजः श्रीकृष्णः । मल्लपं मल्लश्रेष्ठं चाणूरं । भूमौ विनिपात्य । पदेन पादेन । पिपेष पिण्डी चकार । बलः बलरामः । अन्तरा युद्धमध्ये । मुष्टिकं मुष्टिकासुरं । दुष्टं चेतो येषां तान् । सर्वान् प्रमल्लान् मल्लश्रेष्ठानपि । तथा पिण्डीकृत्य । अवधीत् जघान । हनधातोः कर्तरि लुङ् । 'लुङि चे' ति वधादेशः ॥ ८ ॥

दृष्ट्वा ऽरि मासादितकार्य माहवे भियाऽग्रही त्कोशमुखा दसावसिम् ।
दृष्ट्वा त मेवं भयविह्वलं हरि र्ग्रहीतु मैच्छ त्प्लुतलाघवा दरिम् ॥९॥

दृष्ट्वेति ॥ असौ मञ्चस्थः कंसः । आहवे मल्लयुद्धे । अरिं श्रीकृष्ण आसादितं प्राप्तं कार्यं जयरूपकार्यं येन तं कृतकृत्य मित्यर्थः । दृष्ट्वा भयेन । कोशमुखात् खाङ्गवरकमुखात् । असिं खड्गं । अग्रहीत् जग्राह । हरिः श्रीकृष्णः । एवं भयेन विह्वलं विवशं । तं अरिं कंसं । दृष्ट्वा । प्लुतलाघवात् ग्रहीतु मैच्छत इयेष । इषधातोः कर्तरि लङ् ॥ ९ ॥

आप्लुत्य मञ्चे निजवैरिणं हरिः कुर्वन् ऋतां वाच मथाऽशरीरिणाम् ।
खगेश्वरो नाग मिवाग्रही त्कचे पुच्छे स सभ्येषु मिषत्सु मातुलम् ॥१०॥

आप्लुत्येति ॥ अथानन्तरं; स हरिः श्रीकृष्णः मञ्चे आप्लुत्य । सभ्येषु मिषत्सु पश्यत्सु सत्सु । अशरीरिणां देवानां । वाचं 'अस्यास्त्वा मष्टमो गर्भो हन्ता यां नयसेऽबुध' इति वाचं, ऋतां सत्यां । कुर्वन् । खगेश्वरः गरुडः । पुच्छे नागं सर्पं मिव । निजवैरिणं मातुलं कंसं । कचेषु । अग्रहीत् जग्राह । ग्रहधातोः कर्तरि लुङ् । उपमालङ्कारः ॥ १० ॥

आकृष्य तस्माद् भुवि घोररूपिणं निपात्य तं पापिन माशु केशिहा ।
स्वयं पपातोपरि तस्य वक्षसः ममार कंसो भयविह्वलो भृशम् ॥११॥

आकृष्येति ॥ केशिनं हन्तीति केशिहा श्रीकृष्णः । घोरं रूपं अस्यास्तीति तथोक्तं पापिनं कंसं । तस्मान्मञ्चात् । आकृष्य, भुवि भूम्यां । आशु निपात्य, तस्य कंसस्य । वक्षस उपरि स्वयं । पपात । कंसः भृशं भयेन विह्वलः विवशस्सन् । ममार मृतोऽभूत् । मृङ्धातोः कर्तरि लिट् ॥११॥

अन्तः पुरस्था नमला नसूर्यंपश्या नदृष्टा नपि राजदारान् ।
संप्राप्य भृत्यो विमनाः कथंचित् शनैः शनैः कंम मजीघत त्कः ॥१२॥

अन्तःपुरेति ॥ कोऽपि भृत्यः कंसभटः । अन्तःपुरस्थान् अन्तःपुरे विद्यमानान् । अमलान् विशुद्धान् उभयकुलविशुद्धान् । सूर्यं न पश्यन्तीति तानसूर्यंपश्यान् 'असूर्यललाटयोः दृशि तपो' रिति खशि, 'अरुर्द्विष' दिति मुमागमः । अत एव अदृष्टान् अन्यै रदृष्टान् । राजदारान् कंसपत्नीः । संप्राप्य । विमनाः खिन्नः सन् । कथंचि दतिप्रयासेन शनैः शनैः कंस मजीघतत् कंसवधमचष्ट । कंसवधशब्धात् 'तत्करोति तदाचष्ट' इति णिचि 'आख्यानात् कृतस्तदाचष्टे कृल्लुक्' इत्यदिना प्रकृतिप्रत्यापत्तौ प्रकृतिवत् च कारके सति कंसं हन् इति रूपं निष्पद्यते; ततः कुत्वतत्वादि णिजन्तात्कर्तरि लुङि च्लेश्चङि 'णेरनिटी' ति णिलोपे 'णौ चङी' ति उपधाह्रस्वे द्वित्वे सन्वद्भावे इत्वे अभ्यासदीर्घः ॥ १२ ॥

जयेति पौरा भुवि मानुषं वपु र्दधान मुक्त्वा ऽञ्जलिबद्धमल्लिकाः ।
अवाकिरन् पुष्पचयै रमुं हरिं नेदु स्तदा देवमृदङ्गडिण्डिमाः ॥ १३ ॥

जयेति ॥ पौराः पुरजनाः । अञ्जलिषु बद्धा मल्लिकाः मल्लिकापुष्पाणि यै स्तथोक्ता स्सन्तः । मानुषं वपु र्दधानं अमुं कंसहन्तारं हरिं श्रीकृष्णं । जय सर्वोत्कर्षेण वर्तस्वेति उक्त्वा, पुष्पचयैः कुसुमसमूहैः । अवाकिरन् अवकिरन्ति स्म । तदा देवानां मृदङ्गाः डिण्डिमाश्च वाद्यविशेषाः । नेदुः अनदन् । नदधातोः कर्तरि लिट् ॥ १३ ॥

तौ मोचयित्वा पितरौ सुदुःखितौ बालावमू बन्धनगेहकन्दरात् ।
पादौ प्रगृह्यानति मेतयो र्मुहु र्मुदा व्यधातां प्रियमञ्जुभाषणौ ॥१४॥

ताविति ॥ अमू बालौ रामकृष्णौ कर्तारौ । सुदुःखितौ अतिदुःखितौ । बद्धौ पितरौ देवकीवसुदेवौ । बन्धनगेहं कन्दर मिव गुहेव तस्मात् । मोचयित्वा प्रियाणि मञ्जूनि भाषणानि ययो स्तथाविधौ सन्तौ 'एतयो र्मातापित्रोः पादौ प्रगृह्य मुदा सन्तोषेण आनतिं नमस्क्रियां मुहु र्व्यधातां विदधतुः । दाधातोः कर्तरि लुङ् ॥ १४ ॥

अथ त्रिभिः कुलकेन मातर माह—

बाल्ये रणन्नूपुरहंसमण्डितस्फुटांघ्रिपङ्केरुहमन्दचङ्क्रमः ।
देह्यन्न मद्यैव बुभुक्षिताय मे मात र्मुदं नाकरवं किलेत्यहम् ॥ १५ ॥

बाल्य इति ॥ अहं बाल्ये । रणन्ति नूपुराण्येव हंसा स्तैः मण्डितयो रलङ्कृतयोः । स्फुटांघ्रिपङ्केरुहयोः विकसितपादकमलयोः मन्दः चङ्क्रमो गति र्यस्य तथोक्त स्सन् । हे मातः हे देवकि ! बुभुक्षिताय क्षुधिताय । 'बुभुक्षितः स्यात् क्षुधितः' इत्यमरः । मे मह्यं अद्यैवान्नं देहि' इति मुदं नाकरवं न कृतवानस्मि किल । कृधातोः कर्तरि लुङ् ॥ १५ ॥

सञ्जात दन्ताङ्कुरपङ्क्तिकान्तिभि र्मुग्धस्मितै रप्पसमग्रभाषणैः ।
वक्षोजवस्त्राञ्चलकर्षणादिभि र्गलत्पयश्चूचुकपानकेलिभिः ॥ १६ ॥

सञ्जातेति ॥ सञ्जातानां दन्ताङ्कुराणां पंक्तेः कान्ति र्येषां तैः । मुग्धैः सुन्दरैः स्मितै रसमग्रभाषणै रर्धोक्तिभिः । वक्षोजयोः स्तनयोः वस्त्राञ्चलस्य कर्षणमादि र्येषां तैः । गलत्पयः ययो स्तयोः चूचुकयोः कुचाग्रयोः । 'चूचुकं तु कुचाग्रं स्या' दित्यमरः । पानकेलिभिः पानक्रीडाभिः ॥ १६ ॥

हे अम्ब हे मातरिति प्रभाषणै र्वीथीषु बालै स्सह संप्रधावनैः ।
देह्यद्य मे त्वं चषकोत्तमं पयः पास्यामि यास्यामि च बालकैस्समम्
॥ १७ ॥

हे अम्बेति ॥ हे अम्ब! 'है हे प्रयोगे है हयो' रिति प्लुतत्वात् प्रकृतिभावः । हे मातः! त्व मद्य मे मम । चषकोत्तमं पानपात्रं; 'चषकोऽस्त्री पानपात्र' मित्यमरः । देहि । पयः क्षीरं पास्यामि । बालकै स्समं यास्यामि गमिष्यामि च । इति प्रभाषणै स्संप्रधावनैः पांसुकेलिप्रभृतिभिः ....

ऋणत्रया च्छोकविवर्धना दहं कथं तरेयं किल योगिना मपि ।
कथं भवेयं ह्यनृणो महीभृतां ऋणत्रयान्मुक्ति रवश्य मीप्सिता ॥१९॥

ऋणत्रयादिति ॥ योगिना मपि शोकविवर्धनात् दुःखहेतोः । ऋणत्रया दहं कथं तरेयं तीर्णो भवानि । कथ मनृणो भवेयम् । महीभृतां राज्ञां । ऋणत्रया न्मुक्तिः । शोकस्य ऋणत्रयं हि कारण मित्यर्थः । अवश्य मीप्सिता । आवयोः शीघ्र मुपनयनादिकं कर्तव्य मिति भावः । सामान्येन विशेषसमर्थना दर्थान्तरन्यासालङ्कारः ॥ १९ ॥

एवं प्रभाष्यानकदुन्दुभिं हरिः चच्छाद मायाभि रतीव मातरम् ।
स देवकीजानि रमुं रमेश्वरं नामन्यताद्यं निजपुत्र मेव तु ॥ २० ॥

एवमिति ॥ हरिः श्रीकृष्णः, आनकदुन्दुभिं वसुदेवं । मातरं देवकीं च, एवं पूर्वोक्तप्रकारेण; प्रभाष्य उक्त्वा; मायाभि रतीव चच्छाद आच्छादित-

---

According to the Ms. Sloka No. 18 is missing.

वान्। दुष्करकंसादिवधकर्तरि मयि भगवद्बुद्धि र्मा भू दित्यभिप्राया दिति भावः। स देवकीजानिः वसुदेवः। अमुं श्रीकृष्णं आद्यं आदिपुरुषं। रमेश्वरं विष्णुं। नामन्यत न मेने। किं तु निजपुत्रं स्वपुत्रमेव अमन्यत। मनुधातोः कर्तरि लङ् ॥ २० ॥

स सान्त्वयित्वा पितरं च मातरं मातामहं तत्र यदूत्तमं स्वयम् ।
स उग्रसेनं त्वकरो त्प्रजाधिपं ययातिशापा न्न नृपासने मतिम् ॥ २१ ॥

स इति ॥ स श्रीकृष्णः। पितरं वसुदेवं। मातरं देवकीं च। सम्यक् सान्त्वयित्वा आश्वास्य। यदूत्तमं यदुश्रेष्ठं। मातामहं कंसजनकं उग्रसेनं। तत्र मधुरायां। प्रजाधिपं राजान मकरोत्। स्वयं ययातिशापात्। नृपासने सिंहासने मतिं नाकरोत्। कृधातोः कर्तरि लङ् ॥ २१ ॥

तत स्स वृष्ण्यन्धकभोजसात्वता नितो गतान् कंसभयाद्दिशो दश ।
आनाय्य रेमे ऽतिसुखं नृपात्मजैः स्साकं मुरारि र्बलदेवसङ्गतः ॥ २२ ॥

तत इति ॥ ततोऽनन्तरं। मुरारिः श्रीकृष्णः। कंसभयात् हेतोः। इतो मधुरापट्टणात्। दशदिशो गतान्, वृष्णयः अन्धकाः भोजाः सात्वताश्च, तान् जनान् मधुरा मानाय्य प्रापय्य, बलदेवेन बलरामेण संगतः सन्। नृपात्मजैः साकं अतिसुखं यथा तथा। रेमे रमते स्म। सुख मवर्ततेत्यर्थः। रमुधातोः कर्तरि लिट् ॥ २२ ॥

नन्दं समाहूय स देवकीपतिः वित्तै रनेकै र्विविधैश्च भूषणैः ।
संपूज्य मे नन्दसुता विमौ त्वया संपालिता वित्यवदन् मुदा मुहुः ॥ २३ ॥

नन्दमिति ॥ स देवकीपति र्वसुदेवः, नन्दं समाहूय। अनेकै र्वित्तै र्धनैः, विविधै र्भूषणैश्च संपूज्य। हे नन्द इमौ मे सुतौ रामकृष्णौ, त्वया संपालितौ सुरक्षितौ, इति मुदा सन्तोषेण, मुहु रवदत्। वदधातोः कर्तरि लङ् ॥ २३ ॥

आभाष्य यातुं वसुदेव मादरात् स प्रेमबाष्पाम्बुनिरुद्धलोचनम् ।
यान्तं व्रजेशं त मुवाच माधवो ऽप्यहं समेष्या म्यचिरा दिति व्रजम्
॥ २४ ॥

आभाष्येति ॥ माधवः श्रीकृष्णः कर्ता । यातुं आदरा दाभाष्य आपृच्छ्या । सप्रेम्णा बाष्पाम्बुभि रश्रुजलैः निरुद्धे पिहिते लोचने यस्य तं यान्तं गच्छन्तं । व्रजेशं नन्दं प्रति । अह मपि अचिरात् शीघ्रं । व्रजं समेष्यामि । इति उवाच । वचधातोः कर्तरि लिट् ॥ २४ ॥

अथ द्वाभ्या मुपनयनादिकं वर्णयति—

आचार्यवर्यं स्वकुलस्य सम्मतं गर्गं समाहूय स देवकीपतिः ।
अकारयत् संस्कृति मेतयो स्ततः ब्रह्मोपदेशं निजपुत्रयो र्मुदा ॥ २५ ॥

आचार्येति ॥ ततो नन्दगमनानन्तरं । स देवकीपतिः वसुदेवः । स्वकुलस्य सम्मतं आचार्यवर्यं गर्गं समाहूय । मुदा एतयोः निजपुत्रयोः रामकृष्णयोः । ब्रह्मोपदेशं संस्कृतिं उपनयनसंस्कारं । अकारयत् कारयामास । कृधातो र्णिजन्तात् कर्तरि लिट् ॥ २५ ॥

ददौ तदा विप्रकुलाय शुद्धधी रानाय्य गोष्ठान् बहुशोऽपि गोव्रजान् ।
कंसस्य चैतान् सुतजन्मवासरे मनोऽर्पितान् रौप्यसुवर्णमण्डितान्
॥ २६ ॥

तदेति ॥ विशुद्धा व्यसनरहिता धी बुद्धिः अन्तःकरणं यस्य तथोक्तः वसुदेवः । सुतस्य श्रीकृष्णस्य । जन्मवासरे जन्मदिने । एतान् मनसा अर्पितान् ब्राह्मणेभ्यो दत्तान् । रौप्येण रजतेन । सुवर्णेन काञ्चनेन मण्डितान् । गोव्रजान् गोसमूहान् । कंसस्य गोष्ठात् गोस्थानात् । आनाय्य । तदा उपनयनकाले । विप्रकुलाय ब्राह्मणसंघाय । बहुशोऽनेकशः । ददौ दत्तवान् । दाधातोः कर्तरि लिट् ॥ २६ ॥

अथ त्रिभि र्गुरुकुलवासं वर्णयति—

संप्राप्य संस्कारवशात् द्विजत्वं स्वाचार्यवर्याद् बलकेशवौ तौ ।
वरौ यदूनां ययतु र्हि काश्यां सान्दीपनिं नाम गुरुं वसन्तम् ॥ २७ ॥

समिति ॥ यदूनां वरौ श्रेष्ठौ । तौ बलकेशवौ रामकृष्णौ । स्वस्य आचार्य-वर्यात् गर्गाचार्यात् । संस्कारवशात् उपनयनसंस्कारवशात् । द्विजत्वं संप्राप्य । काश्यां वसन्तं । सान्दीपनिं नाम गुरुं । ययतुः प्रापतुः । याधातोः कर्तरि लिट् ॥ २७ ॥

विद्यार्थिनौ तौ विनयान्वितौ तदा वृषाकपी वाऽतिलसत्स्वरूपिणौ ।
त्रयीं सहाङ्गै रखिलै र्धनुश्श्रुतिं चाध्यापयामास स विप्रपुङ्गवः ॥२८॥

विद्येति ॥ स विप्रपुङ्गवः ब्राह्मणश्रेष्ठः सान्दीपनिः । 'स्युरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः । सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः' इत्यमरः । वृषाकपी इव हरविष्णू इव । 'हरविष्णू वृषाकपी' इत्यमरः । इवार्थे वशब्दः । अतिलसत्स्वरूपं अनयो रस्तीति तथोक्तौ । विद्या मर्थयतः याचेते इति विद्यार्थिनौ । अत एव विनयेन प्रश्रयेण अन्वितौ रामकृष्णौ कर्मे । तदा त्रयीं वेदान् 'इति वेदा स्त्रय स्त्रयी' त्यमरः । धनुश्श्रुतिं धनुर्वेदं च । अखिलै रङ्गैः शिक्षादिभि स्सह अध्यापयामास अध्यापितवान् । अधिपूर्वकइङ्धातोः णिजन्तात्कर्तरि लिटि आमि अनुप्रयोगः । गतिबुद्धीत्यादिना अणि कर्तुःकर्मत्वम् ॥ २८ ॥

दिने दिनेऽधीत्य तदेकिकां कलां गुरो स्सकाशाच्छ्रवणोपदेशतः ।
पूर्णौ चतुष्षष्टिदिनात्तविद्यया पप्रच्छतु स्तौ गुरुदक्षिणां गुरुम् ॥२९॥

दिन इति ॥ तौ रामकृष्णौ, गुरोः सान्दीपनेः सकाशात् । दिने दिने; वीप्सायां द्विर्भावः । एकिकां एकैकां कलां विद्यां; श्रवणव्याजेनाधीत्य; चतुष्षष्ट्या दिनै रात्तया धीतया विद्यया; जातावेकवचनम् । चतुष्षष्टि-

कलाभिरित्यर्थः । पूर्णौ सन्तौ । गुरुं गुरुदक्षिणां । पप्रच्छतु रपृच्छताम् । पृच्छधातोः कर्तरि लिट् । दुह्यादित्वाद् द्विकर्मकत्वम् ॥ २९ ॥

अथ त्रिभि र्गुरुदक्षिणाप्रदानं वर्णयति—

दातुं समर्थौ किमपीश्वराविमौ मत्वा ऽऽत्मखेदं व्यपनेतु मञ्जसा ।
मृतं प्रभासे वरुणालये सुतं वव्रेऽ प्यलभ्यं गुरुदक्षिणां गुरुः ॥ ३० ॥

दातुमिति ॥ गुरुः सान्दीपनिः, इमौ रामकृष्णौ, किमपि अनिर्वाच्य-मसाध्य मपीत्यर्थः । दातुं समर्थौ । ईश्वरौ जगदीश्वरौ मत्वा ; आत्मनः खेदं दुःखं । व्यपनेतु मपनेतुं । वरुणालये प्रभासे प्रभासतीर्थे । मृतं ; अत एवालभ्यं । सुतं पुत्रं । गुरुदक्षिणां । वव्रे वृतवान् । वृञ्धातोः कर्तरि लिट् ॥ ३० ॥

रथेन गत्वाऽब्धितलान्तवासिनं हत्वाऽसुरं पञ्चजनं दरं मुदा ।
लब्ध्वा यमं प्राप्य सुतं प्रगृह्य तौ गुरो स्सकाशं समगच्छतां पुनः ॥ ३१ ॥

रथेनेति ॥ तौ रामकृष्णौ । रथेन गत्वा । अब्धितलान्ते समुद्रमध्ये वसतीति तथोक्तम् । पञ्चजनं नाम असुरं हत्वा ; मुदा दरं शंखं लब्ध्वा, यमं प्राप्य, गुरोः मृतं सुतं प्रगृह्य ; सान्दीपनेः सकाशं, पुन स्समगच्छतां माजग्मतुः । संपूर्वकगम्लृ धातोः कर्तरि लङ् ॥ ३१ ॥

दत्वा तदा तौ गुरवे कुमारं प्रदक्षिणीकृत्य पुनः पुन स्तम् ।
नत्वा लसन्मूर्धकिरीटकोट्या झडित्ययातां पुन रेव गेहम् ॥ ३२ ॥

दत्वेति ॥ तदा तौ रामकृष्णौ ; गुरवे सान्दीपनये ; कुमारं दत्वा ; तं गुरुं पुनः पुनः प्रदक्षिणीकृत्य ; लसतो मूर्ध्नः किरीटकोट्या किरीटाग्रेण नत्वा ; झडित्येव पुनः गेहं स्वगृहं । अयातां प्रापतुः । याधातोः कर्तरि लङ् ॥ ३२ ॥

अथ गोपीसमाश्वासनाय व्रजं प्रत्युद्धवं प्रेषयति —

स्मृत्वाऽपि गोपीजनदैन्यभाषणं स उद्धवं दौत्यविशारदं व्रजम् ।
हरि स्समाश्वासयितुं महामतिः वियोगखिन्नाः प्रजिघाय ता भृशम् ॥ ३३ ॥

स्मृत्वेति ॥ अथ महामतिः स श्रीकृष्णः । गोपीजनानां । दैन्यभाषणं मधुरागमनसमये यद्दैन्यभाषणं तत् स्मृत्वा ; भृशमत्यन्तं । वियोगेन खिन्नाः ता गोपीः समाश्वासयितुं । दौत्ये दूतकर्मणि विशारदं चतुरं । उद्धवं । व्रजं । प्रजिघाय प्रेषयामास । हिनोतेः कर्तरि लिट् । हेरचङीति कुत्वम् ॥ ३३ ॥

तत स्समारुह्य मनोजवै र्हयै र्युतं शताङ्गं मतिमान् बृहस्पतेः ।
शिष्यो ययौ तूर्णमवाप्य गोकुलं गतेऽस्त मर्के स गवां प्रभो र्गृहम् ॥ ३४ ॥

तत इति ॥ ततोऽनन्तरं ; मतिमान् बृहस्पतेः शिष्यः ; स उद्धवः मनोजवै र्मनोवेगैः, हयै रश्वैः, युतं शताङ्गं रथं ; 'शताङ्गः स्यन्दनो रथः' इत्यमरः । समारुह्य । अर्के सूर्ये । अस्तं गते सति । गोकुलं घोषं । तूर्णमवाप्य, गवां प्रभो र्नन्दस्य । गृहं ययौ । यातेः कर्तरि लिट् ॥ ३४ ॥

नन्दं स पृष्ट्वा कुशलं तदा सुखं झडित्यवोच द्वसुदेवपुत्रयोः ।
आश्वासयामास च नन्दसुन्दरी रन्याः स्त्रिय स्तत्र वियोगकर्शिताः ॥ ३५ ॥

नन्दमिति ॥ स उद्धवः, तदा तस्मिन् समये, नन्दं कुशलं अनामयं पृष्ट्वा । वसुदेवपुत्रयोः रामकृष्णयोः । सुखं झडिति शीघ्र मवोचत् । तत्र गृहे, नन्दसुन्दरीः यशोदाप्रभृतीः । वियोगेन कृष्णवियोगेन कर्शिताः पीडिताः । अन्याः स्त्रियश्च । आश्वासयामास । श्वसधातोः णिजन्तादामि अनुप्रयोगे कर्तरि लिट् ॥ ३५ ॥

तं पूजयामास सदन्नपायसैः हरेः प्रियं वातरुजं महामतिम् ।
सुगन्धिमाल्याम्बरभूषणोत्तमैः शय्योपधानै र्वसतौ स गोपतिः
॥ ३६ ॥

तमिति ॥ स गोपति र्नन्दः । हरेः प्रियं महामतिं वातरुजं पवनव्याधिं उद्धवं । सदन्नपायसैः सुगन्धिभि र्माल्यैः अम्बरै र्भूषणोत्तमैः शय्योपधानैश्च वसतौ गृहे । रात्रौ च । 'वसती रात्रिवेश्मनो' रित्यमरः । पूजयामास । पूजधातो-र्णिचि आमि अनुप्रयोगे कर्तरि लिट् ॥ ३६ ॥

अथ द्वाभ्यां गोपिकानां भगवति प्रेमातिशयमाह —

चलन्नितम्बस्तनकर्णकुण्डलाः रणच्छयान्तर्मणिकङ्कणप्रभाः ।
मन्थानरश्मिप्रकरप्रकर्षणैः कल्ये व्यमश्नन् प्रमदा हि गर्गरान्
॥ ३७ ॥

चलदिति ॥ मन्थानानां मन्थदण्डानां रश्मीनां प्रग्रहाणां 'किरण-प्रग्रहौ रश्मी' इत्यमरः । प्रकरः समूहः । तस्य प्रकर्षणैः विकर्षणैः । चलन्ति नितम्बा स्तनाः कर्णकुण्डलानि च यासां ताः । रणतां शयेषु हस्तेषु विद्यमानां अन्तर्मणीनां मणिखचितानां कङ्कणानां प्रभा यासां ताः । प्रमदा गोप्यः । कल्ये अहर्मुखे । गर्गरान् दधिभाण्डान् । व्यमश्नन् हि ममन्थुः किल । मश्नातेः कर्तरि लङ् ॥ ३७ ॥

सुवर्णमन्थाननिनादमागधप्रवन्दिबृन्दस्तुतिपाठबोधितः ।
गोविन्द दामोदर माधवे त्यसौ शुश्राव वाक्यान्युषसीश्वरप्रियः
॥ ३८ ॥

सुवर्णेति ॥ उषसि सुवर्णमन्थानानां निनाद एव मागधाः प्रवन्दिनश्च तेषां बृन्दस्य स्तुतिपाठै र्बोधितः ईश्वरस्य प्रियः । असौ उद्धवः । गोविन्द दामोदर माधवेति वाक्यानि । शुश्राव अशृणोत् । श्रुधातोः कर्तरि लिट् ॥३८॥

कृत्वा ऽऽह्निकं कार्यममू व्रजास्त्रियो गच्छन्त मेनं प्रभुनन्दमन्दिरम् ।
दृष्ट्वोद्धवं तं विशशङ्किरे हरिं ध्यानेन तस्मिन् दृढलग्नबुद्धयः ॥३९॥

कृत्वेति ॥ ध्यानेन, तस्मिन् कृष्णे । दृढं यथा तथा लग्ना बुद्धि र्यासां तथाभूता । अमू व्रजस्त्रियो गोप्यः । आह्निकं कार्यं सन्ध्यावन्दनादिकं । कृत्वा उपास्य । प्रभो र्नन्दस्य मन्दिरं । गच्छन्तं त मुद्धवं । दृष्ट्वा । हरिं विशशङ्किरे तर्कयामासुः । शङ्किधातोः कर्तरि लिट् ॥ ३९ ॥

उवाच का कोऽय मपीच्यदर्शनः कस्या स्सुतश्चाच्युतवेषभाषणः ।
हृत्वा स न श्चित्तमयं ययौ पुरा नेतुं किमस्तीत्यधुना ऽऽगतः
पृथक् ॥ ४० ॥

उवाचेति ॥ अच्युतस्येव वेषभाषणानि यस्य सः । अपीच्यं प्रियं दर्शनं यस्य सः । अयं कः, कस्याश्च सुतः । सोऽयं पुरा नः चित्तं हृत्वा ययौ । अधुना आगतः, पृथक् नेतुं किमस्ति शरीरादन्यत् किमस्तीति काचि-द्गोपी उवाच । वचधातोः कर्तरि लिट् ॥ ४० ॥

श्रीकृष्णदेवस्य पदाब्जसेवकं विज्ञाय भर्तुः प्रियवाक्यवादिनम् ।
रहस्यमुं प्रापु रमू यदूत्तमं गोपाङ्गना स्तं परिहृष्टमानसाः ॥४१॥

श्रीकृष्णेति ॥ अमू गोपाङ्गनाः । श्रीकृष्णदेवस्य पदाब्जसेवकं यदूत्तमं यदुश्रेष्ठं, अमु मुद्धवं । भर्तुः श्रीकृष्णस्य प्रियवाक्यवादिनं दूतं । विज्ञाय ज्ञात्वा । परिहृष्टमानसाः सन्तुष्टचित्ता स्सत्यः । रहसि तं प्रापुः । प्रपूर्व-काप्लृधातोः कर्तरि लिट् ॥ ४१ ।

अथ द्वाभ्यां भगवद्वियोग मसहमानाः गोप्य उद्धवमाहुः –

जानाम सन्देशहरं हरेः सकृत् सुहृद्वियोगं मुनयोऽपि सेहिरे ।
नाबाल्यमितस्य वियोग मागतं वयं कथं तस्य सहाम योषितः
॥ ४२ ॥

जानामेति ॥ त्वामिति शेषः । हरेः श्रीकृष्णस्य । सन्देशं हरतीति तथोक्तं दूतं ; 'स्यात्सन्देशहरो दूत' इत्यमरः । वयं जानाम ज्ञातवत्यः । सकृत् कदाचित् । सुहृदः वियोगं । मुनयोऽपि । न सेहिरे न सहन्ते स्म । आबाल्यं बाल्यमभिव्याप्य मित्रस्य तस्य हरेः आगतं प्राप्तं वियोगं, योषितो वयं कथं सहाम सोढुमशक्ता एवेत्यर्थः । षहधातोः कर्तरि लोट् । काव्यार्थापत्त्यलङ्कारः । तदुक्तम् — 'कैमुत्येनार्थसंसिद्धिः काव्यार्थापत्तिरिष्यत' इति ॥ ४२ ॥

केलीषु रासेषु हरि स्सुगानमुद्बिभ्रतां स्त्रैणविमोहपण्डितः ।
गायन्नमन्दं मृगयुर्मनोहरं मृगीगणाना मिव नोऽ हरन्मनः ॥४३॥

केलीष्विति ॥ स्त्रैणस्य स्त्रीसमूहस्य । विमोहे मोहने । पण्डितः चतुरः वंचकः । हरिः श्रीकृष्णः । रासेषु केलीषु रासक्रीडासु । सुगानेन वेणुगानेन, मुदं सन्तोषं, बिभ्रतीति तथोक्तानां । नः अस्माकं । मनः । अमन्दं मनोहरं । यथातथा गायन् । मृगयुः मृगं यातीति मृगयुः व्याधः । 'मृगय्वादय' श्चेति औणादिकः कुप्रत्ययान्तो निपातः । 'व्याधो मृगवधाजीवो मृगयु र्लुब्धकोऽपि स' इत्यमरः । मृगीगणानां मन इव अहरज्जहार । हृञ्धातोः कर्तरि लङ् । पूर्णोपमालङ्कारः ॥ ४३ ॥

अथ त्रिभिर्गोप्यो मधुपापदेशेन उद्धवं निन्दन्ति —

उक्त्वैवमेनं परिहस्य निन्दितुं कृष्णस्य दूतं मधुपापदेशतः ।
वाग्भिर्वराभिश्चतुरा वराङ्गना स्त मूचु रित्थं मदनेन पीडिताः ॥४४॥

उक्त्वेति ॥ चतुरा वराङ्गना गोप्यः । मदनेन मन्मथेन । पीडितास्सत्यः एवं पूर्वोक्तप्रकारेण उक्त्वा । एनं कृष्णस्य दूतं, वराभिर्वाग्भिः परिहस्य, मधुपापदेशतः भ्रमरव्याजेन । निन्दितुं तमुद्धव मित्थं वक्ष्यमाणप्रकारेण ऊचुः । वचधातोः कर्तरि लिट् ॥ ४४ ॥

मात्वं स्पृशाङ्घ्रिं भ्रमर! प्रमादतो ऽप्यन्यास्तनालम्बिसुमालि-
काश्रयः।
अङ्गैः स्समग्रं सुविलेपितै स्सदा किञ्जल्करेणुप्रकरै स्सुगन्धिभिः
॥ ४५ ॥

मेति ॥ भ्रमर! सदा सर्वदा। अन्यस्याः सपत्न्याः। स्तनावलम्बिनी क्रीडासु कुचसंस्पर्शिनी सुमालिका नवमाला आश्रयो यस्य सः त्वं, सुगन्धिभिः शोभनगन्धयुक्तैः। किंजल्कानां केसराणां। रेणुप्रकरै रेणुसंघैः। समग्रं समन्तात्। सुष्ठु विलेपितैः अङ्गैः। प्रमादतोऽपि भ्रमादपि। अंघ्रिं अस्मदंघ्रिं। मा स्पृश। स्पृशधातोः कर्तरि लोट् ॥ ४५ ॥

कर्णसमीपमागत्य गुञ्जन्तं मधुकर मभिलक्ष्याहुः—

भाषस्व मा त्वं मधुवैरिसत्कथाः मनोभवावेशविमूढचेतसाम्।
अग्रे तु नो गच्छ किरीटिसारथेः प्रियाङ्गनानां पुरतो भजेप्सितम्
॥ ४६ ॥

भाषस्वेति ॥ हे भ्रमरेति शेषः। मधुवैरिणः श्रीकृष्णस्य। सत्कथाः रहःकथाः। मनोभवावेशेन मन्मथावेशेन। विमूढं चेतो यासां तासां। नः। अग्रे। मा भाषस्व मा वद। किन्तु किरीटिसारथेः श्रीकृष्णस्य। प्रियाङ्गनानां। पुरतः। गच्छ। ईप्सितं बहुमानं। भज प्राप्नुहि। भजधातोः कर्तरि लोट् ॥ ४६ ॥

अथ त्रिभि र्मोहात्कृष्णं पुरःस्थितं मत्वा निन्दन्ति—

त्वत्पादपद्मे परमा रमा सदा दधार बुद्धिं चरितुं सुवञ्चिता।
इत्यङ्गना संघविमोहकोक्तिभिः विनिश्चितं तत्कथ मन्यथा शठे
॥ ४७ ॥

त्वदिति ॥ परमा सर्वोत्तमा रमा च लक्ष्मीरपि। अङ्गनानां संघस्य स्त्रीसमूहस्य विमोहकाभि रुक्तिभि र्वाक्यैः। सुष्ठु वञ्चिता सती तव पादपद्मे

सदा चरितुं सेवितुं । बुद्धिं दधार धृतवती इति विनिश्चितं निर्णीतं ; अन्यथा वञ्चिता न यदि । शठे वञ्चके त्वयि तत्कथं त्वत्सेवनं कथं स्यादित्यर्थः ॥ ४७ ॥

समाश्रितानां भवतस्करो महाभूतात्मतां निर्गुणतां भवानपि ।
दधाति भोगायतनं न विग्रहं त्वामीदृशं ताः कथमाश्रयामहे ॥४८॥

समाश्रितानामिति ॥ समाश्रितानां सेवकानां ; भवस्य संसारस्य तस्कर श्चोरः । 'तद्बृहतोः करपत्यो श्चोरदेवतयोः सुट् तलोपश्चे' ति तकारलोपसुडागमौ । भवान् महाभूतात्मतां उरुपिशाचरूपतां निर्गुणतां गुणशून्यत्वमपि दधाति । धा धातोः कर्तरि लट् । भोगायतनं भोगसाधनं विग्रहं न दधाति । ईदृशं त्वां ताः भोगेच्छावत्यो वयं कथ माश्रयामहे । आङ्पूर्वकश्रयतेः कर्तरि लट् । अत्र भगवतः तस्करत्वादिनिन्दाव्याजेन भगवतः स्तुतिर्गम्यते । संसारानर्थनिवृत्तिपूर्वक सर्वात्मकनिर्गुणब्रह्मप्राप्तिरूपमुक्तिप्रदत्वरूपस्तुत्यलङ्कारः । तदुक्तम् — 'उक्ति र्व्याजस्तुति र्निन्दास्तुतिभ्यां स्तुतिनिन्दयो' रिति ॥ ४८ ॥

सा दिष्ट लोकत्रितयेऽपि का वयं क्वास्ते मनोज्ञं तव पादपङ्कजम् ।
न सेवते या खलु योगिनां मते त्वय्युत्तमश्लोकपदप्रवाच्यता
॥ ४९ ॥

सेति ॥ हे कृष्ण ! मनोज्ञं तव पादपङ्कजं, या न सेवते सा, दिष्टलोकत्रितये कालत्रये लोकत्रयेऽपीत्यर्थः । क्वास्ते न क्वापीत्यर्थः । वयं काः । तादृशा एवेत्यर्थः । अत स्त्वया वञ्चितास्सत्यः यथा सर्वाः स्त्रिय स्सेवन्ते तथा वयमपीति भावः । कथं तर्हि उत्तमश्लोकपदस्य प्रवाच्यता प्रवादः योगिनां मते खलु योगिनां मत एव नास्माकं मतमित्यर्थः ॥ ४९ ॥

विगतमोहा स्सत्य उद्धव माहुः —

आस्ते स किं तत्र यदूत्तमप्रभुः पुर्यां यदूनां कुशलं कि मुद्धव ।
स्मरत्यमू न्नन्दमुखा न्स बान्धवान् यदा कदाऽस्मान् निजकिङ्करीगणान्
॥ ५० ॥

आस्त इति ॥ हे उद्धवः यदूत्तमानां यादवश्रेष्ठानां प्रभुः स श्रीकृष्णः, तत्र यदूनां पुर्यां मधुरायां कुशल मास्ते किं? अमून् नन्दमुखान् नन्द प्रभृतीन् । सबान्धवान् यदा कदाचिदपि निजकिङ्करीगणान् अस्मांश्च स्मरति किम्? ॥५०॥

एवं गदन्ती र्विरहातुरा मुहु स्स सान्त्वयन् मुग्धवधू र्हरिप्रियः ।
प्रियोदित मन्द मवोचदाविलां तासां मनीषां विशदां प्रकुर्वन् ॥५१॥

एवमिति ॥ हरेः प्रियः स उद्धवः । एवं पूर्वोक्तप्रकारेण मुहु र्गदन्तीः विरहातुराः मुग्धवधू र्गोपीः सान्त्वयन् । तासा माविलां कलुषां 'कलुषोऽनच्छ आविलः' इत्यमरः । मनीषां बुद्धिं विशदां स्वच्छां प्रकुर्वन् । प्रियेण कृष्णेन उदित मुक्तं वचो मन्द मवोचत् उवाच । वचधातोः कर्तरि लुङ् ॥ ५१ ॥

कृष्णोक्तिप्रकारमेवाह—

चिरोषितोऽस्म्यत्र दुरन्तचिन्तया मय्येव भावाय सदा व्रजाङ्गनाः ।
योगीश्वराणा मपि सङ्गभङ्गिनां मद्भावयोगाद् गुरु नान्यदस्ति हि ॥५२॥

चिरेति ॥ हे व्रजाङ्गना गोप्यः, सदा सर्वदा, दुरन्तया अपारया चिन्तया, मय्येव भावाय, तादर्थ्ये चतुर्थी; अत्र मधुरायां चिरोषितः चिर-काल मुषितवा नस्मि । सङ्गभङ्गिनां निस्सङ्गानां योगीश्वराणा मपि मद्भावयोगात् गुरु अधिकं अन्यत् नास्ति न विद्यते हि । असधातोः कर्तरि लट् ॥ ५२ ॥

तत्किमत आह—

मद्भावयोगा द्धुतकर्मबन्धना धन्या स्सदा सत्त्वगुणप्रधानतः ।
मामेव यूयं हृदि पश्यताधुना गोप्यो निरुद्धेन्द्रियमानसा परम् ॥५३॥

मद्भावेति ॥ हे गोप्यः यूयं मद्भावयोगात् मद्भक्तियोगात्, गतानि कर्मबन्धनानि यासां ताः । अत एव धन्याः । सत्त्वगुणप्रधानतः सत्त्वगुण-प्राधान्यात् । भावप्रधानोऽयं निर्देशः । परं निरुद्धानि इन्द्रियाणि चक्षुरादीनि मानसं च तानि यासां तथोक्ता स्सत्यः । अधुना मामेव हृदि पश्यत । दृशिधातोः कर्तरि लोट् । 'पाघ्रे' त्यादिना पश्यादेशः ॥ ५३ ॥

इत्यच्युतोपघ्नतरो स्समाकुलाः परोक्षभावाद् व्रजसुन्दरीलताः ।
कन्दर्पदावानलतापिता वचोऽमृतैर्न्यषिञ्चन्मुहुरुद्धवाम्बुदः ॥५४॥

इतीति ॥ उद्धव एवाम्बुदो मेघः । अच्युतः कृष्ण एव उपघ्नतरुः अन्तिकाश्रयवृक्षः । 'स्यादुपघ्नोऽन्तिकाश्रय' इत्यमरः । तस्य परोक्षाभावात् असन्निधानात् । समाकुलाः । कन्दर्पो मन्मथ एव दावानलो वनाग्नि स्तेन तापिता स्तप्ताः । व्रजसुन्दर्य एव लतास्ताः॰कर्म । इति एवं भूतानि वचां-स्येवामृतानि उदकानि च तैर्न्यषिञ्चत् सिषेच । कृष्णोक्तिं कथयामासेति भावः । निपूर्वकसिचधातोः कर्तरि लङ् । सावयवरूपकालङ्कारः ॥ ५४ ॥

श्रुत्वोद्धवाद्वाक्यमिदं हरेः प्रियं संत्यक्तमोहा विमलाशया स्तदा ।
स्तुत्वैव तं गीर्भि रिमा व्रजस्त्रियः प्रपेदिरे मोदभरं पुनः पुनः
॥ ५५ ॥

श्रुत्वेति ॥ इमा व्रजस्त्रियो गोप्यः । उद्धवात् हरे रिदं पूर्वोक्तं, प्रियं वाक्यं श्रुत्वा । तदा सन्त्यक्तो मोहो याभि स्ताः । अत एव विमलः आशयो यासां तथा भूतास्सत्यः । गीर्भि स्तमेवोद्धवं पुनः पुनः स्तुत्वा मोदभरं सन्तोषातिशयं, 'अथातिशयो भर' इत्यमरः । प्रपेदिरे । पदधातोः कर्तरि लिट् ॥ ५५ ॥

इत्थं समाश्वास्य हरेः प्रभाषणै स्संमुष्य घोषे कतिचित्स वासरान् ।
आमन्त्र्य गोपी रपि नन्दसुन्दरीं नन्दं प्रयातुं रथ मारुरोह च ॥५६॥

इत्थमिति ॥ स उद्धवः । इत्थं पूर्वोक्तप्रकारेण हरेः प्रभाषणैः गोपीः समाश्वास्य । घोषे कतिचिद्वासरान् संमुष्य । नन्दसुन्दरीं यशोदां । नन्दं च । आमन्त्र्य आपृच्छय । प्रयातुं रथ मारुरोह । रुहधातोः कर्तरि लिट् ॥ ५६ ॥

नन्दाज्ञया गोपगणा स्तमुद्धवं करै रनेकै रनुजग्मु रुत्सुकाः ।
सम्प्राप्य शीघ्रं मधुरां महामति र्निवेदयामास मुरारये समम् ॥५७॥

नन्देति ॥ गोपगणा गोपकाः, नन्दस्याज्ञया, अनेकैः करै रुपायनै स्सह । 'बलिहस्तांशवः करा' इत्यमरः । उत्सुकाः श्रीकृष्णं द्रष्टु मुत्सुका स्सन्तः । त मुद्धव मनुजग्मुः अनुययुः । महामति रुद्धवः । मधुरां शीघ्रं संप्राप्य मुरारये कृष्णाय, समं सर्वं वृत्तान्तं । निवेदयामास कथयामास । निपूर्वकविदधातोः णिजन्तादामि अनुप्रयोगे कर्तरि लिट् ॥ ५७ ॥

अथोद्धवस्याशु मुखात्प्रचोदितां वाचं समाकर्ण्य विशुद्धबुद्धिभिः ।
गोपीभि रत्यन्तविलासबोधिकां मुदं सलेभे रतिकेलिलालसः ॥५८॥

अथेति ॥ अथानन्तरं, स श्रीकृष्णः, विशुद्धा बुद्धि र्यासां ताभि र्गोपीभिः प्रचोदितां, अत्यन्तं विलासानां रासक्रीडादीनां बोधिकां वाचं, उद्धवस्य मुखा त्समाकर्ण्य श्रुत्वा, रतिकेलिषु सुरतक्रीडासु लालसा औत्सुक्यं यस्य तथोक्तस्सन्, मुदं लेभे । लभधातोः कर्तरि लिट् ॥ ५८ ॥

अथ षड्भिः कुब्जाया स्सुरतक्रीडां वर्णयति —

संस्मृत्य कुब्जागृह मध्यगात्ततः प्रतिश्रुतं रन्तु मसौ तया हरिः ।
बन्धै रनेकै र्वरहंसतूलिकातल्पै र्महार्है रुपशोभितं मुदा ॥ ५९ ॥

संस्मृत्येति ॥ ततोऽनन्तरं, असौ हरिः श्रीकृष्णः, प्रतिश्रुतं पूर्वं प्रतिज्ञातं संस्मृत्य, अनेकै र्बन्धैः, तया सह रन्तुं, महार्है रमूल्यै र्वरै र्हंस-तूलिकातल्पै रुपशोभितं कुब्जागृहं मुदा सन्तोषेणाध्यगात् । इण्धातोः कर्तरि लुङि गादेशः ॥ ५९ ॥

कुब्जा त मायान्त मवेक्ष्य सुन्दरं प्रत्युद्गता वासकसज्जिका हरिम् ।
जवात्समुत्थाय निजासना त्प्रियं सभाजयामास वरासनादिभिः
॥ ६० ॥

कुब्जेति ॥ वासकसज्जिका केलीगृह मात्मानं चालंकृत्य प्रतीक्षमाणा । तदुक्तम्—'केलीगृहं तथात्मानं मण्डयन्ती स्मरातुरा । प्रतीक्षते या दयितं सा स्याद्वासकसज्जिका' इति । कुब्जा आयान्तं गृह मागच्छन्तं सुन्दरं प्रियं तं हरिं श्रीकृष्ण मवेक्ष्य । निजासना दास्तरणात् जवात्समुत्थाय । 'ऊर्ध्वं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आगते । प्रत्युत्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यते' इति शास्त्र मनुसरन्तीतिभावः । प्रत्युद्गता सती वरासनादिभि स्सभाजयामास । सभाजधातोर्णिचि आमि अनुप्रयोगे कर्तरि लिट् ॥ ६० ॥

तदोद्धव स्साधु तयाऽभिपूजितो न्यषीद दुर्व्यां सचिवो हरे र्मुदा ।
अनर्घशय्या मतुलां रतिप्रिया प्रवेशयामास हरिं रते गृहे ॥६१॥

तदेति ॥ तदा तस्मिन् समये, हरेः श्रीकृष्णस्य सचिव स्सखा उद्धवः, तया कुब्जया, साधु अभिपूजितस्सन्, उर्व्यां भूम्यां न्यषीद न्निषसाद । रतिप्रिया सुरतप्रिया कुब्जा रते गृहे केलीगृहे हरिं कृष्णं अतुला-मनर्घशय्यां प्रवेशयामास । प्रपूर्वकविशधातोः णिजन्तादामि अनुप्रयोगे कर्तरि लिट् ॥ ६१ ॥

निमज्जनालेपनगन्धभूषणस्रगम्बरालक्तरसाञ्जनादिभिः ।
प्रसाधिता सा हरि माप वल्लभं सव्रीडहासस्मितविभ्रमेक्षणा ॥६२॥

निमज्जनेति ॥ निमज्जनेन स्नानेन, आलेपनेन हरिद्रादिलेपनगन्धेन चन्दनेन, भूषणैः स्रग्भिः अम्बरैः अलक्तरसेनाञ्जनादिभिश्च प्रसाधिता अल-ङ्कृता । 'प्रसाधितोऽलङ्कृतश्चे' त्यमरः । सा कुब्जा । सव्रीडानि मन्दस्मितानि विभ्रमेक्षणानि विलासावलोकनानि यस्या स्तथाभूता सती । वल्लभं प्रियं । हरिं श्रीकृष्णं । आप प्राप । आप्लृधातोः कर्तरि लिट् ॥ ६२ ॥

रेमे तया चन्दनदानसम्पदा सम्बोध्य कान्तां नवसङ्गमप्रियाम् ।
विशङ्कितां भूषणभूषितां ह्रिया प्रगृह्य शय्या मभिवेश्य माधवः ॥ ६३ ॥

रेम इति ॥ माधवः श्रीकृष्णः । नवसंगमः प्रियो यस्या स्तथाभूतां, ह्रिया लज्जया विशङ्कितां । भूषणै र्भूषिता मलङ्कृतां । कान्तां कुब्जां । संबोध्य आहूय । प्रगृह्य, शय्या मभिवेश्य प्रापय्य, स्वस्य चन्दनदानेन प्राप्ताः सम्पदः सौन्दर्यादयः यया तथाभूतया कुब्जया सह । रेमे अरमत । रमुधातोः कर्तरि लिट् ॥ ६३ ॥

कन्दर्पसन्तापनितान्ततप्तयो स्तदङ्गसंस्पर्शविमुक्तबन्धयोः ।
सुवृत्तपीनस्तनयो र्वराङ्गना तत्पाणिपङ्केरुहमादधे स्वयम् ॥ ६४ ॥

कन्दर्पेति ॥ वराङ्गना कुब्जा, कन्दर्पसन्तापेन नितान्तं तप्तयोः । तस्य भगवतः अङ्गसंस्पर्शेन विमुक्तबन्धयोः त्रुटितचोलबन्धनयोः सुवृत्तयोः पीनस्तनयोः तत्पाणिपङ्केरुहं कृष्णकराम्बुजं स्वय मादधे निदधौ । आङ्पूर्वकधाधातोः कर्तरि लिट् ॥ ६४ ॥

अथ चतुर्भि रक्रूरगमनमाह —

तां तर्पयित्वा सुरतप्रकेलिभिः सोऽक्रूरगेहं प्रययौ सहोद्धवः ।
रामेण साकं निजभक्त मच्युत स्संप्रीणयन् भागवतोत्तमं गुरुम् ॥६५॥

तामिति ॥ सोऽच्युतः श्रीकृष्णः । तां कुब्जां सुरतप्रकेलिभी रतिक्रीडाभिः तर्पयित्वा प्रीणयित्वा, सहोद्धवः उद्धवसहितः । रामेण बलरामेण साकं । निजभक्तं भागवतोत्तमं । गुरुं पितृव्यं । संप्रीणयन् सन्तोषयन् । अक्रूरस्य गेहं ययौ प्राप । यातेः कर्तरि लिट् ॥ ६५ ॥

त्रिलोकनाथावचिरेण भक्तिमान् प्रत्युद्ययौ तौ निजगेहपावनौ ।
तौ नेमतु स्तं जयतां वरौ मुदा सत्यं भजन्तौ गुरवे प्रतिश्रुतम् ॥६६॥

त्रिलोकेति ॥ भक्तिमा नक्रूरः । निजगेहपावनौ त्रिलोकनाथौ तौ रामकृष्णौ । प्रत्युद्ययौ प्रत्युज्जगाम । गुरवेऽक्रूराय । प्रतिश्रुतं सत्यं भजन्तौ । कुर्वन्तौ, जयतां वरौ जयशीलौ तौ रामकृष्णौ । त मक्रूरं मुदा नेमतुः अनमताम् । नम् धातोः कर्तरि लिट् ॥ ६६ ॥

तस्याननं सम्परिकल्प्य मङ्गलं प्रक्षाल्य पादाववनेजनी रपः ।
शिरस्यसौ सम्परिगृह्य भोजनैः सन्तर्पयामास मुदा त मुत्सुकः ॥६७॥

तस्येति ॥ असावक्रूरः । उत्सुकः आसक्तः सन् । तस्य श्रीकृष्णस्य । मङ्गलं शुभ मासनं । संपरिकल्प्य । पादौ प्रक्षाल्य । अवनेजनी रपः पादोदकानि । शिरसि संपरिगृह्य धृत्वा । भोजनै रन्नादिभिः । मुदा तं हरिं । सन्तर्पयामास । तृपधातोर्णिचि आमि अनुप्रयोगे कर्तरि लिट् ॥ ६७ ॥

शय्यां समावेश्य सुखं त मच्युतं प्रोवाच सोऽक्रूर इति प्रहर्षितः ।
अद्यैव मे गेहशरीरसूनवः कलत्रसोदर्यजनाः कृतार्थिताः ॥६८॥

शय्यामिति ॥ सोऽक्रूर स्त मच्युतं श्रीकृष्णं ; शय्यां समावेश्य प्रापय्य, प्रहर्षितस्सन्, अद्येदानीमेव मे गेहशरीरसूनवः गृहदेहपुत्राः । कलत्रसोदर्यजनाः कृतार्थिता इति । प्रोवाच जगाद । प्रपूर्वकब्रूञ्धातोः कर्तरि लिट् । 'ब्रुवोवचि' रिति वचिरादेशः ॥ ६८ ॥

तं प्रेषयामास स हस्तिनापुरीं ततः कुरूणा ममरावतीनिभाम् ।
कुन्तीसुतानां कुशलाय धर्मिणां स्वपादपद्मे भजतां महात्मनाम्
॥ ६९ ॥

तमिति ॥ स श्रीकृष्णः । धर्मिणां धर्मात्मनां । स्वपादपद्मे भजतां महात्मनां कुन्तीसुतानां पाण्डवानां । कुशलाय क्षेमज्ञानाय । त मक्रूरं । अमरावतीनिभां स्वर्गतुल्यां । हस्तिनाख्यां कुरूणां पुरीं । प्रेषयामास प्रेषितवान् । प्रपूर्वक इषधातोर्णिजन्तादामि अनुप्रयोगे कर्तरि लिट् ॥ ६९ ॥

गत्वा गृहं गोपकुलावतंसः भक्तेषु सन्दर्शितसम्प्रसादः ।
क्रीडन् स लीलाभि रसौ रमेशो ऽप्युवास पुर्यां मधुभोजपानाम्
॥ ७० ॥

गत्वेति ॥ भक्तेषु विषये सन्दर्शितः सम्प्रसादोऽनुग्रहः येन तथोक्तः । गोपकुलस्यावतंसः भूषणं । असौ रमेशः । श्रीकृष्णोऽपि, गृहं स्वगृहं गत्वा, लीलाभि र्विलासैः । क्रीडन् सन् । मधुभोजपानां । पुर्यां मधुरायां । उवास अवसत् । वसधातोः कर्तरि लिट् ॥ ७० ॥

अथ नवभिः कुन्तीसुतानां क्षेमं ज्ञातुं हस्तिनापुरीं प्रति अक्रूरगमनमाह —

अथागमत्कौरवपुण्यसञ्चयां स राजधानी मतिसुन्दरां वराम् ।
स्वगोपुराट्टालकहर्म्यजालकैः प्ररुद्धमार्गां दिवि चन्द्रसूर्ययोः
॥ ७१ ॥

अथेति ॥ अथानन्तरं । सोऽक्रूरः, कौरवाणां कुरुराजानां पुण्यसञ्चयां सुकृतपुञ्जात्मिकां । अतिसुन्दरां । वरां श्रेष्ठां । दिवि आकाशे । चन्द्रसूर्ययोः । स्वगोपुराणां पुरद्वाराणां अट्टालकानां हर्म्याणां जालकैः गवाक्षैः । प्ररुद्धः मार्गो यस्यां तां । राजधानी मगमत् प्राप । गम्लृधातोः कर्तरि लुङि लृदित्वादङ् ॥ ७१ ॥

पुरोपकण्ठे नवचूतपादपप्रवालखण्डाशनमत्तकोकिले ।
पद्माकरोत्फुल्लसरोरुहावलीचलाचलेन्दिन्दिरबृन्दनादिते ॥ ७२ ॥

पुरोपकण्ठ इति ॥ पुरोपकण्ठेत्यादि श्लोकद्वयमेकं वाक्यम् । सोऽक्रूरः । पुरोपकण्ठे हस्तिनापुरसमीपे । नवानां चूतपादपानां प्रवालानां पल्लवानां खण्डानां छेदानां अशनेन भक्षणेन मत्ताः कोकिला यस्मिन् तस्मिन् । पद्माकरेषु तटाकेषु उत्फुल्लानां विकसितानां सरोरुहाणां पद्माना मावलीषु चलाचलानां; 'चरिचली' त्यादिना अच्प्रत्यये द्वित्वेऽभ्यासस्य दीर्घः । 'चलं लोलं

चलाचल' मित्यमरः। इन्दिन्दिराणां मधुकराणां; 'इन्दिन्दिरश्चञ्चरीक' इत्यमरः। बृन्देन नादिते मुखरीकृते —; ॥ ७२ ॥

वने ऽवस त्फुल्लसरोरुहस्खलत्परागसौरभ्यसुनिर्भरानिले।
स मालतीमञ्जुलकुन्दमल्लिकालतासमाक्रान्तनिकुञ्जमण्डिते ॥ ७३ ॥

वन इति॥ सः अक्रूरः, फुल्लानां सरोरुहाणां कमलानां स्खलतः परागस्य रजसः सौरभ्येण सुनिर्भरः सुष्ठु व्याप्तः अनिलो यस्मिंस्तस्मिन्। मालतीनां मञ्जुलानां कुन्दानां मल्लिकानां च लताभिः समाक्रान्तैः निकुञ्जै-र्लतागृहैः मण्डिते वने उपवने अवसत् उवास। वसधातोः कर्तरि लिट् ॥७३॥

पुरीं प्रविष्टः समवाप्य मन्दिरं सुयोधनस्याथ विचारयन् सुखम्।
स कर्णदुश्शासनमन्त्रिणश्च पप्रच्छ सौख्यं धृतराष्ट्रभूपतिम् ॥७४॥

पुरीमिति॥ अथानन्तरं। पुरीं प्रविष्टः सः अक्रूरः। सुयोधनस्य दुर्योधनस्य। मन्दिरं समवाप्य, सुखं कुशलं विचारयन्, कर्णदुश्शासनप्रमुखान् मन्त्रिणः, धृतराष्ट्रभूपतिं च। सौख्यं कुशलं। पप्रच्छ। पृच्छधातोः कर्तरि लिट् ॥ ७४ ॥

तं पूजयामासु रतीव गान्दिनीसुतं मुदा ते धृतराष्ट्रसूनवः।
अनामयं तत्र यदूत्तमप्रभोः पृष्ट्वा हरेः कंसवधादिवैभवम् ॥ ७५ ॥

तमिति॥ ते धृतराष्ट्रसूनवो दुर्योधनादयः। गान्दिनीसुत मक्रूरं। तत्र मधुरायां। यदूत्तमप्रभोः हरेः श्रीकृष्णस्य। अनामयं कुशलं। कंसवधादिवैभवं च पृष्ट्वा। त मक्रूर मतीव पूजयामासुः। पूजधातोर्णिचि आमि अनुप्रयोगे कर्तरि लिट् ॥ ७५ ॥

---

१. *स्फुटत्पराग (ख) Comt. स्फुटतः परागस्य (ख)

उवास तत्रैव स गान्दिनीसुतो परेङ्गितज्ञाननिधि र्महामतिः ।
मासान् कति ज्ञातु मतीव चेष्टितुं पुत्रेषु पाण्डो स्तनयेषु भूपतेः ॥ ७६ ॥

उवासेति ॥ परेङ्गितस्य परेषा मभिप्रायज्ञानस्य निधि रावासभूतः। महामतिः । स गान्दिनीसुतोऽक्रूरः । भूपते र्धृतराष्ट्रस्य । पुत्रेषु दुर्योधनादिषु । पाण्डो स्तनयेषु युधिष्ठिरादिषु । चेष्टितं वृत्ति मतीव ज्ञातुं । कतिचि न्मासां स्तत्रैव हस्तिनानगर्याम् मुवास न्यवसत् । वसधातोः कर्तरि लिट् ॥ ७६ ॥

विज्ञाय तस्याविनयं प्रभाषणैः पुत्रेषु पाण्डोरनुजस्य शेमुषीम् ।
कृत्वा प्रयातुं स्वपुरीं महामतिः प्रावोचदित्थं धृतराष्ट्रभूपतिम् ॥७७॥

विज्ञायेति ॥ महामति रक्रूरः, अनुजस्य भ्रातुः, पाण्डोः पुत्रेषु युधिष्ठिरादिषु तस्य धृतराष्ट्रस्य, अविनयं दुर्नयं, प्रभाषणै र्विज्ञाय स्वपुरीं मधुरां प्रयातुं गन्तुं शेमुषीं बुद्धिं कृत्वा, धृतराष्ट्रभूपतिं प्रति, इत्थं वक्ष्यमाणप्राकरेण प्रावोचत् प्रोवाच । वचधातोः कर्तरि लुङ् ॥ ७७ ॥

वक्ष्यमाणप्रकारमे वाह —

भवादृशानां भुवि यादृशी विभो दृष्टि रसमा सर्वजनानुमोदिता ।
पुत्रेषु पाण्डोः कुरु तादृशी मिति प्राह स्म सोऽन्धं जगदीशसेवकः ॥ ७८ ॥

भवादृशानामिति ॥ हे विभो धृतराष्ट्र ! भुवि भवादृशानां भवद्विधानां यादृशी समा दृष्टिः सर्वजनानुमोदिता सर्वजनै रनुमोदनीया । तादृशीं दृष्टिं । पाण्डोः पुत्रेषु धर्मराजादिषु । कुरु इति । स जगदीशसेवकः कृष्णभक्तोऽक्रूरः । अन्धं धृतराष्ट्रं । प्राह स्म उवाच । प्रपूर्वकब्रूञ्धातोः कर्तरि लट् । 'ब्रुवः पञ्चाना' मित्याहादेशः । स्मयोगाद् भूतार्थकत्वम् ॥ ७८ ॥

आमन्त्र्य राजान मवाप्य तां पुरीं कृष्णाय वृत्तिं समवोचदादितः ।
अन्धस्य कुन्तीसुतपञ्चके तदा दुष्टस्य राज्ञः कुमते र्महामतिः
॥ ७९ ॥

आमन्त्र्येति ॥ महामति रक्रूरः । राजानं दुर्योधनं ; आमन्त्र्य आपृच्छ्य ; तां पुरीं मधुरा मवाप्य ; कुमते र्दुष्टस्यान्धस्य राज्ञो धृतराष्ट्रस्य ; कुन्तीसुतानां धर्मराजादीनां ; पञ्चके विषये वृत्तिं प्रीतिं आदितः, कृष्णाय समवोचत् उवाच । वचधातोः कर्तरि लुङ् ॥ ७९ ॥

कृष्णारुणाधरसुनीलशरीरदन्त-
माणिक्यनीलमणिमौक्तिकगुम्भितेऽस्मिन् ।
श्रीपुण्यकोटिविदुषो ज्ज्वलकाव्यहारे
सर्गो बभूव नवम स्तरलायमानः ॥ ८० ॥

कृष्णेति ॥ पुण्यकोटिविदुषा, कृष्णस्य अरुणाधरः सुनीलशरीर-दन्ताश्चतएव माणिक्यनीलमणिमौक्तिकानि तै र्गुम्भिते ग्रथितेऽस्मिन् समुज्ज्वले प्रकाशमाने काव्यहारः काव्यालाप एव हारः मुक्ताहार स्तस्मिन्, तरलायमानो नायकमणिः इव आचरन् । आचारार्थे क्यजन्तात्कर्तरि शानच् । 'तरलो हारमध्यग' इत्यमरः । कृष्णावतारमुख्यप्रयोजनकंसादिवधप्रतिपादकत्वान्मुख्यत्वम् । 'जातः कंसवधार्थाये' ति वचनात् । नवमस्सर्गो बभूव । भूधातोः कर्तरि लिट् । यथासंख्यालङ्कारः ॥ ८० ॥

भक्तिपारवश्यात्कविराह—

स्मेराननात्कमलकोमलपादयुग्मा-
दिन्दीवरेन्दुघनलोचनवक्त्रगात्रात् ।
वंशीनिनादरसिका च्छिखिपिञ्छचूडाद्
बाला त्परं किमपि दैव महं न जाने ॥ ८१ ॥

स्मेरेति ॥ स्मेरं स्निग्ध माननं मुखं यस्य तस्मात्, कमलमिव कोमलं पादयुग्मं यस्य तस्मात्। इन्दीवरं नीलोत्पलं, इन्दुश्चन्द्रः घनो मेघश्च त इव लोचनवक्त्रगात्रं यस्य तस्मात्। वंशीनिनादे वेणुनादे रसिकात्। शिखिपिञ्छानि चूडायां केशबन्धे यस्य तस्मात्। 'शिखा चूडा केशपाश' इत्यमरः। बालात्कृष्णा त्परं अन्यत् किमपि दैवं न जाने न जानामि। अत्र क्रमिकाणां इन्दीवरादीनां लोचनादिषु क्रमेणान्वयात् यथासंख्यालङ्कारः ॥ ८१ ॥

॥ इति श्रीकृष्णविलासे सव्याख्याने पुण्यकोटिकृते
नवमस्सर्गः ॥

दशमस्सर्गः

गत्वाऽथ कंसस्य हतप्रिये स्त्रियौ गिरिव्रजाख्यं नगरं गताशये ।
द्वे मागधस्याशु निपत्य पादयो स्तातस्य संचुक्रुशतु र्मुहु र्मुहुः ॥ १ ॥

गत्वेति ॥ अथ कंसवधानन्तरं, हतः प्रियो ययो स्ते । अत एव गताशये गताशे द्वे कंसस्य स्त्रियौ भार्ये गिरिव्रजाख्यं नगरं मागधराजधानीं गत्वा, तातस्य पितुः मागधस्य मगधदेशाधीश्वरस्य जरासन्धस्य पादयोः आशु निपत्य, मुहु र्मुहुः संचुक्रुशतुः रुरुदुः । क्रुशधातोः कर्तरि लिट् ॥ १ ॥

प्राप्तां च वैधव्यगतिं स मागधः प्रास्तेस्सुतायाः कृतकंसमर्दनात् ।
अस्तेश्च दृष्ट्वा हरयेऽश्रुलोचन श्चुकोप संक्रुद्ध इव श्वसन् फणी ॥ २ ॥

प्राप्तामिति ॥ स मागधो जरासन्धः कृतं कंसमर्दनं येन तस्मात् श्रीकृष्णात् सुतायाः अस्तेः प्रास्तेश्च प्राप्तां वैधव्यगतिं दृष्ट्वा, अश्रूणि लोचनयो र्यस्य तथाभूतस्सन् संक्रुद्धः फणी सर्प इव श्वसन् सन् उच्छ्वासं मुञ्चन् हरये कृष्णाय चुकोप कुपितवान् । 'क्रुधद्रुहेर्ष्यासूयार्थाना' मिति चतुर्थी । कुपधातोः कर्तरि लिट् । पूर्णोपमालङ्कारः ॥ २ ॥

अथैकोनविंशतिश्लोकै र्जरासन्धस्य हरिणा सह युद्धे पराजयो वर्ण्यते—

कृत्वा तदाश्वेत्य हि सोद्यमं त्रयोविंशत्युपेतो रिपुमागधाधिपः ।
अक्षौहिणीनां न्यरुणत्पुरीं हरेः कृष्णो जरासन्ध ममन्यतागतम् ॥ ३ ॥

कृत्वेति ॥ तदा तस्मिन् समये । सोद्यम इत्यत्र सः उद्यम मिति छेदः । 'सोऽचि लोपे चेदि' ति सोर्लोपः । स रिपुमागधाधिपः जरासन्धः, उद्यमं अतिप्रयत्नं कृत्वा, अक्षौहिणीनां त्रयोविंशत्या उपेत स्सन्, आशु एत्य

आगत्य, हरेः पुरीं मधुरां न्यरुणत् रुरोध। कृष्णोऽपि जरासन्धमागत-ममन्यत मेने। मनुतेः कर्तरि लुङ् ॥ ३ ॥

सोऽचिन्तय त्तं सबलं निहन्मि चे दन्यं न पश्यामि बलोद्यमक्षमम्।
तस्माद् बलं तच्चतुरङ्ग मञ्जसा हन्मीति कर्ताऽस्य बलोद्यमं पुनः ॥४॥

स इति ॥ स श्रीकृष्णः कर्ता, सबलं तं जरासन्धं हन्मि चेत्, बलोद्यमे बलसंग्रहे क्षमं समर्थं अन्यं न पश्यामि। तस्माद्धेतोः, चत्वार्यङ्गानि हस्त्यश्वरथपदातिरूपाणि यस्य, तत्, तद्बलं जरासन्धबलं सैन्यं अञ्जसा हन्मि संहरामि। स जरासन्धः, पुन रस्य बलोद्यमं कर्ता करिष्यतीति, अचिन्तयत् चिन्तयामास। चितिधातो र्णिजन्ता त्कर्तरि लङ् ॥ ४ ॥

अतिदुर्घटमपि स्मरणमात्रेण घटत इत्याह —

सुध्यायतीशे ऽखिललोकसम्मते रथौ ससूतौ सपरिच्छदायुधौ।
स्वलङ्कृतौ तत्र तयो रुपस्थिता वाकाशमार्गादनलार्कसन्निभौ ॥ ५ ॥

सुध्यायतीति ॥ अखिलानां लोकानां सम्मते ईशे कृष्णे सुध्यायति सति ससूतौ ससारथी। 'सूतः त्वष्टरि सारथौ' इत्यमरः। सपरिच्छदायुधौ उपकरणायुधसहितौ अत एवानलार्कसन्निभौ अग्निरवितुल्यौ रथौ तत्र प्रदेशे तयो रामकृष्णयोः पुर इति शेषः। आकाशमार्गात् उपस्थितौ प्राप्तौ ॥ ५ ॥

दृष्ट्वा रथौ तौ बल मब्रवी द्धरिः समागतं दिव्य मिमं जनार्तिहन्।
आरोह ते स्यन्दन माशु मागधं यावः स्वशत्रुं शरचापमण्डितः ॥ ६ ॥

दृष्ट्वेति ॥ हरिः श्रीकृष्णः, तौ समागतौ रथौ दृष्ट्वा, जनाना मार्तिं पीडां; 'आर्तिः पीडाधनुष्कोट्यो' रिति विश्वः। तां हन्तीति तथोक्तः। तस्य सम्बुद्धिः हे जनार्तिहन्! बलराम! समागतं दिव्य मिमं ते स्यन्दनं तालाङ्कं रथं, शरै श्चापेन च मण्डितस्सन् आरोह! स्वशत्रुं मागधं जरासन्धं आशु यावो गच्छावः। इति बलं बलराम मब्रवीत् उवाच। ब्रूञ् धातोः कर्तरि लङ्। 'ब्रुव ई डि' ति ईडागमः ॥ ६ ॥

**आरुह्य तावाशु रथौ स्वपट्टणा न्निरीयतु र्वीरवरौ महारथौ ।
गृहीततूणीरशरासनौ हरिः शंखं स दध्मौ परहृद्भिदारवम् ॥ ७ ॥**

आरुह्येति ॥ वीरवरौ वीरश्रेष्ठौ, महारथौ 'आत्मानं सारथिं चाश्वान् रक्षन् युध्येत यो नरः । स महारथसंज्ञः स्या' दिति महारथलक्षणम् । तौ रामकृष्णा वाशु रथ मारुह्य, गृहीता स्तूणीरा निषङ्गाः 'तूणोपासङ्गतूणीर-निषङ्गा इषुधि र्द्वयो' रित्यमरः । शरासने धनुषी च याभ्यां तथाविधौ सन्तौ स्वपट्टणात् मधुरापुरा न्निरीयतुः निर्जग्मतुः । निर्पूर्वकइण्धातोः कर्तरि लिट् । 'दीर्घ इणःकिती' ति दीर्घः । स हरिः श्रीकृष्णः, परेषां शत्रूणां हृत् हृदयं भिनत्तीति तथोक्तः । आरवः ध्वनि र्यस्य तं, शंखं पाञ्चजन्यं दध्मौ पूरयामास । ध्माधातोः कर्तरि लिट् ॥ ७ ॥

**आह स कृष्णं मगधेश्वरो रुषा नीचाधम त्वं न समोऽसि याहि मे ।
बलं निहन्म्येन मथेति पश्यति त्वय्युत्तमद्रोहिणि मत्सुतापतेः ॥ ८ ॥**

आहेति ॥ अथानन्तरं, मगधेश्वरो जरासन्धः कर्ता, हे नीचाधम! त्वं मे न समोऽसि । अतो याहि गच्छ! मत्सुतयो रस्तिप्रास्त्योः पते र्भर्तुः कंसस्य, उत्तमश्चासौ द्रोही च तस्मिन् त्वयि पश्यति सति । 'षष्ठी चानादर' इति अनादरे सप्तमी । पश्यन्तं त्वामनादृत्येत्यर्थः । एनं बलं बलरामं निहन्मि संहरामि । इति रुषा कृष्णमाह स उवाच । ब्रूञ्धातोः कर्तरि लट् । आहादेशः ॥ ८ ॥

**इत्थं जरासन्ध मसाधुवादिनं विकत्थसे त्वं न करोषि विक्रमम् ।
गर्जन्ति मेघाः किल मोघ मुच्चकै र्न वारि मुञ्चन्ति यथाऽवद
द्धरिः ॥ ९ ॥**

इत्थमिति ॥ मेघाः यथा मोघं व्यर्थं उच्चकै र्गर्जन्ति, वारि न मुञ्चन्ति, तथा त्वं विकत्थसे वृथा जल्पसि । विक्रमं न करोषि । इत्थं हरिः कृष्णः, असाधुवादिनं परुषवादिनं जरासन्धं अवद दवोचत् । वदधातोः कर्तरि लङ् । पूर्णोपमालङ्कारः ॥ ९ ॥

आगत्य कृष्णं बहु सेनयाऽऽवृणोत्कोपा दसौ सूर्य मिवाशु रेणुभिः ।
समुद्धतै र्वायु रिवाम्बुदो गिरिं ववर्ष शस्त्रै स्सलिलं वलाहकः ॥१०॥

आगत्येति ॥ असौ जरासन्धः कोपा दागत्योपेत्य सबलं सरामं कृष्णं बहुसेनया समुद्धतै रेणुभिः परागैः वायु स्सूर्य मिवाशु आवृणो दाच्छादितवान् । अम्बुदः वलाहको मेघः गिरि मिव शस्त्रै र्ववर्ष । वर्षधातोः कर्तरि लिट् । पूर्णोपमालङ्कारः ॥ १० ॥

सुपर्णतालध्वजचिह्नितौ रथौ विलक्षयन्त्यो न तु तौ नरोत्तमौ ।
पुरस्त्रियोऽट्टालकसौधगोपुरा ण्यारुह्य बाष्पं मुमुचु र्मुहु र्मुहुः ॥११॥

सुपर्णेति ॥ पुरस्त्रियः पौराङ्गनाः, अट्टालकानि सौधानि गोपुराणि पुरद्वाराणि च । 'पुरद्वारं तु गोपुर' मित्यमरः । आरुह्य । सुपर्णतालध्वजाभ्यां चिह्नितौ रथौ विलक्षयन्त्यः पश्यन्त्यः, तौ नरोत्तमौ पुरुषश्रेष्ठौ रामकृष्णौ तु न विलक्षयन्त्यः सत्यः, बाष्प मश्रूणि मुहु र्मुहु र्मुमुचुः मुक्तवत्यः । मुचॢधातोः कर्तरि लिट् ॥ ११ ॥

हरिः परानीक पयोधरापत त्प्रचण्ड काण्डाऽशनि वर्षपातितम् ।
स्वसैन्य मावेक्ष्य सुरासुरेडितं समाददे शार्ङ्गशरासनं नदन् ॥१२॥

हरिरिति ॥ हरिः श्रीकृष्णः, परानीकं शत्रुसैन्यमेव पयोधरो मेघः तस्मादापततां, प्रचण्डाः काण्डाः त एवाशनयः तेषां वर्षे पातितं स्वसैन्यमावेक्ष्य नदन् सिंहनादं कुर्वन्, सुरासुरै रीडितं स्तुतं शार्ङ्गशरासनं शार्ङ्गनामकं धनुः समाददे जग्राह । समाङ्पूर्वक दाधातोः कर्तरि लिट् । रूपकालङ्कारः ॥ १२ ॥

विमुञ्चत स्तीक्ष्णमुखान् शिलीमुखान् सैन्येषु शत्रो श्शतशोऽतिलाघवात् ।
शरासनं तस्य सुमण्डलीकृतं व्यलोकि लोकेन विभो र्मृधे तदा ॥१३॥

विमुञ्चत इति ॥ शलो जेरासन्धस्य सैन्येषु मृधे युद्धे तीक्ष्णानि मुखानि अग्राणि येषां तान्। शिलीमुखान् बाणान् अतिलाघवाच्छतशः विमुञ्चत स्तस्य विभोः श्रीकृष्णस्य, शरासनं धनुः तदा तस्मिन् समये; लोकेन जनेन सुष्ठु मण्डलीकृतं व्यलोकि ददृशे। लोकृधातोः कर्मणि लुङ् ॥ १३ ॥

निषङ्गमध्या दिपुसञ्चयान् हरि स्समादधानो न च सन्दधानकः ।
अलक्ष्यतास्याशुगभिन्नविग्रहाः जनेन सैन्या निपतन्त एव तु ॥ १४ ॥

निषङ्गेति ॥ जनेन निषङ्गमध्यात् तूणीरमध्यात् इषुसंचयान् बाण-गणान् समादधानः गृह्णन् सन्दधानकश्च धनुषि सन्दधानश्च, स हरिः श्रीकृष्णः नालक्ष्यत। किं तु अस्य श्रीकृष्णस्य आशुगै र्बाणै र्भिन्ना विग्रहा देहा स्ते सैन्या स्सैनिकाः 'सेनायां समवेता ये सैन्यास्ते सैनिकाश्च ते' इत्यमरः। भूम्यां निपतन्त एव अलक्ष्यन्त। लक्षधातोः कर्मणि लङ् ॥ १४ ॥

इभाः प्रभिन्ना निशितै श्शिलीमुखै र्विभिन्नकुम्भा भुवि पेतु राहताः ।
अश्वा रथाः सध्वजसारथीश्वराः पदातय श्छिन्नभुजोरुकन्धराः ॥१५॥

इभा इति ॥ प्रभिन्ना मत्ताः 'प्रभिन्नो गर्जितो मत्त' इत्यमरः। इभा गजाः, निशितैस्तीक्ष्णैः, शिलीमुखै र्बाणैः, विभिन्नाः कुम्भा येषां ते तथोक्ता स्सन्तः। अश्वाः ध्वजै स्सारथिभि रीश्वरैश्च सहिताः सध्वजसारथीश्वराः। रथा आहता स्सन्तः, तदा पदातयः पत्तयः, भुजा ऊरवः कन्धराश्च तेषां समा-हारः भुजोरुकन्धरं; प्राण्यङ्गत्वादेकवद्भावः। छिन्नं भुजोरुकन्धरं येषां तथोक्ता-स्सन्तः। भुवि पेतुः अपतन्। पत्लृधातोः कर्तरि लिट् ॥ १५ ॥

सङ्ग्रामभूम्यम्बुगभीरवाहिनीसमाकुलं लोलकबन्धबन्धुरम् ।
चक्री सुचक्रीकृतशार्ङ्गकार्मुक श्चक्रे महान् नक्र इवाकुलं तदा ॥१६॥

संग्रामेति ॥ चक्री कृष्णः। गभीराभि र्वाहिनीभिः सेनाभि र्नदीभिश्च समाकुलम्। लोलैः कबन्धै रपगतमूर्धकलेबरैः। 'कबन्धोऽस्त्री क्रियायुक्त मप-

मूर्धकलेबर' मित्यमरः। जलैश्च। 'कबन्धमुदकं पाथ' इत्यमरः। बन्धुरं मेदुरं, संग्राममूमि युद्धभूमिरेव अम्बुनिधि स्समुद्रः तं सुष्ठु चक्रीकृतं शार्ङ्गनामकं कार्मुकं येन तथाभूतस्सन् महान् नक्रः ग्राह इव 'ग्राहोऽवहारो नक्रस्तु' इत्यमरः। तदा आकुलं व्याकुलं चक्रे चकार। कृधातोः कर्तरि लिट्। वाहिनीकबन्धादिशब्दश्लेषमूलकः उपमालङ्कारः॥ १६॥

प्रसस्तु रत्न क्षतजोदका नदा बाहूरुमीनोत्तमवर्मकच्छपाः।
गजाश्वभिन्नाङ्गकनक्रसर्पिणो राज्ञां सितोष्णीषसुफेनमेदुराः॥१७॥

प्रसस्तुरिति॥ अत्र युद्धभुवि, क्षतजं रक्तमेव उदकं येषु ते। बाहूर्वेव मीनाः उत्तमवर्माण्येव कच्छपाश्च येषां ते। प्राण्यङ्गत्वादेकवद्भावः। गजाश्च अश्वाश्च तेषां भिन्नानि अङ्गान्येव नक्रा ग्राहाः सर्पाश्च येषां ते। राज्ञां सितोष्णीषा एव सुफेनाः तै र्मेदुराः सान्द्रा नदाः प्रसस्रुः। स्रुधातोः कर्तरि लिट्। रूपकालङ्कारः॥ १७॥

एवं निहत्यारिबलं बलानुजो हलायुधं युद्धविशारदं मुदा।
जहीत्यवोचद्धतसेन माकुलं शत्रुं रणे दुष्टधियं स मागधम्॥ १८॥

एवमिति॥ स बलानुजः श्रीकृष्णः। एवं पूर्वोक्तप्रकारेण। अरिबलं शत्रुसैन्यं। निहत्य संहृत्य। युद्धे विशारदं समर्थं हलायुधं रामं प्रति। हता सेना यस्य तं। अत एवाकुलं। दुष्टा धीर्यस्य तं; शत्रुं मागधं जरासन्धं। रणे जहि इति मुदाऽवोचत्। वचधातोः कर्तरि लुङ्॥ १८॥

विभिन्नदेहं विरथं स मागधं विनष्टसूताश्वशरासिकार्मुकम्।
प्रगृह्य तं हन्तु मियेष रोहिणीसुतोऽथ केशेषु निपात्य वैरिणम्॥१९॥

विभिन्नेति॥ अथानन्तरं स रोहिणीसुतो बलरामः विभिन्नो विदीर्णो देहो यस्य तं, विगतो रथो यस्य तं; विनष्टानि सूतः सारथिः अश्वाः शराः असिः कार्मुकं च तानि यस्य तम्। वैरिणं मागधं जरासन्धं केशेषु प्रगृह्य निपात्य पातयित्वा हन्तुमियेष। इषधातोः कर्तरि लिट्॥ १९॥

तं मोचयित्वा बलतो विनाकृतं बलेन लज्जानदमज्जदाननम् ।
पराभवो नीचयदुभ्य एव ते प्राप्तः किलेति प्रजहास तं हरिः
॥ २० ॥

तमिति ॥ हरिः श्रीकृष्णः बलेन सैन्येन विनाकृतं वियोजितं, अत एव लज्जैव नद स्तस्मिन् मज्जत् आननं यस्य तथाविधं जरासन्धं । बलतः बलरामान्मोचयित्वा । ते तव नीचयदुभ्य एव पराभवः प्राप्त इति । तं जरासन्धं प्रजहास परिहसितवान् । प्रपूर्वक हसधातोः कर्तरि लिट् । 'नीचाधम त्वं न समोऽसी'ति पूर्वं त्वया योऽवमानित स्तेनैव पराभवो जात इति परिहसितवानिति भावः ॥ २० ॥

वारान् रिपो स्सप्तदशैव माहवे निहत्य सैन्यं मुमुदे स केशिहा ।
अष्टादशे भाविनि नारदेरितः सकालपूर्वो यवनोऽरुणत् पुरीम् ॥२१॥

वारानिति ॥ स केशिहा श्रीकृष्णः, एवं पूर्वोक्तप्रकारेण आहवे युद्धे रिपो र्जरासन्धस्य सैन्यं सप्तदशवारान् निहत्य मुमुदे तुतोष । अष्टादशे आहवे भाविनि सति नारदेन ईरितः प्रेरितः स प्रसिद्धः कालशब्दपूर्वो यवनः कालयवन इत्यर्थः । पुरीं मधुरापुरी मरुणत् रुरोध । रुधिर्धातोः कर्तरि लङ् । अत्र कालशब्दपूर्वत्वं यवनशब्दस्यैव, न तु संज्ञिनस्तदर्थस्येति शब्दपरस्य यवनशब्दस्यार्थपरत्वेनाप्रयोज्यस्य प्रयोगात् अवाच्यवचनं दोषमाहुः । 'यदवाच्यस्य वचनं अवाच्यवचनं हि तदि' ति लक्षणात् । समाधानं तु एवंविधविषये शब्दपरेणापि अर्थो लक्ष्यत इति कथंचित्संपाद्यमिति 'देवपूर्वं गिरिं ते, धनुरुपपदमस्मै वेदमन्वादिदेश' इत्येतद्व्याख्यानावसरे सञ्जीविन्यां घण्टापथे चोक्तम् ॥ २१ ॥

अथ हरि रागतेन कालयवनेन, आगमिष्यता जरासन्धेन वा युद्धे प्रसक्ते सति अन्यतरो मधुरां प्रविश्य रक्षकाभावात् सर्वान् हनिष्यतीति समालोच्य अन्यैः प्रवेष्टुमशक्यां जलदुर्गां द्वारकापुरीं रचयामासेति त्रिभिः कुलकमाह—

हरिः समालोच्य पुरं स्ववैरिणा समावृतं कालदुरात्मना स्वकम् ।
एष्यन्तमन्तर्जलधौ च मागधं श्वो राजधानीं रचयांचकार सः ॥२२॥

हरिरिति ॥ स हरिः श्रीकृष्णः । स्ववैरिणा कालदुरात्मना । स्वकं पुरं समावृतं मागधं जरासन्धं श्वः एष्यन्तं च समालोच्य, अन्तर्जलधौ जलमध्ये । राजधानीं पुरीं रचयामास । रचधातो र्णिजन्तादामि कर्तरि लिट् अनुप्रयोगः ॥ २२ ॥

अत्युन्नतां द्वादशयोजनायतां त्वष्टुस्सुनैपुण्यविशेषसंश्रयाम् ।
स्वर्गोपमां पुण्यनरोपयोगिनीं प्राकाररेखापरिखासमावृताम् ॥ २३ ॥

अत्युन्नतामिति ॥ अत्युन्नतां द्वादशयोजनानि आयतां विस्तृतां, त्वष्टु विश्वकर्मणः, सुनैपुण्यविशेषस्य निर्माणचातुर्यातिशयस्य, संश्रयामाश्रयभूताम्, स्वर्गोपमां स्वर्गतुल्यां, पुण्यनराणां पुण्यपुरुषाणां उपयोगिनीं उपयुक्तां ताच्छील्ये णिनिः । प्राकाररूपया रेखया परिखया च समावृताम् ॥ २३ ॥

सुवर्णहर्म्यस्फटिकाट्टमण्डितां माणिक्यवातायनसौधशोभिताम् ।
समुन्नतद्वारवतीं पुरोत्तमां सुपर्वणां तां रचयाञ्चकार ॥ २४ ॥

सुवर्णेति ॥ स श्रीकृष्णः, सुवर्णहर्म्यैः कनकमयोन्नतगृहैः स्फटिकाट्टैः स्फटिकमयगृहविशेषैः मण्डिता मलङ्कृताम् । माणिक्यमयानि वातायनानि माणिक्यमया गवाक्षाः येषु तैः सौधैः राजभवनैः शोभितां समुन्नतानि द्वाराणि अस्याः सन्तीति तथोक्तां, सुपर्वणां देवानां पुरोत्तमां द्वारवतीं द्वारकापुरीं रचयाञ्चकारेति पूर्वेणान्वयः ॥ २४ ॥

संस्थाप्य बन्धून्निजयोगमायया कृत्स्नाद्भुतायां लघु तत्र माधवः ।
पुर्यां ययौ योध्दुमनेन वैरिणा सहाग्रजः कालदुरात्मना जवात् ॥२५॥

संस्थाप्येति ॥ माधवः श्रीकृष्णः । कृत्स्नस्य कृत्स्नजनस्य, अद्भुताया माश्चर्यभूतायां तत्र पुर्यां द्वारकायां, बन्धून्, निजयोगमायया लघु शीघ्रं संस्थाप्य, अनेन कालदुरात्मना कालः कालयवनः । नामैकदेशे नामग्रहणम् । स चासौ दुरात्मा च तेन योद्धुं सहाग्रजः रामसहितः सन् जवात् ययौ । यातेः कर्तरि लिट् ॥ २५ ॥

अथ पञ्चभिः कालयवनवधरूपलीला वर्ण्यते—

तं वञ्चितुं तूर्णमसौ निरायुधः पुराद्बहि र्युद्धभुवि व्यदृश्यत ।
तेनैव देवो यदनेन माधवः रूपादिनायं त्विति सिद्धबुद्धिना ॥२६॥

तमिति ॥ असौ देवः श्रीकृष्णः । तं कालयवनं वञ्चितुं निरायुध-स्सन् तेन मेघश्यामः पीताम्बरः निरायुध इत्यादिना (रजोक्तैनैव?) रूपादिना अयं देवो माधव इति सिद्धा बुद्धि र्यस्य तेन यवनेन पुराद् बहि र्युद्धभुवि तूर्णं व्यदृश्यत ददृशे । दृशिधातोः कर्मणि लङ् ॥ २६ ॥

तं सन्ददर्शाथ यदुप्रभुं हरिं सन्दर्शनीयाङ्गविभूषणोज्ज्वलम् ।
कामायमानं यवनो दुरात्मकः पीताम्बरालंकृतचारुमेखलम्
॥ २७ ॥

तमिति ॥ अथानन्तरं दुरात्मकः दुष्टो यवनः कालयवनः संदर्शनीयै-रङ्गैः विभूषणैश्च उज्ज्वलं प्रकाशमानं कामायमानं काम इवाचरन्तं तद्वत्सुन्दर-मित्यर्थः । उपमानादाचारे कर्तुः क्यङ् । पीताम्बरेणालङ्कृता चारुमेखला यस्य तं यदूनां प्रभुं हरिं श्रीकृष्णं संददर्श । संपूर्वकदृशिधातोः कर्तरि लिट् ॥ २७ ॥

विभासयन्तं ककुभो मुखेन्दुना पलायमानं यवन स्त मन्वगात् ।
पदे पदे भाविनि लभ्यचिन्तया तिरोदधेऽसौ गिरिकन्दरे ततः
॥ २८ ॥

विभासयन्तमिति ॥ यवनः कालयवनः, मुखेन्दुना मुखचन्द्रेण ककुभो दिशः विभासयन्तं प्रकाशयन्तं पलायमानं तं श्रीकृष्णं भाविनि पदे पदे। वीप्सायां द्विर्भावः । लभ्यः प्राप्यः इति चिन्तयाऽन्वगात् अनुययौ । ततोऽनन्तर मसौ श्रीकृष्णः गिरिकन्दरे पर्वतगुहायां तिरोदधेऽन्तर्हितोऽभवत् । धा धातोः कर्तरि लिट् ॥ २८ ॥

प्रविश्य शीघ्रं गिरिगह्वरं रिपुः दृष्ट्वा शयानं मुचुकुन्दमन्तरा ।
पदप्रहारेण विनिद्र माशु तं चकार मन्दो मधुभिन्मनीषया ॥२९॥

प्रविश्येति ॥ मन्दो मूढो रिपुः कालयवनः । शीघ्रं गिरिगह्वरं गुहां, 'देवखातबिले गुहा गह्वर' मित्यमरः । प्रविश्य अन्तरा गुहामध्ये शयानं मुचुकुन्दं दृष्ट्वा मधुभिदिति कृष्ण इति मनीषया बुद्ध्या तं मुचुकुन्दं पदप्रहारेण आशु विनिद्रं निद्रारहितं चकार । कृधातोः कर्तरि लिट् ॥ २९ ॥

सोत्थाय दृष्ट्वा यवनं पुरः स्थितं प्रादीदह न्नेत्रजवह्निना रुषा ।
पपात भूमौ किल भस्मसात्कृतः क्षणेन कृष्णे कुहरे स पश्यति ॥३०॥

स इति ॥ स मुचुकुन्दः । 'सोऽचि लोपे चे'दिति सोर्लोपः । उत्थाय पुरः स्थितं यवनं कालयवनं दृष्ट्वा रुषा नेत्रजेन वह्निना प्रादीदहत् ददाह । स यवनः कृष्णे पश्यति सति क्षणेन, अभस्म भस्म संपद्यते भस्मसात् कृतस्सन् 'विभाषा साति कार्त्स्न्ये' इति साति प्रत्ययः । कुहरे गुहायां भूमौ पपात किल । पतधातोः कर्तरि लिट् ॥ ३० ॥

अत्र दैवासुरे युद्धे देवैः सहायार्थं प्रार्थितं असुरै र्युध्यमानं निद्रया विनाऽतीतबहुकालं जैत्रं मुचुकुन्दं प्रीता देवाः वरेण छन्दयामासुः । सतु अविघ्नं यथा तथा निद्रां मोक्षं च वृतवान् । अनन्तरं तव निद्रा तथैव भवतु । अन्तरा यः विघ्नमाचरति स तु तव नेत्राग्निना भस्मीभविष्यतीति वरं दत्वा, न वयं मोक्षदातारः, किं तु जनार्दन एव, मोक्षमिच्छेज्जनार्दना दिति वचनात् । निद्रान्ते त्वं जनार्दन दर्शनपूर्वकं मोक्षं प्राप्स्यसीति देव रुवत इति कथाऽनुसन्धेया ।

अथ पञ्चभि र्मुचुकुन्दस्य ज्ञान मुपदिशति—

दृष्ट्वा ऽब्रवीदेष रमेश मन्तिके श्रीवत्सचिह्नाङ्कितचारुवक्षसम् ।
चतुर्भुजं भासुररत्नकुण्डलं पीताम्बरालम्बिसुवर्णमेखलम् ॥ ३१ ॥

दृष्ट्वेति ॥ एष मुचुकुन्दः श्रीवत्साख्यचिह्नेनाङ्कितं चारु वक्षो यस्य तं; चत्वारो भुजा यस्य तं; भासुरे रत्नकुण्डले यस्य तं; पीताम्बरे आलम्बिनी सुवर्णमेखला यस्य तं; रमेशं कृष्णं अन्तिके समीपे दृष्ट्वाऽब्रवीदवोचत् । ब्रूञ्धातोः कर्तरि लङ् । 'ब्रुव ई'डिति ईडागमः ॥ ३१ ॥

कस्त्वं विभो देव गिरे र्गुहा मिमां कथं प्रविष्टो भगवन् ममेष्टद ।
अर्हत्तमोऽसीश पदाम्बुजद्वयं प्रसीद पद्माक्ष नतोऽस्मि मा चिरम् ॥३२॥

कस्त्वमिति ॥ हे विभो देव त्वं कः? मम इष्टद अभीष्टद! हे भगवन्! इमां गिरे र्गुहां कथं प्रविष्टोऽसि? हे ईश! अर्हत्तमः अतिशयेन पूज्योऽसि । पदाम्बुजद्वयं त्वच्चरणारविन्दयुगलं नतोऽस्मि । हे पद्माक्ष! कमललोचन! प्रसीद! मा चिरं कालविलम्बो मा भूत् ॥ ३२ ॥

दैवासुरे त्वां सुरपक्षपालना दिक्ष्वाकुजं भूमिप वेद्मि मत्प्रियम् ।
जानीहि ते देववरा दिहागतं मोक्षप्रदं मा मिति सोऽब्रवी दिदम् ॥३३॥

दैवेति ॥ मम प्रियं, हे भूमिप मुचुकुन्दभूप! त्वां दैवासुरे युद्धे सुराणां देवानां, पक्षस्य पालनात् इक्ष्वाकुजं इक्ष्वाकुपुत्रं वेद्मि जाने । इह गुहायां । आगतं मां । देवानां वरा त्ते तुभ्यं मोक्षप्रदं । जानीहि अवेहि । इति स श्रीकृष्णः इमं मुचुकुन्द मब्रवीत् उवाच । ब्रूञ्धातोः कर्तरि लङ् ॥ ३३ ॥

तं प्रेषयामास स मुक्तिदो हरिद्वारं हरि र्बन्धविमोक्षदं नृणाम् ।
भजस्व मां प्राप्स्यसि मुक्ति मञ्जसा योगेन भावेन मयीत्युदीरयन्
॥ ३४ ॥

तमिति ॥ मुक्तिदो हरिः श्रीकृष्णः । तं मुचुकुन्दं प्रति । मयि भावेन योगेन अष्टाङ्गयोगेन च, मां भजस्व, मुक्तिं मञ्जसा प्राप्स्यसि इति उदीरयन् वदन्, नृणां जनानां बन्धविमोक्षदं संसारबन्धनिवर्तकं हरिद्वारं, प्रेषयामास प्रेषितवान् । प्रपूर्वक इषधातोः णिजन्तादामि अनुप्रयोगे कर्तरि लिट् ॥ ३४ ॥

प्रदक्षिणीकृत्य तमीश्वरं मुदा दृष्ट्वा जनान् क्षुल्लकमन्दमेधसः ।
ययौ स नारायण माश्रमं तदा स्मरन् रमेशं मुचुकुन्दभूपतिः ॥३५॥

प्रदक्षिणीकृत्येति ॥ मुकुन्दस्य भक्तः स मुचुकुन्दभूपतिः, तमीश्वरं श्रीकृष्णं मुदा प्रदक्षिणीकृत्य, तदा तस्मिन् काले क्षुल्लकान् अल्पाकृतीन् मन्दमेधसः मन्दमतीन् जनान् दृष्ट्वा, नारायणं नारायणसम्बन्धिनं; शैषिकोऽण् प्रत्ययः । 'वा नामधेयस्ये' ति वृद्धिसंज्ञाया वैकल्पिकत्वान् छप्रत्ययाभावः । आश्रमं नारायणाश्रम मित्यर्थः । रमेशं श्रीकृष्णं स्मरन् ययौ । यातेः कर्तरि लिट् ॥ ३५ ॥

पुनर्हरिः शत्रुबलाभिपीडितां सम्प्राप्य शीघ्रं मधुरां बलाच्युतौ ।
कृतातिसीमां चतुरङ्गवाहिनीं तावाहतां कालदुरात्मनः क्षणात्
॥ ३६ ॥

पुनरिति ॥ हरिः श्रीकृष्णः, शत्रुबलेन शत्रुसैन्येनाभिपीडितां मधुरां पुनश्च शीघ्रं सम्प्राप्य आगत्य, अतिसीमां अतिक्रान्तमर्यादां असंख्येयामित्यर्थः । कालदुरात्मनः कालयवनस्य चतुरङ्गां चत्वार्यङ्गानि हस्त्यश्वरथपादातरूपाणि यस्या स्तां वाहिनीं सेनां तौ बलाच्युतौ आहतां जघ्नतुः । आङ्पूर्वक हनधातोः कर्तरि लङ् ॥ ३६ ॥

अथ पञ्चभि र्मागधपराजयरूपलीलां वर्णयति —

धनानि सर्वाणि पुरात्पुरीं नवा मिभौ नयन्तौ वृषभोष्ट्रवाजिभिः ।
श्रुत्वा धुरीणैः पुरुषोत्तमौ रुषा बली सरण्यां न्यरुण त्स मागधः
॥ ३७ ॥

धनानीति ॥ बली बलवान् मागधो जरासन्धः पुरुषोत्तमाविमौ रामकृष्णौ सर्वाणि धनानि धुरीणै र्भारवहैः वृषभै रुष्ट्रैः वाजिभिश्च पुरात् मधुरायाः नवां पुरीं द्वारकां नयन्तौ प्रापयन्तौ श्रुत्वा सरण्यां मार्गे रुषा न्यरुणत् रुरोध । रुधधातोः कर्तरि लङ् ॥ ३७ ॥

दृष्ट्वा रिपुं तौ बलदेवकेशवौ विसृज्य रायो बत विश्वरूपिणौ ।
अधावता मन्वगम त्स तौ रुषा धर्तुं हि शक्याविति मूढतल्लजः ॥ ३८ ॥

दृष्ट्वेति ॥ विश्वरूपिणौ सर्वात्मकौ तौ बलदेवकेशवौ रिपुं जरासन्धं दृष्ट्वा रायो धनानि विसृज्य त्यक्त्वा । 'अर्थ रै विभवा अपि' इत्यमरः । अधावतां पलायेतां; बतेत्याश्चर्ये । मूढेषु तल्लजः श्रेष्ठः । 'प्रकाण्डमुद्घतल्लजौ प्रशस्तवाचकान्यमूनि' इत्यमरः । स जरासन्धः तौ रामकृष्णौ धर्तुं ग्रहीतुं शक्याविति रुषा अन्वगमत् अनुजगाम । गमॢधातोः कर्तरि लुङि लृदित्वादङ् ॥ ३८ ॥

आरोहतां तौ धरणीभृतं द्रुतं समीरलोलत्तरुगुल्मसङ्कुलम् ।
देवत्र मेकादशयोजनोच्छ्रितं तरक्षुहर्यक्षनिनादभीषणम् ॥ ३९ ॥

आरोहतामिति ॥ तौ रामकृष्णौ; देवान् त्रायते रक्षतीति देवत्रं; एकादशयोजनानि उच्छ्रितं उन्नतं; समीरेण वायुना लोलद्भिः चञ्चलै स्तरुभिः वृक्षै गुल्मैः लतागुल्मैश्च संकुलं निबिडं; तरक्षूणां व्याघ्रविशेषाणां; 'तरक्षुस्तु मृगादन' इत्यमरः । हर्यक्षाणां सिंहानां; 'हर्यक्षः केसरी हरि' रित्यमरः । निनादेन भीषणं भयङ्करं धरणीभृतं द्रुतमारोहतां आरुरुहतुः । आङ् पूर्वकरुहधातोः कर्तरि लङ् ॥ ३९ ॥

निरुध्य वीरौ निजसैन्यसंवृतः सर्वत्र शैलस्य समीपभूमिषु ।
दग्ध्वाशु शैलं परितो हतौ रिपू मत्वा जगाम स्वपुरं जयद्रथः ॥ ४० ॥

निरुध्येति ॥ जयद्रथो जरासन्धः निजसैन्यैः संवृतः सन् शैलस्य सर्वत्र समीपभूमिषु उपत्यकासु वीरौ रामकृष्णौ निरुध्य परितः शैलं आशु दग्ध्वा रिपू रामकृष्णौ हतौ मत्वा स्वपुरीं गिरिव्रजं जगाम । गम्लृधातोः कर्तरि लिट् ॥ ४० ॥

आप्लुत्य तस्माद्गिरिशृङ्गकन्दरात् प्राप्तौ पुरीं मब्धिविनिर्मितां वरौ ।
सुरासुराणा मपि लोचनप्रियां मुदग्रसौधाग्रचरोडुमण्डलाम् ॥ ४१ ॥

आप्लुत्येति ॥ वरौ रामकृष्णौ, गिरिशृङ्गस्य तस्मात्कन्दरात्, आप्लुत्य, अब्धौ समुद्रे विनिर्मितां सुराणा मसुराणा मपि लोचनप्रियां दृष्टिप्रियां, उदग्रेषु सौधाग्रेषु चरन्तीति तथाभूतानां, उडूनां नक्षत्राणां मण्डलं यस्यास्तां पुरीं द्वारकां प्राप्तौ ॥ ४१ ॥

अथैकेन बलरामविवाह माह—

स रौहिणेयोऽथ सुतां हि रेवती मानर्तदेशाधिपते र्महात्मनः ।
सञ्चोदितां ता मुपयेम ईप्सितां पितामहेन प्रथितां युगान्तरे ॥४२॥

स इति ॥ अथानन्तरं स रौहिणेयो बलरामः, पितामहेन ब्रह्मणा । ‘परमेष्ठी पितामह’ इत्यमरः । सञ्चोदितां प्रेरितां प्रथितां प्रसिद्धां, ईप्सितां, महात्मनः आनर्तदेशानामधिपते राज्ञः, तां रेवतीं रेवतीं नाम कन्यकां, उपयेमे परिणिनाय । उपपूर्वकयमधातोः कर्तरि लिट् ॥

कदाचि द्रैवतो राजा स्वसुताया रेवत्याः वरनिश्चयार्थं ब्रह्मसमीपं गतवान् । तदा ब्रह्मणि गान्धर्वासक्तचित्ते सति समयं प्रतीक्षमाणे सति राजनि भूयान् कालोऽतीतः । निवृत्तगान्धर्वेण ब्रह्मणा आगमनं किमिति पृष्टः कन्याया अनुरूपं वरं प्रष्टु मागतोऽस्मीति वदन्तं राजानं प्रति ‘त्वया मनसि चिन्तिता राजान स्सर्वेऽपि कालवशं गताः । अत इदानीं भूभारावतरणाय कृतावताराय भगवते बलरामाय देहीति ब्रह्मणा चोदित इति कथाऽनुसन्धेया ॥ ४२ ॥

अथ आसर्गपरिसमाप्तेः रुक्मिणीविवाहं वर्णयति —

स भीष्मको नाम विदर्भभूपती रुक्म्यादिभिः पञ्चभि रात्मजै र्युतः ।
आसी त्सुतैका वरवर्णिनी गुणै रनुत्तमा तस्य बभूव रुक्मिणी ॥४३॥

स इति ॥ पञ्चभी रुक्म्यादिभिः आत्मजै र्युतः भीष्मको नाम स प्रसिद्धः विदर्भभूपतिः विदर्भराज आसीत् । वरवर्णिनी रूपवती तस्य भीष्मकस्य रुक्मिणी नाम एका सुता, गुणैः सौन्दर्यादिभिः अनुत्तमा सर्वोत्तमा बभूव । भूधातोः कर्तरि लिट् ॥ ४३ ॥

श्रुत्वा हरे रद्भुतरूपयौवनप्रागल्भ्यशौर्यादिगुणा ननुत्तमान् ।
वव्रे पतिं सा सदृशं तमीश्वरं तथैव तस्याश्च पिताऽन्वमन्यत
॥ ४४ ॥

श्रुत्वेति ॥ सा रुक्मिणी हरेः श्रीकृष्णस्य, अनुत्तमान् सर्वोत्तमान् अद्भुतरूपं च यौवनं च अद्भुतरूपयौवने ते च प्रागल्भ्यं च शौर्यं च प्रागल्भ्यशौर्ये ते आदि र्येषां ते च ते गुणाश्च ते च तथोक्ताः तान् श्रुत्वा तमीश्वरं श्रीकृष्णं सदृशमनुरूपं पतिं वव्रे मनसा वृतवती । तस्या रुक्मिण्याः पिता च भीष्मकोऽपि तथैवान्वमन्यत अनुमेने । मनुधातोः कर्तरि लङ् ॥ ४४ ॥

हरि र्महात्माऽखिललोकनायक स्तां रुक्मिणीं रुक्मरथस्य सोदरीम् ।
मेने स्वभार्यां रतिकेलिसम्पदां स्वस्यानुरूपा मनुजन्म सुन्दरीम्
॥ ४५ ॥

हरिरिति ॥ अखिललोकानां नायकः, महात्मा हरिः, रुक्मरथस्य रुक्मरथाख्यस्य सोदरीं, अनुजन्म प्रतिजन्म । वीप्सायामव्ययीभावः । स्वभार्यां सुन्दरीं तां रुक्मिणीं स्वस्य आत्मनः रतिकेलिसम्पदां अनुरूपां मेने अमन्यत । मनुधातोः कर्तरि लिट् ॥ ४५ ॥

रुक्मी स्वसारं स्वजनस्य दुर्जनः कृष्णाय दातुं दृढमिच्छतो मतिम्।
निवार्य मेने खलचेदिपं पतिं दुष्टो वृणीते हि खलस्य सङ्गतिम्
॥ ४६ ॥

रुक्मीति ॥ दुर्जनः खलः रुक्मी स्वसारं रुक्मिणीं कृष्णाय दातुं दृढमिच्छतः स्वजनस्य मतिं निवार्य, खलं चेदिपं शिशुपालं पतिं मेने । मनुधातोः कर्तरि लिट् । तथा हि दुष्टः खलस्य दुर्जनस्य सङ्गतिं संबन्धं वृणीते हि इच्छति किल । वृङ्धातोः कर्तरि लट् । सामान्येन विशेष-समर्थना दर्थान्तरन्यासालङ्कारः ॥ ४६ ॥

तस्मिन् हरौ नित्यनिबद्धमानसा सञ्चिन्तयन्ती पतिपादसेवनम् ।
सा रुक्मिणी कञ्चन भूसुरं प्रियं संप्रेषयामास रमेशमन्दिरम् ॥४७॥

तस्मिन्निति ॥ तस्मिन् हरौ, नित्यं निबद्धं निवेशितं मानसं मनो यया तथोक्ता सा रुक्मिणी, पतिपादसेवनं सञ्चिन्तयन्ती कांक्षमाणा सती, प्रियं कञ्चन भूसुरं ब्राह्मणं, रमेशमन्दिरं कृष्णगृहं संप्रेषयामास प्रेषितवती । गतिबुद्धीत्यादिना अणि कर्तुः कर्मत्वम् ॥ ४७ ॥

गत्वा पुरीं द्वारवतीं द्विजोत्तम स्सुपर्णचित्तानिलवेगसंयुतः ।
प्रविश्य गेहं वररत्नभूषितं ददर्श सिंहासनसंस्थितं हरिम् ॥ ४८ ॥

गत्वेति ॥ द्विजोत्तमो ब्राह्मणश्रेष्ठः, सुपर्णस्य गरुत्मतः, चित्तस्य मनसः, अनिलो वायुः, तेषां वेग स्तेन संयुतस्सन्, द्वारवतीं पुरीं, वरैः श्रेष्ठैः रत्नैर्भूषितं गेहं प्रविश्य सिंहासने संस्थितं आसीनं हरिं ददर्श । दृशिधातोः कर्तरि लिट् ॥ ४८ ॥

दृष्ट्वा त मायान्त मतीव सूचकं शुभस्य विप्रं मधुसूदनो जवात् ।
उत्थाय संपूज्य सदन्नपायसैः सन्तर्पयामास स भोजनप्रियम् ॥४९॥

दृष्ट्वेति ॥ स मधुसूदनः श्रीकृष्णः शुभस्यातीव सूचकं, आयान्तं तं विप्रं दृष्ट्वा, जवादुत्थाय, सम्पूज्य, भोजनप्रियं विप्रं, सदन्नपायसैः सन्तर्पयामासातर्पयत् । तृपधातोर्णिजन्तादामि अनुप्रयोगे लिट् ॥ ४९ ॥

शौरि श्शयाने शयने द्विजोत्तमे संवाहयं स्तच्चरणौ त मब्रवीत् ।
सन्दर्शनं मे भवत श्शुभावहं शुभोदयायैव हि सत्समागमः ॥५०॥

शौरिरिति ॥ शौरिः श्रीकृष्णः, द्विजोत्तमे ब्राह्मणोत्तमे, शयने शय्यायां, शयाने सति, तस्य चरणौ, संवाहयन् मर्दयन् सन्, 'संवाहनं मर्दनं स्या' दित्यमरः । तं द्विज मब्रवीत् । उक्तिप्रकारमेवाह सार्धश्लोकेन । भवतस्सन्दर्शनं, मे मम, शुभावहं श्रेयस्संपादकं, उक्तमर्थ मर्थान्तरन्यासेन द्रढयति — सतां सत्पुरुषाणां समागमः, शुभोदयायैव हि । अत्र सामान्येन विशेषसमर्थना दर्थान्तरन्यासः ॥ ५० ॥

न गोप्य मेत द्यदि वक्तु मर्हसि ह्युदन्त मर्हामि यदीच्छसि प्रियम् ।
निस्तीर्य दुर्गं जल माशु मन्दिरं प्राप्तोऽसि किं ते करवाणि भूसुर ॥ ५१ ॥

नेति ॥ हे भूसुर ब्राह्मण, एतद्गोप्यं न यदि, प्रियमिच्छसि यदि, उदन्तं वृत्तान्तं, वक्तुमर्हसि । 'वार्ता प्रवृत्ति र्वृत्तान्त उदन्त' इत्यमरः । अहं अर्हामि श्रोतुमिच्छामि । जलं दुर्गं समुद्रं आशु निस्तीर्य तीर्त्वा मन्दिरं मे गृहं प्राप्तोऽसि, ते किं करवाणि । कृञ्धातोः कर्तरि लोट् ॥ ५१ ॥

एवं वदन्तं त मुवाच रुक्मिणीप्रियङ्करः किङ्करभावभावितः ।
तया रहो मुद्रितदत्तपत्रिकां मत्त स्समाकर्णय ते सुबोधिकाम् ॥५२॥

एवमिति ॥ रुक्मिण्याः प्रियं करोतीति 'क्षेमप्रिये' ति खचि मुमागमः । किङ्करभावेन दौत्येन भावितः नियोजितः विप्रः, एवं पूर्वोक्तप्रकारेण, वदन्तं तं हरिं प्रति ते तव सुबोधिकां रुक्मिणीमनोरथज्ञापिकां तया रुक्मिण्या

रहो मुद्रितां दत्तां पत्रिकां मत्तः समाकर्णय शृणु इति उवाच । वचधातोः कर्तरि लिट् ॥ ५२ ॥

द्विज स्तदुल्लेखनरूपभारती मुवाच यद् भूरि गलन्नवामृताम् ।
श्रुत्वा गुणांस्ते कमलामनोहरान् मनो विभो मुह्यति निस्त्रपं त्वयि ॥ ५३ ॥

द्विज इति ॥ स द्विजो ब्राह्मणः, भूरि बहुलं गलत् नवममृतं यस्यास्तां, तत् तस्या रुक्मिण्याः, लेखनरूपां भारती मुवाच वाचयति स्म । सन्देशप्रकारमेवाह सार्धैस्सप्तभिः — श्रुत्वेति । हे विभो ! कमलाया लक्ष्म्या अपि मनोहरांस्ते गुणान् श्रुत्वा मे मनो निस्त्रपं सत् त्वयि मुह्यति मोहं प्राप्नोति । मुहधातोः कर्तरि लट् ॥ ५३ ॥

कुलाबलाना मतिकामभाषणं जानीहि मा योग्य मिति स्म माधव ।
का नाम वा त्वा न वृणोति सुन्दरं गुणोत्तराप्यङ्ग नवं भुवः स्मरम् ॥ ५४ ॥

कुलेति ॥ हे माधव श्रीकृष्ण ! कुलाबलानां कुलस्त्रीणां अति अत्यन्तं कामेन भाषणं अयोग्यमिति मा स्म जानीहि अङ्ग भोः ! गुणैः सौन्दर्यादिभिः उत्तरा श्रेष्ठापि का वा नाम स्त्री भुवः नवं स्मरं मन्मथं सुन्दरं त्वा त्वां न वृणोति न वृणुयात् । वृणोतेः कर्तरि लट् ॥ ५४ ॥

शिरीषनीलोत्पलपङ्कजोल्लसच्छरीरनेत्राननशोभितो जनैः ।
कुन्देन्दुबिम्बोत्तमदन्तपङ्क्तिकाहासाधरस्त्वं श्रवणातिथीकृतः ॥ ५५ ॥

शिरीषेति ॥ शिरीषं शिरीषपुष्पं नीलोत्पलं पङ्कजं च तानीव मृदुत्व नैल्याह्लादकरत्वै रुल्लसता शरीरेण नेत्राननेन च शोभितः, कुन्देन्दुबिम्बोत्तमवत दन्तपंक्तिकाहासाधराः यस्य स त्वं जनैः श्रवणातिथीकृतः । श्रावितः

ममेति शेषः । 'अभूततद्भावे च्विः, च्वौ चे' ति दीर्घः । यथासंख्य लङ्कारः ॥ ५५ ॥

रमाऽपि सा ब्रह्मसहोद्भवा वरा सर्वोत्तमं त्वां चकमे न किं पतिम् ।
त्वत्पादपद्मे भजतां मदाशय स्सर्वात्मना सर्वफलप्रदायके ॥५६॥

रमेति ॥ ब्रह्मणा सह उद्भवो यस्या स्सा, वरा श्रेष्ठा, सा रमा लक्ष्मीरपि सर्वोत्तमं त्वां पतिं न चकमे कामयामास किं? भजतां भक्तानां सर्वफलप्रदायके धर्मादिपुरुषार्थप्रदे त्वत्पादपद्मे सर्वात्मना सर्वप्रकारेण मदाशयो मन्मनः वर्तत इति शेषः ॥ ५६ ॥

न कामये देव तवांघ्रिसेवना दन्यं त्रिलोकाधिपसङ्गताधिकम् ।
अहं त्वया य्यवमानिता हरे जहा म्यसूनाशु तदा त्वदाप्तये ॥५७॥

नेति ॥ हे देव! तवांघ्रिसेवनात् त्रिलोकाधिपस्य संगतात् सङ्गतो ऽधिक मपि अन्यं न कामये नेच्छामि । हे हरेऽहं त्वयाऽवमानिता अनङ्गी-कृता यदि तदा त्वदाप्तये तव प्राप्त्यर्थं, असून् प्राणान् आशु जहामि त्यजामि । ओहाक् धातोः कर्तरि लट् ॥ ५७ ॥

तनुं तनुं चीर्णतपास्त्यजाम्यमूं पाणौ कृताहं भवता न चे द्विभो ।
जानीहि मां ते प्रियकिङ्करां दृढं जनुष्यमुष्मिन् जननान्तरेष्वपि ॥ ५८ ॥

तनुमिति ॥ हे विभो! अमुष्मिन् जनुषि जन्मनि भवता अहं पाणौ कृता परिणीता न चेत् यदि चीर्णतपाः कृतचान्द्रायणा । 'तप श्चान्द्रायणादौ स्या द्धर्मे लोकान्तरेऽपि चे' ति विश्वः । सती तनुं कृशां अमूं तनुं कायं; 'तनुः काये कृशे चाल्पे विरलेऽपि चे' ति विश्वः । त्यजामि । ततः किमत आह । हे प्रिय जननान्तरेषु जन्मान्तरेष्वपि मां ते तव किङ्करां दृढं जानीहि अवेहि । ज्ञा धातोः कर्तरि लोट् ॥५८ ॥

कुर्वन्निमां सोदरशेमुषीं मम व्यर्थां नृसिंहस्य तवेममच्युत ।
भागं स भूपाधमचैद्यजम्बुको याव न्न ताव त्स्पृशतीश मां नय
॥ ५९ ॥

कुर्वन्निति ॥ हे अच्युत ईश । इमां तुच्छां मम सोदरस्य रुक्मिणः शेमुषीं शिशुपालाय दास्येयेति मतिं बुद्धिं व्यर्थां कुर्वन् नृसिंहस्य तव इमं पुरः स्थितं भागं मां स भूपेष्वधमः चैद्यः शिशुपाल एव जम्बुकः याव न्न स्पृशति तावत् नय स्वपुरीं प्रापय । नीङ् धातोः कर्तरि लोट् ॥ ५९ ॥

तत्प्रकार मेवाह—

बहि र्नगर्याः कुलदेवताऽम्बिकापूजां विधायाशु पुन स्स्वमन्दिरम् ।
यान्तीं नयारोप्य रथं च मां पुरीं निर्जित्य सर्वान् मधुसूदन द्विषः
॥ ६० ॥

बहिरिति ॥ हे मधुसूदन श्रीकृष्ण! नगर्या बहिः, कुलदेवताया गौर्याः पूजां विधाय, पुनः स्वमन्दिरं यान्तीं मां रथ मारोप्य सर्वांश्च द्विषः शत्रून्निर्जित्य, पुरीं द्वारकां आशु नय प्रापय । नीङ्धातोः कर्तरि लोट् ॥६०॥

श्रुत्वोक्त मस्याः प्रियकार्यगौरवं समन्दहासो हरि रन्तरात्मकः ।
अवीवद दन्तरुचा तमो नुदन् तं भूसुरं भूसुरपक्षपालकः ॥ ६१ ॥

श्रुत्वेति ॥ अन्तरात्मकः, भूसुराणां ब्राह्मणानां पक्षपालकः हरिः श्रीकृष्णः, अस्या रुक्मिण्या उक्तं प्रियस्य कार्यस्य गौरवं श्रुत्वा समन्दहासो मन्दहासेन सहितः अत एव दन्तरुचा दन्तकान्त्या तमः नुदन् तं भूसुरं विप्र मवीवदत् अबोचत् । वदधातोः कर्तरि लुङि यङ्लुक् ॥ ६१ ॥

मनो ममास्यां द्विज लग्नमेव भो मुहुर्मुहु र्मय्यनुरक्तचेतसि ।
नवर्ति भैष्म्यां कुलरूपयौवनैः श्रुतौ प्रसिद्धा वरवर्णिनी मम ॥६२॥

मन इति ॥ भो द्विज! मुहुर्मुहुः मय्यनुरक्तं चेतो यस्या स्तस्यां, अस्यां भैष्म्यां रुक्मिण्यां, मम मनो लग्नं सक्तमेव । कुलेन रूपेण यौवनेन च सा वरवर्णिनी रुक्मिणी मम श्रुतौ श्रवणे वेदे च 'वेदे श्रवसि च श्रुति' रित्यमरः । प्रसिद्धा वर्वर्ति पुनः पुन र्वर्तते बहुधा सैवेत्यर्थः ॥ ६२ ॥

अभीष्ट मस्या स्सफलीकरिष्यता हलायुधेनाह मिति स्वबन्धुभिः ।
आगत्य युक्तः पथि तां महोत्सवे पश्यामि यान्ती मिति विप्र भो वद ॥ ६३ ॥

अभीष्टमिति ॥ भो विप्र! अह मस्याः रुक्मिण्याः, अभीष्टं सफलीकरिष्यता हलायुधेन, स्वबन्धुभिश्च युक्तस्सन्, इतो द्वारकाया आगत्य महोत्सवे विवाहे, पथि मार्गे यान्तीं तां रुक्मिणीं पश्यामीति वद । वदधातोः कर्तरि लोट् ॥ ६३ ॥

विज्ञाय वैवाहिकघस्र मादरा द्विप्रा द्धरि र्दारुक मित्यभाषत ।
समानय क्षत्त रितो रथं द्रुतं यातुं पुरं कुण्डिन मण्डजध्वजम्॥६४॥

विज्ञायेति ॥ हरिः श्रीकृष्णः, आदरात् विप्रात् वैवाहिकघस्रं विवाहवासरं; 'घस्रो दिनाहनी वा तु क्लीबे दिवसवासरौ' इत्यमरः । विज्ञाय. क्षत्तः हे सारथे; 'सूतः क्षत्ता च सारथि' रित्यमरः । इतो द्वारकायाः, कुण्डिनाख्यं पुरं यातुं, अण्डजो गरुडः ध्वजे यस्य तं; रथं द्रुतं समानय इति दारुकं तन्नामकं सारथिं अभाषत । भाषधातोः कर्तरि लङ् ॥ ६४ ॥

सुग्रीवशैब्या वथ मेघपुष्पबलाहकौ चाधिरथं मनोजवान् ।
संयोज्य सोऽश्वान् समलङ्कृतं तं समानय न्मातलितुल्यसारथिः ॥ ६५ ॥

सुग्रीवेति ॥ अथानन्तरं, स मातलिना इन्द्रसारथिना तुल्यः सारथि र्दारुकनामकः मनोजवान् सुग्रीवशैब्यनामानौ, मेघपुष्पवलाहकनामानौ च

अश्वान्, अधिरथं रथे; विभक्त्यर्थेऽव्ययीभावः । संयोज्य योजयित्वा, समलङ्कृतं तं रथं समानयदानयामास । समाङ् पूर्वकनीङ्धातोः कर्तरि लङ् ॥६५॥

अनेकरत्नप्रतिमापरस्परप्रभाषणै श्चारुतरै श्शुभोक्तिभिः ।
युतं वरं दिव्यविमानसुन्दरं मनोजवं पक्षिवरध्वजोच्छ्रितम् ॥ ६६ ॥

अनेकेति ॥ शुभोक्तिभिः चारुतरै रनेकानां रत्नप्रतिमानां परस्परमन्योन्यं प्रभाषणै स्संभाषणैर्युतं, वरं श्रेष्ठं; दिव्यानां देवानां विमान मिव सुन्दरं मनोजवं, पक्षिवरध्वजेन उच्छ्रितं उन्नतं रथं समानयत् ॥ ६६ ॥

अरुरुहु स्ते रथ माशु काञ्चनं श्रीकृष्णविप्रोत्तमदारुका मुदा ।
सञ्चोदयामास स सारथि र्हया नाकाशमार्गेण ततो मनोजवान् ॥६७॥

अरुरुहन्निति ॥ ते श्रीकृष्णविप्रोत्तमदारुकाः, काञ्चनं स्वर्णमयं, रथं मुदा अरुरुहन् । तत स्सारथि र्दारुकः, मनोजवानश्वान् आकाशमार्गेण सञ्चोदयामास प्रेरयामास । चुदधातो र्णिजन्ता दामि अनुप्रयोगे कर्तरि लिट् ॥ ६७ ॥

अतीत्य चानर्तकमागधा नसौ विदर्भदेशा नगम त्स भीष्मकः ।
कन्यां प्रदातुं दमघोषसूनवे चकार यत्नं निजपुत्रचोदितः ॥ ६८ ॥

अतीत्येति ॥ असौ श्रीकृष्णः, आनर्तकान् मागधांश्च प्रदेशा नतीत्य, विदर्भदेशा नगमत् प्राप । स भीष्मकः निजपुत्रेण रुक्मिणा चोदितस्सन्, दमघोषसूनवे शिशुपालाय, कन्यां रुक्मिणीं प्रदातुं यत्नं चकार । कृञ्धातोः कर्तरि लिट् ॥ ६८ ॥

मनोज्ञरम्भानवचूतपल्लवद्वारै र्गृहै रुच्छ्रितकेतुशोभितैः ।
स्रगम्बरालङ्कृतयौवतैः पुरं सुमण्डितं कुण्डिनभूपति र्व्यधात् ॥ ६९ ॥

मनोज्ञेति ॥ कुण्डिनभूपति र्भीष्मकः, पुरं कुण्डिनं, मनोज्ञाः रम्भाः कदल्यः नवाः चूतपल्लवाश्च येषु तानि द्वाराणि येषां तैः । उच्छ्रितैः केतुभि-र्ध्वजैः शोभितै र्गृहैः, स्रग्भि रम्बरै श्चालङ्कृतैश्च यौवतै र्युवतिसमूहैः, सुमण्डित-मलङ्कृतं व्यधात् । विपूर्वकधाधातोः कर्तरि लुङ् ॥ ६९ ॥

तदाहतैर्वस्त्रवरै र्विभूषणै रमूल्यमाणिक्यसुहीरमौक्तिकैः ।
अलङ्कृतां तां परिवृत्य रुक्मिणी मुपासतार्याः स्थविरोत्तमाङ्गनाः
॥ ७० ॥

तदेति ॥ आर्याः पूज्याः, स्थविरा वृद्धाः उत्तमाङ्गनाः, अहतै र्नूतनै र्वस्त्रवरै र्वस्त्रश्रेष्ठैः, अमूल्यानि माणिक्यानि सुहीराः वज्राः मौक्तिकानि च येषु तैः, विभूषणै रलङ्कृतां तां रुक्मिणीं परिवृत्य उपासत अतिष्ठन् । उपपूर्वकासधातोः कर्तरि लङ् ॥ ७० ॥

स चेदिराजो निजसैन्यबन्धुभि स्सहागम द्भीष्मकभूपमन्दिरम् ।
समागतं संयुतमागधं वरं स पूजयामास वरासनादिभिः ॥ ७१ ॥

स इति ॥ स चेदिराजः शिशुपालः, निजसैन्यबन्धुभिस्सह, भीष्मक-भूपस्य मन्दिर मागमत् आययौ । स भीष्मकः मागधेन संयुतं समागतं आगतं, वरं शिशुपालं वरासनादिभिः पूजयामास । पूजधातो र्णिजन्तात्कर्तरि लिट् ॥७१॥

ज्ञात्वा हली चेष्टित माशु सेनया सहाययौ चेदिपपक्षभूक्षिताम् ।
स कुण्डिनं योध्दुमनेन रुक्मिणीग्रहे विवाहे मधुसूदनद्विषा ॥७२॥

ज्ञात्वेति ॥ स हली बलरामः । चेदिपस्य शिशुपालस्य पक्षाणां सहायानां, 'पक्ष स्सहाये' इत्यमरः । भूक्षितां जरासन्धादीनां राज्ञां चेष्टितं, आशु ज्ञात्वा, मधुसूदनद्विषा कृष्णवैरिणा, अनेन शिशुपालेन सह विवाहे अस्या रुक्मिण्याः । ग्रहे ग्रहणे, योद्धुं सेनया सह; आययौ । यातेः कर्तरि लि ॥ ७२ ॥

उषस्यसौ कृष्णहृतेन्द्रियोच्चकै रनागतस्यास्य विचिन्तया सती ।
शुष्यन्मुखी बाष्पकलाभिसंभृता ददर्श वामोरुभुजाक्षिकम्पनम् ॥ ७३ ॥

उषसीति ॥ कृष्णेन हृतानि इन्द्रियाणि मनआदीनि यस्या स्सा, अनागतस्यास्य विप्रस्य उच्चकै र्विचिन्तया, शुष्यन्मुखो ग्लानवदना, बाष्पकलाभि रश्रुकणैः, अभिसंभृता पूर्णा सती साध्वी असौ रुक्मिणी, उषसि प्रभातसमये, वामस्य ऊरुभुजाक्षिणः; प्राण्यङ्गत्वादेकवद्भावः । कम्पनं ददर्श । दृशिधातोः कर्तरि लिट् ॥ ७३ ॥

ऐक्षिष्ट सा विप्रवरं स्वजीवदं तस्मिन्क्षणे कृष्ण मुपागतं मुदा ।
गदन्त मार्यं स्वपुरोपकण्ठगं बालातपं पद्ममुखीव पद्मिनी ॥ ७४ ॥

ऐक्षिष्टेति ॥ पद्ममुखी सा रुक्मिणी, तस्मिन् क्षणे, उपागतं कृष्णं, स्वपुरोपकण्ठगं कुण्डिनसमीपस्थं, गदन्तं, अत एव स्वजीवदं आर्यं पूज्यं विप्रवरं ब्राह्मणश्रेष्ठं, पद्मिनी कमलिनी बालातपमिव मुदा ऐक्षिष्ट । ईक्षधातोः कर्तरि लुङ् । पूर्णोपमालङ्कारः ॥ ७४ ॥

विप्राय दातुं निजजीवदाय सद्वस्तुष्वयोग्यत्व महो विमृश्य सा ।
ननाम तं सर्वसुपर्वसंपदां पात्रं विधातुं सुरराजपूजिता ॥ ७५ ॥

विप्रायेति ॥ सुरराजेन इन्द्रेण । राजाहस्सखिभ्य इति टच् । पूजिता सा रुक्मिणी, निजजीवदाय स्वप्राणदाय, विप्राय दातुं, सद्वस्तुषु भूषणाम्बरादिषु अयोग्यत्वं अनर्हत्वं विमृश्यालोच्य, तं विप्रं, सर्वसुपर्वसंपदां पात्रं भाजनं; 'योग्यभाजनयोः पात्र' मित्यमरः । विधातुं ननाम नमस्कृतवती । अहो इत्याश्चर्ये । नमु धातोः कर्तरि लिट् ॥ ७५ ॥

तावागतौ वीक्ष्य सुरोत्तमौ तदा प्रत्युद्ययावार्हणगीतवाद्यकैः ।
अथो स भीष्मो मधुपर्कमङ्गलै रानर्च कृष्णं सबलं गृहोत्तमे॥७६॥

ताविति ॥ स भीष्मो राजा, तदा सुरोत्तमौ, तौ आगतौ रामकृष्णौ वीक्ष्य आर्हणैः पूजाद्रव्यैः गीतैः वाद्यकैः वाद्यैश्च सह प्रत्युद्ययौ प्रत्युज्जगाम । अथो अनन्तरं गृहोत्तमे, सबलं कृष्णं, मधुपर्कैः मङ्गलैः मङ्गलद्रव्यैश्च आनर्च पूजयामास । अर्चधातोर्लिट् । तस्मान्नु डिति नुडागमः ॥ ७६ ॥

पौरा निपीयास्य मुखाम्बुजासवं प्रोचु र्मुदाऽ न्योन्यमथाक्षिसंप्रपैः ।
अस्यैव भार्या भवितुं च रुक्मिणी योग्येति तस्याः पति रेष माधवः ॥ ७७ ॥

पौरा इति ॥ अथ पौराः पौरजनाः; अक्षिसंप्रपैः अस्य कृष्णस्य मुखाम्बुजासवं मुखकमलमकरन्दं मुदा निपीय आदरात् दृष्ट्वेत्यर्थः । रुक्मिणी अस्य श्रीकृष्णस्यैव भार्या भवितुं योग्या; एष माधवश्च तस्या रुक्मिण्याः पतिर्भवितुं योग्य इति अन्योन्यं प्रोचुः । वचधातोः कर्तरि लिट् ॥ ७७ ॥

विनिर्ययावंघ्रिसरोजचंक्रमैः संशोभयन्ती भुव मङ्गनाजनैः ।
ध्यानेन तत्कृष्णपदाम्बुजस्य सा युक्ता जनै र्वाङ्नियमेन मातृभिः ॥ ७८ ॥

विनिर्ययाविति ॥ तस्य कृष्णस्य पदाम्बुजस्य ध्यानेन वाङ्नियमेन च युक्ता सा रुक्मिणी, अङ्गनाजनैः मातृभिस्सह, अंघ्रिसरोजचंक्रमैः, पद-कमलविन्यासैः भुवं संशोभयन्ती सती शनैः विनिर्ययौ पुरात् निर्ययौ । याधातोः कर्तरि लिट् ॥ ७८ ॥

भटै रनेकै रसिचर्मधारिभिः मृदङ्गशंखानकतूर्यवादकैः ।
नानोपदापाणिभि रालिभि र्जनैः वाराङ्गनाभि र्वरगायकै र्युता ॥ ७९ ॥

भटैरिति ॥ असिचर्मधारिभिः खड्गचर्मधारिभिः अनेकैः भटैर्योधैः मृदङ्गानां शंखानां आनकानां पटहानां तूर्याणां वाद्यविशेषाणां वादकै र्जनैः

नानोपदाः विविधगौर्युपहाराः पाणिषु यासां ताभिः। आलिभि स्सखीभिः वाराङ्गनाभिः वरगायकैश्च युता सती विनिर्ययाविति पूर्वेणान्वयः ॥ ७९ ॥

पटीरदिव्याम्बरमालिकाकरद्विजाङ्गनाभिः परिवारिता सती ।
आसाद्य गौर्या स्सदनं शुचिस्मिता संस्पृश्य तोयं प्रविवेश रुक्मिणी ॥ ८० ॥

पटीरेति ॥ शुचिस्मिता रुक्मिणी, पटीरं चन्दनं दिव्याम्बराणि मालिकाश्च करेषु यासां ताभिः द्विजाङ्गनाभिः परिवारिता सती गौर्यास्सदन मासाद्य, तोयं संस्पृश्य प्रविवेश । विशतेः कर्तरि लिट् ॥ ८० ॥

शिवप्रियां तां कुलपालिका शिशवां शिवप्रदां भीष्मभुवाऽभ्यपूजयन् ।
सुगन्धमाल्याभरणै रपूपकै र्दध्यक्षतै मङ्गलकण्ठसूत्रकैः ॥ ८१ ॥

शिवप्रियामिति ॥ कुलपालिकाः कुलस्त्रियः कर्त्र्यः । 'कुलस्त्री कुलपालिके' त्यमरः । भीष्मभुवा रुक्मिण्या । शिवानि मङ्गलानि प्रददातीति तथोक्तां, शिवस्य प्रियां कान्तां; तां शिवां गौरीं, सुगन्धेन माल्यै राभरणै-रपूपकै र्भक्ष्यविशेषैः, दध्यक्षतै र्दधिमिश्रिताक्षतैः मङ्गलकण्ठसूत्रकै श्चाभ्यपूजयन् पूजयाञ्चक्रुः । पूजधातोः हेतुमण्णिजन्ता त्कर्तरि लङ् ॥ ८१ ॥

सा निर्ययौ पूजितशङ्करप्रिया देवीगृहा त्कण्ठविलग्नपाणिना ।
सख्या स्तदा रत्नवदूर्मिशोभिना दिव श्च्युता वीरविमोहिनी वरा ॥ ८२ ॥

सेति ॥ दिवः स्वर्गात् च्युता कापि अनिर्वाच्या वीरविमोहिनी वीरमोहकरी सुरसुन्दरीव स्थिता वरा सा रुक्मिणी, पूजिता शङ्करप्रिया गौरी यया तथोक्ता । रत्नवतीभिरूर्मिभिः अङ्गुलीयकैः शोभत इति तथोक्तेन सख्याः कण्ठे विलग्नेन पाणिना उपलक्षिता सती देव्या गौर्याः गृहात् निर्ययौ निश्चक्राम । याधातोः कर्तरि लिट् ॥ ८२ ॥

वपुःप्रभानिर्झरमध्यशोभितं मुखाम्बुजं स्वोष्ठमरन्दबन्धुरम् ।
स्मितच्छलाच्छच्छदचारचारु चकर्ष नेत्रालिगणान् महीभृताम्
॥ ८३ ॥

वपुरिति ॥ वपुषः प्रभानां कान्तीनां निर्झरः प्रवाहः, तस्य मध्ये शोभत इति तथोक्तं; शोभनस्य ओष्ठस्य मरन्दः मकरन्दः तेन बन्धुरं मेदुरं, स्मितमिति च्छलं यस्य तस्य अच्छच्छदस्य हंसस्य चारेण संचारेण चारु मनोज्ञं तस्या रुक्मिण्याः मुखाम्बुजं मुखकमलं, महीभृतां राज्ञां नेत्राण्येव अलयः भ्रमराः तेषां गणान् चकर्ष आचकर्ष । कृषधातोः कर्तरि लिट् । रूपकालङ्कारः ॥ ८३ ॥

सुकेशपाशां परमाणुमध्यमां श्यामां नितम्बाञ्चितरत्नमेखलाम् ।
वृत्तस्तनीं कुन्तलशङ्कितेक्षणां लसन्मुखीं चारुतरप्रभाषिणीम् ॥८४॥

सुकेशेति ॥ शोभनः केशपाशो यस्यास्तां, श्यामां यौवनमध्यस्थां, नितम्बे अञ्चिता प्रकाशिता रत्नमेखला रत्नमयकाञ्ची यस्यास्तां; 'स्त्रीकट्यां मेखला काञ्ची' त्यमरः । वृत्तौ वर्तुलौ स्तनौ यस्यास्तां, कुन्तलेभ्यः शङ्कितानि ईक्षणानि विलोकनानि यस्यास्ताम्; लसन्मुखं यस्यास्तां; चारुतरं प्रभाषत इति तथोक्तां तां रुक्मिणीम्; ॥ ८४ ॥

शुचिस्मितां बिम्बफलाधरश्रिया शोणायमानद्विजकुन्दकुट्मलाम् ।
पदा चलन्तीं कलहंसिकामिव स्फुरद्रणन्नूपुररत्नशोभिताम् ॥ ८५ ॥

शुचीति ॥ शुचिस्मितां बिम्बफलसदृशः यः अधरः तस्य श्रिया कान्त्या; अशोणाः शोणा इवाचरन्तः शोणायमानाः । आचारार्थे क्यङ् कर्तरि शानच्, द्विजाः कुन्दकुट्मला इवेति उपमितसमासः ते यस्यास्तां; स्फुरतः प्रकाशमानस्य रणतः शिञ्जतः नूपुरस्य रत्नैः शोभत इति तथोक्तां; पदा पादेन; कलहंसिकामिव चलन्तीं मन्दं यान्तीं तां रुक्मिणीं; तद्गुणालङ्कारः ॥ ८५ ॥

वीरा विलोक्याशु मुहु र्विमोहिताः यशस्विन स्तां स्फुटहृच्छयार्दिताः ।
संत्यक्तबाणासनबाणसंचयाः[1] विरेजु रालेख्यसमर्पिता इव ॥ ८६ ॥

वीरा इति ॥ यशस्विनः कीर्तिमन्तः; वीरा स्तां रुक्मिणीं विलोक्य आशु स्फुटेन उल्बणेन; 'स्फुटं प्रव्यक्तमुल्बण' मित्यमरः । हृच्छयेन मन्मथेन अर्दिता स्ताडिताः, अत एव मुहुर्विमोहिताः मूर्छिताः, संत्यक्तानि बाणासनानि धनूंषि बाणसंचयाश्च यै स्तथाविधास्सन्तः आलेख्यसमर्पिता इव चित्रार्पितप्रतिमा इव विरेजुः । राजतेः कर्तरि लिट् । पूर्णोपमालङ्कारः ॥ ८६ ॥

तां पुण्डरीकनयन स्स उदारहासव्रीडावलोकमुखकञ्जकटाक्षशोभाम् ।
यात्राच्छलेन चलितां निजरूपवित्तं स्वस्मै समर्पयितुमीक्ष्य मुमोद
कृष्णः ॥ ८७ ॥

तामिति ॥ स पुण्डरीकनयनः कृष्णः, उदारा श्रेष्ठा हासस्य व्रीडावलोकस्य मुखकञ्जस्य (वदन?) पङ्कजस्य कटाक्षाणां शोभा यस्यास्ताम्; यात्राच्छलेन यात्राव्याजेन गौरीपूजार्थं गमनव्याजेन निजरूपवित्तं स्वसौन्दर्यधनं स्वस्मै आत्मने समर्पयितु चलितां निर्गतां, तां रुक्मिणीं वीक्ष्य, मुमोद तुतोष । मुदधातोः कर्तरि लिट् । अत्र यात्राया श्छलपदेनासत्यत्वप्रतिपादना त्कैतवापह्नुत्यलङ्कारः ॥८७॥

एवं शनै स्सुविलसत्पदकञ्जयाना ग्राहं हरे र्भगवतः प्रसमीक्षमाणा ।
सोद्धृत्य वामकरजै रलका नपाङ्गा द्राज्ञो ह्रियैक्षत तथा हरि
मन्तिके च ॥ ८८ ॥

एवमिति ॥ एवं पूर्वोक्तप्रकारेण शनै स्सुविलसतः पदकञ्जस्य यानं गमनं यस्यास्सा । भगवतो हरे र्ग्राहं ग्रहणं प्रसमीक्षमाणा प्रतीक्षमाणा सा रुक्मिणी । वामस्य वामहस्तस्य करजै र्नखै रलकानुद्धृत्य अपाङ्गान्नेत्रान्तात् ह्रिया राज्ञो भूपतीन् अन्तिके समीपे हरिं च तथा ऐक्षत ददर्श । ईक्षधातोः कर्तरि लङ् ॥ ८८ ॥

1–1 Text reads निपेतु रुर्व्यां गतचेतना इव ।

तां रुक्मिणीं किन्नरसुन्दरीनिभां प्रसह्य कृष्णो रथ मारुरुक्षतीम् ।
नीत्वा रथं स्वस्य सुपर्णचिह्नितं राज्ञां तदानीं मिषतां ययौ मुदा
॥ ८९ ॥

तामिति ॥ तदानीं कृष्णः, किन्नरसुन्दरीनिभां, रथं स्वरथं आरुरुक्षती मारोढुमिच्छन्तीं तां रुक्मिणीं सुपर्णेन गरुडेन चिह्नितं अङ्कितं स्वस्य रथं प्रसह्य बलात्कारेण नीत्वा, मिषतां राज्ञां अनादरे षष्ठी । पश्यतो राज्ञोऽनादृत्येत्यर्थः । मुदा ययौ । यातेः कर्तरि लिट् ॥ ८९ ॥

तस्याङ्कगेवाऽथ रराज रुक्मिणी तटित्वदन्तर्गतचञ्चलालता ।
विधूय राज्ञो मृगराड्ययौ हरिः सृगालसंघानिव तान् गतश्रियः
॥ ९० ॥

तस्येति ॥ अथानन्तरं तस्य श्रीकृष्णस्याङ्कगा; उत्सङ्गगता रुक्मिणी तटित्वतो मेघस्यान्तर्गता चञ्चलालता विद्युल्लतेव । 'विद्युत् चञ्चला चपला अपी' त्यमरः । रराज । हरिः श्रीकृष्णः । गता श्रीः येषां तान् । विवर्णवदना-नित्यर्थः । तान् राजसंघान् मृगराट् सिंहः । सृगालानां जम्बूकानां संघानिव विधूय तिरस्कृत्य ययौ । यातेः कर्तरि लिट् । पूर्णोपमालङ्कारः ॥ ९० ॥

एणाङ्कतुल्याननपङ्कजोज्ज्वल स्तद्देहभायामुनपूरपूरितः ।
तयो स्सुनेत्रोत्पलकान्तिमण्डितः शताङ्गपद्माकर एष सम्बभौ ॥ ९१ ॥

एणेति ॥ एणाङ्केन चन्द्रेण तुल्यान्याननान्येव पङ्कजानि कमलानि तैरुज्ज्वलः, रत्नस्तम्भेषु प्रतिफलनात् मुखबाहुल्यद्यम्; तस्य श्रीकृष्णस्य देहभाः शरीरकान्तिरेव यामुनपूरः यमुनाप्रवाह स्तेन पूरितः । तयो रुक्मिणीकृष्णयोः नेत्राण्येवोत्पलानि कुवलयानि तेषां कान्त्या मण्डितः एष शताङ्गो रथ एव पद्माकर स्तटाक स्संबभौ । भातेः कर्तरि लिट् । रूपकालङ्कारः ॥ ९१ ॥

रथाम्बुराशि र्धनुचर्मसायकप्रणक्रकूर्मोरगमत्स्यसंवृतः ।
ध्वजादिशैवालसुपर्णकेतुसत्पक्षीन्द्रसञ्चारविमण्डितो बभौ ॥ ९२ ॥

रथेति ॥ धनवः धनूंषि चर्माणि सायकानि बाणा एव प्रकृष्टा नक्राः कूर्मा उरगा मत्स्याश्च तैः संवृतः पूर्णः । ध्वजादय एव शैवालानि तैः । सुपर्ण रूपकेतुरेव सत्पक्षीन्द्रो गरुडः तस्य सञ्चारेण विमण्डितः रथाम्बुराशी रथसमुद्रः बभौ । भातेः कर्तरि लिट् । रूपकालङ्कारः ॥ ९२ ॥

हरे श्शताङ्गध्वजपक्षिराडयं विलोलपक्षद्वयकम्पनादिभिः ।
जिघृक्षु रुड्डीय सपत्नवाहिनीमहार्णवेऽस्त्राहिगणानिवाबभौ ॥९३॥

हरेरिति ॥ अयं हरे श्शताङ्गस्य रथस्य ध्वजे विद्यमानः पक्षिराट् गरुडः, विलोलस्य पक्षद्वयस्य कम्पनादिभिः उड्डीयोत्प्लुत्य, सपत्नवाहिनी शत्रुसेनैव महार्णवस्समुद्र स्तस्मि न्नस्त्राणि आयुधान्येवाहयः सर्पा स्तेषां गणान् जिघृक्षुः ग्रहीतुमिच्छुरिव आबभौ । भातेः कर्तरि लिट् । अत्र पक्षकम्पनरूपान्य धर्मसम्बन्धेन निमित्तेन सर्पजिघृक्षुतादात्म्योत्प्रेक्षणात् रूपकानुप्राणितेयं उक्तविषया स्वरूपोत्प्रेक्षा ॥ ९३ ॥

दृष्ट्वा जरासन्धमुखा विचुक्रुशु र्हर्तार मस्या धिगिति प्रशूरताम् ।
यन्नोऽहरत्पश्यति राजमण्डले कन्यां श्रियं वीरयश स्स गोपकः
॥ ९४ ॥

दृष्ट्वेति ॥ जरासन्धमुखाः जरासन्धादयो राजानो ऽस्या रुक्मिण्या हर्तारं श्रीकृष्णं दृष्ट्वा, यस्मा त्स गोपको नन्दसूनुः श्रीकृष्णः, राजमण्डले पश्यति सति कन्यां रुक्मिणीं नोऽस्माकं श्रियं कान्तिं, वीरयशः वीरा इति कीर्तिं चाहरत । जहार । तस्मा न्नः प्रशूरतां धिक् निन्दा अस्त्विति विचुक्रुशुः अक्रोशितवन्तः । क्रुशधातोः कर्तरि लिट् ॥ ९४ ॥

शूरा स्समेत्याशु बलै रनीकपै र्जन्याय राजन्यगणा स्तमन्वगुः ।
दृष्ट्वा पृषत्कै र्हरि राततायिनो बिभेद तान् शार्ङ्गशरासनच्युतैः ॥९५॥

शूरा इति ॥ शूरा राजन्यगणाः मूर्धाभिषिक्तराजसंघाः, बलैस्सैन्यैः अनीकपैस्सेनापतिभिः समेत्य, जन्याय युद्धाय । 'युद्धमायोधनं जन्य' मित्यमरः । आशु तं श्रीकृष्णं अन्वगुरनुजग्मुः । हरिः श्रीकृष्णः आततायिनो वधोद्यतान् तान् जरासन्धादीन् दृष्ट्वा शार्ङ्गशरासनात् शार्ङ्गनामकधनुषः च्युतैः पृषत्कैः बाणैः; 'पृषत्कबाणविशिखा' इत्यमरः । बिभेद । भिदिर्धातोः कर्तरि लिट् ॥ ९५ ॥

संभिन्नधन्वा विरथोऽथ मागधः दुद्राव बाणै र्निहताश्वसारथिः ।
इभा विभिन्ना भुवि पेतु रञ्जसा पदातय श्छिन्नभुजोरुकन्धराः ॥ ९६ ॥

संभिन्नेति ॥ अथानन्तरं मागधो जरासन्धः, बाणैः कृष्णबाणैः, संभिन्नं धनु र्यस्य स संभिन्नधन्वा । 'धनुषश्चे' त्यनङादेशः । विगतो रथो यस्य सः निहताः अश्वाः सारथिश्च यस्य तथाविधस्सन् दुद्राव । इभा गजा विभिन्ना बाणै र्विभिन्नाः सन्तः, पदातयः छिन्नभुजोरुकन्धरास्सन्तः अञ्जसा भुवि पेतुः । पत्लृधातोः कर्तरि लिट् । अत्राश्वादीनां भूपतनरूपक्रियान्वयात् तुल्ययोगितालङ्कारः ॥ ९६ ॥

अमोचयित्वाऽद्य मम स्वसारं गोपं च चोरं रणमूर्ध्न्यहत्वा ।
पुरं प्रवेक्ष्यामि न मामकीन मिति प्रतिज्ञा मकरोत्स रुक्मी ॥९७॥

अमोचयित्वेति ॥ स रुक्मी कर्ता । अद्य मम स्वसारं रुक्मिणीं अमोचयित्वा, रणमूर्ध्नि चोरं कन्यापहर्तारं गोपं श्रीकृष्णं, अहत्वा, 'समासेऽनञ्पूर्वे' इति विधानाभ्न ल्यबादेशः । मामकीनं मदीयं, 'युष्मदस्मदो रन्यतरस्यां खञ् चेति' खञ् । 'तवकममका वेकवचने' इति ममकादेशः । पुरं कुण्डिनं न प्रवेक्ष्यामीति प्रतिज्ञा मकरो चकार । कृञ्धातोः कर्तरि लङ् ॥ ९७ ॥

द्रवन् द्रुतं कृष्णजिघृक्षया बलैर्युतो रुषा मन्दमतिः स्म सङ्गरे ।
संप्राप्य तं यासि मयि क्व तिष्ठति प्राह स्म भो भीषणभाषणैरिति
॥ ९८ ॥

द्रवन्निति ॥ मन्दमतिर्मन्दमनाः रुक्मी, सङ्गरे युद्धे कृष्णस्य जिघृक्षया ग्रहणेच्छया, बलैः सैन्यैर्युतः, द्रुतं द्रवन्, तं कृष्णं संप्राप्य, भोः कृष्ण ! मयि तिष्ठति क्व यासीति रुषा, भीषणभाषणैः, प्राह स्म उवाच । ब्रूञ्धातोः कर्तरि लट्, आहादेशः ॥ ९८ ॥

क्व यासि मुष्णन् मम सोदरीमरे निहन्मि न त्वां यदि मुञ्चसी त्यमूम् ।
वदन् पृषत्कैः स्म ललाटमध्यमे न्यहन्नहिघ्नं विनदन् रुषा हरिम्
॥ ९९ ॥

क्वेति ॥ स रुक्मी कर्ता; अरे नीच कृष्ण; मम सोदरीं रुक्मिणीं, मुष्णन्नपहरन्, क्व यासि । अमूं रुक्मिणीं न मुञ्चसि यदि त्वां त्वा निहन्मि, इति वदन्, रुषा विनदन् गर्जन्, अहिघ्नं अहिनामकासुरहन्तारं हरिं श्रीकृष्णं; ललाटमध्यमे, पृषत्कैः बाणैः, न्यहन् जघान । निपूर्वकहनधातोः कर्तरि लङ् ॥ ९९ ॥

रे रे यदूनां कुलपांसनाऽद्य मे ध्वांक्षः पुरोडाशमिव क्व दारिकाम् ।
संमुष्य यासीति लपन्तमच्युतो निहन्तुमादत्त शरासनं द्रुतम् ॥१००॥

रेर इति ॥ अच्युतः श्रीकृष्णः कर्ता । रे रे यदूनां कुलपांसन यदुवंशदूषण इति प्रकृतार्थः । वस्तुतस्तु यदूनां कुलं पातीति कुलप स्तस्य संबुद्धिः । अंसन असुरघातुक अंसधातोः कर्तरि ल्युट्प्रत्ययः । अद्य मे दारिकां बालिकां पुरोडाशं ध्वांक्ष इव । वस्तुतस्तु अध्वांक्षवत् सहस्राक्षवत् सिंहवत् गरुडवत् इति वा । संमुष्य क्व यासीति लपन्तं रुक्मिणं निहन्तुं द्रुतं शरासनं समादत्त जग्राह । आङ्पूर्वकदाञ्धातोः कर्तरि लङ् ॥ १०० ॥

**हसन् शरेणास्य धनू रमापति र्बिभेद षड्भि स्त मथास्य सारथिम् ।
द्वाभ्यां शराभ्यां चतुर स्तुरङ्गमान् चतुर्भि रेकेन रथं सकूजनम् ॥१०१॥**

हसन्निति ॥ अथानन्तरं रमापतिः श्रीकृष्णः, हसन् एकेन शरेण बाणेनास्य रुक्मिणो धनु र्बिभेद । षड्भि रस्य रुक्मिणः तं सारथिं; द्वाभ्यां शराभ्यां चतुर स्तुरङ्गमान् अश्वान्; चतुर्भि श्शरैः सकूजनं रथं च बिभेद । भिदिर्धातोः कर्तरि लिट् ॥ १०१ ॥

**स कार्मुकश्रेष्ठ मथोऽन्य दञ्जसा प्रगृह्य कृष्णं नतपर्वभि श्शरैः ।
विव्याध तच्चाप मसौ पुन र्हसन् आदत्त यद्य त्तदथाच्छिन द्धरिः ॥१०२॥**

स इति ॥ अथोऽनन्तरं स रुक्मी; अन्य त्कार्मुकश्रेष्ठं कर्मणि प्रभवतीति कार्मुकं; कर्मण उकञ् प्रत्ययः । अञ्जसा प्रगृह्य । नतपर्वभिः नम्रग्रन्थिभिः । 'ग्रन्थि र्ना पर्वपरुषी' त्यमरः । शरैः कृष्णं विव्याध जघान । असौ श्रीकृष्णः हसन् तत् तद्गृहीतं चापं धनु रच्छिनत् । अथ यद्य द्धनुरादिक मादत्त तत्तदच्छिनत् चिच्छेद । छिदधातोः कर्तरि लङ् ॥ १०२ ॥

**रथा दवप्लुत्य तथाऽवमानितः प्रगृह्य खड्गं स जिघांसया रुषा ।
अभ्यद्रव त्कृष्ण मथो धनञ्जयं देदीप्यमानं शलभो यथा मृधे ॥१०३॥**

रथादिति ॥ अथोनन्तरं; मृधे युद्धे; तथा उक्तप्रकारेणावमानितः; रथा दवप्लुत्य; खड्गं प्रगृह्य; जिघांसया हन्तुमिच्छया कृष्णं शलभः पतङ्गः; 'समौ पतङ्गशलभा' वित्यमरः । देदीप्यमानं ज्वलन्तं धनञ्जयं यथा अग्निमिव; रुषाऽभ्यद्रवत् अभिदुद्राव । अभिपूर्वकद्रुधातोः कर्तरि लङ् । पूर्णोपमा ॥१०३॥

**सुतीक्ष्णधारं करवाल मेत मादाय कोपा दभिजग्मिवांसम् ।
प्रगृह्य संहर्तु मियेष कृष्णः तदाऽऽह देवी भयविह्वलैनम्॥ १०४ ॥**

सुतीक्ष्णेति ॥ कृष्णः सुतीक्ष्णा धारा यस्य तं; करवालं खड्गं; आदाय; कोपा दभिजग्मिवांसं आगच्छन्तं एतं रुक्मिणं प्रगृह्य संहर्तु मियेष । तदा देवी रुक्मिणी भयेन विह्वला सती एनं श्रीकृष्णं आह वदति ॥ १०४ ॥

कल्याण हे देव जगत्पते गुरो दीनार्तिहन् भ्रातर मन्तिके मम ।
श्यालं रुषा नार्हसि हन्तु मित्यमुं निगद्य तत्पादयुगं ननाम सा ।।१०५।।

कल्याणेति ।। सा रुक्मिणी कर्त्री । हे कल्याण परममङ्गल ! हे देव स्वप्रकाश ! हे जगत्पते जगन्नाथ ! दीनाना मार्तिं दुःखं हन्तीति तथा, तस्य सम्बुद्धिः । हे गुरो स्वामिन् ! भ्रातरं मद्भ्रातरं, अत एव श्यालं असुं रुक्मिणं, ममान्तिके; रुषा हन्तुं नार्हसि । इति निगद्य तस्य श्रीकृष्णस्य पादयुगं ननाम । नम्धातोः कर्तरि लिट् ।। १०५ ।।

तयाऽस्य सन्त्राणपरीप्सया शुचा भिया हरि र्बाष्पनिरुद्धकण्ठया ।
स्वपादपद्माञ्चितकैश्यपुष्पया संप्रार्थित स्सन् मुदितो न्यवर्तत ।।१०६।।

तयेति ।। हरिः श्रीकृष्णः शुचा शोकेन; कृष्णात् भिया च; बाष्पेण निरुद्धः कण्ठो यस्यास्सा; तया; स्वपादपद्मे अञ्चितानि कैश्यपुष्पाणि कबरी-कुसुमानि यया तथाविधया तया रुक्मिण्या । अस्य रुक्मिणः सन्त्राणस्य परीप्सया संप्रार्थितस्सन् मुदितस्सन् न्यवर्तत । रुक्मिवधा दिति शेषः । निपूर्वकवृतुधातोः कर्तरि लङ् ।। १०६ ।।

वस्त्रेण बध्वैव मसाधुकारिणं सश्मश्रुकेशार्ध ममुं वपन् तदा ।
व्यरूपय त्तस्य सितासिना हरि र्मुदा परीहासचिकीर्षयेव तम् ।।१०७।।

वस्त्रेणेति ।। एवं पूर्वोक्तप्रकारेण असाधुकारिणं तममुं श्यालं रुक्मिणं; वस्त्रेण तदीयेनैव बध्वा; परीहासस्य चिकीर्षया कर्तुमिच्छयेव तदा तस्य रुक्मिण एव तीक्ष्णखड्गेन; श्मश्रूणां केशानां चार्धं वपन्; व्यरूपयत् विरूपितवान् । विपूर्वकरूपधातो र्णिजन्तात्कर्तरि लङ् । अत्र विरूपकरणे अहेतुभूतैव परिहासचिकीर्षा हेतुत्वेनोत्प्रेक्ष्यत इति असिद्धहेतूत्प्रेक्षा ।। १०७ ।।

आगत्य कृष्णान्तिक माशु रेवतीधव स्त माह स विमुच्य बन्धनात् ।
कर्तुं न योग्योऽय मिति प्रहेलनां स्यालो यतोऽस्माक मतो विरूपिताम्
।। १०८ ।।

आगत्येति ॥ रेवतीधवो बलरामः; आशु कृष्णान्तिक मागत्य; तं रुक्मिणं बन्धना द्विमुच्य; यतोऽयं रुक्मी; अस्माकं श्यालः अतो विरूपितां विरूपितारूपां प्रहेलनां कर्तुं न योग्य इति आह स्म उवाच ॥ १०८ ॥

आश्वास्य तं रुक्मिण मज्ञ मादरा त्तां रुक्मिणीं राम उवाच सूक्तिभिः ।
हतप्रतिज्ञोऽय मिति स्म माधवं न योग्य मस्यावपनं जुगुप्सितम् ॥१०९॥

आश्वास्येति ॥ रामो बलरामः; अज्ञं मूढं; तं रुक्मिणं; तां दुःखितां रुक्मिणीं च । आदरात् सूक्तिभि राश्वास्य; अयं रुक्मी हतप्रतिज्ञः; जुगुप्सित मावपन मस्य न योग्यम्; इति माधवं श्रीकृष्णं उवाच । स्म आश्चर्ये । वचधातोः कर्तरि लिट् ॥ १०९ ॥

लज्जानदीमज्जितवक्त्रविभ्रमो रुक्मी नवं भोजकटं पुरं तदा ।
निर्माय रोषा दवसद्रमाधवो व्यजीगमद् द्वारवतीं बलान्वितः ॥११०॥

लज्जेति ॥ रुक्मी; लज्जैव नदी; तस्यां मज्जितो मग्नः वक्त्रविभ्रमः मुखविलासो यस्य तथाभूतस्सन् । तदा रोषात् भोजकटं नाम; नवं पुरं निर्माय अवसत् । रमाधवः श्रीकृष्णोऽपि बलान्वितो रामसहितस्सन् द्वारवतीं व्यजी-गमत् जगाम । गम्लृधातोः कर्तरि लुङ् ॥ ११० ॥

एवं विनिर्जित्य नृपान् विजित्वरः हरिः पुरे ता मुपयेम ईप्सिताम् ।
गृहे गृहे चोत्सवमोदनिर्भर स्तयो र्ददौ पौरजनोऽर्हणं तदा ॥ १११ ॥

एवमिति ॥ विजित्वरो जयशीलो हरिः श्रीकृष्णः; एवं पूर्वोक्तप्रकारेण; नृपान् जरासन्धादीन् विनिर्जित्य; ईप्सितां तां रुक्मिणीं; पुरे द्वारकाया मुपयेमे परिणिनाय । तदा पौरजनः; उत्सवेन विवाहमहोत्सवेन यो मोद स्तेन निर्भरः पूर्णस्सन्; तयो र्दम्पत्योः गृहे गृहे चार्हणां परिबर्हं; ददौ । दाधातोः कर्तरि लिट् ॥ १११ ॥

पुरे स्वगेहेऽथ च रुक्मिणीशयोः प्राप्यैव वास्तव्यकुटुम्बितां मुदा ।
क्रीडासु नित्यं रममाणयो स्तदा कालो व्यरंसी न्न तु तृप्ति रेतयोः ॥११२॥

पुर इति ॥ अथानन्तरं पुरे द्वारकायां; वास्तव्यकुटुम्बितां वसन्तीति वास्तव्याः वस्तारः । 'वसेस्तव्यत् कर्तरि णिच्चे'ति तव्यप्रत्ययः वृद्धिश्च । ते च ते कुटुम्बिनश्च तेषां भाव स्तत्तां; प्राप्यैव स्वगेहे मुदा क्रीडासु विहारेषु नित्यं रममाणयो स्तयो रुक्मिणीशयोः कालो व्यरंसीत् गतः । एतयो र्दम्पत्योः तृप्तिस्तु न ॥ ११२ ॥

आभीरसूनुभगवच्चरणाब्जभृङ्ग-
श्रीमच्छुकोक्त्यमृतकूपनिपानवाचः ।
श्रीपुण्यकोटिविदुषो दशमेऽत्र काव्ये
सर्गे कृतौ विजयते रमयाऽस्य केलिः ॥ ११३ ॥

आभीरेति ॥ आभीरसूनो र्नन्दनन्दनस्य भगवतः श्रीकृष्णस्य चरणाब्जयोः पदकमलयोः भृङ्गो भक्त इत्यर्थः । श्रीमतः शुकस्य उक्तय एवामृतकूपः तस्य निपान आहावभूताः । 'आहावस्तु निपानं स्यादुपकूपजलाशये' इत्यमरः । वाचो यस्य तथोक्तः । श्रीपुण्यकोटिविदुषः कृतौ अत्र काव्ये दशमे सर्गे अस्य श्रीकृष्णस्य रमया सह केलि र्विजयते सर्वोत्कर्षेण वर्तते । 'विपराभ्यां जे' रित्यात्मनेपदम् ॥ ११३ ॥

॥ इति श्रीकृष्णविलासे सव्याख्याने पुण्यकोटिकृते
दशमस्सर्गः समाप्तः ॥

एकादशस्सर्गः

अथ षोडशभिः प्रद्युम्नस्योत्पत्त्यादिचरितमाह—

वदन् हरिस्सूक्तिभिरेष रुक्मिणीं संक्रीडयाञ्चक्र इमां वराननाम् ।
लोलाक्षि गर्भं बिभरांबभूविथेत्यमानुषो मानुषभाग्विभु स्तथा ॥१॥

वदन्निति ॥ मानुषवेषं भजतीति तथा, अमानुषो विभु र्व्यापकः । एष हरिः श्रीकृष्णः । हे लोलाक्षि! त्वं गर्भं बिभरांबभूविथ धृतवत्यसि । भृञ् धातो रामि 'भीह्री' इत्यादिना श्लुवद्भावे द्वित्वेऽनुप्रयोगे लिट् । इति सूक्तिभिरिमां वराननां रुक्मिणीं वदन् संक्रीडयाञ्चक्रे क्रीडयामास । क्रीड-धातो र्णिजन्ता दामि अनुप्रयोगे कर्तरि लिट् ॥ १ ॥

सञ्जातपुत्रं शिशुमाशु शम्बरो हृत्वा रिपुं मन्मथ मत्र सागरे ।
प्रक्षिप्य नीरे स्वगृहं ययौ ततो दुष्ट स्स मायाव्यसुरो महाबलः ॥२॥

सञ्जातेति ॥ ततोऽनन्तरं दुष्टो महाबलः मायावी मायिकः 'अस्माया मेधास्रजो विनि' रिति विनिप्रत्ययः । सः प्रसिद्धः शम्बरो नामाऽसुरः । रिपुं शत्रुं, अत्र द्वारकायां सञ्जातपुत्रं शिशुं मन्मथं, आशु हृत्वा, सागरे नीरे जले, प्रक्षिप्य स्वगृहं ययौ, यातेः कर्तरि लिट् ॥ २ ॥

तं सञ्जगाराथ महाझष शिशुं प्रगृह्य तं मत्स्य मतीव सुन्दरम् ।
जालेन दाशा महता समावृतं सूपायनं शम्बररक्षसे ददुः ॥ ३ ॥

तमिति ॥ अथ अब्धिप्रक्षेपणानन्तरं, तं शिशुं, महाझषो महान् मत्स्यः, सञ्जगार अभक्षयत् । दाशा धीवराः; 'कैवर्ते दाशधीवरा' वित्यमरः । महता जालेन आनायेन; 'आनायः पुंसि जालं स्या' दित्यमरः ।

सुमावृतं अतीव सुन्दरं तं मत्स्यं प्रगृह्य; शम्बररक्षसे सूपायनं उपहारं ददुः। दाधातोः कर्तरि लिट् ॥ ३ ॥

सूदा मुदा तस्य महानसं झषं नीत्वा ह्यवाद्य न्नुदरेऽस्य बालकम्।
दृष्ट्वा मनोज्ञं पतिशम्बराज्ञया पत्न्यै ददु र्मन्मथतुल्यरूपिणम् ॥ ४ ॥

सूदा इति ॥ तस्य शम्बरस्य, सूदा औदनिकाः 'सूदा औदनिका गुणा' इत्यमरः। मुदा झषं महानसं पाकस्थानं; 'पाकस्थानं महानसे' इत्यमरः। नीत्वा अवाद्यन् हि अखण्डयन्। अवपूर्वक दो अवखण्डन इति- धातोः कर्तरि लङ्। अस्य मत्स्यस्योदरे, मन्मथेन तुल्यं रूपं अस्यास्तीति तथोक्तम्। अत एव मनोज्ञं बालकं दृष्ट्वा, पत्यु श्शम्बरस्याज्ञया; पत्न्यै ददुः। दाधातोः कर्तरि लिट् ॥ ४ ॥

मायावती सा परिगृह्य बालकं वृत्तान्त मस्यादित एव नारदात्।
ज्ञात्वा रति स्वं स्वपतिं रमाधवा ज्जातं पुपोषातिमुदा मनोहरम् ॥५॥

मायावतीति ॥ सा मायावती मायावतीनामिका रतिः; तं बालकं परिगृह्य; नारदात् अस्य शिशो र्वृत्तान्तं आदितो मूलत एव ज्ञात्वा; रमाधवा- ज्जातं मनोहरं स्वपतिं मन्मथं अतिमुदा पुपोष पोषितवती। पुषधातोः कर्तरि लिट् ॥ ५ ॥

प्रतीक्षमाणा पतिमेव देहिनं लब्ध्वा तमेवाशु रति र्मुदा सती।
संवर्धयामास गृहे दिने दिने कालेन सोऽविन्दत यौवनं नवम् ॥ ६ ॥

प्रतीक्षमाणेति ॥ पति मनङ्गं; देहिनं शरीरवन्तमेव; प्रतीक्षमाणा सती पतिव्रता रतिः; तमेव देहवन्तमेव लब्ध्वा; मुदा दिने दिने संवर्धयामास। स प्रद्युम्नः कालेन नवं यौवनं अविन्दत प्राप। विदधातोः कर्तरि लङ्। रुधादित्वात् श्नम् ॥ ६ ॥

कार्ष्णिं तदा सा वरवर्णिनी मुदा निजं पतिं मञ्जुनिरूढयौवनम् ।
सव्रीडहासैश्चलितेक्षणैः परं मृगेक्षणैक्षिष्ट रतिप्रसूचकैः ॥ ७ ॥

कार्ष्णिमिति ॥ तदा तस्मिन् समये; मृगेक्षणा सा वरवर्णिनी रतिः; मञ्जु मनोज्ञं; निरूढ मङ्कुरितं यौवनं यस्य तथाभूतम्; निजपतिं कार्ष्णि कृष्णपुत्रं प्रद्युम्नं; रतिप्रसूचकैः स्सुरताभिव्यञ्जकैः व्रीडाहासेन सहितैः सव्रीड-हासैः; चलितैश्चञ्चलैरीक्षणैः परमैक्षिष्ट ददर्श । ईक्षधातोः कर्तरि लङ् ॥ ७ ॥

स तामथोचे मयि भाव मन्यथा मातः करोषीति सुकामुकीव किम् ।
त्वां कृष्णजं मत्पतिमेष सूतिकागृहाज्जहारेति तदा जगाद सा
॥ ८ ॥

स इति ॥ अथानन्तरं; स प्रद्युम्नः; हे मातः त्वं सुकामुकीव रति-क्रीडासक्तेव । जानपदेत्यादिना ङीष् । मयि अन्यथाभावं प्रकारान्तरेणाभिप्रायं करोषि किं? एतत् किमिति तां रतिमूचे । तदा तस्मिन् समये सा रतिः; कृष्णजं प्रद्युम्नरूपेण कृष्णाज्जातं, मत्पतिं मन्मथं त्वा मेष शम्बरासुरः सूतिका-गृहाज्जहार अहरदिति जगाद । गदधातोः कर्तरि लिट् ॥ ८ ॥

प्रगृह्य मायाशतमद्य मे पते प्रसह्य जह्येन मसह्यविभ्रमम् ।
मायाविनं शम्बरमञ्जसा मृधे व्रजाव शीघ्रं तव मातृमन्दिरम्
॥ ९ ॥

प्रगृह्येति ॥ हे पते प्रद्युम्न! अद्य मे मम, मायाशतं प्रगृह्य, असह्य-विभ्रमं मायाविनं शम्बरं, मृधे युद्धे, प्रसह्य अञ्जसा जहि संहर । तव मातृमन्दिरं रुक्मिणीगृहं शीघ्रं व्रजाव गच्छाव । व्रजधातोः कर्तरि लोट् ॥ ९ ॥

आहूय तं युद्धविशारदो रिपुं युद्धाय दैत्याधिप माक्षिपन्मृधे ।
निहत्य दृप्तं मुरवैरिसंभवः ययौ मुदा द्वारवतीं स्वभार्यया ॥ १० ॥

आहूयेति ॥ युद्धे विशारदः समर्थः, मुरवैरिणः सम्भवः उत्पत्ति र्यस्य स प्रद्युम्नः, दृप्तं गर्वितं रिपुं शत्रुं तं दैत्याधिपतिं शम्बरं, आक्षिपन् तिरस्कुर्वन्; युद्धाय आहूय; मृधे निहत्य; स्वभार्यया सह मुदा द्वारवतीं ययौ। यातेः कर्तरि लिट् ॥ १० ॥

तमापतन्तं ललनायुतं नवं सविद्युदभ्रं गगनादिव स्थितम्।
दृष्ट्वा सुरूपं नवकञ्जलोचनं स्त्रीणां कुलं कृष्ण ममन्यताद्भुतम् ॥११॥

तमिति ॥ गगना दापतन्तं अवतरन्तं; ललनया कान्तया युतं; अत एव नवं नूतनं; सविद्युदभ्रं सतटिन्मेघं इव स्थितं; सुरूपं सुन्दरं; नवकञ्जे इव लोचने यस्य तं; अद्भुतमाश्चर्यकरं; तं प्रद्युम्नं दृष्ट्वा; स्त्रीणां कुलं कृष्णममन्यत मेने। मन्यतेः कर्तरि लङ्। भ्रान्तिमदलङ्कारः ॥ ११ ॥

अमुं विनिश्चित्य विलक्षणं गुणैः स्त्रीरत्नयुक्तं मुमुहु स्ततोऽङ्गनाः।
कोऽयं हरे रद्भुतरूपसंपदः पात्रं कया वेत्युदरे भृतः पुमान्
॥ १२ ॥

अमुमिति ॥ ततोऽनन्तरं; अङ्गनाः स्त्रियः स्त्रीरत्नयुक्तं अमुं प्रद्युम्नं; गुणै र्हेतुभिः; विलक्षणं हरिभिन्नं; विनिश्चित्य; हरेः कृष्णस्याद्भुताया रूप-सम्पदः पात्रं भाजन मयं पुमान् कः, कया वा उदरे भृत इति मुमुहुः मुह्यन्ति स्म। निर्धारितु मसमर्था बभूवु रित्यर्थः। मुहधातोः कर्तरि लिट् ॥ १२ ॥

जीवे त्स यद्येव ममाद्य बालको नष्ट स्सुरूपेण वयोऽङ्गसौष्ठवैः।
हासावलोकै रथ रुक्मिणी पुन र्भवे दयं मे सुत इत्युवाच सा
॥१३॥

जीवेदिति ॥ अथानन्तरं; सा रुक्मिणी, पुनः त्वर्थे। नष्टः सूतिका गृहे हृतः मम बालकः, अद्य जीवेद्यदि; सुरूपेण वयसाऽङ्गानां सौष्ठवैश्च;

हासावलोकैः सस्मितावलोकनैश्च स मे सुतोऽयमेव भवेदिति उवाच । वचधातोः कर्तरि लिट् ॥ १३ ॥

स्नेहस्नुतापीनपयोधरा वरा मेने सुतं नष्ट मुपागतं पुनः ।
तदन्तरा कृष्णपिता च देवकी कृष्णश्च शीघ्रं गृह माययु र्मुदा ॥ १४ ॥

स्नेहेति ॥ वरा रुक्मिणी, स्नेहेन वात्सल्येन स्नुतौ स्रवन्तौ पीनौ पयोधरौ यस्या स्तथाभूता सती, नष्टं सुतं पुनरुपागतं प्राप्तं मेने; तदन्तरा तस्मिन् समये, कृष्णपिता वसुदेवः, देवकी; कृष्णश्च मुदा गृहं रुक्मिणीगृहं शीघ्र माययुः । आङ्पूर्वकयातेः कर्तरि लिट् ॥ १४ ॥

कार्ष्णिं युवानं हतशम्बरं शिशुं हृतं पुरा तं त्वधिसूतिकागृहम् ।
कन्दर्प मेना मवगम्य तत्प्रियां ते नारदा न्मोदभरं प्रपेदिरे ॥ १५ ॥

कार्ष्णिमिति ॥ ते वसुदेवादयः; युवानं तरुणं; तं गृहागतं; कार्ष्णिं कृष्णपुत्रं अधिसूतिकागृहं सूतिकागृहे । विभक्त्यर्थेऽव्ययीभावः । हृतं शिशुं; हत श्शम्बरो येन तं शम्बरहन्तारं कन्दर्पं मन्मथं एनां रतिं च तत्प्रियां नारदादवगम्य ज्ञात्वा; मोदभरं सन्तोषातिशयं प्रपेदिरे । प्रपूर्वकपदधातोः कर्तरि लिट् ॥ १५ ॥

पौरा स्त दाकर्ण्य हतारि मागतं प्रद्युम्न मेनं निजभार्यया सह ।
श्रीकृष्णसूनुं जगदेकसुन्दरं दृष्ट्वा मुदं प्रापु रतीव विस्मिताः ॥ १६ ॥

पौरा इति ॥ तदा तत्समये, पौराः पुरजनाः, जगति एकसुन्दरं मुख्यसुन्दरं एनं प्रद्युम्ननामकं श्रीकृष्णसूनुं, हतः अरिः शम्बरो येन तथाभूतं, निज-

भार्यया आगत माकर्ण्य, अतीव विस्मिताः सन्तः: दृष्ट्वा मुदं प्रापुः । आप्ल धातोः कर्तरि लिट् ॥ १६ ॥

अथ सप्तदशभिः श्यमन्तमणिं प्रस्तुत्याह---

देवेन दत्तेन मयूखमालिना मणिप्रवेकेन गलावलम्बिना ।
सत्राजि दत्यन्तमुदा समागतो व्यदर्शि लोकेन स भास्करोऽपरः ॥ १७ ॥

देवेनेति ॥ देवेन मयूखमालिना सूर्येण दत्तेन गलावलम्बिना मणिप्रवेकेन श्यमन्तकमणिनोपलक्षितः, अत एवात्यन्तमुदा समागतः प्रसिद्ध स्सत्राजित लोकेन जनेनापरो भास्कर इव व्यादर्शि। दृशिधातोः कर्मणि लुङ् ॥ १७ ॥

श्यमन्तकमणिप्रभाव माह---

श्यमन्तको नाम महाद्युति र्मणि स्सुवर्णभाराष्टकसूर्दिने दिने ।
यद्वर्तते तत्र न मार्युपद्रवाः दुर्भिक्षचोरादिभयानि सन्ति हि ॥१८॥

श्यमन्तक इति ॥ महती द्युति र्यस्य सः, दिने दिने, सुवर्णस्य भाराः तुलार्विंशत्यात्मकाः। 'तुला स्त्रियां पलशतं भारःस्या द्विंशति स्तुलाः' इत्यमरः। तेषा मष्टकं सूत इति। तथा श्यमन्तको नाम सूर्यदत्तो मणि र्यत् यत्र प्रदेशे वर्तते; तत्र मार्युपद्रवाः दुर्भिक्षचोरादिभ्यो भयानि च न सन्ति न विद्यन्ते। असधातोः कर्तरि लट् ॥ १८ ॥

नन्विदमधिकार्थदं लोकोत्तरं रत्नं राज्ञे योग्यमित्याह ---

कृष्ण स्स सत्राजित माह सूक्तिभि र्देहीति राज्ञे मणि मर्कसन्निभम् ।
मूढो हरे र्भाषितमेव निष्फलं कृत्वा स्म लोभेन जगाम मन्दिरम् ॥ १९ ॥

कृष्ण इति ॥ कृष्णः, अर्कसन्निभं सूर्यसङ्काशं, मणिं श्यमन्तकं राज्ञे उग्रसेनाय देहीति सूक्तिभिः सत्राजित माह स। मूढः स सत्राजित् लोभेन हरेर्भाषितं वचनं निष्फलं व्यर्थमेव कृत्वा मन्दिरं स्वभवनं जगाम। गम्लृधातोः कर्तरि लिट् ॥१९॥

भ्राता प्रसेन स्स्वगले लसन्मणिः हयं समारुह्य वनं ययौ ततः।
यान्तं हरिं तं विनिहत्य कानने हत्वा मणिं प्राप्य ययौ च जाम्बवान् ॥ २० ॥

भ्रातेति ॥ ततोऽस्य सत्राजितः प्रसेनो नाम भ्राता अनुजः, स्वस्य गले लसन्मणिस्सन्, हयं समारुह्य, वनं ययौ। कानने तं प्रसेनं विनिहत्य यान्तं गच्छन्तं हरिं सिंहं जाम्बवान् हत्वा मणिं तन्नखगतं श्यमन्तकं प्राप्य ययौ। यातेः कर्तरि लिट् ॥ २० ॥

श्रुत्वा हतं भ्रातर माशु कानने कृतं स मेने मणिलिप्सुनाऽमुना।
कृष्णेन तद्दुर्यशसः प्रमार्जनं वाञ्छन्नसौ कानन मन्वगाहत ॥२१॥

श्रुत्वेति ॥ स सत्राजित्, भ्रातरं प्रसेनं, कानने आशु हतं श्रुत्वा, मणिलिप्सुना मणिं प्राप्तुकामेन, अमुना कृष्णेन, कृतं मेने। असौ श्रीकृष्णः, तस्य दुर्यशसः, प्रमार्जनमपनयनं, वाञ्छन् इच्छन्, काननं वन मन्वगाहत प्रविवेश ॥ गाहधातोः कर्तरि लङ् ॥ २१ ॥

ततः किं मत आह—

तेनैव मार्गेण बिलं रमेशो गत्वा गृहं जाम्बवतो मुरारिः।
दृष्ट्वा मणिं तत्र युयोध सोऽष्टाविंशत्यहं तेन महाबलेन ॥ २२ ॥

तेनेति ॥ मुरारिः मुरद्विट् स रमेशः श्रीकृष्णः, तेनैव मार्गेण प्रसेन-गतमार्गेणैव, जाम्बवतो बिलं गृहं गत्वा, तत्र मणिं दृष्ट्वा, महाबलेन तेन

जाम्बवता सहाष्टाविंशते रह्नां समाहारो ऽष्टाविंशत्यहं अष्टाविंशतिदिनानि । 'रात्र्यहस्संवत्सराच्चे' ति खप्रत्ययः । युयोध अयुध्यत । युधधातोः कर्तरि लिट् ॥ २२ ॥

ज्ञात्वा हरिं दाशरथिं पराक्रमात् स्तुत्वा सुतां जाम्बवती मदा न्मुदा ।
मणिप्रवेकेन समं स विष्णवे सहिष्णवे स्वेन कृताखिलागसाम् ॥ २३ ॥

ज्ञात्वेति ॥ स जाम्बवान्, हरिं कृष्णं, पराक्रमा द्दाशरथिं रामं ज्ञात्वा; स्तुत्वा; स्वेन आत्मना कृताना मखिलागसां अपराधानां सहिष्णवे सहनशीलाय 'अलंकृञी' त्यादिना ताच्छील्ये इष्णुच् । विष्णवे कृष्णाय; सुतां जाम्बवतीं मणिप्रवेकेन समं मुदाऽदा द्ददौ ॥ दाधातोः कर्तरि लुङि 'गातिस्थे' ति सिचो लुक् ॥ २३ ॥

आदाय तां तं गृह मेत्य माधवो झडित्यपाकृष्ट मसह्यदुर्यशः ।
सत्राजिते दत्तमणिः स्वनिन्दकं प्रावोच देनं मणिवृत्त मादितः ॥ २४ ॥

आदायेति ॥ माधवः श्रीकृष्णः; तां जाम्बवतीं; तं मणिं चादाय; गृहमेत्य असह्यं दुर्यशोऽपाकृष्टुं परिमार्ष्टुं; झडिति सत्राजिते; दत्तमणिस्सन्, स्वनिन्दक मेनं सत्राजितं प्रति आदितो मणे र्वृत्तं वृत्तान्तं प्रावोचत् वचधातोः कर्तरि लुङ् ॥ २४ ॥

सत्राजितः सर्वसुपर्वरूपिणि प्रयुक्तनिन्दा मपनेतु मुत्सुकः ।
स कृकुदोऽदा न्मणिरत्नसंयुतं स्त्रीरत्न मस्मै हरये स्वसंभवम् ॥ २५ ॥

सत्राजित इति ॥ कूकुदः अलंकृतकन्याप्रदः 'सत्कृत्यालङ्कृतां कन्यां यो ददाति स कूकुदः' इत्यमरः ॥ स सत्राजितः ॥ अकारान्तोऽयं शब्दः ॥ सर्वसुपर्वरूपिणि सर्वदेवस्वरूपे श्रीकृष्णे प्रयुक्ता मारोपितां निन्दां निन्दाप्रयुक्तदोषमित्यर्थः ॥ अपनेतु मुत्सुक आसक्त स्सन् ॥ मणिरत्नेन मणि-श्रेष्ठेन श्यमन्तकेन संयुतं, स्वस्मात् संभव उत्पत्तिः यस्य तत् स्त्रीरत्नं सत्यभामां, अस्मै हरये; अदात् ददौ ॥ दाधातोः कर्तरि लुङ् ॥ २५ ॥

तां सत्यभामां परिणीय माधवो नैच्छ न्मणिं तस्य तु दायत स्स्व-कम् ।
निनाय गेहं कृतवर्मयाचितां मन्दाक्षतां सर्वसुपर्वयोषिताम् ॥२६॥

तामिति ॥ माधवः श्रीकृष्णः कृतवर्मणा याचितां पूर्वं विवाहार्थं कृतवर्मणा याचितां सर्वासां सुपर्वयोषितां सुरसुन्दरीणां; मन्दाक्षं लज्जा । 'मन्दाक्षं ह्रीस्त्रपा व्रीडे' त्यमरः । तद्वदाचरतीति तथोक्तां तां सत्यभामां; परिणीय गेहं निनाय ॥ दायतः दायं; सार्वविभक्तिक स्तसिः ॥ अत एव स्वकं स्वीयं; अपुत्रवतो धनस्य दौहित्रांशतया स्वीयत्व मिति भावः ॥ तस्य अपुत्रवत स्सत्राजित स्सम्बन्धिनं तं मणिं नैच्छत् न प्रतिगृहीतवा नित्यर्थः । इषधातोः कर्तरि लङ् ॥ २६ ॥

मणिप्रवेकाहरणेच्छया ततो न्यहन्यतायं शतधन्वना निशि ।
संमुष्य रत्नं परिरक्षणं भया दयाचताक्रूर मसौ पुनःपुनः ॥ २७ ॥

मणीति ॥ ततोऽनन्तर मयं सत्राजित् शतधन्वना; मणिप्रवेकस्य श्यमन्तकस्याहरणेच्छया अपहरणेच्छया निशि न्यहन्यत निजघ्ने ॥ असौ शतधन्वा रत्नं मणिं संमुष्यापहृत्य; भया दक्रूरं परिरक्षणं संरक्षणं पुनः पुन-रयाचत ययाचे ॥ याचतेः कर्तरि लङ् ॥ दुह्यादित्वात् द्विकर्मकत्वम् २७ ॥

अक्रूर माहैन मिति त्रिविक्रमं को द्वेष्टु मिच्छे न्मृति मिच्छतो विना ।
[1]तद्वाक्य माकर्ण्य महामणिं पटे तस्यैव निक्षिप्य पलायत द्रुतम्
॥ २८ ॥

अक्रूर इति । अक्रूरः कर्ता । त्रिविक्रमं श्रीकृष्णं, मृतिमिच्छतः मर्तुकामाद्विना । 'पृथग्विने' त्यादिना पञ्चमी । को द्वेष्टु मिच्छे दिति एनं शतधन्वान माह स । एष शतधन्वा तस्याक्रूरस्य वाक्य माकर्ण्य, महामणिं श्यमन्तकं, तस्याक्रूरस्यैव पटे परोक्षे निक्षिप्य, द्रुतं पलायत । परापूर्वकायतेः कर्तरि लङ् । 'उपसर्गस्यायता' विति लत्वम् ।

सा सत्यभामा पितरं हतं गृहे रुरोद सत्राजित मेत्य सस्वरम् ।
कृष्णोऽन्वगा द्धन्तु ममुं रमाधवो बलेन साकं गरुडध्वजो बली ॥
॥ २९ ॥

सेति ॥ सा सत्यभामा, गृहे, हतं पितरं सत्राजितं एत्य आगत्य, सस्वर मुच्चैस्स्वरं रुरोद । बली गरुडध्वजः रमाधवः श्रीकृष्णः, अमुं श्वशुर-हन्तारं शतधन्वानं हन्तुं बलेन बलरामेण साकं, अन्वगा दनुययौ । अनु-पूर्वकेण्धातोः कर्तरि लुङ् ; गादेशः ॥ २९ ॥

चक्रेण शत्रुं मिथिला मसौ हरिः पलायमानं समयाऽवधी द्रुषा ।
मणिं विचिन्वन्निव रेवतीपतिं स्थित्वा जगादाथ मणि र्न भो इति
॥ ३० ॥

चक्रेणेति ॥ असौ हरिः श्रीकृष्णः, पलायमानं शत्रुं शतधन्वानं, रुषा, मिथिलां समया मिथिलायास्समीपे । 'समयानिकषाशब्दौ सामीप्ये त्वव्ययौ मता' विति हलायुधः । 'अभितस्समयानिकषे' त्यादिना द्वितीया । चक्रेणा-वधीत् । हन्तेः कर्तरि लुङि चङि वधादेशः । अथानन्तरं मणिं विचिन्वन्निव ।

---

1. तदेष चाकर्ण्य (ख)

स्थित्वा, विज्ञातमणिवृत्तान्तोऽपि मार्गमाण इव, शतधन्वन स्समीपे स्थित्वा, भो राम ! मणि र्नास्तीति रेवतीपतिं रामं जगाद । गदधातोः कर्तरि लिट् ॥ ३० ॥

सङ्कुप्य तस्मै पुरुषाय सोऽग्रज स्संप्राप्य वैदेहपुरं हलायुधः ।
उवास मासान् कतिचिच्च पट्टने हरि र्जगामाथ पुरं सदारुकः
॥ ३१ ॥

सङ्कुप्येति ॥ अग्रज स्स हलायुधो राम स्तस्मै पुरुषाय, सङ्कुप्य विज्ञातमणिवृत्तान्तोऽपि शतधन्वानं हतवानिति सङ्कुप्य 'क्रुधद्रुहा' दिना चतुर्थी । वैदेहपुरं मिथिलां, सम्प्राप्य, तत्र पट्टने कतिचिन्मासा नुवास । अथ हरिः सदारुकस्सन्, पुरं द्वारकापुरं, जगाम । गम्लृधातोः कर्तरि लिट् ॥ ३१ ॥

निर्वर्त्य सोऽथ श्वशुरस्य संस्कृतिं त्रसन्त मक्रूर मितो रहो मणेः ।
याहीति काशी मवद द्रमापतिः सोऽयष्ट ता मेत्य शताश्वमेधकैः
॥ ३२ ॥

निर्वर्त्येति ॥ अथानन्तरं रमापतिः, श्वशुरस्य सत्राजितः, संस्कृतिं और्ध्वदेहिकं निर्वर्त्य, मणेः श्यमन्तकात्, त्रसन्तं सत्राजिद्धननापवादभिया त्रसन्तं, अक्रूरं प्रति, इतो द्वारकायाः काशीं याहीति रह एकान्तेऽवदत् । सोऽक्रूरः, तां काशी मेत्य गत्वा, शताश्वमेधकै रयष्ट ईजे । यजधातोः कर्तरि लुङ् ॥ ३२ ॥

स कारयामास मुदा स्वनामत स्तदा चतुष्षष्टिषु जाह्नवीतटे ।
घट्टेषु सोपानतटीः प्रभावतो मणे रथाद्यापि विभान्ति तत्कृताः
॥ ३३ ॥

स इति ॥ अथानन्तरं सोऽक्रूरः, जाह्नवीतटे गङ्गातीरे, चतुष्षष्टिषु घट्टेषु, मणेः श्यमन्तकस्य, प्रभावतः, सोपानतटीः, मुदा कारयामास अकार-

यत्। तत्कृताः अक्रूरनिर्मिताः सोपानततयोऽद्यापि स्वनामतो विभान्ति प्रकाशन्ते। भातेः कर्तरि लट्॥ ३३॥

अथ द्वाभ्यां हरे र्हस्तिनापुरगमनं वर्ण्यते—

हरि र्ययौ नागपुरीं पितृष्वसुः कुन्त्याः कुमारान् धृतराष्ट्रभूपतिम्।
राजा च तं कृष्ण मपूजय न्मुदा कुन्तीसुता नेमु रमुं समागतम्॥ ३४॥

हरिरिति॥ हरिः श्रीकृष्णः, पितृष्वसुः कुन्त्याः कुमारान् युधिष्ठिरादीन् धृतराष्ट्रभूपतिं च, द्रष्टुं, नागपुरीं हस्तिनापुरीं, ययौ। समागतं तं कृष्णं, राजा धृतराष्ट्रः, मुदाऽपूजयत्। कुन्तीसुताः पार्थादयश्च नेमुः नमश्चक्रुः। णमुधातोः कर्तरि लिट्॥ ३४॥

तां द्रौपदीं प्राप्तपतीं नवोढिकां किरीटिना यन्त्रभिदा जितां वराम्।
दृष्ट्वा च पृष्ट्वा कुशलं सुभाषणैः कृष्णो मुदा तत्र समूषिवा नसौ॥ ३५॥

तामिति॥ असौ श्रीकृष्णः, यन्त्रभिदा मत्स्ययन्त्रभिदा, किरीटिनाऽर्जुनेन जितां, प्राप्ताः पतयो युधिष्ठिरादयो यया ताम्; नवोढिकां नवोढां, वरां श्रेष्ठां, तां प्रसिद्धां द्रौपदीं दृष्ट्वा, सुभाषणैः प्रियोक्तिभिः, कुशलं च पृष्ट्वा, तत्र हस्तिनपुरे, मुदा समूषिवान् उषितवान्। वसधातो र्लिटि क्वसुप्रत्ययः॥ ३५॥

अथ त्रिभिः कालिन्दीविवाहं वर्णयति—

कदाचि देतौ वनकेलिकामुकौ कृष्णा वयातां विपिनं धनुर्धरौ।
गाण्डीवधन्वा यमुनातटस्थितां कलिन्दकन्यां समभाषतार्जुनः॥ ३६॥

कदाचिदिति ॥ कदाचित्, वनकेलिकामुका वेतौ कृष्णौ कृष्णार्जुनौ, धनुर्धरौ सन्तौ, विपिन मयातां अगच्छताम् । गाण्डीवधन्वाऽर्जुनः, यमुनातटे स्थितां, कलिन्दकन्यां कालिन्दीं समभाषत । भाषधातोः कर्तरि लङ् ॥३६॥

का त्वं वरार्हे पतिलिप्सयाऽत्र तपश्चरन्तीव विभासि भामिनि ।
इतीरयन्तं समभाषताऽङ्गना नान्यं वृणे तं मधुसूदनं विना ॥३७॥

का इति ॥ हे वरार्हे पूज्ये, भामिनि त्वं का? पतिलिप्सया पतिं लब्धुमिच्छया, अत्र यमुनातटे तपश्चरन्तीव मे विभासि । इति ईरयन्तं वदन्तं, तमर्जुनं प्रति शङ्कितेति शेषः । अङ्गना कालिन्दी, मधुसूदनं कृष्णं विनाऽन्यं न वृणे इति समभाषत । भाषधातोः कर्तरि लङ् ॥ ३७ ॥

तदाऽभिनन्द्य प्रतिभाषितं मुदा तस्याः किरीटी पतिमेव तं हरिम् ।
तां प्राप्स्यसीत्याशु वदन् स तौ मुदा समीप मानीय चकार दम्पती ॥ ३८ ॥

तदेति ॥ तदा तस्मिन् समये, स किरीटी अर्जुनः । तस्याः कालिन्द्याः, प्रतिभाषितं प्रत्युत्तर मभिनन्द्य सन्तुष्य, तं हरिमेव पति माशु प्राप्स्यसीति वदन्, तां कालिन्दीं मुदा समीपं हरे स्समीप मानीय तौ कालिन्दी-कृष्णौ दम्पती भार्यापती चकार । कृञ् धातोः कर्तरि लिट् ॥ ३८ ॥

अथ मित्रविन्दाविवाहं वर्णयति —

विधूय राज्ञो निजवीर्यशुल्किका माहृत्य कृष्णोऽय मवन्तिराट्-सुताम् ।
तां मित्रविन्दां नलिनायतेक्षणां व्युवाह कन्यां सुरसुन्दरीनिभाम् ॥ ३९ ॥

विधूयेति ॥ अयं कृष्णो राज्ञः विधूय परिभूय, निजवीर्यं स्वपराक्रम एव शुल्कं यस्यास्तां ; नलिने इव आयते ईक्षणे यस्यास्तां, सुरसुन्दरीनिभां, अवन्तिराट्सुतां अवन्तिराजस्य सुतां प्रसिद्धां मित्रविन्दानामिकां कन्या माहृत्य व्युवाह उपयेमे । विपूर्वकवहधातोः कर्तरि लिट् ॥ ३९ ॥

अथ नाग्नजितीविवाह माह ––

राज्ञ स्ततो नग्नजित स्स कन्यकां निबन्धना त्सप्तककुद्मतां बलात् ।
जित्वा हरि स्ता मतिलीलया मुदा व्युवाह काले श्वशुरौ प्रकर्षयन्
॥ ४० ॥

राज्ञ इति ॥ ततोऽनन्तरं, स हरिः, सप्तककुद्मतां 'सप्तमहाबला-नेतान् वृषभान् एकदा प्रगृह्य यो बध्नाति तस्मै मत्सुतां दास्यामी' ति कन्या-शुल्कत्वेन प्रतिज्ञावबोधनानां सप्तवृषभानां बलात् अतिलीलया निबन्धनात् नग्नजिदाख्यस्य राज्ञः कन्यकां नाग्नजितीं जित्वा श्वशुरौ श्वश्रूश्वशुरौ, 'श्वशुरः-श्वा' इत्येकशेषः । प्रकर्षयन् काले व्युवाह ऊढवान् ॥ ४० ॥

तस्याः पिता रत्नचया नमूल्यकान् गजायुतं कोटिपदातिकां स्तदा ।
अश्वार्बुदं सुन्दरनिष्ककन्धरा दासी स्सहस्रं हरये ददौ मुदा ॥ ४१ ॥

तस्या इति ॥ तस्या नाग्नजित्याः पिता, तदा विवाहसमये ; अमूल्य-कान् अमूल्यान् रत्नचयान्, गजानामयुतं, कोटिपदातिकान् अश्वानामर्बुदं, सुन्दराणि निष्कानि कन्धरासु यासां तथाविधाः, सहस्रं दासीश्च मुदा हरये ददौ । दाधातोः कर्तरि लिट् ॥ ४१ ॥

अथ भद्राविवाहं वर्णयति ––

भद्रां ततः केकयराजकन्यकां मनोहरां मञ्जुलवाग्विलासिनीम् ।
स्वयंवरे प्राप्य जगत्प्रभु श्शुभां ययौ पुरं तां परिणीय माधवः
॥ ४२ ॥

भद्रामिति ॥ ततोऽनन्तरं, जगत्प्रभु र्माधवः श्रीकृष्णः, मनोहरां, मञ्जुलो वाग्विलासः अस्या अस्तीति तथोक्तां शुभां भद्राख्यां केकयराजकन्यकां स्वयंवरे प्राप्य, तां परिणीय, पुरं द्वारकां ययौ। यातेः कर्तरि लिट् ॥ ४२ ॥

अथ लक्ष्मणाविवाहं वर्णयति —

मृगाङ्कवक्त्रां मृगशावकेक्षणां सुलक्षणां सुन्दरवाग्विचक्षणाम्।
स लक्ष्मणा माहतलक्षणो हरिः पतिंवरा माप ततः स्वयंवरे ॥४३॥

मृगाङ्केति ॥ ततोऽनन्तरं, आहतलक्षणः गुणैः प्रसिद्धः, 'गुणैः प्रतीते तु कृतलक्षणाहतलक्षणौ' इत्यमरः। स हरिः, मृगाङ्कवक्त्रां चन्द्रवदनां, मृगशावकस्येक्षणे इव नेत्रे यस्या स्तां; शोभनानि लक्षणानि सामुद्रिकोक्तानि यस्यास्ताम्। सुन्दरासु वाक्षु विचक्षणां समर्थाम्। पतिंवरां लक्ष्मणां लक्ष्मणाख्यां कन्यां स्वयंवरे आप प्राप। आप्लृधातोः कर्तरि लिट् ॥ ४३ ॥

अथ दशभि र्नरकासुरवधपूर्वकं पारिजातापहरणं च वर्णयति —

स नारदो भेदविशारदः कदा चिदेत्य पुष्पं बत पारिजातजम्।
अदा न्मुदेऽस्मै प्रियरुक्मिणीगृहे सत्या तदाकर्ण्य चुकोप विष्णवे ॥ ४४ ॥

स इति ॥ भेदविशारदः कलहप्रियः स प्रसिद्धो नारदः, कदाचि देत्य आगत्य, पारिजातजं पुष्पं, प्रियरुक्मिणीगृहेऽस्मै कृष्णाय, मुदे सन्तोषाय अदात्। सत्या सत्यभामा, तत्पारिजातपुष्पदान माकर्ण्य, विष्णवे कृष्णाय चुकोप अकुप्यत्। 'क्रुधद्रुहे' त्यादिना चतुर्थी। सपत्नीगृहे जग्राहेति कुपितेति भावः। कुपधातोः कर्तरि लिट् ॥ ४४ ॥

तां सान्त्वयन् मञ्जुवचोभि रच्युत स्तदाधिरूढो गरुडं सहानया ।
प्राग्ज्योतिषं शत्रुजिघांसया पुरं मुराग्निपाशानिलवारिसंवृतम् ॥४५॥

तामिति ॥ अच्युतः श्रीकृष्णः, तदा तां सत्यभामां, मञ्जुवचोभिः पारिजात माहरिष्या मीत्यादिवचोभिः सान्त्वयन्, अनया सत्यभामया सह गरुड मधिरूढ स्सन् शत्रुजिघांसया असुरवधेच्छया, मुरेण मुरासुरेण, अग्निना, पाशै र्वरुणपाशै रनिलेन वायुना वारिणा उदकेन च, संवृतं प्राग्ज्योतिषं नाम नरकासुरपुरं ययौ । यातेः कर्तरि लिट् ॥ ४५ ॥

हत्वा मुरं तत्पुरपालकं द्रुतं सोऽपूरय त्पाञ्चजनं दरं हरिः ।
श्रुत्वाऽथ निर्गत्य बहिः कुजो दरं ददर्श सत्यां गरुडे च माधवम्
॥ ४६ ॥

हत्वेति ॥ अथानन्तरं हरिः श्रीकृष्णः, तस्य नरकासुरस्य, पुरपालकं मुरं मुरासुरं; द्रुतं हत्वा, पाञ्चजनं दरं शंख मपूरयत् पूरयामास । कुजो नरकासुरः दरं शंखनादं, श्रुत्वा बहिः पुरात् बहि र्निर्गत्य, गरुडे माधवं सत्यां सत्यभामां च ददर्श । दृशिधातोः कर्तरि लिट् ॥ ४६ ॥

राकेन्दुवक्त्रां रविमण्डलाननां कन्दर्पकेतुं घनधूमकेतुभाम् ।
सकार्मुकां चारुतरां भयङ्करा मवेक्ष्य तां कृष्णरिपू मुमूर्च्छतुः ॥४७॥

राकेति ॥ कृष्णः रिपुः नरकश्च तौ कृष्णरिपू । प्रियपक्षे राकेन्दुरिव वक्त्रं यस्यास्तां; अन्यत्र रविमण्डल मिवाननं यस्यास्ताम्; प्रियपक्षे कन्दर्पस्य केतुं ध्वजं, मन्मथोद्दीपिका मित्यर्थः । अन्यत्र घनस्य धूमकेतोः भाः कान्ति र्यस्यास्ताम्, सकार्मुकां धृतचापां; प्रियपक्षे चारुतरां, अन्यत्र भयङ्करां; तां सत्यभामा मवेक्ष्य मुमूर्च्छतुः । प्रियः कामेन रिपुः भयेने त्यूह्यम् । मूर्च्छधातोः कर्तरि लिट् । उल्लेखालङ्कारः । तदुक्तं 'बहुभि र्बहुधोल्लेखा देकस्योल्लेख इष्यत' इति ॥ ४७ ॥

दृष्ट्वा सभार्यं गरुडोपरि स्थितं सविद्युदभ्रं परयेव तीव्रया ।
गुर्व्या च भौमो गदया न्यहन् रुषा सवाहनं वासवसोदरं बली
॥ ४८ ॥

दृष्ट्वेति ॥ स भौमो नरकः, गरुडोपरि स्थितं सभार्यं अत एव सविद्युदभ्रं सतडिन्मेघ मित्युपमा । वासवसोदर मिन्द्रानुजं, कृष्णं दृष्ट्वा, परया श्रेष्ठया, तीव्रया वेगयुक्तया, गुर्व्या गदया, रुषा सवाहनं सगरुडं कृष्णं, न्यहन् जघान । हन्तेः कर्तरि लङ् ॥ ४८ ॥

भूम्यास्समक्षं नरकस्य माधवः चक्रेण शीर्षं सकिरीटकुण्डलम् ।
चिच्छेद मोदं जनयन् सुपर्वणां जघान सेनां कुपितोऽस्य चाखि-
लाम् ॥ ४९ ॥

भूम्या इति । स माधवः श्रीकृष्णः, कुपितस्सन् भूम्यास्समक्षं, सकिरीटकुण्डलं, नरकस्य शीर्षं शिरः, सुपर्वणां देवानां, मोदं जनयन् सन्, चक्रेण चिच्छेद बिभेद । अस्याखिलां सेनां च जघान । हनधातोः कर्तरि लिट् ॥ ४९ ॥

आदाय जाम्बूनदभास्वरे वरे सुकुण्डले कृष्ण मुपेत्य मेदिनी ।
सा वैजयन्त्या वनमालया मणिं छत्रं ददौ कौस्तुभ माशु वारुणम्
॥ ५० ॥

आदायेति ॥ सा नरकासुरजननी, मेदिनी भूमिः, जाम्बूनदेन स्वर्णेन, भास्वरे प्रकाशमाने, वरे श्रेष्ठे, सुकुण्डले अदितिकुण्डले आदाय, आशु कृष्ण मुपेत्य, वैजयन्त्या वैजयन्त्याख्यया वनमालयासह, कौस्तुभं मणिं, वारुणं वरुणसम्बन्धि छत्रं च ददौ । दाधातोः कर्तरि लिट् ॥ ५० ॥

दत्वा धरण्या अभयं रमाधवः प्रविश्य भौमस्य पुरीं च मन्दिरम् ।
षड्भि स्सहस्रै र्दशभि र्निरागसां स्त्रीणां युतं बन्धनगेहमाययौ
॥ ५१ ॥

दत्वेति ॥ रमाधवः श्रीकृष्णः, धरण्यै भूम्यै, अभयं तव पौत्रं भगदत्तं पालयामीति अभयं दत्वा, भौमस्य नरकस्य, पुरं मन्दिरं च प्रविश्य, निरागसां निरपराधानां, स्त्रीणां, दशभिः षड्भिश्च षोडशभिः सहस्रैर्युतं बन्धनगेहं कारागृहं माययौ आजगाम । यातेः कर्तरि लिट् ॥ ५१ ॥

दृष्ट्वा स्त्रिय स्तं पति माशु वव्रिरे सर्वा स्समं मन्मथमन्मथं मुदा ।
तदैव ता स्संपरिगृह्य माधव स्संप्रेषयामास स वाहनैः पुरीम् ॥५२॥

दृष्ट्वेति ॥ सर्वाः षोडशसहस्रसंख्याकाः स्त्रियः, मन्मथस्यापि मन्मथं, अतिसुन्दरमित्यर्थः । तं श्रीकृष्णं, दृष्ट्वा, समं एकदैव, पतिं वव्रिरे । स माधवः श्रीकृष्णः, तदैव ताः स्त्रियः, संपरिगृह्य, पुरीं द्वारकां, वाहनैः शिबिकाभिः संप्रेषयामास । सं प्र पूर्वक इषधातो णिजन्ता दामि अनुप्रयोगे कर्तरि लिट् ॥ ५२ ॥

दत्वाऽऽशु अदित्यै वरकुण्डले हरि र्गत्वा पुरं वज्रधरस्य नन्दनात् ।
हृत्वा च सत्यासदने प्रतिष्ठितं कृत्वा मुदं प्राप स पारिजातकम्
॥ ५३ ॥

दत्वेति ॥ स श्रीकृष्णः, आशु वज्रधरस्य इन्द्रस्य, पुरं गत्वा, वरकुण्डले अदित्यै दत्वा, नन्दनात् इन्द्रोपवनात् पारिजातकं पारिजातवृक्षं हृत्वा आनीय, सत्यासदने सत्यभामागृहे प्रतिष्ठितं कृत्वा मुदं प्राप । प्रपूर्वकाप्लृधातोः कर्तरि लिट् ॥ ५३ ॥

अथ पञ्चभिः रुक्मिणीकृष्णयोः प्रणयकलहं वर्णयति—

हरिं कदाचित् प्रियरुक्मिणी प्रियं न्यवीविजत् शीतसुगन्धिवायुना ।
शिरीषमृद्वद्भुतहंसतूलिकातल्पे शयानं व्यजनेन मन्दिरे ॥ ५४ ॥

हरिमिति ॥ कदाचित् कालविशेषे, मन्दिरे क्रीडागृहे, प्रिया च सा रुक्मिणी च प्रियरुक्मिणी, शिरीषपुष्पवत् मृदुनि, अद्भुते हंसतूलिकातल्पे

शयानं प्रियं हरिं, शीतः सुगन्धिः वायुर्यस्य तेन, व्यजनेन न्यवीविजत् वीजयामास । निपूर्वकवीजधातोः णिजन्तादामि अनुप्रयोगे कर्तरि लिट् ॥ ५४ ॥

वल्गत्कुचा मधरबिम्बनितान्तकान्ति शोणायमानरदनां कमलाननां ताम् ।
भूमौ स्थितां स्ववदनाम्बुजमीक्षमाणा मूचे प्रियां हरि रनर्हवचांसि देवीम् ॥ ५५ ॥

वल्गदिति ॥ हरिः श्रीकृष्णः, वल्गन्तावुच्चलन्तौ कुचौ यस्यास्तां; अधरो बिम्बमिवेति उपमितसमासः । तस्य नितान्तं कान्त्या शोणायमानाः; आचारार्थे क्यङि कर्तरि शानच् । रदना दन्ता यस्यास्ताम्; कमलाननां पद्ममुखीं, भूमौ स्थितां, स्ववदनाम्बुजमीक्षमाणां तां प्रियां देवीं रुक्मिणीं; अनर्हाणि अयोग्यानि वचांसि ऊचे उवाच । वचधातोः कर्तरि लिट् । शोणायमानरदनामित्यत्र तद्गुणालङ्कारः ॥ ५५ ॥

रूपसौन्दर्यादिभि रात्मान मसदृशीं मन्यमानां रुक्मिणीं परिहसन्निवाह—

याहि त्व मस्माद् वृणु चेदिपं पतिं किं कार्यमत्रास्ति तवान्यकामुके ।
इत्याह तां विप्रियवाक्यकोविदो गर्वस्य भङ्गाय रमाधव स्तदा ॥ ५६ ॥

याहीति ॥ हे अन्यकामुके ! अत्र गेहे, तव किं कार्यमस्ति; अस्माद् गृहात् याहि गच्छ ! चेदिपं शिशुपालं पतिं वृणु वृणीष्वेति, विप्रियवाक्येषु कोविद स्समर्थः रमाधवः श्रीकृष्णः । तदा तां रुक्मिणीं गर्वस्य भङ्गाय परिहारार्थ माह स्म ॥ ५६ ॥

श्रुत्वेरितं रत्ननितम्बभूषया भूमौ तदा नूपुरकङ्कणैस्सह ।
जलेन हीना रविरश्मिपीडिता समीरनुन्ना कदलीव साऽपतत् ॥ ५७ ॥

श्रुत्वेति ॥ तदा सा रुक्मिणी, ईरितं प्रियोक्तं श्रुत्वा, जलेन हीना, रविरश्मिभिः पीडिता, समीरेण नुन्ना आहता कदलीव, रत्ननितम्बभूषया रत्नमयकाञ्च्या नूपुरकङ्कणैस्सह भूमावपतत् पपात । पत्लृधातोः कर्तरि लङ् । उपमालङ्कारः ॥ ५७ ॥

तथा शयानां परिरभ्य नेत्रयो र्जलप्रवाहौ परिमृज्य पाणिना ।
अये प्रिये ते हृदयं बुभुत्सुना मयोक्त मित्यद्य बभाण माधवः ॥५८॥

तथेति ॥ माधवः श्रीकृष्णः, तथा शयानां भूमिं गतां रुक्मिणीं परिरभ्य, तस्या नेत्रयो र्जलप्रवाहौ पाणिना परिमृज्य, अये प्रिये कान्ते ! अद्य ते तव हृदयं बुभुत्सुना बोध्दुमिच्छुना । बुधधातोस्सन्नन्ता दुप्रत्ययः । मया उक्तम् । न तु वस्तुत इति शेषः । इति बभाण । भणधातोः कर्तरि लिट् ॥ ५८ ॥

क्रीडन्मुदा तासु कुलोत्तमा स्वयं पत्नीषु मुख्यान् गुणवीर्यकान्तिभिः ।
"न विद्यते तान् गणनाऽपि पुत्रकान् येषा मथो धीरतरा न जीजनत्" ॥ ५९ ॥

क्रीडन्निति ॥ अथानन्तरं, अयं श्रीकृष्णः, कुलोत्तमासु कुलश्रेष्ठासु तासु अष्टोत्तरशताधिकषोडशसहस्रेषु पत्नीषु मुदा क्रीडन्, गुणवीर्यकान्तिभिः मुख्यान् धीरतरान् पुत्रका नजीजनत् जनयामास । येषां गणना संख्याऽपि न विद्यते । तानित्यन्वयः ॥ ५९ ॥

अथ चतुर्दशभि रुषापरिणयं वर्णयति—

उषाऽथ योषाऽसुरबाणपुत्रिका कार्ष्णी स्सुतं स्वेन समागतं निशि ।
स्वप्नेऽनिरुद्धं परिरभ्य सा रतै राखेलनै स्संरमते स्म कन्यका ॥६०॥

उषेति ॥ अथानन्तरं, असुरस्य बाणस्य पुत्रिका कन्यका अनूढा उषा उषाख्या योषा, निशि स्वप्ने, स्वेन स्वयं समागतं कार्ष्णेः प्रद्युम्नस्य सुतमनिरुद्धं

परिरभ्य, सा रतैः, आखेलनै र्विलासैः, संरमते स्म। रमुधातोः कर्तरि लट् ॥ ६० ॥

उत्थाय वेगेन सुकान्तचिन्तया बाणस्य मन्त्रिप्रवरस्य पुत्रिकाम् ।
सखीं स चित्रं निशि चित्रलेखिकां सा चित्रलेखा मिद माह मोहिनी ॥ ६१ ॥

उत्थायेति ॥ मोहोऽस्या अस्तीति मोहिनी सा उषा, निशि सुकान्तस्य प्रियस्य चिन्तया वेगेनोत्थाय स्वप्नादुत्थाय, बाणस्य बाणसंबन्धिनो मन्त्रिप्रवरस्य मन्त्रिश्रेष्ठस्य पुत्रिकां, चित्राणामालेख्यानां; 'आलेख्याश्चर्ययो श्चित्र' मित्यमरः। लेखिकां चित्रलेखां चित्रलेखाख्यां सखी मिदं वक्ष्यमाणं चित्र माश्चर्य माह वदति स्म ॥ ६१ ॥

तत्प्रकार मेवाह—

स्वप्नेऽद्य कश्चि त्पुरुषोऽधरामृतं मां पाययित्वा कुचकुङ्कुमाङ्कितः ।
स्वां लालयित्वा रतिकेलिभिस्सखि व्यजीगम च्चित्तहरोऽतिसुन्दरः ॥ ६२ ॥

स्वप्न इति ॥ हे सखि ! चित्रलेखे ! अद्य स्वप्ने अतिसुन्दरः अत एव चित्तहरः कश्चित्पुरुषः अधरामृतं स्वां स्वीयां मां पाययित्वा, रतिकेलिभिश्च लालयित्वा, कुचकुङ्कुमाङ्कितस्सन् व्यजीगमत् जगाम। विपूर्वकगम्लृ धातो र्णिजन्ता त्कर्तरि लुङ् ॥ ६२ ॥

जीवामि नाहं सुरतप्रमोददं विनाऽद्य सुभ्रू स्तमिहानयाञ्जसा ।
इतीरिता सा भुवनत्रयोत्तमान् पटेऽलिख ल्लेखनचातुरीधुरी ॥ ६३ ॥

जीवामीति ॥ हे सुभ्रूः चित्रलेखे ! सुरतेषु केलीप्रमोदं ददातीति तथोक्तः; तं पुरुषं विना, अद्याहं न जीवामि। अञ्जसा तमिहानय। इतीरिता लेखनचातुर्याः धूर्यस्याः सा लेखनचातुरीधुरी । 'ऋक्पूरि' त्यदिना अप्र-

त्ययः । सा चित्रलेखा, भुवनत्रये उत्तमान् श्रेष्ठान् पटे ऽलिखत लिलेख । लिखधातोः कर्तरि लङ् ॥ ६३ ॥

सर्वोत्तमांस्तान् यदुवंशसम्भवान् विलोक्य शूरानकदुन्दुभी विधुम् ।
नेत्याह सा कार्ष्णि मतीव लज्जिता ह्यवाङ्मुखत्वं त्वनिरुद्धमावहत्
॥ ६४ ॥

सर्वोत्तमानिति ॥ सा उषा, तान् चित्रपटे लिखितान्, सर्वोत्तमान् यदुवंशसंभवान् शूरं आनकदुन्दुभिं वसुदेवं, विधुं श्रीकृष्णं च; 'विधु र्विष्णौ चन्द्रमसी' त्यमरः । कार्ष्णि प्रद्युम्नं च विलोक्य नेत्याह । किं तु अनिरुद्धं विलोक्य लज्जिता अवाङ्मुखत्व मावहत् प्राप । आङ्पूर्वकवहतेः कर्तरि लङ् ॥ ६४ ॥

हा प्राणनाथेति निगद्य तत्पटेऽप्यालिङ्गिनीं बाष्पनिरुद्धकन्धराम् ।
रोमाञ्चसंलक्षितहृच्छयां सखी त मानयामीति जगाद ता मसौ ॥६५॥

हेति ॥ हा प्राणनाथेति निगद्योदीर्य, तत्पटे चित्रपटे, लिखितमपि । त मनिरुद्धं । आलिङ्गिनीं, बाष्पै र्निरुद्धा कन्धरा यस्या स्तथाभूतां । रोमाञ्चेन रोमहर्षेण, संलक्षितः सूचितः हृच्छयो मन्मथो यस्या स्तामुषा मसौ सखी चित्रलेखा तमनिरुद्धमानयामीति जगाद । गदतेः कर्तरि लिट् ॥ ६५ ॥

गत्वाऽनिरुद्धं मृदुतल्पशायिनं प्राद्युम्नि मानीय हरेः पुरं निशि ।
सा चित्रलेखा निजयोगमायया प्रदाय तस्यै बहुमान माप च
॥ ६६ ॥

गत्वेति ॥ सा चित्रलेखा; निजयोगमायया, निशि हरेः पुरं द्वारकां गत्वा, मृदुतल्पशायिनं प्राद्युम्निमनिरुद्ध मानीय, तस्यै उषायै प्रदाय, बहुमान माप च । आप्लधातोः कर्तरि लिट् ॥ ६६ ॥

सरोजिनी प्राप्य मयूखमालिनं चूतं पिकस्त्रीव विधुं कुमुद्वती ।
प्राप्तं पतिं प्रोषितभर्तृकेव तं प्राविन्दतानन्द मतीव सुन्दरी ॥ ६७॥

सरोजिनीति ॥ मयूखमालिनं सरोजिनीव, चूतं पिकस्त्रीव, विधुं कुमुदिनीव, पतिं प्रोषितभर्तृकेव सुन्दरी उषा प्राप्तं त मनिरुद्धं प्राप्य अतीवानन्दं प्राविन्दत लेभे । विद्लृधातोः कर्तरि लङ् । मालोपमालङ्कारः ॥ ६७ ॥

तेनैव सङ्गम्य पिशङ्गवाससा नवाभ्रतुल्येन मुदाऽऽरमन्त्यसौ ।
नामंस्त नक्तंदिव मेतयो स्ततो राज्ञो भट स्सङ्ग मथ व्यजिज्ञपत्
॥ ६८ ॥

तेनेति ॥ ततोऽनिरुद्धलाभानन्तरं, नवाभ्रतुल्येन मेघश्यामेन, पिशङ्गवाससा पीताम्बरेण, तेनैवानिरुद्धेनैव सङ्गम्य मुदा, आरमन्ती रममाणा । 'व्याङ्परिभ्यो रम' इति परस्मैपदम् । असौ उषा, नक्तंदिव महोरात्रं नामंस्त न बुबुधे । अथानन्तरं भटोऽन्तःपुरपालकः, एतयो रुषाऽनिरुद्धयोः, सङ्गं सङ्गमं, राज्ञे बाणासुराय व्यजिज्ञपत् विज्ञापयामास । ज्ञाधातोः कर्तरि लुङ् ॥ ६८ ॥

बाणासुरो दुस्सहकार्यकारिणं चक्रेऽनिरुद्धं स निरुद्ध माकुलः ।
प्राद्युम्नि मानाय्य झटि त्ययोमयैः पाशैश्च बद्ध्वा निगलै र्मनोहरम्
॥ ६९ ॥

बाणासुर इति ॥ स बाणासुरः, आकुलो व्याकुलस्सन्, दुस्सहकार्यकारिणं उषासंगमरूपदुस्सहकार्यकारिणं, मनोहरं प्राद्युम्निं अनिरुद्धं, झडित्यानाय्य, अयोमयै र्निगलैः पाशैश्च, बद्ध्वा निरुद्धं चक्रे । कृञ्धातोः कर्तरि लिट् । अनिरुद्ध इति विरोधः । अनिरुद्धनामक इति परिहारः । विरोधाभासालङ्कारः ॥ ६९ ॥

सुभ्रू रसौ शोभनकुन्तलानना बद्धं स्वपित्राऽश्रुकलाभिपूरिता ।
श्रुत्वा स्वकान्तं भुवनैकसुन्दरं सुतप्यमानाऽभव दालिमण्डले ॥७०॥

सुभ्रूरिति ॥ शोभनाः कुन्तला आननं च यस्यास्सा । असौ सुभ्रू रुषा । भुवने लोके एकसुन्दरं मुख्यसुन्दरं, स्वकान्तं स्वपित्रा बद्धं श्रुत्वाऽश्रुकलाभिः बाष्पकणैः, अभिपूरिता सती आलिमण्डले सखीसमूहे सुतप्यमानाऽभवत् । भूधातोः कर्तरि लङ् ॥ ७० ॥

बाणेन तं बद्ध मवेत्य नारदा द्धरि र्ययौ योद्धु मनेन वैरिणा ।
बले स्सुतेनाथ बलेन सङ्गतः प्रद्युम्नसाम्बप्रमुखै स्ससात्यकिः ॥ ७१ ॥

बाणेनेति ॥ अथानन्तरं हरिः श्रीकृष्णः, नारदात् तमनिरुद्धं बाणेन बद्ध मवेत्य ज्ञात्वा, वैरिणा, बलेः बलिचक्रवर्तिनः सुतेन अनेन बाणेन सह योद्धुं, ससात्यकिः सात्यकिना सहितः, बलेन रामेण, प्रद्युम्नसाम्बप्रमुखैश्च सङ्गतस्सन् आययौ । यातेः कर्तरि लिट् ७१ ॥

जित्वा मृडानीपति मेष पार्षदै र्युतं सदा बाणपुरस्य पालकम् ।
गुहं ज्वरं द्व्यूनसहस्रदोर्वरां श्छित्वा मुमोचैन मनेन याचितः ॥७२॥

जित्वेति ॥ एष श्रीकृष्णः, पार्षदैः प्रमथगणै र्युतं, सदा बाणपुरस्य पालकं मृडानीपतिं शिवं, गुहं कुमारं, ज्वरं माहेश्वरं ज्वरं च जित्वा, बाणस्य द्वाभ्यां भुजाभ्यां ऊनान् सहस्रदोर्वरान् सहस्रभुजां श्छित्वा, द्वौ भुजौ अवशेष्येत्यर्थः । अनेन शिवेन याचितस्सन्, एनं बाणासुरं मुमोच मुक्तवान् । मुच्लृधातोः कर्तरि लिट् ॥ ७२ ॥

अथानिरुद्धं रथिनं सहोषया मुदा समादाय समर्प्य द्बलेः ।
सुत स्स तस्मै पुरुषाय विष्णवे प्राद्युम्नि रेना मुपयेम ईप्सिताम् ॥ ७३ ॥

अथेति ॥ अथानन्तरं बलेः सुत स्स बाणः, अनिरुद्धं उषया सह रथिनं मुदा समादाय, विष्णवे तस्मै पुरुषाय कृष्णाय समर्प्य दर्पयामास ।

प्राद्युम्नि रनिरुद्धः, ईप्सिता मेना मुषा मुपयेमे परिणिनाय । उपपूर्वकयमधातोः कर्तरि लिट् ॥ ७३ ॥

अथ नृगशापविमोचन माह —

नृगं हरि र्ब्राह्मणशापशातितं हेतो र्गवां तं कृकलासरूपिणम् ।
कूपा त्समुद्धृत्य जनेऽनुपश्यति स्पृष्ट्वा शयेनाशु चकार भूपतिम्
॥ ७४ ॥

नृगमिति ॥ हरिः श्रीकृष्णः, गवां हेतोः, ब्राह्मणस्य शापेन, शातितं बाधितं, अत एव कृकलासस्य सरटस्य रूप मस्यास्तीति तादृशं, 'सरटः कृकलासः स्या' दित्यमरः । तं कूपपतितं नृगं कूपा त्समुद्धृत्य, जनेऽनुपश्यति सति, शयेन पाणिना स्पृष्ट्वा, आशु भूपतिं चकार । कृञ्धातोः कर्तरि लिट् ॥ ७४ ॥

अथ त्रिभिः पौण्ड्रकवासुदेववधरूपलीला वर्ण्यते —

कश्चि न्नृपः पौण्ड्रकवासुदेवः पीताम्बरः कृष्णसमानवेषः ।
पास्पर्ध्यमानः प्रलपन् स्वदूतं सम्प्रेषयामास हरे स्समीपम् ॥७५॥

कश्चिदिति ॥ पौण्ड्रकवासुदेवो नाम कश्चिन्नृपः पीताम्बरः कृष्णेन समानो वेषो यस्य तथाभूतस्सन्, पास्पर्ध्यमानः पुनः पुनः स्पर्धमानः । 'धातो-रेकाच' इति यङि यङन्ता त्कर्तरि लटः शानच् । प्रलपन् 'वासुदेव इति नाम, शंखचक्राद्यायुधानि च त्यज, युद्धाय वा एही' ति प्रलपन्, स्वदूतं हरे स्समीपं प्रेषयामास । प्रेषधातो र्णिजन्ता दामि अनुप्रयोगे लिट् ॥ ७५ ॥

कृष्णायुधानि त्यज नाम च त्वं युद्धाय वैहीति ततोऽस्य दूतम् ।
कृष्ण स्समागत्य गदन्त मार्य तस्मिं स्त्यजामीति बभाण तानि तम्
॥ ७६ ॥

कृष्णेति ॥ ततोऽनन्तरं समागत्य, हे कृष्ण ! त्व मायुधानि चक्रादीनि, नाम वासुदेव इति नामधेयं च त्यज, युद्धाय वा एहीति गदन्तं, अस्य

पौण्ड्रकवासुदेवस्य दूतं प्रति कृष्णः, आर्य ! तस्मिन् पौण्ड्रकवासुदेवे तान्यायुधानि त्यजामीति बभाण । युद्धायैवागमिष्यामीति भावः । भणधातोः कर्तरि लिट् । विकल्पालङ्कारः । 'विरोधे तुल्यबलयो र्विकल्पालंकृतिर्मते' ति ॥ ७६ ॥

गत्वा झडि त्येव मसाधुवादिनं चक्रेण भास्वद्रविकोटिकान्तिना ।
तं पौण्ड्रकं दुष्टसमाजसङ्गतं न्यह न्नहिघ्नः पविनेव वैरिणम् ॥७७॥

गत्वेति ॥ स हरिः झडिति गत्वा, एवं पूर्वोक्तप्रकारेण, असाधुवादिनं अयुक्तवादिनं, दुष्टसमाजेन संगतं तं पौण्ड्रकं, भास्वतां प्रकाशमानानां रवीणां कोटेः कान्ति रिव कान्ति र्यस्य तेन चक्रेण, पविना कुलिशेन, 'कुलिशं भिदुरं पवि' रित्यमरः । अहिघ्न इन्द्रः, वैरिणं वृत्रासुरमिव, 'व्यूहो वृन्देऽप्यहि र्वृत्रे' इत्यमरः । न्यहन् जघान । हनधातोः कर्तरि लङ् ॥ ७७ ॥

अथ कदाचित् कृष्णवचनात् व्रज मागतेन रामेण सह गोपीसंभाषणादिकं वर्णयति —

उपेयिवांसं हरिचोदितं बलं निषेदिवांसं वरकाञ्चनासने ।
संशुश्रुवांसं व्रजराजभाषितं त माहु रेवं परमं व्रजस्त्रियः ॥ ७८ ॥

उपेयिवांस मिति ॥ हरिणा चोदितं, अत एव व्रज मुपेयिवांसं प्राप्तं वरे काञ्चनासने निषेदिवांसं निषण्णं व्रजराजस्य नन्दस्य भाषितं संशुश्रुवांसं शृण्वन्तं, परमं श्रेष्ठं, तं बलरामं, व्रजस्त्रियो गोपिकाः एवं वक्ष्यमाणप्रकारेण आहु र्वदन्ति स्म । ब्रूञ्धातोः कर्तरि लिट् । आहादेशः ॥ ७८ ॥

तत्प्रकार मेवाह —

स्मर त्यसौ नः पुरयोषितां प्रियः कच्चि त्स मातापितरौ स्वबान्धवान् ।
कच्चिच्च रासादिविलाससंभ्रमं कच्चि त्समास्ते सुख मित्यवादिषुः
॥ ७९ ॥

स्मरतीति ॥ पुरयोषितां द्वारकाङ्गनानां प्रियः असौ श्रीकृष्णः; नः अस्मान् स्मरति कच्चित् । स श्रीकृष्णः मातापितरौ स्वबान्धवांश्च स्मरति कच्चित् । रासादिविलाससंभ्रमं च स्मरति कच्चित् । सुखं समास्ते कच्चित् । इत्यवादिषुः । गोप्य इति शेषः । वद्धातोः कर्तरि लुङ् ॥ ७९ ॥

आश्वास्य गोपी रखिला हलायुधः केलीषु काश्चि त्परिरम्भणादिभिः
रम्ये वसन्तेऽधरबिम्बचुम्बनैः प्रेमावलोकैः कलयाञ्चकार सः
॥ ८० ॥

आश्वास्येति ॥ स हलायुधः । अखिला गोपी राश्वास्य, रम्ये वसन्ते वसन्तर्तौ, केलीषु सुरतक्रीडासु काश्चित् कृष्णेन अनुपयुक्तयौवना गोपीः परिरम्भणादिभिः आलिङ्गनादिभिः, अधरबिम्बचुम्बनैः प्रेमावलोकैश्च कलयाञ्चकार क्रीडयामास । कलधातो र्णिजन्ता दामि अनुप्रयोगे कर्तरि लिट् ॥ ८० ॥

द्विविदवध माह —

स वानरेशं द्विविदं महाबलं सुग्रीवमन्त्रिप्रवरं स्वदूषकम् ।
पुरव्रजग्रामविनाशकारिणं न्यहन् हली रैवतके वने बली ॥ ८१ ॥

स इति ॥ बली बलवान्, हली रामः, महाबलं पुरव्रजग्रामाणां विनाशं करोतीति तथाभूतं स्वस्य दूषकं सुग्रीवस्य मन्त्रिप्रवरं द्विविदं द्विविदनामकं वानरेशं वानरश्रेष्ठं रैवतके रैवतपर्वते वने न्यहन् निजघान । हनधातोः कर्तरि लङ् ॥ ८१ ॥

स्वयंवरे जाम्बवतीसुतः पुरी मागत्य दुर्योधनपुत्रिकां वराम् ।
तां लक्ष्मणां लक्षणसंपदा युतां जहार साम्बो जगदीशविक्रमः ॥ ८२ ॥

स्वयंवर इति ॥ जगदीशस्य श्रीकृष्णस्य विक्रम इव विक्रमो यस्य सः । जाम्बवत्या स्सुतस्साम्बः । पुरीं हस्तिना मागत्य लक्षणसंपदा युतां सामुद्रिकोक्त यावत्सुलक्षणलक्षितां वरां श्रेष्ठां लक्ष्मणाख्यां तां प्रसिद्धां दुर्योधनस्य पुत्रिकां वयंवरे जहार । हृञ्धातोः कर्तरि लिट् ॥ ८२ ॥

अथ चतुर्भि र्नारदागमनं प्रस्तुत्य भगवद्विभूतिं वर्णयति —

स नारदो भूतिदिदृक्षया हरे र्गृहान् कदाचि त्समगा द्धिरण्मयान् ।
वैदूर्यमाणिक्यगवाक्षमण्डितान् गारुत्मतस्तम्भकवाटशोभितान्
॥ ८३ ॥

स इति ॥ कदाचि त्स नारदः, भूते रैश्वर्यस्य दिदृक्षया, वैदूर्याणां माणिक्यानां च गवाक्षै र्मण्डितान्, गारुत्मतानां मरकतमणीनां, 'गारुत्मतं मरकत' मित्यमरः । स्तम्भैः कवाटैश्च शोभितान् हिरण्मयान् । स्वर्णमयान् 'दाण्डिनायने' त्यादिना निपातना त्साधुः । हरे र्गृहान् समगात् प्राप । समाङ्पूर्वक इण् धातोः कर्तरि लुङि गादेशः ॥ ८३ ॥

दर्शनप्रकार मेवाह --

स्त्रीणां सहस्रै र्मधुरैकभाषणै र्मुनि र्मुदा षोडशभिश्शताधिकैः ।
अष्टाभि रेनं रममाणमीश्वरं गृहे गृहे कृष्ण मपश्य दादितः ॥८४॥

स्त्रीणामिति ॥ मुनि र्नारदः, मधुरैकभाषणैः शताधिकैः षोडशभिः स्त्रीणां सहस्रै रष्टाभि र्महिषीभिश्च, मुदा रममाणं, ईश्वरं सर्वेश्वरं सर्वैश्वर्यसंपन्नं कृष्ण मादितः गृहे गृहेऽपश्यत् । दृशिधातोः कर्तरि लङ् । पाघ्रेत्यादिना पश्यादेशः ॥ ८४ ॥

एकत्र भार्यापरिरम्भसंभ्रमं चान्यत्र बाले रतिखेलनापरम् ।
विध्युक्तकार्याणि समाचरत्तमं दीव्यन्त मक्षै रपरत्र भार्यया
॥ ८५ ॥

एकत्रेति ॥ एकत्र गृहे, भार्यायाः परिरंभे संभ्रमो यस्य तं; अन्यत्र च, बाले रतीव खेलनासु परं सक्तम् । अपरत्र विध्युक्तानि विधिचोदितानि

कार्याणि समाचरन्तमं अतिशयेन कुर्वन्तं; अपरत्र गृहान्तरे, भार्यया सहाक्षै-र्दीव्यन्तं क्रीडन्तं कृष्ण मपश्य दिति पूर्वेणान्वयः ॥ ८५ ॥

दृष्ट्वाऽभिनन्द्यात्र स नारदो हरे स्तथोरुलीलस्य गृहे गृहे वराः ।
भूती र्ययौ तस्य गुणान् विमुक्तिदान गाय न्महत्या परमेष्ठिसंभवः
॥ ८६ ॥

दृष्ट्वेति ॥ परमेष्ठिनो ब्रह्मणः संभव उत्पत्ति र्यस्य सः । स नारदः । तथा उक्तप्रकारेण, उरुलीलस्य बहुविलासस्य हरेः, वराः श्रेष्ठाः भूतीः, अत्र द्वारकायां गृहे गृहे दृष्ट्वाऽभिनन्द्य सन्तुष्य, तस्य विमुक्तिदान् मोक्षदान् गुणान् , महत्या महत्याख्यया वीणाया । 'विश्वावसोस्तु बृहती, तुम्बुरोस्तु कलावती । महती नारदस्य स्या त्सरस्वत्यास्तु कच्छपी' इति वैजयन्ती ॥ गायन् सन् ययौ । यातेः कर्तरि लिट् ॥ ८६ ॥

अथ धर्मराजस्य राजसूयं प्रस्तुत्य शिशुपालबधरूपलीलां वर्णयति अष्टाभिः —

इयक्षमाणे सति धर्मनन्दने हरि र्ययौ तत्र निहन्तु मन्तरा ।
यागे वसन्तं दमघोषनन्दनं राज्ञां समाजे निजवैरिणं ततः ॥८७॥

इयक्षमाण इति ॥ ततोऽनन्तरं, हरिः श्रीकृष्णः । धर्मनन्दने धर्मराजे, इयक्षमाणे यष्टुमिच्छति सति । यजते स्सन्नन्ता लृट श्शानजादेशः । तत्र यागे राजसूये । अन्तरा मध्ये । राज्ञां समाजे वसन्तं निजवैरिणं दमघोषनन्दनं शिशुपालं निहन्तुं ययौ । यातेः कर्तरि लिट् ॥ ८७ ॥

धनुर्धरौ दिग्विजयाय निर्गतौ भूत्वाऽर्थिनौ ब्राह्मणवेषधारिणौ ।
कृष्णौ सभीमौ विनिहत्य मागधं राज्ञ स्समस्ता नपि जिग्यतू रणे
॥ ८८ ॥

धनुर्धराविति ॥ दिग्विजयाय निर्गतौ सभीमौ कृष्णौ कृष्णार्जुनौ ब्राह्मण वेषधारिणौ अर्थिनावतिथी भूत्वा, मागधं जरासन्धं विनिहत्य, धनुर्धरौ सन्तौ, रणे समस्तानपि राज्ञः जिग्यतु रजयताम् । जिधातोः कर्तरि लिट् । 'सँल्लिटोर्जे' रिति कुत्वम् ॥ ८८ ॥

यज्वा मुदा राजसभासद स्ततः स राजसूये मखराजि राजति ।
युधिष्ठिरोऽस्मिन् वदताग्रपूजनं प्राप्तुं सुयोग्यं सदसी त्यभाषत
॥ ८९ ॥

यज्वेति ॥ ततोऽनन्तरं, यज्वा 'यज्वा तु विधिनेष्टवा' नित्यमरः । स युधिष्ठिरः, मखराजि क्रतुश्रेष्ठे राजसूये राजति प्रकाशमाने सति, हे राजसभासदः अस्मिन् सदसि, अग्रपूजनं अग्रपूजां प्राप्तुं सुयोग्यं वदत इति मुदा अभाषत । भाषधातोः कर्तरि लङ् ॥ ८९ ॥

अमूल्यमाणिक्यवराम्बरादिभिः सम्पूज्य कृष्णं सहदेवचोदितः ।
तत्पादपद्मे न्यवनिज्य पावनी रपः प्रणीयाशु शिर स्यसौ बभौ
॥ ९० ॥

अमूल्येति ॥ असौ युधिष्ठिरः, सहदेवेन चोदितस्सन्, अमूल्य माणिक्यैः वराम्बरादिभिश्च कृष्णं संपूज्य, तस्य भगवतः पादपद्मे न्यवनिज्य प्रक्षाल्य, पावनी रपः आशु शिरसि प्रणीय बभौ । भातेः कर्तरि लिट् ॥ ९० ॥

सम्यक् चकर्थेति युधिष्ठिरं सभासदोऽवद न्तं जगदीशपूजकम् ।
मध्येसभं राजनि शृण्वतीश्वरे प्रावोच दित्थं दमघोषनन्दनः ॥ ९१ ॥

सम्यगिति ॥ सभासदो जगदीशस्य कृष्णस्य पूजकं तं युधिष्ठिरं सम्यक् चकर्थ साधु कृतवा नसी त्यवदन् । मध्येसभं सभामध्ये । 'पारे मध्ये षष्ठ्या वा' इति साधुः । राजनि धर्मराजे, ईश्वरे श्रीकृष्णे च शृण्वति सति ।

दमघोषनन्दन शिशुपालः, इत्थं वक्ष्यमाणप्रकारेण प्रावोचत। वचधातोः कर्तरि लङ् ॥ ९१ ॥

वक्ष्यमाणप्रकारमेवाह द्वाभ्याम् —

अज्ञातसम्पत्कुलगोत्रसंभवः ययातिशापाच्च नृपासनोज्झितः ।
गोपीभुजङ्गः स्थितिहीनतस्करस्सभास्वपूज्योऽयमपूज्यहो कथम्
॥ ९२ ॥

अज्ञातेति ॥ अज्ञाताः संपत् कुलं गोत्रं संभवश्च यस्य सः, ययातिशापात् नृपासनात् सिंहासनात् उज्झितः गोपीभुजङ्गः वल्लवीविटः, स्थितिहीनः, तस्करश्च बाल्यादारभ्य तस्करः । 'तद्बृहतोः करपत्योश्चोरदेवतयोस्सुट् तलोपश्चे'ति तकारलोपस्सुडागमौ । अत एव सभासु अपूज्यः, अयं कृष्णः कथमपूजि पूजितः । अहो इत्याश्चर्ये । पूजधातोः कर्मणि लुङ् । परमार्थस्तु — ब्रह्मादिभिरपि अज्ञाताः संपत्कुलगोत्रसंभवाः यस्य । अवाङ्मानसगोचरत्वात् कुलगोत्रसंबन्धानामभाव इति भावः । जगदीश्वरस्य तुच्छं नृपासनं न योग्यमितिभावः । स्थितिहीनः व्यापकत्वान्निराश्रयः । तस्करः संसारचोरः । अपरिच्छिन्नत्वादपूज्य इति ॥ ९२ ॥

पूजां कथं तिष्ठति भूसुरोत्तमे काकः पुरोडाशमिवार्हतीदृशीम् ।
शीलेन मानेन पराक्रमेण वा जारोत्तमः पानरतस्स वर्जितः ॥९३॥

पूजामिति ॥ भूसुरोत्तमे व्यासे तिष्ठति सति शीलेन मानेन पराक्रमेण च वर्जितः जारोत्तमः पानरतः मद्यपानरतः स श्रीकृष्णः ईदृशीं पूजां काकः पुरोडाशमिव कथमर्हति ? नार्हतीत्यर्थः । परमार्थस्तु—निर्गुणत्वात् शीलमानपराक्रमवर्जितः । अजारः अनादिब्रह्मचारित्वात् उत्तमः सर्वोत्तमः, पानरतः सोमपानरतः । अकाकः इन्द्रः पुरोडाशमिव । यद्वा अकाकः कं सुखं, अकं दुःखं, तद्वर्जित इति । पूर्णोपमालङ्कारः ॥ ९३ ॥

शतापराधे सति चेदिभूपतौ चक्रेण तस्याशु शिरोऽहर द्धरिः ।
अगा दमुं पश्यति तेज एव त चित्रं तदा राजनि राजमण्डले ॥९४॥

शतेति ॥ हरिः श्रीकृष्णः, चेदिभूपतौ शिशुपाले, शत मपराधा अश्लील भाषणरूपा यस्य तथाभूते सति चक्रेण तस्य शिरः आशु अहरत् । तदा तत्समये, राजनि युधिष्ठिरे राजमण्डले च पश्यति सति, तत्तेजः शिशुपालतेजः, अमुं श्रीकृष्णमेव अगात् प्राप । चित्र माश्चर्यम् । इण्धातोः कर्तरि लुङ्, गादेशः ॥ ९४ ॥

कुर्वन् मुदा सर्वगुणालयो हली स तीर्थयात्रां विचर न्मही मिमाम् ।
जगाम सूतस्य समीप मेकदा नापूजय त्तं मुनिदत्तपीठगः ॥ ९५ ॥

कुर्वन्निति ॥ सर्वेषां गुणाना मालयः, स हली रामः । तीर्थयात्रां कुर्वन्, अत एव इमां महीं विचरन् सन्, एकदा सूतस्य पौराणिकोत्तमस्य समीपं जगाम । मुनिदत्तपीठगः मुनिदत्तोच्चासनस्थितः सूतः तं बलरामं नापूजयत् प्रत्युत्थानादिभि र्न पूजयामास । पूजधातो र्णिजन्ता त्कर्तरि लङ् ॥९५॥

शिरोऽहर त्तस्य निषिद्धजातिभूसूतस्य मूर्खस्य वरासनस्थितेः ।
संजीव्य तं भूसुरयाचितः पुनः समूषिवान् तत्र विपक्षहा हली ॥ ९६ ॥

शिर इति ॥ विपक्षहा शत्रुघ्नः स हली बलरामः । मूर्खस्य तस्य निषिद्धजातिभुवः सूतस्य शिरः, वरासनस्थिते र्हेतोः अहरत् जहार । भूसुरैर्ब्राह्मणै र्याचितस्सन् तं सूतं पुनः संजीव्य, उग्रश्रवःपुत्ररूपेण जीवयित्वा, तत्र समूषिवान् उवास । वसधातो लिटि क्वसु प्रत्ययः ॥ ९६ ॥

समागतं यज्ञहनं वरायुधं रक्षोधिपं पल्वल मिल्वलात्मजम् ।
अजीघन द्राजघसोदरो हली मुदं तदा सञ्जनयन् स यज्वनाम् ॥ ९७ ॥

समागतमिति ॥ तदा तस्मिन् समये । राज्ञो हन्तीति राजघः । 'राजघ उप संख्यान'मिति निपातनात् साधुः । तस्य श्रीकृष्णस्य सोदरः स हली बलरामः, समागतं वर मायुधं यस्य तं यज्ञहनं यागनाशकं इल्वलात्मजं पल्वलनामकं रक्षोधिपं राक्षसं, यज्वनां मुदं सञ्जनयन् सन् अजीघनत् जघान। हनधातो र्णिजन्ता त्कर्तरि लुङ् । 'हो हन्ते' रिति कुत्वे 'हन स्तो' इति तकारः ॥ ९७ ॥

अथ दशभिः कुचेलचरित माह—

श्रीदामनामा द्विजपुङ्गवो गृहे कुटुम्बमात्रोचितजीविकापरः ।
हरौ तदा भक्तियुतः स्वभार्यया निनाय कालं सकलार्थतत्त्ववित्
॥ ९८ ॥

श्रीदामेति ॥ सकलाना मर्थानां तत्त्वं वेत्तीति तथोक्तः । हरौ कृष्णे, सदा भक्तियुतः श्रीदामेति नाम यस्य सः द्विजपुंगवः ब्राह्मणश्रेष्ठः गृहे स्वभार्यया सह कुटुम्बमात्रस्य उचितायां जीविकायां परं आसक्तः सन् कालं निनाय। नीङ्धातोः कर्तरि लिट् ९८ ॥

अथैकदा तस्य वधूः सुकर्शिता दारिद्र्यदुःखैरपि भर्तृसंमता ।
अयाचतात्यन्तधनार्थिनी पतिं याहीति कृष्णं त मभीष्टदं प्रियम्
॥ ९९ ॥

अथेति ॥ अथानन्तरं, एकदा कदाचित्, दारिद्र्यदुःखैः सुकर्शिता पीडिताऽपि, भर्तृसंमता अनुकूला, तस्य कुचेलस्य, वधूः, अत्यन्तधनार्थिनी सती अभीष्टदं वाञ्छितार्थप्रदं प्रियं सखायं तं कृष्णं याहीति पति मयाचत । याचधातोः कर्तरि लङ् ॥ ९९ ॥

उपायनं मे नहि किञ्चिदस्ति तं कथं प्रिये यामि वदेत्युदीरिता ।
संयाच्य धानाः प्रति सा परान् द्विजा नदात्स्वभर्त्रे गमनाय माधवम्
॥ १०० ॥

उपायनमिति ॥ हे प्रिये । मे मम, किंचि दुपायन मुपहारः नास्ति हि । तं श्रीकृष्ण कथं यामि गच्छामि । 'रिक्तहस्तेन नोपेयाद्राजानं दैवतं गुरुम्' इति स्मृतेः । इति उदीरिता सा कुचेलभार्या, अपरान् द्विजान् धानाः संयाच्य याचित्वा । माधवं प्रति गमनाय स्वभर्त्रे अदात । दाधातो कर्तरि लुङ् ॥ १०० ॥

संप्राप्य शीघ्रं समतीत्य गुल्मकैर्जुष्टा स्स कक्ष्याः परया मुदा गृहम् ।
ऐक्षिष्ट देवं रमया युतं ततो निश्शङ्क मागत्य शशाङ्कवक्त्रया ॥१०१॥

संप्राप्येति ॥ ततोऽनन्तरं, स कुचेलः, गुल्मकैर्बलस्थानैः, जुष्टाः कक्ष्याः, शीघ्रं समतीत्य, परया मुदा, गृह मन्तःपुरं संप्राप्य, तत्र शशाङ्क-वक्त्रया रमया रुक्मिण्या युतं देवं श्रीकृष्णं, निश्शङ्कं यथातथा समीप मागत्य ऐक्षिष्ट ददर्श । ईक्षधातोः कर्तरि लुङ् ॥ १०१ ॥

दृष्ट्वा कुचेलं तु कुचेलधारिणं प्रत्युद्ययौ तं हरि रेष दूरतः ।
आलिंग्य पृष्ट्वा कुशलं वरासनं हैमं सखायं समभिन्यवीविशत् ॥१०२॥

दृष्ट्वेति ॥ एष हरिः, कुचेलधारिणं कुत्सितवस्त्रं धरतीति तथोक्तं तं कुचेलं, दूरत एव दृष्ट्वा प्रत्युद्ययौ । सखायं तं कुचेल मालिंग्य, कुशलं पृष्ट्वा, हैमं वरासनं समभिन्यवीविशत् वरासने निवेशयामासेत्यर्थः । विशते-र्णिजन्ता त्कर्तरि लुङ् । 'अभिनिविशश्च' त्याधारस्य कर्मत्वम् ॥ १०२ ॥

प्रक्षाल्य पादौ परया मुदा हरिः धृत्वाऽस्य मूर्ध्न्यङ्घ्र्यवनेजनी रपः ।
संपूज्य पूज्यं मधुपर्कमण्डनै रथाब्रवीदेनमसौ द्विजोत्तमम् ॥१०३॥

प्रक्षाल्येति ॥ अथानन्तरं, असौ हरिः, परया मुदा, अस्य कुचेलस्य पादौ प्रक्षाल्य, अङ्घ्र्यवनेजनीः पादावनेजनीः अपः मूर्ध्नि धृत्वा, पूज्यं द्विजोत्तम मेनं कुचेलं मधुपर्केण मण्डनैः गन्धपुष्पाक्षताभि स्संपूज्य अब्रवीत् । ब्रूतेः कर्तरि लङ् ॥ १०३ ॥

सखे किमानीत मिहे त्युपायनं पटच्चरान्तर्गतपूतधानिकाः ।
आकृष्य जग्ध्वा लघु मुष्टि मेकिका मियेष भोक्तुं हरि रेष चापराम्
॥ १०४ ॥

सख इति ॥ एष हरिः श्रीकृष्णः कर्ता ; हे सखे ! कुचेल ! इह किमुपायनं उपहारः आनीत मिति पटच्चरस्य जीर्णवस्त्रस्य ; 'पटच्चरं जीर्णवस्त्र' मित्यमरः । अन्तर्गता अन्तर्बद्धाः । पूतधानिका धानाः, आकृष्य एकिकां मुष्टिं लघु क्षिप्रं जग्ध्वा भक्षयित्वा, 'अदो जग्धि र्ल्यपि किती' ति जग्ध्या-देशः । अपरां च मुष्टिं भोक्तु मियेष । इषधातोः कर्तरि लिट् ॥ १०४ ॥

सा रुक्मिणी तं परिगृह्य पाणिना प्रावोच दीशं प्रिय भक्षणै रलम् ।
संजग्ध्य भूयो द्विजदास्यकर्मणः कर्त्रीं हरे मा मथ मा कृथा इति
॥ १०५ ॥

सेति ॥ अथानन्तरं सा रुक्मिणी, पाणिना तं कृष्णं, परिगृह्य, भक्षणै रलं ; हे प्रिय हरे ! भूयः पुनः संजग्ध्य भक्षयित्वा मां द्विजस्य ब्राह्मणस्य दास्यकर्मणः कर्त्रीं मा कृथाः मा कार्षीः, इति ईशं प्रावोचत् । वचधातोः कर्तरि लुङ् ॥ १०५ ॥

तच्चर्वितेनाशु महासमृद्धिमच्छ्रियं प्रपेदेऽस्य सती ह्यनर्गलाम् ।
विनीतसर्वामरदास्यसंभृता मनर्घसद्माम्बररत्नमेदुराम् ॥ १०६ ॥

तदिति ॥ अस्य कुचेलस्य सती भार्या । तच्चर्वितेन धानाचर्वणेन अनर्गला मधिकां, विनीतानां सर्वामराणां दास्येन संभृतां, अनर्घैः सद्मभि रम्बरै

रत्नैश्च मेदुरां महासमृद्धिमच्छ्रियं आशु प्रपेदे हि। पद्धातोः कर्तरि लिट् ॥ १०६ ॥

सतीर्थ्य मेनं सहपङ्क्ति भोजनै राचार्यशुश्रूषणकार्यभाषणैः ।
सल्लाप शय्यासन पादमर्दनैः सन्तोष्य संप्रेषयति स्म माधवः ॥१०७॥

सतीर्थ्यमिति ॥ माधवः श्रीकृष्णः, सतीर्थ्यं सहाध्यायिनं, 'सतीर्थ्या-स्त्वेकगुरव' इत्यमरः । एनं कुचेलं, सहपंक्तिभोजनैः, आचार्यसान्दीपनेः शुश्रूषणकार्याणां इन्धनाहरणादीनां भाषणैः संलापैः, अन्याभिः कथाभिः, शय्यासनपादमर्दनैश्च सन्तोष्य तोषयित्वा संप्रेषयति स्म संप्रेषयामास । प्रेषधातो र्णिजन्ता त्कर्तरि लट् ॥ १०७ ॥

अथ त्रिभिः श्रीकृष्णेन सह नन्दादीनां समागम माह —

सूर्योपरागे हरि रेष बन्धुभि र्जगाम भूमिं कुरुनामिकां मुदा ।
समागता स्तत्र च गोपिकाङ्गना नन्दादयोऽन्ये कुरुराजबान्धवाः ॥ १०८ ॥

सूर्येति ॥ एष हरिः । कदाचि दिति शेषः । सूर्योपरागे सति । बन्धुभि स्सह, कुरुनामिकां भूमिं मुदा जगाम प्राप । तत्र कुरुक्षेत्रे गोपिकाङ्गनाः नन्दादयः अन्ये कुरुराजस्य दुर्योधनस्य बान्धवाः सस्त्रीकाः युधिष्ठिरार्जुनाद-यश्च समागताः ॥ १०८ ॥

सर्वाः स्त्रिय स्तत्र मुदा बभाषिरेऽप्यन्योन्य मेता स्सुकथा स्समावृताः ।
स रुक्मिणीजानि रयं स्वमातरं नन्दं च नत्वा कुशलं स्म पृच्छति ॥ १०९ ॥

सर्वा इति ॥ सर्वा नागरिकाः व्रजस्थाः, एता स्समागताः स्त्रियः, तत्र कुरुक्षेत्रे समावृताः समेत्य । सङ्घीभूयेत्यर्थः । सुकथा अपि अन्योन्यं परस्परं,

मुदा बभाषिरे, सोऽयं रुक्मिणीजानिः श्रीकृष्णः, स्वमातरं यशोदां नन्दं च नत्वा प्रणम्य, कुशल मनामयं पृच्छति स्म । पृच्छधातोः कर्तरि लट् ॥१०९॥

चिरोषितां कृष्णवियोगजां रुजं हित्वा तदा तच्चरणाम्बुजद्वयम् ।
[1]आनम्य शीघ्रं परिरभ्य वल्लभं ता लेभिरे प्रीति मतीव गोपिकाः
॥ ११० ॥

चिरेति ॥ ता गोपिकाः, तदा चिरोषितां कृष्णवियोगजां कृष्णविरहजां तां रुजं पीडां हित्वा, तस्य श्रीकृष्णस्य चरणाम्बुजद्वय मानम्य, वल्लभं श्रीकृष्णं शीघ्रं परिरभ्य, अतीव प्रीति लेभिरे । लभतेः कर्तरि लिट् ॥११०॥

अथ द्वाभ्यां भगवतः श्रीकृष्णस्य भक्तवात्सल्यं वर्णयति —

ततो ययौ भक्तपरायणोऽसा वनुग्रहार्थं बहुलाश्वनाम्नः ।
विदेहराजस्य महर्षिभिश्च विप्रस्य गेहं श्रुतदेवनाम्नः ॥ १११ ॥

तत इति ॥ ततोऽनन्तरं भक्ताः परं अयनं स्थानं यस्य सः । असौ श्रीकृष्णः अनुग्रहार्थं अनुग्रहीतुं एकदैव मूर्तिद्वयं परिगृह्य; बहुलाश्वनाम्नो विदेहराजस्य, श्रुतदेवनाम्नो विप्रस्य च गेहं गृहं महर्षिभि र्नारदव्यासशुकवामदेवादिभिः सह ययौ । यातेः कर्तरि लिट् ॥ १११ ॥

ताभ्यां सपर्याभि रतीव पूजितः
समं समस्तै र्मुनिभिः प्रसेदिवान् ।
प्रीत्योपदिश्य श्रुतिमार्ग मेतयो-
र्ययौ मुदा द्वारवतीं श्रियः पतिः ॥ ११२ ॥

---

1. प्रणम्य । ख.

ताभ्यामिति ॥ ताभ्यां श्रुतदेवबहुलाश्वाभ्यां कृतैः सपर्यादिभिः मधुपर्कादिभिः, समस्तैः पूर्वोक्तै र्मुनिभि स्समं अतीव पूजितस्सन् प्रसेदिवान प्रसन्नः । 'भाषायां सदवसश्रुव' इति लिटः कानच् । श्रियः पतिः श्रीकृष्णः एतयोः श्रुतदेवबहुलाश्वयोः श्रुतिमार्गं श्रुतीनां स्मृतिप्रमाणभूताना मप्रामाण्य-कारणरहितानां मार्गं परब्रह्मपरत्वं प्रीत्या उपदिश्य, द्वारवतीं द्वारकां ययौ । यातेः कर्तरि लिट् ॥ ११२ ॥

एकादशे स्तुतिशते रतिमञ्जुलेऽस्मिन्
श्रीवल्लभस्य भवहर्तु रनन्तशक्तेः ।
सर्गे परं मनुजभावगतस्य हर्षं
वाग्वृत्तिरस्य विदुषां ननु चर्करीति ॥ ११३ ॥

एकादश इति । चर्करीति पुनः पुनः करोति ननु ॥ ११३ ॥

इति श्रीकृष्णविलासे सव्याख्याने पुण्यकोटिविरचिते
एकादश स्सर्ग स्समाप्तः ॥

— समाप्तं काव्यम् —

॥ श्रीकृष्णार्पणमस्तु ॥

श्लोकानुक्रमणिका